Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

079998

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

RT-358

079998

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

UDYOTAH REGISTER L. NO.

वार्षिकमूल्यम् १॥)
सार्धरूपकम्

ॐ

प्रतिखण्डमूल्यम् =)
आनकत्रयम्

उद्योतः

पञ्चनदीयसंस्कृतसाहित्यपरिषदो मासिकं मुखपत्रम् ।

विद्वन्मानसकञ्जकोपकलिकामुन्मीलयन्नादराद्,
अज्ञानान्धतमोविनाशपटुता–विख्यात–विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्,
"उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥१॥

प्रथमवर्षः— १ | चैत्रसङ्क्रान्त्याम् । वि० सं० १९८४ मार्च सं० १९२८ | प्रथमो मयूखः १

सम्पादकः—
कवितार्किक (-तन्त्रचक्रवर्त्ति-) नृसिंहदेवशास्त्री दर्शनाचार्यः ।
सहकारिसम्पादकः—
विद्याभास्करपण्डितपरमेश्वरानन्दशास्त्री साहित्योपाध्यायः ।
प्रकाशकः—
परिषन्मन्त्री पं० जगदीशशास्त्री व्याकरणतीर्थः

(उद्योत कार्यालय जौडेमोरी लाहौर)
" Udyot " Office Jaure Mori Lahore.

श्रीकृष्णदीक्षितप्रबन्धेन "बाम्बे मैशीन प्रेस मोहनलाल रोड लाहौर" इत्याख्ये स्थाने मुद्रितः । पं० जगदीशशास्त्रिणा च उद्योत-कार्यालयात् "जौडेमोरी लाहौर" इत्यतः प्रकाशितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषय सूची

(प्रबन्धानां गुणदोषयोः प्रबन्धलेखका एव प्रतिभुवः)

विषयः		पत्राङ्कः
१—मङ्गलाशंसनम्—लेखकः—	(सम्पादकः)	१
२—प्रथमवर्षारम्भाशंसा—	,,	२
३—वसन्तामोदः—	,,	,,
४—(सम्पादकीयम्)—	,,	३
५—रसः—श्रीयुत हरिचरणशास्त्री त्रैगर्त्तः।		७
६—प्रभातगीतिः—सहकारिसम्पादकः।		१५
७—होलिकोल्लासवर्णनम्—	(सम्पादकः)	१६
८—होलिकोद्गारः—	,,	१७
९—कालः कलिश्च—	,,	१८
१०—सूक्तिविंशतिः—	,,	
११—मानवशास्त्रस्य (विकाशवादस्य) संक्षिप्तं समालोचनम्		२६
१२—पञ्चनदीयसंस्कृतसाहित्यपरिषदो नियमावली		३०
१३—प्रमादशुद्धिः		३४

उद्योतस्य कतिचन नियमाः

१—अस्य मासिकपत्रस्य अग्रिमं वार्षिकं देयम् (भारते, ब्रह्मदेशे सिंहले च)—१॥) सार्धरूपकम्।

२—प्रेषणव्ययो ग्राहकैर्न देयः।

३—प्रबन्धादिकं समालोचनार्थं ग्रन्थादिकञ्च सम्पादकसमीपे, मूल्यादिकं च प्रकाशकसमीपे निर्दिष्टस्थाने प्रेषणीयम्।

४—विज्ञापनपत्रादिमुद्रापणव्यवहारविषयोऽपि कार्यालये प्रकाशकसमीपाद्विवेचनीयः।

५—पत्रं प्रतिसङ्क्रान्ति प्रकाश्येत। येन खलु ग्राहकेण यथाकालं सङ्ख्या नाधिगम्येत तेन तन्मासस्य तृतीयसप्ताहाभ्यन्तर एव कार्यालयाद्विवेच्यम्, नातः परं कस्याप्यभियोगः श्रूयेत, किन्तु तेन प्रथमं स्वपोष्टस्थानं परिशोध्यैव प्रष्टव्यम्। विवेकार्थं ग्राहकसङ्ख्या चावश्यं लेख्या।

६—ग्राहकैः स्वस्थानादिकं स्पष्टमेव लेख्यम्।

७—एतस्य ग्राहका अपि साधारणसभ्येषु गण्येरन्।

८—प्रेषितलेखाः प्रायो यथाक्रमं मुद्राप्येरन्। लेखकैर्न्यूनातिन्यूनं पक्षात्पूर्वमेव लेखाः प्रहीयेरन्। राजविरुद्धान्दोलनलेखाश्च न गृह्येरन्।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

079998

पुस्तक सं० संस्कृत उद्योत
आगत सं० ...
तिथि० १९४१
गुरुकुल ग्रन्थालय कांगड़ी.

उद्योतः

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नादराद् अज्ञानान्धतमोविनाशपटुता–विख्यात–विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन् "उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥

प्रथमवर्षे– १ | चैत्रसङ्क्रान्त्याम् । वि० सं० १९८४ मार्च सं० १९२८ | प्रथमो मयूखः १

मङ्गलाशंसनम् ।

हेरम्ब ! विघ्नशमनेश ! महेशबन्धो !
च्योतन्मदान्धमधुपालिकपोलपाले !
भक्तार्त्तिनाशनकराऽनुपमप्रताप !
ध्यायेम तावकपदाम्बुजमञ्जिमानम् ॥१॥

कुन्देन्दुक्षीरवार्धिप्रभवरुचिततीर्हेपयन्ती स्वभासा
स्वान्तर्लीनाक्षवर्गा निजमहिममहाध्यानलग्ना प्रशान्ता ।
भद्रामुद्रावतीयं वलयितभुजगव्रातहाराऽप्यभीष्मा
सोमा मूर्त्तिः पुरारेरवतु सपदि नः पापकाद्विघ्नपुञ्जात् ॥२॥

मसृणचरणपातैःसञ्चरन्ती हिमाद्रौ
नवनलिनदलानां भ्रान्तिमुत्पादयन्ती ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुचिररुचिरमुग्धैरङ्गकैः क्रीडयन्ती
हरतु दुरितजालं बालभावा भवानी ॥३॥

प्रथमवर्षारम्भाशंसा ।

"उद्योतस्य" प्रथमो वर्षारम्भो भवेन्मुदेऽत्यन्तम् ।
देशे पञ्चनदादौ सुरभारत्याः प्रचारतो नित्यम् ॥४॥

वसन्तामोदः—

सुखं सखे ! शैशिरराज्यपाले
काले गते दक्षिणमारुतेन ।
तेने दिशामास्यविकाशनश्री-
र्वसन्तभूपालनिदेशनेन ॥१॥
महीरुहो बालदलप्रवालाः
पिकालिगीतैर्मुहुराह्वयन्तः ।
पान्थान् प्रियासङ्गमनाशयैव
सासूंस्तदार्त्तिश्रवणाय नूनम् ॥२॥
शिलीमुखाः पौष्पमरन्दमत्ता
गुञ्जद्गला वन्दिगणा इवाऽद्य ।
पिकैः सहैव स्तवनं विधाय
मधोर्महामङ्गलमाचरन्ति ॥३॥
वाराङ्गनाश्चीनसुसूक्ष्मपट्ट-
वासोभिराभूष्य निजाङ्गकानि ।
स्फुरन्मनश्चञ्चलदृष्टिजालै-
र्यूनो मृगान् वीथिषु पाशयन्ति ॥४॥
मन्दः सुगन्धः शिशिरः समीरः
प्रवान्मनोमोदततिं विधत्ते ।
सन्धुक्षयन् कामहुताशनं यो
वियोगिवीथ्यां तपनायते च ॥५॥
श्रुत्वा कथां माधवमाधवीनां
मधौ विनिद्राद्भुतकोरकाणाम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानो विभेत्यद्य सुमानिनीनां
योऽत्यन्तमास्थाय हृदि व्यराजत् ॥६॥
प्रियाय कामोत्सवरञ्जितान्त-
र्निलीनभावा नवपाणिपीडा ।
वधूः करे दर्पणमादधाना
बिम्बेऽधरे भेदधियं चिनोति ॥७॥
रात्रौ नितान्तं प्रियपीतरागं
निजाधरं वीक्ष्य हसन्मुखश्रीः ।
कान्ता समुद्दीपितपुष्पधन्वा
गात्रे लसत्स्वेदततिं बिभर्त्ति ॥८॥
निशासु यूनोरतिरागहेतुः
पाश्चीं द्युतिं लज्जयदुत्सुगन्धि ।
मद्यं मधावद्वयकामराज्य-
सुघोषणादौत्यविधिं विधत्ते ॥९॥
कुहूकुहूकूजनकं पिकीनां
तथैव भृङ्गीकलगुञ्जनञ्च ।
लज्जासखं मानसमङ्गनानां
पर्याकुलं सन्तनुते कुलेषु ॥१०॥

(सम्पादकः)

सम्पादकीयम्

अयि ! संस्कृतानुरागिणः ! प्रियपाठकमहाभागाः !—

विदितमेतदस्तु—अत्रभवतां भवताम्पुरतो ऽस्य संस्कृतपत्रस्य प्रकाशनवृत्तं नाम । जानन्त्येव भवन्तः संस्कृतसाहित्यस्य प्रत्नं महिमानम्, यः कदाचित् संस्कृतसाहित्यमतिमात्रं सकलभाषासाम्राज्ये सम्यगभिषिच्य स्वयं मन्त्रिवृद्ध-पदे भ्राजते स्म । अहो ! अस्याः सुरभारत्याः अपूर्व एव कश्चन भावप्रभावः, या चतुराननसंसर्गवशादतिपवित्रतया सुरलोके देवैः सहात्यन्तमात्मसंसर्ग-मवाप्य भागीरथीव गगनमण्डलमाप्लावयन्ती पवित्रतमासु धर्मसम्बन्धिनीषु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियासु, समर्चनीयासु विदुषां मण्डलीषु, रसोद्भावनपरिष्कृतासु रत्यादिलीलासु, प्रजातन्त्रोपयुक्तेषु च सर्वेष्वेव व्यवहारकार्येषु मुहुर्मुहुरनुशीलिता सती विख्यातकीर्तीनां रमणीयचरणानां ब्राह्मणानां ब्रह्मण्यानाञ्च क्षत्रियादीनां महान्तं मनोमोदञ्जनयन्ती तेषां सदयहृदयेषु परां शान्तिमुत्पादयाम्बभूव । दासीकृत-सकलभाषाप्रभावां कामपि आकृतिमयीं गम्भीरभावस्वभाववतामध्येतॄणां श्रोतॄणाञ्च प्रशस्ततां सञ्जनययामास । कोहि सुरभारत्यास्तादृशे कस्मिंश्चिदलौकिके वेदावस्थातोपि महामहनीयमहिमनि विशाले कविताख्ये स्वरूपे विप्रतिपद्येत, यस्यावतारस्य आदिमं क्षेत्रं मुनिपुङ्गववाल्मीकिप्रतिभाक्षेत्रं बभूव, यत्र शोकोऽपि श्लोकरूपेणैव पर्यणंसीत्, यत्र चोत्तरोत्तरं वाचामगोचरः प्रभावो बभ्राजे वाग्देव्याः। अपिच लोकोत्तरभावानुबन्धसम्बन्धी इह भारते वर्षे गीर्वाणवाण्याश्चिरन्तन-समाग्रहो भारतवासिनां समजायत, यदाग्रहग्रहग्रहिलाः संसारसुखानि परित्यज्य, भगवच्चरणारविन्दमकरन्दामन्दानन्दसन्दोहभाजः स्वःसुखमपि विस्मृतवन्तः केवलं कविनासु हरिस्तुतिमेव स्वात्मभावममंसत। अतएव एतस्या राज्यह्रासे सत्यपि "कवयामि वयामियामि" इत्येवमादि तन्तुवायप्रभृतयोऽपि कवयाम्बभूवुः। हन्त! "सोऽयं महिमा अबाध्यप्रभावतया कालेन कवलीकृत इति सन्तोष्टव्यमुदा-सितव्यञ्चास्मिन् विषये इत्येवमुच्येत चेत्?" नैतत् सारं चिन्तकानां चेतसि चारुविचारचमत्कारमासञ्जयते। प्रियपाठकमहाभागाः! इतो दीयतां दृष्टिः।

न केवलमयं संसारो भवितव्यताभावनामात्रभूमिः किन्तु विशालहृदयेन दृष्टिपातः क्रियेत चेत्?

तर्हि महतीयं विस्तृता सकलक्रियाराजपुरुषार्थक्षेत्रतैव परतश्चकास्ति। किं न बम्भ्रमीति नक्षत्रमण्डलम्? किं प्रत्यहं चण्डमरीचिमण्डलं वा नोदेति, किं वा कलाक्षयमनुभवन्नपि कलानाथ ओषधीषु नामृतं सञ्चारयति? अथवा—लोको-पकाराय हुतभुङ् न जाज्वल्यते, अपांपतिर्वा ऽपारतरङ्गरङ्गभङ्गासङ्गी दिवानिशं न समुच्छलति, आपो वा नोदन्यां शमयन्ति। किन्तु सर्वमिदमनारतं स्वस्वा-धिकारं परिपालयत् शङ्कुरिव * दिक्साधनतां प्रकटीकरोतीत्येतावता सर्वम्पौरुषं सञ्चारमालोच्यैवैतस्मिन् कर्मण्ययमस्माकं समारम्भः। एकदा सनातनधर्ममहा-विद्यालयं सनाथितवन्तो निखिलभारतीयसंस्कृतसाहित्यसम्मेलनमहामन्त्रिपदा-

* यथा मार्गशङ्कुः पथिकान् गमनीयदिशाबोधं करोति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धिरूढा महामहोपाध्यायाः श्रीगिरिधरशर्माणो न्यायशास्त्रिणो लवपुरे सनातन-धर्मकालेजीयसंस्कृतविभागे प्रिंसिपलपदं भूषयन्ति स्म। तेषां संस्कृतानुरागिता, संस्कृतोन्नतिचिकीर्षुता, विद्वज्जनसङ्घटनप्रियता, शास्त्रीयसिद्धान्तप्रचिचारयिषुता चेत्याद्याः सद्गुणा जगति विख्याता न बहु लेखनीव्यापारमपेक्षन्ते। यथाऽमीभि-रिहागत्य निजच्छात्रमण्डली वर्धिता सनातनधर्मकालेजस्य संस्कृतविभागो-प्युन्नतदशां नीतः तथा सर्वे जानन्त्येवेत्यपि न बहु लेखाऽवकाशार्हम्।

एवंव्यतिकरे एकदा अत्रत्यान् सर्वान् पण्डितानभिमन्त्र्य तैः संस्कृतभाषाया हीनां दीनां दशां सयुक्ति सारभटि प्रतिपाद्य तदुन्नत्यर्थं "पञ्चनदे प्रदेशे प्यवश्यं भाव्यं संस्कृतपरिषदा" इति च समर्थ्य "पञ्चनदीयसंस्कृतसाहित्यपरिषद्" इत्याख्या एका परिषत् स्थापिता, यस्या मन्त्रिकृत्यभारः स्वाऽयोग्यतां प्रकटयतो-ऽपि ममैव शिरसि सर्वसम्मत्या निहितोऽभूत्। तेषु दिवसेषु पारिषद्यानां महतो-त्साहेन सुष्ठु कार्यं चलति स्म। अनेकान्यधिवेशनान्यभूवन्, येत्रानकवारमनेकेषां विदुषां नानाविषया निबन्धा अप्यपठ्यन्त। किन्तु—जानन्त्येतद्भवन्तो यत् "श्रेयांसि बहुविघ्नानि" इतीयमुक्तिरपि न निरर्थिका। नानाविधग्रन्थीयटीका-टिप्पणादिकर्मव्यग्रमानसे मयि सभाकृत्यसाधने पूर्णतयाऽवकाशमलभमाने, स्वस्वकार्यभरभुग्नकटिभागे मम साहाय्यकरणावकाशमलभमाने च सभ्यवर्गे, दैवे च प्रातिकूल्यं भजमाने सभासञ्चालनकर्म कथञ्चन शैथिल्यमित्रतामशिश्रियत्।

परं तच्चिचालयिषा संस्कृतानुरागिताहेतोः कस्यापि हृदयान्नात्यन्तमपासरत्। अत एव पुनरप्यवशिष्टानां सभ्यानां दैवानुकूल्येन समुद्योगेन चेयं भूयोप्युज्जीवनं गमिता। परं मन्त्रिकार्यनिर्वहणविषये स्वाशक्तिं मत्वा अस्वीकारपत्रं प्रकाशितवति मयि सम्प्रति मन्त्रिपदे व्याकरणतीर्थानां श्रीजगदीशशास्त्रिणां नियुक्तिर्जाता। सभया च प्रथमाधिवेशन एव प्रस्ताव्य सर्वथालस्यभञ्जकं संस्कृतोन्नतिविषये हर्ष-वर्धकञ्च संस्कृतमासिकपत्रप्रकाशनात्मकमेकं कार्यं सर्वसम्मत्या समाहितम्। लक्ष्यीकृतञ्चैतद् यत् किञ्चित्कालं कार्यं सञ्चाल्यैको महान् उत्सवः कार्येत, यत्र पञ्चनदीया विद्वांसः प्रतिनिधिरूपेणामन्त्र्येरन्, अथेयं परिषत् स्थायिरूपेण समेधमाना निखिलभारतवर्षीयसंस्कृतपरिषदा बलवदङ्गभावं भजेत्, येन संस्कृतभाषाया उन्नतिकरणे व्याप्तिमत्तां दधानाऽस्माकं शक्तिर्म-हते उपकाराय कल्पयिष्यते।

यद्यपीयमस्माकं परमपूजनीया मधुरमधुरा सरससरसा निखिलभाषोप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जीव्यभूतेत्यस्माकं परा श्रद्धा, तथापि वर्त्तमानयुगे विलक्षणरीत्या ह्रासङ्गताया अस्या दशा लेखकलातीतैवेतिमे मतिराभाति । सन्तु नाम अस्यां सकलाः कलाः, सर्वे सिद्धान्ताः, सकलाश्च विद्याः, परमेतस्मिन् वैज्ञानिके युगे सर्वं तत् सदप्यसदिव, जीवदपि मृतमिव लक्ष्यते । अत एवेयं विशिष्टप्रचाराभावहेतोर्मृतेति सोद्बाहूत्फालं बाभाष्यते बहुभिः । तस्मादिदानीं श्रद्धामात्रेणैतस्मिन् कर्मणि सम्पत्तिलाभो गगनकुसुमसत्तां नातिशेते । याच भाषा आहारे विहारे व्यवहारे च नाद्रियते सा मृतकल्पा न स्यादित्यपि "कुपथ्ये रोगा न प्रादुःष्युः" इत्युक्तिमात्रविजृम्भमाणताभुदीक्षते । अतो भाषाप्रचारकारणेषु बहुषु विद्यमानेष्वपि इदमप्येकं महत् कारणं यत् स्थाने स्थाने नगरे नगरे संस्कृतसभानां स्थापनम्, विदुषां सम्मेलनं, तत्सम्बन्धेन समाचारपत्राणाञ्च प्रकाशनं नाम । मन्येऽत्र कस्य धीमतो विप्रतिपत्तिः स्यात् । एतेन हि दूरदेशस्थितानां पण्डितप्रकाण्डानां विविधविषय कलेखप्रतिलेखप्रकाशनदर्शनादिभिरैकमत्येन गीर्वाणवाणीविवृद्धयेऽर्गलायमाना अनेकेऽन्तराया द्रागेव रामबाणै रक्षांसीव हन्तुं शक्येरन्, हिन्दुजात्यन्तर्गताश्चानेके तत्तत्सम्प्रदायानुगताः सिद्धान्ताः समर्थ्येरन्, भूयसाञ्चानुग्रहबलाद् बहुषु विषयेष्वेकवाक्यतोद्गारा अपि सहर्षं प्रकटीक्रियेरन् इत्येवमादिना मार्गेण चरतामस्माकं सर्वं मङ्गलमयमेव भविष्यतीति दृढा नः प्रत्याशा ।

परमालोकयन्तु प्रियपाठकमहाभागाः! महतोऽपि महीयः कर्मैतत् समुदायसाध्यमर्थसाध्यञ्चास्ति । द्वयोश्च सङ्गतयोः सुकर एवोद्देश्यपूर्त्तिमहासम्भारः। "दारु प्रत्येकदत्तं स्याद् भार एकजनस्य स" इति लोकोक्तिः कस्याऽप्रसिद्धा । तस्माद्भवतां पुरतोऽस्माकमियमभ्यर्थना यत्परिषदा उत्थापितस्यास्य कार्यस्यावष्टम्भप्रदानाय भवन्तोऽस्य पत्रस्य स्वयं ग्राहकतां स्वीकृत्य परांश्च ग्राहकान् सम्पादयन्तोऽस्मत्पृष्ठपोषकाः सम्भवन्तु । ज्ञास्यन्ति भवन्तो यदनेन पत्रेण, अनया च परिषदा संस्कृतविदुषां विशेषतश्च संस्कृतच्छात्राणां किं किं हितं भविष्यतीति । आदावेव स्वमुखादनल्पजल्पना कथं शोभेत । मानाम गीरुद्भूत् यदारम्भरम्याणि वाचोहर्म्याणीत्यतो हेतो र्मनसा वाचा कायेन सर्वदा साहाय्यदानाय ग्राहकमहोदयाः समभ्यर्थ्यन्ते । मूलत्राणनगरस्थविद्वन्मण्डनायमानाः श्रीदेवराजशास्त्रिमहोदया अनेकग्राहकसम्पादनद्वारैतस्मिन् कर्मण्यस्माकं हस्तवण्टनं विधास्यन्तीति मम हृदये मनोरथतरुरुद्बुभूषतीवेति शम् ।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रसः

(लेखकः—श्रीयुतहरिचरणशास्त्री त्रैगर्त्तः)

"निरालोकं लोकं जननयननिर्म्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः ।"

'श्रीभवभूतिः'

अद्यत्वे—

इह केचिद् रसराजं शृङ्गारम्-अश्लीलं जल्पन्तः सनासानिकोचं सभ्रूकुटिभङ्गं सजुगुप्सं च बीभत्सयन्ति । ते महानुभावाः पटाञ्चलेन प्रदीप्तं हुतभुजं पिदधति, जगत्प्राणं लोहपञ्जरे निरुन्धन्ति, सर्वजन-संवेद्यं प्रत्यक्षं निह्नुवते च । तेषु क्षेत्रज्ञोऽपि न क्षेत्रस्य जानीते, स्वेन दोषेण पतन्तः परशिरसि दूषणं समारोपयन्ति । 'पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्' इत्युक्तदिशा आत्मानमजानतां नः सुगृहीतनामधेयेषु प्रातःस्मरणीयेषु सारस्वतसर्वतोभद्रभवनस्तम्भेषु जडजगज्जीवातुषु श्रीव्यास-भास-कालिदास-भवभूति-बाणादिषु महाकविपुङ्गवेषु जगत्तत्त्ववेदितृषु यथावस्थितं वर्णयत्सु दोषैकदृक्तया दोषारोपणं न मनागपि शोभते । तदत्र विषयेऽविषयेऽपि मादृशाधियां व्यापार्य्यते लेखनीयम्, यदि क्षणमवधानदानेनानुगृह्णीयुर्महानुभावाः ।

स्थूलमिदमस्मदीयं शरीरकम्—अस्मिंश्च जरायुजाण्डजस्वेदजोद्भिज्जरूपिणि भुक्तान्नादिप्रथमपरिणामरूपाद् रसाद् रक्त-मांस-मेदोऽस्थि-मज्जा-शुक्राणां षड्धातूनां परिपाकहेतुभूतषडग्निस्थानयोगित्वेन षट् शरीराणि षट्त्वङ्नद्धानि रम्भास्तम्भवदितरेतरानुस्यूतानि परस्पराश्रितानि वर्त्तन्ते । करद्वयम्, चरणयुगलम्, उत्तमाङ्गम्, गात्रञ्चेति जरायुजादिचये प्रायःसमासतोऽङ्गानि, षष्ट्यधिकानि त्रीणि च शतानि अस्थ्नाम्, वपा, फुप्फुसौ, नाभिः, क्लोम, यकृत्, प्लीहा, क्षुद्रान्त्रम्, स्थूलान्त्रम्, वृक्कौ, वस्ती, पुरीषाधानी, आमाशयः, उदरम्, पायुः, कोष्ठचगुदद्वयम् ।

कनीनिके द्वे, अक्षिपटलानि, चक्षुःपिधाने, पक्ष्मणी, अक्षिकूटे द्वे, अपाङ्गौ, कर्णशष्कुली द्वे, नासा, कर्णपाल्यौ, कर्णौ, शङ्खौ, भ्रुवौ, दन्तवेष्टौ अधरौत्तरौ द्वौ ओष्ठौ, ककुन्दरे, स्तनौ, कण्ठः, ग्रीवा, घण्टिका, कृकाटिका, ललाटम्, भ्रूमध्यम्, कपोलौ, हनू, चिबुकम्, गलशुण्डिके, तालु, जिह्वा, श्वासनलिके, आहारनलिका, हृदयम्, वस्तिशीर्षम्, वङ्क्षणौ, स्फिजौ, ऊरू, जानुनी, कुक्षी, कटिः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जङ्घे, पिण्डिके, गुल्फौ, पार्ष्णी, बाहू, जत्रुणी, स्कन्धौ, कूर्परौ, अरत्नी, प्रकोष्ठौ, करौ, पादौ,अङ्गुल्यः, पर्वाणि, अवटाः, सन्धयः मर्माणि, पर्शुकाः, पृष्ठम्, पार्श्वे, पृष्ठवंशः, त्रिकम् ।

अत्रच मांसादिधातूनां यथासम्भवं पञ्च पेशीशतानि। सप्त शिराशतानि। नव स्नायुशतानि। द्वे शते धमनीनाम्,–शास्त्रदृष्ट्या च ते पुनः शाखाप्रशाखाभेदैः एकोनत्रिंशल्लक्षाणि, नव शतानि, षट्पञ्चाशत् चेति संख्यां व्रजतः, मर्माणि च सप्तोत्तरं शतम्। सन्धयोऽपि शतद्वयम्।

श्मश्रवः केशाश्च त्रयोलक्षाः, एवं रोमाणि, अन्तःशरीरीयैः स्वेदायनैः सह पवनपरमाणुभिर्विभक्तानि परमाणुरूपाणि चतुःपञ्चाशत् कोटयः सार्धसप्तषष्टि-लक्षाश्च भवन्ति। इत्थम्—अध्यात्मदृष्टिभिर्योगियाज्ञवल्क्यादिभिरभिमतम्।

शास्त्रदृष्टेनाञ्जलिपरिमाणेन च मिताः समधातोः पुंसो यूनः काये सम्यक् परिणताहारसारस्यरसस्य नव, पार्थिवपरमाणुसंश्लेषनिमित्तस्य जलांशस्य दश, अष्टौ रक्तस्य, सप्त पुरीषस्य, षट् श्लेष्मणः, पञ्च पित्तस्य, चत्वारो मूत्रस्य, त्रयो-वसायाः, द्वौ मेदसः, अस्थिसुषिरपूरकस्नेहस्य मज्जाख्यस्य एकः, श्लेष्मणः सारभूतस्य ओजसोऽर्द्धः, शुक्रस्य च अर्द्धः अञ्जलिर्विलसति।

अथ गोपायितृणि चास्य शरीरस्य पञ्च ज्ञानेन्द्रियाणि चक्षुःश्रोत्र नासा-रसनात्वगाख्यानि, रूपशब्दगन्धरसस्पर्शाश्च तेषां ज्ञेयविषयाः।

वाक्. पाणि. पाद. पायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि, वचनादान-विहारनिर्हारानन्दविसर्गाश्च तेषां पञ्चैव कर्म्माणि। एवमेतत् स्थूलं शरीरं भोगायतनरूपेण 'बाह्यवेष्टनकं नाम शास्त्रकारा वर्णयन्ति।

तदिदं विदांङ्कुर्वन्तु विदः। अस्मिंश्च स्थवीयसि भूतसङ्घातेऽन्तरनुस्यूतं कारणं, तदन्तःपरिवर्तिनोऽनन्ता भावास्तद्भावाधिष्ठानं नाम भावयितुर्भावना-नाम्। एतच्चावरं वरञ्चावरणवद् परस्परानुग्राह्यनुग्राहकभावेनावस्थितं प्राणादि-भिर्नियम्यमानमवष्टब्धञ्च, मनसा, पर्य्यायेण, कर्म्माणि कर्म्मेन्द्रियैः, ज्ञानानि च ज्ञानेन्द्रियैः, स्वस्वाधिष्ठानभूतान्पदार्थान् स्वेन सहैव गोचरीकुर्वद्भिर्विषयैश्च सर्वतोभावेन निषेव्यमाणं भवति। तत्तन्द्रियैर्मनसा उपात्तमुपात्तञ्च विषयं विज्ञानमये, बुद्धयै समुपस्थापयताऽनुगृह्यते।

अनेन प्रकारेण पूर्वस्मिन्नन्नमये विलसिता प्राणेन, तत्रानुपतता मनसा तस्मिंश्च सन्निदधता ज्ञानेन, महाननुगृह्यते। महतः परमव्यक्तसमरसेन पुरुषेण,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिद्घनेन आनन्देन सर्वेषां भावानां परतोऽपि तिष्ठता तत्तत्करणेषु चक्षुरादिषु, मनोबुद्ध्यहङ्कारादिषु च स्वयं स्वतःसृष्टेषु युगपद्व्याप्नुवता सर्वमिदं व्याप्तम्। आप्रपदादाशिखं वा आमूलाधारादा ब्रह्मरन्ध्रं वा सर्वमिदं क्षेत्रं क्षेत्रज्ञेन क्षेत्रज्ञानुप्रविष्टेन च तज्ज्ञेन ज्ञायते।

एतमर्थमुपनिषत्सु पश्यन्त्यध्यात्मदृशो यथा—यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद। यो रूपे तिष्ठन् रूपस्यान्तरो यद् रूपं न वेद। यश्चक्षुषि तिष्ठन् चक्षुषोऽन्तरो यच्चक्षुर्नवेद। यो मनसि तिष्ठन् मनसोऽन्तरो यन्मनो न वेद। यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यद् विज्ञानं न वेद ×××× अन्नमयः प्राणमयः। मनोमयो विज्ञानमयः ××××। नित्यं विज्ञानमानन्दं ब्रह्म ×××। इत्यादि।

अयमर्थः—योगेन, साङ्ख्येन, उपनिषदा, तत्तद्दर्शनेषु दृष्टो द्रष्टृभिरिति न शक्यते विशदयितुमल्पीयसा लेखेन परं प्रकृतिसम्बद्ध इति स्थालीपुलाकन्यायेन दिङ्मात्रं सूचितः।

प्रकृते तु सम्प्रति इत्थमवतरणम्:—

तदिदं क्षेत्रं भोगानामायतनं बाह्येन क्षेत्रेणापि भोग्यायतनीभवता विषयोपस्थापनद्वारेणानुगृह्यमाणं तत्तदनुकूलान्नपानादिनाप्यायितं भवति। आमातृ जठरप्रादुर्भावादाषोडशं वर्षं परिपुष्यत् सम्यक् समस्तभावप्रादुर्भावयोग्यक्षेत्रतां भजते मानवानां, यथोपयोगं यथायोनि चेतरेषां प्राणिनाम्। तत्रापि समस्तदेहिषूत्तमं क्षेत्रं क्षेत्रज्ञो मनुष्यदेहमेव मनुते यतोह्यस्मिन् सर्वभावानां स्वं स्वं रूपं प्रादुर्भावयितुं प्रस्फोटयितुं वा यथोचितोऽवकाशः परिस्फुरति न तथेतरेषु प्राणिनिकायेषु तादृशी कर्मबीजवापोपभोगयोग्याभूर्भवति। सर्वपरिणामेष्वन्तिमः खल्वेष प्रकृतेरतिसुन्दरः प्रस्फोटः।

इहापि च विरलविरलाव्यक्तयो नितान्तपरिपूर्णतां दधानाः सुकुमारभावप्रादुर्भावयोग्यक्षेत्राणि सम्पद्यन्ते। तास्वपि वा न बाल्यं केषाञ्चिद् भावानां कृते–भोगायतनतामवगाहते। नच स्थाविरमेव सर्वथा तदुपयुक्तमिति कृत्वा मध्यमं वयो नितान्तोपयुक्तमेव स्थाप्यते।

अयमेव मानवो देहः सर्वाङ्गपरिपुष्टः सन्निहितसमस्तभोगसाधनः सर्वभावभृतः सर्वैरिन्द्रियैः स्वस्वविषयादानसामर्थ्यसम्भृतैः सम्पन्नो निखिलभावनासङ्कल्पाध्यवसायादिसमुचितविकासविकसितः समुज्जृम्भते। अस्मिन्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समस्तकर्म्मवासनावासितेनान्तःकरणपरिवारेण परिवृतो देही स्वस्थेऽस्मिन् स्वस्थं, विकृते विकृतं, प्रसन्ने प्रसन्नं, खिन्ने च खिन्नमात्मानमध्यस्यति।

इत्थमस्मिन्सम्भृताखिलपरिकरे सन्नद्धे भोगायतने, बाह्यजगति च प्रकृतिसन्नाहिनि भोग्यभावेनोपतिष्ठमाने देहभृति च भोक्तरि भोग्यजातं भोगायतनद्वारेण भोक्तुकामे, त्रितयसन्नाहे, अन्तर्व्यापाररूपेण नक्तान्दिवं ये ये भावा जायमाना स्तज्ज्ञैः सूक्ष्मया दृशाऽनुभूयन्ते स्थूलदृग्भिस्ते ते नानुभवपदवीं नीयन्त इत्यत्र कस्य वापराधः मन्येत ? मन्ये न सर्वक्षेत्रेषु समं विलसति प्रकृतिचरितमिति तत्र २ तत्तद्भावप्रादुर्भावयोग्यतैव न प्रस्फुटति येन स्थूलविचारपिहितेऽन्तस्तले विलसन्तोऽपि ते नानुभवितुं शक्यन्तेऽतत्परैः।

परं नायं भावानामपराधो नापि तदवहितया धिया यथावस्थितं वर्णयतां क्रान्तदर्शिनां कविमतल्लजानाम्।

आत्मैव सौम्येदमग्र आसीत्, सच्च, सदेवेदमग्र आसीदिति, । अस्तीति सत्, तत् च, चेतयत इति चित्, चेतयमानश्च आनन्दतीत्यानन्दः, एवं सत् चित् आनन्दः बृंहतीति ब्रह्म। तद् विद्यमानं चेतयत् आनन्दत् वर्धते इत्यर्थः फलति। तत् कथं बृंहतीत्युच्यते–'स एक आसीत्,–सततमतनशीलत्वादात्मत्वं परिस्पन्दतो वा। स बिभाय, तस्मादेकाकी बिभेति, स्वत एव बिभेति अनन्यत्वात्। 'सोऽकामयत बहुस्यां प्रजायेय इति, एवं तस्य प्रथमः परिवर्तः कामः । 'स न रेमे, तस्मादेकाकी न रमते। 'तत्सृष्ट्वा तदेव प्राविशत्, प्रविश्य सच्च त्यच्चाभवत्, इति अन्यो भवन्नपि स्वसत्तातो न हीयते, इत्थमेव बृंहतिः सार्थकः। एवं च स मिथुनमसृजदित्यादयः श्रुतयोऽनुसन्धीयन्ते।

एकः सत्ताख्यो भावः परिस्पन्दनक्रियया सहकृतो बहुधात्मानं विकरोतीति वा विवर्तत इति वा विपरिणमत इति वा, बहुधा दर्शनानि भवन्ति तत्र षड्भावविकारा भवन्तीति वार्ष्यायणिः, जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति, इति। ततश्च जायमानो विद्यमानो विपरिणमन् वर्धमानोऽपक्षीयमाणो विनश्यन्नपि अयमात्मा सत्तां न जहाति इत्यभिप्रायः।

तस्मात् कामो नाम आद्योऽवतारः परमात्मनो बहु बुभूषतः। तेन बहुलीभावाय आत्मा सर्वत्र कामयते, कामयमान एव च बहुभवतीति फलितम्। अस्मात्कामात् समस्तमेतत्सचराचरं जगत् सततं षोढा विकृतिं भजमानमद्यापि प्रत्यक्षीभवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामो नाम संकल्पः निर्विकारस्य प्रथमो विकारः, इच्छा वा।

इच्छन् हि कामयते, निस्पन्दस्य मुख्यः परिस्पन्दो नान्यः कामात्सम्भवति। एवमेष कामरूपेण सर्वस्मिन् प्रविष्टोऽन्योऽन्यस्मै कामयते। योऽस्मै न कामयते यं वा नैष कामयते तस्मै क्रुध्यति, तस्मात् तस्य कामस्य द्वितीयः परिवर्तः क्रोधो नाम, काम एव क्रोधमन्तःप्रविष्ट इत्यर्थः। एतेन प्रकारेण कामो रतिः आनन्दः सुखं प्रमोदः, मुत्, प्रीतिः, हर्षः, सम्मदः, अनुकूलं, यद् २ तत्तद् स्पृहणीयं, तत्र २ रमते, सर्वात्मना तदेव भवितुमीहते तत्तद्भोग्यमुपादत्ते भोक्ता भोगायतने। यद्यत् च कामं विघ्नयति तस्मै द्वेष्टि तत्र न रमते तस्मै द्रुह्यति क्रुध्यति असूयति, तं जिघांसति, नह्यकामयमानं कामयते। सर्वश्च कामयते, कश्चिदर्थं कामाय कामयते, कामानां हि साधकोऽर्थ इति। कश्चिद्धर्मं कामयते धर्म्मतो हि सुखं, सुखं च काम इति। अपरो मोक्षं कामयते, कस्मान्मोक्ष इति कामान्मोक्ष इत्येव वक्तव्यं भवति। एवञ्चेतरेतरभोग्यभोक्तृभावेन स्थितं सर्वम्। एको भोक्ता सर्वमन्यत्स्वभोग्यं मन्यते। यत्र च भोग्यबुद्धिं कल्पयति तदाकर्षति तेन वा कृष्यते, तद्द्वयमितरेतरालम्बनं जायते। आलम्ब्यमानेषु च यदेवाधिकां प्रीतिं जनयति तदेवालम्ब्यते। अनया च पद्धत्या यो यस्य कामायालं स एव तस्य हृदि रतिमुद्भावयति। यदालम्ब्य निर्विकारे हृदि रत्यङ्कुर उदेति तत्तस्य कारणं विभाव्यते, तेन स "आलम्बनविभाव" इत्युच्यते कविभिः।

यद्यच्च स्वच्छं रम्यमनुकूलमुज्ज्वलञ्च तदेकतममालम्ब्यमानं भवति, तदितराणि च तत्रोद्दीपनानि सम्पद्यन्ते तादृशान्यविरोधीनि। एकमालम्बनं चेत् स्थिरं भवेत् तर्हि स्थायीभवति रत्याख्यो भावः। एष देवं गुरुं पितरं मातरं सखायं वा विषयीकरोति चेत् तर्हि भाव एव तिष्ठति, इतरस्याः परिपोषिकाया कारणसामग्र्यास्तत्राननुकूलतया असन्निधानात्। अथ यदि पुत्रादीन् विषयीकरोति तर्हि सैव रतिः परिपुष्टान्यथाकारेव भवति वात्सल्यरूपेण विपरिणमते वा।

दैवेन विसंवादिता वा नष्टालम्बा भवति चेत्? शोकाकारतां दधाना स्थिर आलम्बननाशे, शोके स्थायितां भजमाने, तादृशैर्दीप्यमाना च करुणः सम्पद्यते।

एवं यशः प्रतिष्ठां, धनं वा कामयमान एव यदि धीरमुत्सहते न क्रुध्यति च तादात्वे-उत्साहः सञ्चारी, स्थिरे चालम्बने भिन्ने रिपुप्रभृतिके, सस्थायित्वेन पृथगिव स्फुरन् परिणमते। पौनपुन्येन परैः प्रसभं—विघ्न्यमानः काम एव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रोधरूपतां धत्ते "कामात् क्रोधोऽभिजायते" इत्यादिभगवद्वचनात् । दृढे आलम्बने स एव स्थायीभवन् परिपोषमाप्तो रौद्रमात्मानं करोति ।

रतावुपकुर्वाणाः सञ्चरन्तो हासादयः पृथक् २ आलम्बं स्थिरमाप्य स्थायिनो भवन्ति भावा अमी ।

उज्ज्वलेषु विलसति कामे कद्वादवेषपूतिगलितकुत्सितशब्दशिङ्घाणपिञ्जूषदूषिकावान्तादिभिरनुज्ज्वलैर्भावैर्दूष्यमाणे जुगुप्सा रूपतां बिभ्रति बीभत्सो भावः । यत्कामयते यत्र करोति रतिं, तस्मिन्नालम्बे बलिना केनापि भावेन प्रतिहन्यमाने, प्रतिकर्तुमशक्ये तस्मिन्, मा मे कामोऽयं ध्वंसतामिति बिभेति, उद्विजते विच्छेदभीतो नश्यतीव निलीयत इवेति भीतिः सञ्चरति, सोसौ कामो भयं प्रविशति, स एष भयानको भावः ।

सर्वभावेषु लोकानुभूतपूर्वेषु सङ्कल्पातिशायि किमपि लोकातिशायि वा चमत्कारि पश्यन्नयमात्मा विस्मयते, स चायं कामो विस्मयमेधतेऽभूतपूर्वतया च सोऽद्भुतो भावः ।

सर्वेष्वमीषु भावेषु विरज्यमानः कामो यदा तु खिद्यत इव तदोपशाम्यतीव य एष कामानामुपशमो नाम तरङ्गाणामिव महोदधौ स्वे स्वे कारणे लयो भवन्निव विभाव्यते, न कामपि ब्रह्मातिरिक्तां निरतिशयानन्दतुन्दिलां तुष्टिमवगाहते कामस्तदात्मन्यात्मना सन्तुष्यन्निष्पन्दो निश्चेष्ट इव सम्पद्यते सोऽयं शमप्रधानः कामो निष्कामतां कामयमान उपशाम्यन् शान्तो भावः । एवञ्च रतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयशमाख्या नवापि भावाः प्रस्फुरन्ति च विलीयन्ते च । इतोतिरिक्ताश्चैतेषां सहचारिणस्त्रयस्त्रिंशत्—निर्वेदादयो वितर्कान्ता हारे मुक्ता इव सूत्रे कुसुमानीवोतप्रोततया समुल्लसन्ति, तेऽपि कामनिदाना एव जायन्ते च निलीयन्ते च ।

तस्मिन् जाग्रति जाग्रति सुप्ते सुप्ता भवन्ति भावास्ते ।
तस्मात् कामो भोक्ता भोग्यं भोग स्त्रिधा स्थितं सच्चित् । इति ।
इच्छा कान्तिः कामः स्पन्दोथानन्दथुः सुखं प्रीतिः ।
भावो भूतिर्भक्तिर्भवोऽभवे केवलं ब्रह्म ।

॥ इति समासः ॥

तथा च श्रूयते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोऽदात्कामोदात्×××कामोदाता कामः प्रतिग्रहीता×××कामः कामस्य भेषजम्, इत्यादि ।

अविचारितरम्याणि च भवन्ति वचांसि वादिनाम्—

तस्माद् विचारनिकषकषणमन्तरा न गतिरस्ति तेन चाग्रे विचार्य्यते—

क्षणं पिधीयेतां बाह्ये दृशौ उद्घाट्यतामान्तरं चक्षुः—आकलयत कलाविदः ! साम्प्रतं साम्प्रतं वक्तुम्—

अस्य खलु आन्तरस्य सर्वभावाधिनाथस्य कामस्य कृत्स्नं जगत्कवलीकर्तुं कलयतः कथङ्कारं शक्येत कर्तुं कार्त्स्न्येन सकलायुषापि कथङ्कथमपि कथोपकथनम् ।

असौ जायमानो जायासु जनये जागर्ति, । ताः किलास्य धर्म्मतोऽभ्युपगता जन्मभूमयः । पुंसां यथैव वामनयनास्तथैव कामिनीनां पुंस्त्वाभिमानिनः कायाः कामस्यालम्बनानि भवन्ति । यो यां या च यं कामयते तदतिरिक्तमितरत्समस्तं तद्रूपं पश्यति । सर्वैर्भावैः स्वं स्वमालम्बमालम्बमानयोर्न हि तात्किमपि यत्तन्नसम्पद्यते । तमिममानन्दमानन्दमेदुरौ तावपि वर्णयितुं न प्रभू भवतः । किमियमेकाकारा वृत्तिश्चेतसः कामात्मनः शृङ्गाराद्दते क्वापि कथमपि कदापि भवितुं प्रभवति नाम । इममनिर्वचनीयं हर्षप्रकर्षवर्षं सहृदयहृदयजीवातुवाचां वक्तृवाचां वाग्मिनां वचांसि प्रसन्नमधुराणि सरलसरसगम्भीराणि मुक्त्वास्ति वा विशदयितुं क्वापि सरणिः । नास्ति चेत्समस्तमेतदस्तशङ्कं निर्विवादमभिधातुं कस्मात्कीलितेव लसति रसना दन्तपञ्जरे । क्व नाम ते तादृशाः सर्वमर्मातिक्रान्तिकारिणः कोमलमधुरप्रसादमन्दिरायमाणा मुनिमानसमोहना विभावाः क्व नु तदनु च तदनुभवजन्याश्चेतोद्रवीभावमात्रजन्मानः सत्त्वमात्रमूर्तयो नीरजस्तमस्का समस्ताः समस्ताः सात्त्विका भावा अनुभूयन्ते सचेतोभिः । क्व वा शृङ्गारवारांनिधिमृते तावती भावसम्पद् या पुरुषायुषशतेनापि सर्वकालं वर्ण्यमानापि अद्यत्वेपि नव नवैव विस्फुरति । न शोभते हास्यमतिवेलम्, सर्वदा शोकदूना अपि कियत्पारयन्ति रोदितुम् । समेधमानश्च क्रोधः कियद्रसयितुं पार्येत पण्डितैरपि, भयानके तु सर्वाङ्गसङ्कोचनसहैव समखिलभावातिरोभाव इव चिराय जायते । जुगुप्सिते च बीभत्से पिशाचप्रकृतयोऽपि पशुपक्षिणोऽपि न चिराद् विरज्यन्ते, योऽप्यद्भुतो नाम सोऽपि लोकसीमातिवर्तिवस्त्वालम्बनः खेचर इव अयथा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वद् वस्त्वाभिधायितया न भूतलस्पर्शी। तेन विस्मयोपि न पुष्यतितरां तद्विदां हृदन्तर्भूमिकासु।

अथ य एष शमस्थायिभावः शान्त इति भण्यते सोऽपि किल नितान्तविरलक्षेत्रप्ररोही वस्तुतः सर्वभावतिरोभावात्मा नाभिनेयो नापि रसयितुमास्वादयितुं वा जनतया पार्य्यते, निर्वाणोन्मुखं पुनर्ज्योतिरिव कियदिव वर्ण्यमानमाकाशकुसुमायितं न भवेत्।

एतदतिरिक्तास्त्वपरे निर्वेदादयः सञ्चारिण एवाङ्गिनमृते न परं पोषं जुषन्ते। रसाभासभावाभासभावोदयभावसन्धिभावशबलतादयस्तु वस्तुतो न रसा रसनधर्मसामान्येन तेषु तु रसप्रयोगो भाक्तः। सोऽपि तत्त्वतः शृङ्गारसामग्रीमुदीक्षमाण इव शोभते न पुनरेकलः क्वाचित्कश्च। तस्मात्सर्वभावानां मूलकन्दायमानौ शृङ्गारवीरावेव उत्तमप्रकृतिषु परं यथार्थं च परिपोषं दधाते।

तयोरपि वीरो नितान्तविरलालम्बो महापुरुषमात्रक्षेत्रभूः स्वाभाविकतां जगतस्तथा न विषयीकरोति यथा खलु प्रकृतिमधुरः सर्वसचेतस्सरलालम्बी सुकुमारपरिकरः समुज्ज्वलपरिवारः सुपरिष्कृतसौन्दर्य्यप्रार्थी रतिप्राणः शृङ्गारोऽसौ रसानां मुकुटभूषणायिततां भजमानस्समस्तस्वाभाविकभावमूर्धाभिषिक्तः।

नहि सर्वकालं काचिद् व्यक्तिर्हसति, उत्सहते, क्रुध्यति, शोचति, जुगुप्सते बिभेति, विस्मयते, शाम्यति वा। सुखमानन्दं हर्षं माधुर्य्यं सौकुमार्य्यं विलासं वा समालम्बमाना न कदापि विरज्यन्ते, विरज्यन्तो वा निर्विद्यन्ते खिद्यन्ते वा प्राणिनोऽपि सचेतसः, किमुत प्राणिनां मूर्धन्याः समुज्ज्वलवेषभाषाभूषाभाजो नरः। कपोतः कपोतीमापतन्तीमभिपश्यन् केनापि भावेन परवश इव नर्त्यते। शिखण्डी मयूरीमक्षिविषयीकुर्वाण इव बर्हाणि धुन्वन्नात्मानि न माति, अशिक्षिता अपि अनध्यापिता अपि, अमताश्रुता अपि स्वभावमधुराश्चेष्टाः काममहानटादृते को नाम वयसि नाटयितुमलं यूनः।

अनुभवितारो वा किमनुभवितारो जगति नीरसे श्मशानायमाने प्रेममहामृतवञ्चिते शुष्कतृष्णामये भसितभरिते।

(सावशेषम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभातगीतिः

(ले०—सहकारिसम्पादकः)

उदयति मिहिरे विदलिततिमिरे
प्रातः परमभिरामम् ।
लसदलिपुञ्जैर्नलिननिकुञ्जैः
सरसी जयति निकामम् ॥

प्रवहति धीरे सुरभिसमीरे
किरते[1] कुसुमपरागः ।
पञ्चममञ्चति चञ्चलपरभृति
चञ्चति सहृदयरागः ॥

भगवति चन्द्रे भवति सतन्द्रे
मुकुलति[2] कुमुदकलापः ।
हृष्यति कोके विरहित-शोके
प्रसरति घूकविलापः ॥

कलकलकारिणि सरितो वारिणि
मज्जति विप्रसमाजः ।
द्विजवरबटवच्छन्दसि पटवो
जुह्वति गुणगणभाजः ॥

जयति स सविता समजगदविता
प्रसुवति[3] कर्मणि लोकम् ।
जयति च भातं सदा प्रभातम्
कुरुते तमो विमोकम् ॥

१—कर्मकर्तरि लट्, 'भृषाकर्मकिरादिसनां चान्यत्रात्मनेपदात्' इति यगभावः ।
२—आचारक्विबन्तः । ३—प्रेरयतीत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

होलिकोल्लासवर्णनम्

(ले०—सम्पादकः)

कामक्रीडाकुलान्ता अपि कुलललना बालिका मुग्धभावा
वृद्धान् बालांश्च यूनो विकृतिमुपनयन्धूलिसम्मर्ददेहः ।
साङ्कर्यं सर्ववर्णेष्वपि विधदतुलं हास्यगालीप्रमत्तो
भूयो भव्याय भूयाद्विगतभयतया "होलिकोल्लास" एषः ॥ १ ॥

एका नारी कौङ्कुमेनाक्तवासाः
कामोन्मत्ता पीवराभ्यां स्तनाभ्याम् ।
अन्यां स्वीयां गाढमालिङ्ग्य वीथ्यां
धूल्या लिप्तां चारु सञ्चुम्बतीह ॥ २ ॥

अन्या तस्या गण्डपालीं रजोभि-
र्लिप्तां कृत्वा साट्टहासा विधत्ते ।
रङ्गोल्लेपैस्तन्मुखे भूरिचर्चा-
स्थासं पश्चं पञ्चकैरङ्गुलीनाम् ॥ ३ ॥

बाला बाला आ ह्वयन्ते सलीलं
लीलालोला हासगर्भैर्वचोभिः ।
श्रुत्वा तासां वाक्यजातानि वृद्धा-
श्चित्तक्षेत्रे कामबीजं वपन्ति ॥ ४ ॥

बाला बालानाह्वयन्तः सहास्यं
गालीर्दत्वा स्वसृमात्रादिनाम्ना ।
श्रुत्वा वृद्धा नैव तान्वारयन्ते ।
प्राद्युम्नीं तां लप्सिकां मन्यमानाः ॥ ५ ॥

स्थाने स्थाने चत्वरे चत्वरे च
गोष्ठ्यां गोष्ठ्यामङ्गणे प्राङ्गणे च ।
हो हो होली होलिका हुर्हुरेति-
प्रौढा वाचः सर्वतः सञ्चरन्ति ॥ ६ ॥

रङ्गै रङ्गैर्नालिकाः सम्प्रपूर्य
रक्ता मत्ताश्चालयन्त्यङ्गनासु ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नार्योऽप्येवं पुंसु संसक्तचित्तां
हर्षामोदैः कूणिताक्षाश्चरन्ति ॥ ७ ॥
अश्लीलार्था हासगर्भा विचित्रा
लोका लोलाः केलिकल्लोलचोलाः ।
नाना गीतं मञ्जु सप्रेम हृष्टा
गायं गायं मत्तमत्ता भवन्ति ॥ ८ ॥
अथो विधातापि निरीक्ष्य लोकान्
होल्युत्सवोड्डीन-रजोविलिप्तान् ।
चिक्रीडिषुर्वाढमसौ वितर्के[1]
प्रावर्षयन्मत्ततयाऽतिरेणून् ॥९॥
विधातृवेगोत्थितधूलिपुञ्जै
र्वृष्टिर्न माति स्म बहिःप्रदेशे ।
रन्ध्रेषु लोम्नां सबलं प्रविश्य
पेटास्थवासःसु महन्त्यलेष्ट ॥ १० ॥
नर्मालापवती सदर्थरसिका कामोत्कलोल्लासिनी
धर्माऽधर्मविचारसारसरला भङ्गातरङ्गाकुला ।
बाह्याभ्यन्तरयन्त्रतन्त्रनिपुणाऽनङ्गप्रमोदोद्धुरा
हास्यप्राणचणा च शोकविधुरा शास्त्रित्रयी राजते ॥११॥

होलिकोद्गारः

(लिङ्गमहिमा)

अयि ! होलिकारङ्गरञ्जितान्तःकरणाः ! प्रियपाठक महाभागाः ! मन्येऽनेकवारं भवद्भिर्लिङ्गमहिमा साक्षात्कृतो भाविष्यति, परमद्यत्वे केचन लिङ्गार्चां प्रद्विषन्ति तथाप्यनिवार्यं लिङ्गस्य महत्त्वम् । न केवलं लिङ्गपुराणादिष्वेवास्य चर्चः स्मर्यते, पठ्यते च, प्रत्युत भगवती श्रुतिरेवोद्बाहुर्भूत्वा लिङ्गं वर्णयन्ती लिङ्गादुत्थानं लिङ्गे स्थितिं, लिङ्ग एव च चराचरास्य लयं समर्थयते । तथाहि—"रेतो मूत्रं विजहाति योनिं प्रविशदिन्द्रियम्" "आहेडमानो वयासिसीष्ठाः" "विष्णुर्योनिं कल्पयतु" "त्वष्टा

१—एष्वेव दिवसेषु लवपुरे दिनत्रयं यावन्महद्धूलिवर्षणमभूत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुपाणि पिंशतु" "भगोऽर्यमा" इत्यादिभि लैङ्गिकवचोभिरिहामुत्रफलभोगकामनासिद्ध्यर्थमवश्यमेव लिङ्गमुपासनीयं प्रतिपादयति, मूषिकाणां सञ्चारभीतिश्च स्वप्नेऽपि न मनुते। लीनमर्थं गमयतीति लिङ्गम्, लयतेर्वा संश्लेषकर्मणः गमेर्वा प्राप्तिकर्मणः, डोपजनः इति हि नैरुक्ताः। पाणिनिर्भगवांस्तु लिङ्गादेव परिमाणं मन्वानः सूत्रं रचितवान् "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमे"ति। वार्त्तिककारश्च प्रथममेव लिङ्गस्य ग्रहणं कृतवान्—"प्रथमलिङ्गग्रहणञ्चेति"। शेषस्तु लिङ्गं लोकाश्रयत्वेनैवोचे—लिङ्गमशिष्यं लोकाश्रयत्वात् लिङ्गस्येति। किम्ब्रूमः—साङ्ख्यप्रक्रियायां द्वे लिङ्गे विनिविष्टे निरीक्ष्यापि जिज्ञासुहृदन्तःप्रवेशाय सकलदार्शनिकमूर्धन्यो भगवान् वाचस्पतिमिश्रो लिङ्गिनो ग्रहणमावर्त्तयन् तृतीयलिङ्गप्रवेशमपि साधु मनुते। नैयायिकानान्तु—लिङ्गेन विना किञ्चिदपि कार्यं न चलति "तस्मात् लिङ्गपरामर्शोऽनुमानम्" इति वदताम्। एतेन योगाद्या व्याख्याताः। "विशेषाऽविशेषलिङ्गमात्राणि गुणपर्वाणि" "सक्रियमनेकमाश्रितं लिङ्गम्" लिङ्गमात्रमलिङ्गस्य प्रत्यासन्नं तत्संसृष्टं विविच्यते" इति। पूर्वमीमांसा तु बहु लिङ्गदर्शनं करोति "लिङ्गदर्शनाच्च" इत्येवमनेकवारं पठन्ती। अपिच—"लिङ्गं सङ्घातधर्मः स्यात्" "लिङ्गक्रमसमाख्यानात्" इति लिङ्गस्यैव सर्वत्र सङ्घाते क्रमः समाख्यायते। इदं महदाश्चर्यं यान्निर्विशेषापि उत्तरमीमांसा "लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि" "लिङ्गाच्च" इति लिङ्गे सविशेषैव। अपिचाऽद्य"—उद्योतस्य" लिङ्गमालोक्य "सुप्रभातं" "सूर्योदय" श्च सर्वथा हर्षमेष्यतः। किन्तु—"संस्कृतसाहित्यपरिषद्" अबलात्वात् प्रथमसमागमाद्वा वृद्धात्वाद्वा कदाचित्त्रासमाश्रयेदित्यस्माकं तस्यां महती शङ्का वर्त्तते।

"कालः कलिश्च"

आः! अनिर्वचनीय एवाऽयं नैसर्गिको महिमा कालस्य भगवतो यदसौ नानाविधानि सर्वाङ्गीणसौन्दर्यभाञ्जि हृद्यानि अनवद्यान्यपि च वस्तूनि रचयित्वा स्वयमेवांशतोऽपि तेषां सत्तां न सहते। लोकानामालोकमानानामेव हस्ताहस्तिकया तेषां सर्वावयववैकृत्यमापाद्य, हृद्यतां मर्दयित्वा, अनवद्यताञ्च दलयित्वा, यथाकथाचामीषां सत्तायाः समूलोद्ध्वंसने मतिं धृतिञ्च धारयते। हन्त! केन नालोक्यते यदतितान्तस्वान्तशान्ततातेतूभूतैः शीतलशीतलैर्गभस्तिपुञ्जैः समेध-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानोऽपि राकापती राकायाममन्दचन्द्रिकाचाकचक्यचकितीकृतावलोचकलोकलोचनयुगलः, पूर्णतासीमन्तिनीसीमन्ते निजरागेण सिन्दूरतिलकमिव कुर्वाणो जनमनःसु परमाह्लादं सञ्जनयन्, नितान्तशान्तद्युतिसुधाधौतदशदिगङ्गनाननो गगनश्रिय आदर्श इव, ऐन्द्र्याः प्रस्थानकालिकमङ्गलकलश इव, अनल्पसौन्दर्यदर्पकन्दर्पसौवर्णतूणीरमुखमिव च सम्भूतः, अनेनैव महात्मना सितेतरदलात्मना परिणतेन कालेन क्षयक्षीणतां गमितः कुह्वां दर्शनमार्गादत्यन्तमेवापसार्यते ।

सान्द्रसान्द्रया शिशिरतमया च छायया अध्वक्लमभाजामध्वनीनानामध्वश्रममपनयन् सुन्दरीसुन्दराधरदललुलितलुलितैः किसलयैः कलकण्ठान् रक्तीकुर्वन्, सुधारसस्पर्धिना आम्रफलसारेण सकलानपि लोकान्मादयन्, हर्षयंश्च रसालमहीरुहो ग्रीष्मात्मना विवर्त्तमानेनाऽमुनैव सपदि हतप्रभीक्रियते । विनिद्ररसरसिजकुमुदवनेषु सहर्षं सप्रश्रयं सानुरागं सोल्लासं विनिर्भयश्च विहारमाचरन्तः पद्मावतीपादपद्मविलासझणझणायमानमनोहरनूपुररवानुकारिणा मनोहारिणा कलकूजितेन उद्यानलक्ष्म्या वन्दीमिव कलयन्तः कलहंसाः अपारासारासु दुर्दिनघटनाशिल्पिनीषु वर्षासु तदात्मताङ्गतेनानेनैव प्रोषितीक्रियन्ते ।

अनारतप्रवर्त्तमानवारिधारापरम्पराक्लेदितसकलभुवनतलाः, दूरीकृताखिलतपनतापाः, समुत्पादितहरितहरिततृणाङ्कुराः, कृष्णाकृतिमप्युपहसन्तो जीवनप्रदा जीमूतवाहनाः शरदाकारतां बिभ्राणेनाऽमुनैव रुष्टतमनिपीडितधौतवास इव निर्जलीक्रियन्ते । तारुण्यमदमत्ततरुणीजनाननविडम्बनानि, सकलाशाविसारिणा अमन्दमरन्देन मत्तानां मधुलिहां पटलेन झाङ्कारितानि, मदकलकारण्डवमल्लिकाक्षसारसादिपतत्रिवृन्दविहरणरमणीयानि सांसिद्धिकान्येव सरःश्रियो विभ्रमाणि, भ्रमद्भ्रमराणि, सरसिजवनानि, हेमन्तात्मनैवामुना काण्डशेषीक्रियन्ते ।

अहो ! अयमेव यूनां मनःसु शृङ्गमुद्भाव्य, रतिमुल्लास्य, रविप्राणयोर्मिथुनीकरणलीलया अनादिमहामोह इव प्रवृत्तः स्त्रीक्षेत्रेषु सत्त्वमाधाय, कललबुद्बुदाद्यवस्थाभिर्नाट्यदक्षतां निधाय, भ्रूणभावात् परतो निसर्गरमणीयं बालभावं विधाय, अथो तरुणिमानमाकलय्य, प्राणिनस्तथा उन्मादयति, चपलयति, विह्वलयति, विचित्तयति च यथैते सारासारविवेकविकलाः सन्तः अतिमिरा अन्धाः, अवातदोषिण उन्मादिनः, अमुखफेनिला अपस्मारिणः, अजीर्णा ज्वरिणः, अक्षतोरस्काः यक्ष्मिणश्च सञ्जायन्त इति कियन्ति कीदृशि चास्य (कालस्य) विचित्राणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरित्राणि कीर्त्तयेरन् । अथानेनोच्चावचैः स्वपरिणामैरेकतो द्विधा सञ्जातयोर्दम्पत्योः पुत्रपौत्रादिपरीवारं वर्धयित्वा, तृष्णाजालमातत्य, अर्थाशासमीरसन्धुक्ष्यमाणमनोरथानलज्वालाजालैर्विवेकभवनानि भस्मीकृत्य, सर्वतः पालित्यमुद्भाव्य विकलोऽपि सकल इवात्मानं मन्यमानोऽत्यन्तमेव नर्त्यते लोकः ।

अनेनैव किल अमरगुरुप्रज्ञामप्युपहसतां निखिलतन्त्रस्वतन्त्राणां पदवाक्यप्रमाणपारावारीणानामसङ्ख्यातानामपि सङ्ख्यावतां मनांसि विभ्रमीकृत्य विवेकाध्वनः सुदूरमाकृष्यन्ते । अमुनैव सकलसामन्तमौलिमालालालितचरणनलिनयुगलाः, रम्भारम्भस्तम्भाभिः कामिनीभिरुपसेव्यमाना महामाना, व्यूढोरस्का, महाभुजा महीभुजोपि परस्परं कलहायमानाः क्षणेनैव राजसिंहासनादधःपात्यन्ते । मलमल्लकशेषाः कुवेषा मक्षिकाभिर्वीयमाणा दूषिकादूषिताक्षा भसितभूषितशरीराः शिराततिसन्तन्यमानचर्माणः प्रतिगृहं, प्रतिद्वारं, प्रतिहट्टं, प्रतिचत्वरं दीनतरेणाननेन देहि देहीति भिक्षाटाट्यामटन्तोऽकुलीना अपि कुलीना इव राजपदवीमधिरोप्यन्ते । किमधिकमुच्येत ?

अयमेव अमर्त्यानपि मर्त्यभूमाववतार्य मर्त्यत्वधर्माणो विदधाति । भुवि भव्यमतीन् भव्याचारान् भावुकान् भूतिमतोऽपि मानवान् पशून् करोति । निरन्तरतपःक्षपिताशेषकल्मषान् संयतकरणान् विषयास्वादनविमुखान् अम्बुपर्णाशिनः पाणिपात्रान् दिगम्बरान् जीवन्मुक्तिकामिन्या सकटाक्षं निरीक्षमाणान् महामुनीनपि सुन्दरीजननयनवागुराभिः सुदृढं यन्त्रयते । हन्त ! को देशः को विदेशः का नगरी को ग्रामः कः खेटः कः खर्वटः किं वनं किमुपवनं को लोकः को वा परलोकोऽस्ति यत्रैतस्य परिणतिसाम्राज्यं न विभ्राजते । उक्तञ्च महामहिमशालिभिर्भर्त्तृहरिभिः—

सा रम्या नगरी महान्स नृपतिः सामन्तचक्रञ्च तत्
पार्श्वे तस्य च सा विदग्धपरिषत्ताश्चन्द्रबिम्बाननाः ।
उद्वृत्तः सच राजपुत्रनिवहस्ते वन्दिनस्ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपथं कालाय तस्मै नमः ॥ इति ॥

भगवानप्याह–"कालोस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्त्तुमिह प्रवृत्तः" इति । श्रुतिरपि च "स कालकालो गुणी सर्वविद्य" इति । इत्थमन्तरङ्गदृशा आलोक्यमानेऽस्मिन् विषये महानयं पारिणामिकः स्वभावो भगवत्स्वरूपान्नातिरिच्यते । बहूनि चैतस्यार्थस्योपबृंहणवाक्यानि "स कालो यद्वशे लोको वायो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिव घनावलिः" इति, "विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया। ईश्वरेण परिच्छिन्नं कालेनाऽव्यक्तमूर्त्तिना" इति चैवमादीनीतिहासपुराणादिषूपलभ्यन्ते।

सोयमेव सृष्ट्यादौ सत्त्वादीन् गुणान् क्षोभयित्वा, महदहङ्कारपञ्चतन्मात्रेन्द्रियकप्राकृतवैकृतादिभेदेन नवविधसर्गपरम्परया[1] ब्राह्मादीन् कल्पान् कल्पयन्, सूर्यात्मना च ज्योतिर्मण्डलमवभासयन्, सतां विशेषाणामन्तिमावस्थानस्य परमाणुमुपाधिमाश्रित्य परमाणुसञ्ज्ञको भूत्वा परममहदवधिं यावत् स्थौल्ये सौक्ष्मे च सकलाभिव्यक्तिकरः त्रुटि-निमेष-लव-क्षण-काष्ठा-नाडिका-मुहूर्त्त-प्रहर-दिनपक्षमासर्त्वयनसंवत्सरादिभेदभिन्नः कृतादियुगात्मनः परिणमते, यमधिकृत्यैव दिव्याऽदिव्यवर्षव्यवस्था शास्त्रकारैराम्नाता। यत्रेदमुक्तम्—

कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम्।
दिव्यैर्द्वादशभिर्वर्षैः सावधानं निरूपितम्॥ इति॥

कृतात्मना वर्त्तमाने चाऽस्मिन् सत्यशौचसन्तोषदयाक्षान्तित्यागार्जवशमदमतपःसाम्यतितिक्षोपरतिश्रुतज्ञानवैराग्यैश्वर्यशौर्यतेजोबलस्मृतिस्वातन्त्र्यकौशलकान्तिधैर्यमार्दवप्रागल्भ्यप्रश्रयशीलसहओजोगाम्भीर्यस्थैर्यास्तिक्यकीर्त्तिमानाऽनहङ्कारप्रभृतयो भगवद्गुणा नित्यमेव प्रजानां मनःसु सन्न्यधिषत। शारदं नभ इव, शैवं वपुरिव, गाङ्गं पाथ इव च सर्वतो विसृत्वरं नैर्मल्यं परां स्थितिं व्यधिषत। तदा शान्तास्तितिक्षवो महान्तः सदसद्विवेकपयःपूरपूतस्वान्तरात्मानो महात्मानो नारायणपरायणाः नरकद्वारभूतं कामादित्रयं दूरत एव प्रक्षिपन्तो धर्माऽविरुद्धं भगद्विभूतिभूतं कामं काममर्चयन्तः शिवप्रभृतीनि भगवन्नामानि प्रतिक्षणं रटन्तोऽनन्तपारात् संसारार्णवात्स्वात्मानमुदधृषत।

तदा नित्यपञ्चमहायज्ञाः सोमपीतिपूततररसना ब्रह्मनिष्ठा ब्राह्मणा विद्यातपोभ्यां समुपबृंहितजातिमहिमानो भुवो मण्डलं मण्डयाम्बभूवुः। ब्रह्मण्याः सत्यसन्धाः शरण्याः धनुर्धारिधीरधौरेया मृगेन्द्र इव विक्रान्ताः अश्वमेधानामाहर्त्तारः प्रजारक्षादक्षाः क्षत्रियाश्च भुवनेषु रूढमुदग्रं क्षत्रं नाम सार्थकञ्चक्रिरे। सत्यतुलार्जितनैककोटिवसवो वसव इव दुर्धर्षकमलासम्पत्तयो वणिजांवारा विविधाभिः समृद्धिभिर्वर्धमानमहामहोत्साहा धर्मोद्वेजकस्कर्मविमुखचेतोवृत्तयः

---

१ एतच्च—कालान्तरे पुराणेतिहासादिवाक्यापर्यालोचनया सविस्तरं विकीर्णेषु सिद्धान्तोक्षेपप्रतिक्षेपमुद्रया प्रतिपादयिष्यते।

०७९९९८
गुरुकुल कांगड़ी विश्वविद्यालय हरिद्वार

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सद्वृत्तयो दीनेषु दयां वितेनिरे। चरमश्च वर्णस्त्रैवर्णिकचरणार्चनसमुपजातमहाहर्षोऽपरधर्मेऽकृतामर्षोऽमृतवाग्वर्षोऽनाकलितनीचतरविषयतर्षोऽत्यन्तमेवात्मानं सेवावारिणा निर्मलीचकार। अमुष्मिन् त्रेतात्मनि सति त्रेताग्निसाध्यानां वैदिकानां यजतिददातिजुहोतिविधीनां प्रधानतया नाकसम्बन्धे जागरूके, द्वापरपर्यये च सन्दिहाना अपि तुल्यतया धर्माधर्मकोट्योः प्रजा धर्मकक्षामेव प्राय उत्प्रेक्षमाणा वेदविरुद्धमध्वानं नैव सम्भावयामासुः। अथ—सर्पति समये, अत्ययमानेषु युगेषु, कृतस्ववर्षेषु वर्षेषु, ह्रसत्सु ऋतुषु, मीयमानेषु मासेषु, क्षीयमाणेषु पक्षेषु, निर्ऋतिमुत्सृज्य त्रियमाणेषु वारेषु, अधर्मस्य समयसङ्गमदांस्त्रीनंशानङ्कुरयित्वा धर्मस्य तपःप्रभृतींस्त्रीन् पादान् सुदृढं प्रवृश्च्याऽधर्मप्रभवः कलिः कालः सकलक्षेत्रेषु प्रवर्त्तमानो महामोहमेवादौ प्रधानसाचिव्यपदेऽभिषिषेच। यस्मिंश्च क्रूरतमे प्राप्तस्वसैनिकशासने वैदिकविधिवादराजपट्टशासनमुल्लङ्घ्य, स्वच्छन्दरतिश्चालिङ्ग्य अनल्पकामेन कामेन मदमानेर्ष्यादिभिस्तैस्तैर्महामोहस्य रक्षिपुरुषैः सर्गादावहम्भावोल्लिखितोपि चिदानन्दमयो निरञ्जनो नित्यशुद्धबुद्धमुक्तस्वभावः पुरुषो विशेषतोऽद्य तथा हीनां दीनां दशामनायि यथा पुनर्न कदाप्यस्यात्मानन्दानुभवस्वाराज्यसाम्राज्यसम्पत्त्यै कोऽपि पर्ययः समुन्मिषितुं पारयेत्। किन्तु—यदस्य प्रधानममन्त्रकं सम्मोहनमस्त्रं योषा नाम, विषमिव विषमेण तेनामुना सहसा सकलस्यैव जीवनमपहृतम्। अद्य—कामं विधेर्विधेयतां परिहरेरन्, राजदण्डमपि सहेरन्, उपानहत्प्रहारमपि न गणयेरन्, परमासां भ्रुकुटिभङ्गतरङ्गाधोरणीधुराहरणे[1] कस्याऽस्ति सामर्थ्यं नवनवाहारविहारविशेषवेषभाषाविष्करणसन्तरणरणरणकहृदयस्याऽस्य जनस्य। यतिरयतिर्वा, मुनिरमुनिर्वा, पण्डितोऽपण्डितो वा, उपाध्यायो महोपाध्यायो वा, ऽन्यो वा यो वा को वा किङ्करोपि स्यात् स सर्वोप्याभिः कुटिलकचनिचयविचिताष्टमीचन्द्रखण्डानुकारिललाटफलकाभिः क्रीडामयूर इव नर्त्यते लोकः। एवं व्यतिकरे विशेषतः कामेङ्गितमाज्ञायाऽधर्मेण धर्मस्य त्रिषु चरणेषु चर्वितेषु किन्नाम तदस्ति यदखर्वगर्वगरिष्ठेन प्रसिद्धभण्डेन दम्भेनापि नाक्रान्तम्। आलोकयन्तु—

प्रियपाठकमहाभागाः! अज्ञाताध्यापकशिष्यताङ्गतोयममोघशक्तिसम्पन्नो दम्भः अपादपि महाजवी, अपाणिरपि सर्वग्रही, अचक्षुरपि विश्वदर्शी, अकर्णोऽपि

१—"वाचा" वत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वश्रवाः । सोयं वाकीं कौर्मीं मार्जारीं शार्गालीं च वृत्तिमुपाश्रित्य क्वचिल्लम्बकूर्चः क्वचिन्मुण्डतुण्डः, क्वचिच्चूली क्वचिज्जटिलः, क्वचित् सर्वमुण्डी क्वचित् मौनतुण्डी क्वचिदात्ततुम्बिः क्वचिद्भाण्डहस्तः, क्वचित् कण्डार्पितबहुमालः क्वचिद्विशालतिलकभालः, क्वचिज्जपमुखचपलोष्ठः, क्वचिदनन्ततीर्थस्नायी, क्वचिद्रामरटननटनानन्तेष्टकाचयनमात्रोन्नीतनयनः, क्वचित् परपदस्पर्शी सरलश्च, क्वचित् समाहितः विषयोपभोगी च, क्वचित् परमकरुणाबन्धुः स्वार्थदत्तदृष्टिश्च, क्वचित् चाटुशतकृत् मूलहर्त्ता च, क्वचिदक्रूरः कृष्णप्रियश्च, क्वचित् खर्वोप्युच्चहृदयश्च, क्वचिदूर्ध्वगोपि नीचहृदयश्च, क्वचिद्भूतिभूषितशरीरो बहुभोगी चेति सकलपरचक्रक्रान्तिं कृत्वा निष्कण्टकमेव प्राज्यं राज्यं भुङ्क्ते ।

अहो ! अद्य पारस्परिकरागद्वेषदोषदूषितगोष्ठीगरिमाणोऽब्रह्मण्या ब्राह्मणाः, अरक्षिकाः क्षत्रियाः, वेशवंशवशो विशः, शुचा शीर्णाः शूद्राश्च संवृत्ताः । आः ! अनन्ताभोगशय्याशयनपरायणे नारायणे प्रच्युते च धर्मे यतस्ततः सर्वाः प्रजा धर्मानुगुणगणहीनाः शीर्णशीलाः प्राप्तव्यसनशतैर्हीनायुर्बलाः सम्पन्नाः। बलक्षयं, विवर्णतां, व्याधिसञ्चयं, मनोग्लानिं परां पीडाञ्च समाश्रयन्तो पि नैव जानन्त्यस्य कलेः कालस्य कूटचेष्टितम् । अद्य उद्देशत एव धर्मः, हेतुवाद एव कुतूहलम्, धार्ष्ट्यं एव पाण्डित्यम्, चक्षुष्येव प्रमाणता, दृष्ट एव श्रद्धा, वाद एव शीलता, नीचेषु कुटिलेषु अव्यक्तवाक्येव च प्रेमप्रवणता ।

हन्त ! अद्य सर्वेषां सर्वं भक्ष्यम्, सर्वेषां सर्वं चर्व्यं, नच ब्रह्मचर्यं नच कुत्रापि सङ्गतिः। अद्य न स्वधा, न स्वाहा, नापि वषट्कारः श्रूयते, किन्तु मुधा कलहः, वृथा नादः, महावर्षः, महती भीतिरिति यतस्ततो दुर्दैवमेव प्रजानां विलसतितराम् ।

अद्य पुत्राः पितॄनादेशयन्ते, शिष्याः कृतघ्नाः सन्तो वाक्शरैर्गुरूनर्दयन्ते, पुत्राः पितॄणां, शिष्या गुरूणां समक्षेऽपि धार्ष्ट्यं प्रकाशयन्ते, स्नुषाः श्वश्रूर्भर्त्सयन्ते। हाहाह—भ्रातृषु शात्रवम्, श्यालेषु बन्धुता, दूरे वार्यमने तीर्थबुद्धिः, नीचेषु धर्मशासकता। अद्य यज्ञैर्नष्टम्, दानैर्भ्रष्टम्, तपोभिर्म्लानम् यशोभिर्ग्लानम्, स्वाध्यायैः पलायितम्, क्रियाभिः सन्न्यस्तम् । यमैर्मूर्च्छितम् , नियमैर्निद्राणम्, आसनैर्व्यवायितम् । इन्द्रियारामा एव प्राणायामाः, विषयाहारा एव प्रत्याहाराः, रणा एव धारणाः, चिन्तैव ध्यानम्, आधिरेव समाधिः । किम्ब्रूमः कियद्ब्रूमः—

यत्र यत्र चक्षुषी व्यापारयामः, मनो वा प्रेरयामः, तत्र तत्र सर्वं व्युत्क्रान्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मर्यादमेवालोक्यते वस्तुजातम् । अद्य भाव्यं न भव्यम्, सम्पत्तिर्नोर्ध्वमुखी, धीरता न स्थिरा, शूरता न सोत्साहा, चपलैव चञ्चला प्रिया, विधूतप्राया साधुता, धुता च मानिता ।

येषां परमपुनीतमनसां नक्तन्दिवा शास्त्रपरिशीलनजुषां विदुषां चरणौ राज्ञां सामन्तमणिमौलिमालालालितेषु शिरःसु लुठन्ति स्म, येषाञ्च विद्यापीठेषु पूर्णः स्वाधिकारो राज्यमकरोत्, येषां सरस्वतीकुतूहलदिदृक्षयाकुलितहृदयाः विनीतभावेन पाणौ गृहीतार्चनाः भास्करप्रभाप्रतिस्पर्धिब्राह्मैर्वर्चोभिर्देदीप्यमानं मुखमण्डलं सादरमीक्षाञ्चक्रिरे, तेऽद्य स्वार्थान्धैः शास्त्रश्रद्धाधनशून्यैः क्षणभङ्गुरसम्पत्तिगर्वितैः परित्यक्तवेदशास्त्राभ्यासैः खद्योतद्युतिभिः स्वात्मचाटुकारप्रियैरत्यन्तमेव पराभूयन्ते, उपेक्ष्यन्ते, गर्ह्यन्ते चेति किमतः परं कष्टं स्यात् । ये त्यक्तसर्वैषणा यथाविधि सन्न्यस्तसकलकर्माणः चरमाश्रमभूमयः पाणिपात्रा दिगम्बराश्चिदम्बरसाक्षात्कारसमुद्भूतानन्तानन्दघनघनाघनामृतवर्षणशान्ततरान्तःकरणाः दारुमयीमपि योषां न पदा पस्पर्शुः, धातुवादादपि नितान्तं बिभ्युः, पत्रपुष्पफलाहारा अरण्य एवारण्यकान्यगीषत, अद्य ते केवलं काषायमुपजीव्य महद्भिः कषायैरुपेताः प्रासादेषु कुथारल्लकास्तरणेषु प्रलुठत्पादाः सौवर्णवर्णाभिः कमलकोमलकराभिः श्रिया रम्भारम्भमप्युपहसन्तीभिरुपवीज्यमाननाः अमन्दमरन्दसारसम्भिन्नसकलावयवाः कोटिपतयो ब्रह्मानन्दसहोदर एव दृढबद्धसख्याः सन्तः सन्तः परात्परविवृतवदनाः परितो दरीदृश्यन्ते । एतेषामबला एव परं शास्त्रबलम्, इष्टकाचयनमेव अधिमात्रोपायाः, कोषवृद्धिरेव परा सिद्धिः, रणरणकमेवारण्यकम्, वागेव वेदान्तसिद्धान्तः । हन्त ! क उपालभ्येत ? क आश्रीयेत ? कः प्रार्थ्येत ? कः श्राव्येत ?। कस्मै वा निजहृदयदुःखं निवेदयामः? केन सह मन्त्रयामः ? कं वा विविक्तबन्धुमाकलयामः ? काल एवाऽयं कलिः करालः, विपरीतं सकलं चक्रम्, नाऽस्य शक्तिः परिहर्त्तुं शक्या, लेखा हि काललिखिता सर्वथा दुरतिक्रमा, अतो वयमत्रैव स्वलेखनीं विरमयामः । अन्ते च पाठयामः—

कालः सर्वाणि भूतानि कालः कलनकालकृत् ।
सर्वं यस्य वशे तस्मै कालाय कलये नमः ॥ इति ॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूक्तिविंशतिः ।

आसुर्या मायया के के वञ्चिता नैव साधवः ।
इयं प्रत्यक्षसिद्धार्थपरावर्त्तपरेश्वरी ॥ १ ॥

सत्येन शपथेनापि मोदः कस्तूरिकाधृतः ।
भावितो नैति सद्भावं दुर्भावजनमानसे ॥ २ ॥

परोपकारशीलस्य नित्यं निर्मलचेतसः ।
अकृतज्ञाः कलेः कूट-मायामूर्त्तिधरा नराः ॥ ३ ॥

जीवत्सु जीवनं दृष्टमजीवत्स्वपि जीवनम् ।
जीवन्तो जीवयन्त्यन्यान् परे घ्नन्त्येव जीवतः ॥ ४ ॥

मस्तके निहिता येऽपि सुखे दुःखे समा न चेत् ।
चिकुरा इव ते बालाश्चेतना-स्फूर्त्ति-वर्जिताः ॥ ५ ॥

नीचा विलासिनो नित्यं भुजङ्गमकुलं यथा ।
अमृतं दत्तमेतेभ्यो मृतं भवति तत्क्षणात् ॥ ६ ॥

सख्यं साप्तपदीनं स्यादित्याहुरसतां न तत् ।
चित्रा वाचः स्रवन्त्येषां बहिरेव मनोहराः ॥ ७ ॥

परसङ्गस्य दोषेण निर्मलोऽपि मली भवेत् ।
काकसङ्गी मरालोपि हतो राज्ञा विजानता ॥ ८ ॥

निर्गुणे नित्यनिर्वाणेऽवंशजे धनुषः पदे ।
स्थापिते देवराजेन कस्मै दोषः प्रदीयताम् ॥ ९ ॥

आर्जवे लघुता दृष्टा गरिमा वक्रतास्थितौ ।
छन्दःशास्त्रे यतो विद्वन् ! तस्मान्मा सरलो भव ॥ १० ॥

उपकारो न येन स्यान्न भूषा नाप्यकोपता ।
गुरुणा तेन किं सिद्ध्येच्छ्लीपदेनेव रोगिणः ॥ ११ ॥

दूरादेव हि शोभन्ते रक्ताः पत्रैकमानिनः ।
मित्र ! मा गन्धलोभी[1] स्याः किंशुकेषु शुकेषु च ॥ १२ ॥

दानी मत्तश्च मातङ्गः कर्णाभ्यान्ताडयेदलीन् ।
तेन तस्यैव शोभायाः क्षतिर्नास्त्यलिनाङ्गणे ॥ १३ ॥

चटको गारुडं वेगं यदि कर्त्तुमना भवेत् ।

---

१ "गन्धः सम्बन्धलेशयोः । गन्धकामोदगर्वेषु" इति हैमः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्षिषु तस्य का शोभा विज्ञेषु समवादिषु ॥ १४ ॥
वालिशावोधमात्रेण कवेः किञ्चिन्न दुष्यति ।
नहि नेत्रनिमीलेन भास्करो न्यक्कृतो भवेत् ॥ १५ ॥
कविर्ज्ञातसमस्तार्थः स्वां स्थितिं नैव मुञ्चति ।
महामल्लमहामुष्टिघातैः किं क्षुभ्यते वियत् ॥ १६ ॥
त्राकचक्यप्रभातौल्ये वालाः काचे भ्रमाकुलाः ।
दोषज्ञाः दृष्टिमात्रेण विरला हीरकाविदः ॥ १७ ॥
अस्त्येव वर्णसादृश्यं पिकध्वाङ्क्षपतत्रिणोः ।
परं पञ्चमसञ्चारे ध्वाङ्क्षो ध्वाङ्क्षः पिकः पिकः ॥ १८ ॥
सुदर्शनोऽयमित्येवं बुद्ध्या मा गा रतिं प्रिय ! ।
एष स्वच्छन्दसञ्चारिजलजन्तुमहाग्रहः ॥ १९ ॥
लेखा विधातुरालेख्यकृता नैवाऽकृता भवेत् ।
इति मत्वा महाधीरो हर्षशोकौ विमुञ्चति ॥ २० ॥

मानवशास्त्रस्य संक्षिप्तं समालोचनम् ।

मानवशास्त्रवादिन इत्थमाकलयन्ते यत् सजीवनिर्जीवभेदेन प्रकृतौ पदार्थद्वैविध्यम् । यत्र सजीवपदार्थानामालोचनं भवति तज्जीवशास्त्रमिति भण्यते । अस्यैव जीवशास्त्रस्यैको विभागः मानवशास्त्रं नरशास्त्रं वेत्युच्यते। यद्यपि मनुष्येषु कश्चनैतादृशो विशेषो वर्त्तते येन ते सर्वेभ्योऽपि श्रेष्ठाः सन्ति, तथापि तद्बुद्धि-भाषा-कीकसादिपरीक्षणेनेदं निश्चीयते यत्तेषु इतरेषु च जन्तुषु कश्चन महान् भेदो न वर्त्तते । इत्थं जीवशास्त्रज्ञसिद्धान्तरीत्या जीवेषु मुख्या प्रथमविभागस्था श्रेणी नराणां द्वितीया च वानराणामिति युक्ततरमाभाति । गौरिलस्य मुखाकृतेर्दर्शनान्मनुष्याणां वानराणाञ्च नितान्तमेव सादृश्यम् । अन्तरन्तु केवलं मनुष्या द्वाभ्यां पादाभ्यां चलन्ति गौरिलश्चतुर्भिरेव पादैरिति । किन्तु अङ्गुष्ठस्य अङ्गुलीनाञ्च सम्मुखानयनशक्तिर्द्वयोः साधारणी । मनुष्यतदितरजन्तुनिष्ठप्रधानभेदे हेतुश्च तेषां मस्तिष्कभेद एव । मत्स्यचटकादीनां मस्तिष्कस्य स्वल्पता चिक्कणता, उत्तरोत्तरं विकाशशक्त्योन्नतश्रेणीस्थानां जीवानाञ्च मस्तिष्कं बृहत्तामागतं भवति । मस्तिष्कस्योपरिभाग एव ज्ञान-कृति-स्मृतीनां स्थानमिति मनःशास्त्रविदां निश्चयः । वानरमस्तिष्कापेक्षया मनुष्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मस्तिष्कं सार्धद्विगुणितम्। यद्यपि गौरिलसञ्ज्ञकवानरा मनुष्यापेक्षया आकारतो बृहन्तो बलवन्तश्च सन्ति तथापि तेषां मस्तिष्कमतिसङ्कुचितम् अत एव न ते मनुष्यसमबुद्धिमन्तो भवन्ति। मनुष्यमस्तिष्के अपूर्वैव काचन विचारणा शक्तिरुपलभ्यते याचेतरेषु जन्तुषु न प्राप्यते। शब्दैरर्थप्रकाशनशक्तिरर्थावगमशक्तिश्च मनुष्येष्वेव विलोक्यते न गौरिलादिषु, चेष्टावगमस्तु कामं स्यात्। एतावदेवान्तरं नराणां वानराणाञ्च। नानाविधकलाकौशलाद्याविष्करणप्रकाराकारविचारः सत्याऽसत्यपरीक्षणादयश्च मनुष्यमस्तिष्कस्थशक्तिवैलक्षण्यस्य परं प्रमाणम्। किन्तु—नैते स्वरचनायै यं कमपि सर्वज्ञं सर्वशक्तिमन्तञ्च परं पुरुषविशेषमपेक्षन्ते। बहवो जानन्ति यन्मनुष्याणामन्येषाञ्च जन्तूनामात्मनि भेदो विद्यते। मनुष्यः सर्वापेक्षया महानस्ति। परन्तु वैज्ञानिका बुद्धिमत्कर्त्तृकपुरुषविशेषनिर्माणवादं न सहन्ते। तेषां कथनं यत् प्राकृतिकशक्तिभिर्यथाऽन्येषां सर्वेषां पदार्थानां सृष्टिरभूत् तथैव मनुष्यसृष्टिरपि। अर्थात् क्रमेणैवाऽयं विकाशोऽकारि। ईश्वरः सर्वान् जीवान् रचयति, प्रलयकाले मनोस्तरणौ सर्वेषां प्रतिकृतिः संस्थाप्यते, ततश्च पुनः सृष्टिरुत्पद्यते इत्यादिकं सर्वं युक्तिशून्यं प्रमाणरहितञ्च वरीवर्त्ति। भूगर्भपरीक्षया सिद्धं यत्सर्वे जन्तवो न युगपदुत्पन्नाः पृथिव्याम्। अपि तु क्षुद्रतम-क्षुद्रतर-क्षुद्रजन्तूद्भवः क्रमिको विकाशः। इत्थञ्च कृमिकीटादिक्रमेण वानरेभ्य एव मानवानां सृष्टिरिति दारुवीण-(Dorwin) मतम्। विकाशवादस्याऽयं सिद्धान्तः—यथा कारणगुणा कार्ये संक्रामन्ते तथैव विविधगुणानां सम्मेलनेन, योग्यव्यक्तीनां रक्षया अयोग्यव्यक्तीनां विनाशेन च शनैः शनैर्नवीनप्रकारका जीवाः समुत्पद्यन्ते। एष एव विकाशवादस्य सिद्धान्तः, एवमेव मानवसृष्टिरभूदिति।

अत्रेदमालोचयामः। योयं कारणगुणानां कार्ये सङ्क्रमणं विकाशवादस्य सिद्धान्तः सच "कारणगुणाः कार्यगुणानारभन्ते" इति प्राक्तनसिद्धान्तान्नातिशेते। तत्र विकाशवादिनां गुणपरिभाषा कीदृशीति नात्र माननीयेन लेखकमहाशयेन स्पष्टीकृतेति तद्विषयेऽस्माभिरपि न किञ्चिदुच्यते। किन्तु विकाशवादस्य युक्तिपूर्णता तदितरवादस्य युक्तिशून्यता चेत्ययमंश एव युक्तिभिः परीक्षणीय इत्ययमस्माकमारम्भः। ननु-भो! विकाशवादिन्! कारणगुणानां कार्यावस्थायां सङ्क्रमः स्वत एव भवति? परतो वा?। स्वतश्चेत् सङ्क्रमावस्थातः पूर्वं तेषां कार्ये सङ्क्रमणशक्तिः केन प्रतिबद्धाऽभूत्। सा चेत्तेषां स्वोभावस्तदा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वभावस्यानपायित्वात् न केनापि प्रतिरोधकेन भाव्यम्, स्वभावहानौ भावावस्थानानुपत्तेः। नहि क्रमिकविकाशमहापक्षपातिना भवतापि कारणगुणानामक्रमावस्था काचिन्नास्तीति वक्तुमपि शक्यम्, निर्मूलकार्यावस्थापत्त्या कार्यकारणभावविलोपप्रसङ्गात्।

महतोऽपि महीयसोऽचिन्त्यविचित्ररचनास्वरूपस्यास्योच्चावचचराचरात्मकस्य प्रपञ्चस्य यदेवा ऽमूलं मूलं, प्रधानं वा, प्रकृतिर्वा, परमाणवो वा, स्कन्धा वा, पुद्गला वा, शून्यं वा, भवदभिमतमन्यद्वा यत्किञ्चित् तत् क्षुद्रतमाद्यवस्थानिर्माणात् पूर्वं कथं स्वव्यभावभागभूत्। स्वेच्छयेति चेत्? चितिपरिणामवादप्रसङ्गः। अथ ब्रूषे—यदस्य विविधस्य प्रपञ्चस्यास्ति परममूलं तत् कार्यावस्थायां स्वगुणसङ्क्रमणकालात्पूर्वं स्वेच्छयैव शान्तमासीत्, यथा कश्चन चिकीर्षुः चिकीर्षोत्पत्तेः पूर्वं चिकीर्षाविषयकजिज्ञासाभावात् उद्देश्यतानुपपत्तेः शान्तस्तिष्ठति, तथैव क्रमिकविकाशकरणात्पूर्वं विकाशकरणशक्तिमत् परमं मूलं स्वेच्छयैव शान्तं वर्त्तत इति, तदेवं ब्रुवतश्चितिपरिणामवादप्रसङ्ग आयातो भवति। इच्छायाश्चैतन्यसामानाधिकरण्यानियमात्, जडे तस्या असम्भवाच्च। इच्छाद्या जडस्यैवान्तःकरणस्य धर्माः सन्तीत्यस्त्येकं दर्शनं तथाऽस्माकपि भविष्यतीति चेन्न अधिष्ठानचितिवादापत्तेः। साङ्ख्यादिदर्शनप्रक्रियादृष्टान्तेन जडे परममूले क्रमिकविकाशविषयके स्वीकुर्वाणस्य योग्यतालक्षणसम्बन्धद्वारा अयस्कान्तमणिरिव सन्निधिमात्रेणायसि उपकारप्रकाशनपरा स्वतन्त्रा काचित् चितिशक्तिरस्तीत्यवश्यं स्वीकर्त्तव्यं भविष्यति, तथासति विकाशसिद्धान्तो भज्येत। इत्थं स्वयं गुणानां कार्यावस्थासङ्क्रमणमिति रिक्तं वचः।

तस्माद् द्वितीयः पक्षः परिशिष्यते "परत" इति। तत्र पृच्छ्यते कोऽसौ पर इति? किं बुद्धिमत्? किं वा अबुद्धिमत्?। आद्येऽपि प्रायो लोकप्रसिद्धा जीवाः सन्ति? ईश्वरो वा?। न तावत् जीवाः भवन्मते क्रमिकविकाशात्पूर्वं जीवचैतन्योत्पत्तेरभावात् प्रोटोप्लाज्मसञ्ज्ञकपदार्थोत्पत्त्यनन्तरमेव ज्ञानतन्तूनां तादृशरचनोपपत्तेर्नित्यस्वतन्त्रानादिजीवचैतन्यानङ्गीकाराच्च। तथापि तेषां संसाररचनासामर्थ्याऽसत्त्वाच्च सर्वथा त्याज्योऽयं पक्षः। न द्वितीयः ईश्वरकर्तृवादप्रसङ्गात् पक्षानुत्थानापत्तेः। प्रथमे द्वितीयश्चेत् किं तद् अबुद्धिमत्? परममूलाद्भिन्नं तदेव वा?। भिन्नं चेत्? "अन्धस्यैवान्धलग्नस्य विनिपातः पदे पदे"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति स्वयमनिच्छं सत् तत् परं सेच्छं कुर्यादिति किं वक्तव्यम्। तदेवेति चेत्? पुनःपरीक्ष्यवादप्रसङ्गः। यदि प्रथमस्थापितमेव अमूलं मूलमित्युच्येत? तत्प्रत्युच्यते—तदेव तु परीक्ष्यते, कथमनिच्छस्य तादृशक्रमिकसमुत्थानं कार्यावस्थायामिति ब्रूहि। अपिच—कार्यावस्थायां स्वगुणसञ्चारात्पूर्वं शान्तता तस्य स्वभावश्चेत् परतोऽपि तथैव स्थास्यतीति कथं स्वरूपासिद्धौ साधनप्रत्याशा विकाशवादिनाम्।

किञ्च—यदि रेलाञ्जन-द्विशकल-(Bicycle) प्रभृतिदृष्टान्तबलेनैवेतन्निरूप्येत? यथा पञ्चाशद्वर्षलगितभगितकालाद् वायुशकलस्य प्रारम्भिकरचनामपेक्ष्य वर्त्तमानरचनातो महद्वैलक्षण्यमासीत्, अस्य पुरश्चक्रं चतुष्पञ्चाशदिञ्चमानोच्चं, पश्चाच्चक्रञ्च पञ्चादशेञ्चमितोच्चमभूत्, सम्प्रति द्वयोः साम्यं, गतौ च पूर्वतोऽपि सारल्यम्, इत्येवमुत्तरोत्तरमेधमानरचनाकं तत् क्रमिकविकाशशक्त्या प्रोटरशकलादिरूपेणात्यल्पेऽपि काले कथं कीदृशं परिणतमिति, एषैव दिक् गुणानां क्रमिकविकाशस्य ज्ञातव्येति चेत्? महाप्रासादादयश्च

तत्रोच्यते—दृष्टान्तबलेन प्रत्यवतिष्ठमानस्यापि नाचेतना अनधिष्ठितचेतना वा गुणाः स्वतन्त्रं किञ्चिद् विशिष्टपुरुषार्थनिर्वर्त्तनक्षमा विविधं विकाशमारचयन्तो दृष्टाः, रेलाञ्जनवायुशकलादि विकाशमानं प्रज्ञावद्भिर्महाशिल्पिभिरेव यथाकालसूहापोहकुशलैः पुरुषार्थविद्भिः कतुदक्षैरेव यथोचितव्यवहाराय रचिता दृश्यन्ते, तथैव परममूलभूतगुणविकाशरूपोऽप्ययं महाप्रपञ्चो विविधकर्मफलोभोगयोग्यः प्रतिनियतावयवादिविन्यासो मेधावद्भिरप्यसम्भाव्यमानरचनः सङ्कल्पयितुमप्यशक्यः कथं चेतनानधिष्ठितैर्गुणैर्विकाशक्रमानभिज्ञैः स्वयं विरच्येत? भवत्स्थापित-स्थापनार्हदृष्टान्तेषु चेतनाधिष्ठितेष्वेव विविधरचनानां दृश्यमानत्वात्। नच-गौणक्रमिकविकाशस्वरूपाश्रयेणैव रेलाञ्जनवायुशकलादि दृष्टान्तीकर्त्तव्यं न पुनर्बुद्धिमत्कर्त्तृस्वरूपव्यपाश्रयेणेति किञ्चिद्राजाज्ञादि नियामकमुपलभामहे। नचैवं सति किञ्चिद्विरुध्यते, प्रत्युत सर्वज्ञसर्वशक्तिमच्चिदधिष्ठानवादपक्षोऽनुगृह्यत एव, साधिष्ठानक्रामिकविकाशवादसमर्पणात्। एतेन "नैते स्वरचनायै यं कमपि सर्वज्ञं सर्वशक्तिमन्तञ्च परं पुरुषविशेषमपेक्षन्ते" इत्यादि प्रत्युक्तं भवति, दृष्टान्तस्यैकान्ततो विकाशवादपक्षसाधकत्वाभावात्।

यच्च—"ईश्वरः सर्वान् जीवान् रचयति, प्रलयकाले मनोस्तरणौ सर्वेषां प्रतिकृतिः संस्थाप्यते" इत्युक्तं तदप्ययुक्तम्, सिद्धान्ते जीवस्यानादित्वात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद्रचनानङ्गीकारात् मनुतरण्यादिपौराणिककथाप्रसङ्गस्याऽभिप्रायापरिज्ञानाच्च। योग्यव्यक्तीनां स्थापनमयोग्यव्यक्तीनाञ्च विनाशनमपि तन्नियमाभिज्ञतासाधकं, स्थापनाऽस्थापनयोरिच्छापूर्वकत्वात्,इच्छायाश्च ज्ञानपूर्वकत्वनियमात्। सर्वजन्तूनां युगपदुत्पत्त्यभावोपोद्बलकत्वं भूगर्भविद्याया नास्मन्मतस्यात्यन्तविरोधि वैदिकैरपि क्रमविशेषस्याहतत्वात् "तस्माद्वा एतस्मादात्मन आकाशःसम्भूतः" (तै०उ० २।१।१) इत्यादिसृष्टिवाक्यानां पर्यालोचनया वाक्यैकवाक्यतान्यायेन तादृशार्थप्रतिपत्तेः।

व्याघाताच्चासमञ्जसम्—अपिचासमञ्जसं दारुवीणप्रभृतिप्रकाशितं विकाशदर्शनं व्याघातात्=परस्परं विरुद्धार्थाभिधायित्वात्। "तथापि तद्बुद्धिभाषाकीकसादिपरीक्षणेनेदं निश्चीयते यत्तेषु इतरेषु च जन्तुषु कश्चन महान् भेदो न वर्त्तते" इत्युक्त्वा "एतावदेवान्तरं नराणां वानराणाञ्च" इत्यादिना यन्मस्तिष्काद्युपाधिना महद्वैलक्षण्यसाधनोक्तिर्नाम व्याघातासामञ्जस्यं प्रतिपादयति विकाशवादिनाम्। ज्ञान-कृति-स्मृतीनां मस्तिष्कमेव स्थानमन्यद्वेति मनःशास्त्रपरीक्षां कालान्तरे प्रस्तोष्यामः। मस्तिष्कादिरचनायाः साधर्म्यवैधर्म्यशृङ्खला तदुत्पत्त्यनुत्पत्तिहेतुरित्यप्यनैकान्तिकम्, सम्प्रति वानरादिभ्यस्तथाऽदर्शनादित्यतिसङ्क्षेपः।

———

ॐ

सरस्वती श्रुतिमहती महीयताम्।

———

पञ्चनदीयसंस्कृतसाहित्यपरिषदः।

नियमावली।

अस्या उद्देश्यानि षट्।

(१) अस्माकं भारतवर्षीयाणामालस्यादिदोषवशात् क्रमशो ह्रासमुपगच्छन्त्याः संस्कृतभाषायाः पुनः प्रचारणमेवास्याः परिषदो मुख्यं प्रथमञ्चोद्देश्यम्।

(२) संस्कृतभाषाया अध्यापनपद्धत्तौ चिराद् व्यवह्रियमाणं प्राचीनं क्रममुपजीव्य सौकर्य्यावहस्येदानीन्तनस्यापि तस्य (क्रमस्य) समुपनिवेशोऽस्या द्वितीयमुद्देश्यम्।

(३) संस्कृतविद्यार्थिनां सौकर्य्याय प्रतिष्ठागौरवाद्यभिवर्धनाय च तत्तन्महा-

---

१ एतद्विषये कालान्तरे लेखनीं व्यापारयिष्यामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यालयाध्यक्षमहाशयेभ्यो विश्वविद्यालयाध्यक्षेभ्यश्च निवेदनमस्यास्तृतीयमुद्देश्यम् ।

(४) एतद्देशप्रसूता अपि ये धर्ममर्मोपदेशिन्याः संस्कृतभाषाया अनभिज्ञास्तेषामेतज्ज्ञानसम्पादनाय प्रवर्तनमस्याश्चतुर्थमुद्देश्यम् ।

(५) सर्वेष्वपि संस्कृतानुरागिषु च सम्भूय कार्य्यसम्पादनपरिपाटीस्पृहयालुतामुपजन्य परस्परसौहार्दस्थापनोद्योगोऽस्याः पञ्चममुद्देश्यम् ।

(६) बहुसभ्यानुमोदितस्य कस्यचित् स्थिरकार्य्यस्यापि सम्पादनप्रयत्नोऽस्याः षष्ठमुद्देश्यम् ।

अथ नियमाः ।

(१) परिषदोऽस्याः "पञ्चनदीयसंस्कृतसाहित्यपरिषद्" इति नाम स्यात्; अस्याश्च सर्वोऽपि कार्य्यकलापः संस्कृभाषयैव परिचाल्येत; अधिवेशनेषु (अत्यावश्यकतां मत्वा) हिन्दीभाषयाऽपि व्याख्यानादीनि भवितुमर्हन्ति ।

(२) अस्याः प्रधानकार्य्यालयो लवपुर एव स्यात् ।

(३) अधिवेशनानि पुनरस्याः पञ्चापप्रान्तीयेषु विभिन्नेषु नगरेषु प्रत्यब्दं भवेयुः । संस्कृतानुरागिणो विद्वांस ऐकमत्येन यत्र निमन्त्रयेयुस्तत्रैवाधिवेशनं नियम्येत ।

(४) एवंविधेऽधिवेशने परिषत्कर्तव्यान्यनुसृत्य ते ते प्रस्तावाः समुपस्थाप्येरन्, बहुसम्मत्या च स्वीक्रियेरन्, तदनुसारेणैव तस्मिन्नब्दे कार्य्यं परिचाल्येत।

कर्त्तव्यानि ।

(५) परिषदियं शिक्षासौकार्य्याय संस्कृतसाहित्याभिवृद्धये च विविधविषयाणां नवनिर्मितान् प्राक्तनानुपलब्धांश्च ग्रन्थान् यथासम्भवं प्रकाशयेत् । संस्कृतानुरागिभ्यो महाराजप्रभृतिभ्योऽन्येभ्यो वा धनिकेभ्यो नूतनग्रन्थनिर्माणार्थं प्राक्तनालभ्यग्रन्थान्वेषणाय च समुचितपारितोषिकमपि दापयितुं प्रयतेत।

(६) आर्षग्रन्थानां शुद्धसंस्करणप्रकाशनाय प्रयतेत परिषदियम् ।

(७) ये च महाराजाद्या विशिष्टा धनिका वा संकृतपुस्तकानां भाषान्तरेषु योग्यमनुवादं सम्पादयितुमभिवाञ्छन्ति तदर्थमपि तदिच्छया परिषदा योग्यविदुषां प्रबन्धः क्रियेत । निर्दोषानुवादसम्पादनाय चावधीयेत ।

(८) शास्त्राणामध्ययनाध्यापनपरिपाटीसंरक्षणाय परिषदियं शास्त्रिपरीक्षोत्तीर्णानामपि उच्चतमशिक्षाधिगमाय विशिष्टान् विद्यालयान् स्थापयितुं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयतेत। तत्राध्येतॄणां च निर्वाहाय छात्रवृत्तिप्रबन्धोऽपि कार्य्येत; उच्चतमज्ञान-सम्पादनाय देशान्तरं जिगमिषतां पञ्चनदीयच्छात्राणां कृते योग्यवृत्तिदापनञ्च कार्य्येत।

(९) संस्कृतशिक्षाया अधिकाधिकप्रचाराय संस्कृतविदुषां सामयिकयोग्य-ताभिवृद्धये च विशिष्टानां विदुषां सम्मतीः संगृह्य परिषदियं शिक्षाक्रमं प्रकाशयेत्।

(१०) आङ्गलविद्यालयेषु द्वितीयभाषारूपेण दीयमानायाः संस्कृतशिक्षायाः पद्धतौ के दोषाः कथञ्च तेऽपनेया इत्याद्यपि परिषदियं काले काले विचारयेत तदानुकूल्याय च विश्वविद्यालयं प्रार्थयेत।

(११) यत्र यत्र संस्कृतपाठशालाः प्रतिष्ठापिताः प्रतिष्ठाप्यन्ते च तत्र विद्यालयाध्यक्षाणामिच्छानुरोधेन योग्यविदुषां प्रबन्धं परिषदियं विदध्यात्। शालानां यथासमयं निरीक्षणप्रबन्धञ्च।

(१२) पञ्चापप्रदेशे संस्कृतशिक्षायाः प्रचारः, विशिष्टविदुषां संङ्ख्यावृद्धिः, संस्कृतविदुषां गौरवञ्च यथाभवेत्तथा परिषदियं विश्वविद्यालयाध्यक्षमहाशया-नामवधानं काले काले समावर्जयेत्।

(१३) पञ्चापप्रान्तीयविशिष्टविदुषां संस्कृतविद्यालयानाञ्च सविवरण-सूचीसम्पादनायं परिषदियं प्रयतेत।

(१४) पञ्चापप्रान्तीयनगरेषु सर्वत्र शाखासभानां प्रतिष्ठापनाय तदभ्यु-न्नतये च परिषदियमवद्धीत।

(१५) परिषदियं रात्रिपाठशालादिपरिचालनेन संस्कृताध्ययनाभिलाषिणां सौकर्य्यं सम्पादयेत्।

(१६) परिषदियं स्वनियमितक्रमानुसारेण तास्ताः परीक्षा अपि व्यवस्था-पयेत्। तदुत्तीर्णेभ्यश्च छात्रेभ्यः समुचितपदकपदवीपारितोषिकादीनां व्यवस्थां कुर्य्यात्। परीक्षाप्रबन्धार्थञ्चोपसमितिं च नियमयेत्।

(१७) सर्वेऽपि संस्कृतज्ञा असंस्कृतज्ञा वा संस्कृतानुरागिणः संस्कृतोन्नति-कामाश्च परिषत्सदस्येषु प्रवेष्टुमर्हन्ति। संस्कृतभाषाभ्युन्नतये परिषद उद्देश्यानां सफलतायै च प्रयत्नः सर्वेषां सदस्यानां कर्तव्यो भवेत् ॥ १ ॥

(१८) अस्याः परिषदस्त्रिविधाः सदस्याः स्युः, संरक्षकाः मानार्हसदस्याः साधारणसदस्याश्च ॥ २ ॥

(१९) एककालिकरूप्यकाणां शतत्रयादन्यूनं परिषत्साहाय्यार्थं ये दद्युः प्रत्यब्दं रूप्यकदशकादन्यूनं साहाय्यं वा दद्युः, ग्रन्थनिर्माणपारितोषिकं विशिष्ट

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा छात्रवृत्तिं परिषत्प्रार्थनया वितरेयुः, स्वद्रव्येण स्वोपदेशेन वा कञ्चित् संस्कृतविद्यालयं परिचालयेयुस्ते परिषदोऽस्याः संरक्षकपदं लभेरन् ॥३॥

(२०) परिषदो महाधिवेशनेषु ये सभापतित्वेन स्थिताः ये वा वर्षादन्यूनं कालं मन्त्रिपदं निर्व्यूढवन्तः संस्कृतसाहित्योन्नतये विशिष्टा ग्रन्था यन्निर्मिताः स्युः परिषत्कार्य्यसफलतायै च यै र्विशिष्टः प्रयत्नः कृतो भवेत्, ये वा प्रतिष्ठामधिगताः संस्कृतानुरागिणः परिषदा सहानुभूतिं प्रदर्शयेयुस्ते परिषदोऽनुमत्या मानार्हाः सदस्या निरुच्येरन् ॥४॥

(२१) ये प्रत्यब्दमेकरूप्यकादन्यूनं साहाय्यं दद्युः पञ्चविंशतेर्वा अन्यूनमेककालिकं साहाय्यं दद्युस्ते साधारणसदस्या भवेयुः ॥५॥

(२२) प्रत्यब्दं महाधिवेशनसमये सर्वविधानां सदस्यानामुपस्थितिः प्रार्थ्येत । तत्र कार्य्यकारिण्याः समितेस्तत्पदाधिकारिणाञ्च निर्वाचनम्, वार्षिकायव्ययपरीक्षणम्, भविष्यद्व्ययव्यवस्थापत्रनिर्माणम्, परिषदुद्देश्येषु यथासाधनं तत्तत्कार्याणामनुष्ठानाय कार्य्यकारिण्यै समितये समादेशश्चेति तस्यां सदसि कर्तव्यानि भवेयुः ॥६॥

(कार्य्यकारिणीसमितिः)

(२३) अस्याः समितेः सदस्या एकविंशतेरनधिका भवेयुः । तेषां निर्वाचनं महाधिवेशने परिषत्सदस्यैः क्रियेत । सप्तानां सदस्यानामुपस्थितौ समितेरस्याः कार्य्यारम्भो भवेत् । पञ्चापप्रान्तस्थविभिन्ननगरेभ्यः सदस्या यथासम्भवमत्र सङ्गृह्येरन् । लवपुरवासिनाञ्च संख्याधिका स्यात् ॥१॥

(२४) अस्या अधिवेशनं प्रतिमासमेकवारं प्रधानकार्य्यालयस्थाने भवेत् । सत्यावश्यकत्वे कालान्तरेऽपि कर्त्तुं शक्येत ! अनुपस्थितानामन्यनगरस्थानां सदस्यानां लिखितापि सम्मतिः सङ्गृह्येत । अधिकसम्मत्या च ते ते विषया निर्णीयेरन् ॥ २ ॥

(२५) इयमेव कार्य्यकारिणी समितिः परिषदः कार्य्यपरिचालने द्रव्यसङ्ग्रहे प्रधानपरिषन्मतानुरोधेन तद्वियोगेचाधिकुर्य्यात् ॥३॥

(२६) सभापतिः, उपसभापतिः, मन्त्री, उपमन्त्री, कोषाध्यक्षः, आयव्ययपरीक्षकश्चेति अस्याः पदाधिकारिणः स्युः ये यथोपयोगं स्वस्वकार्य्याणि निर्वहेयुः ॥४॥

(२७) सङ्गृहीतद्रव्यं मन्त्रिणा कोषाध्यक्षसमीपे प्रेष्येत । समितिस्वीकृतव्ययार्थञ्च पत्रं प्रदाय ततो गृह्येत । नियतद्रव्यादधिकं द्रव्यं कोषाध्यक्षेण समित्यनुमत्या क्वचित्सुरक्षिते स्थाने वृद्ध्यर्थं निधीयेत । समित्यनुमत्यैव च तन्निष्कास्येत ॥ ५ ॥

॥ इति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्यर्थना

ग्राहकान् प्रति सादरमभ्यर्थयामहे यदिदं महासंरम्भात्मकं कार्यं केवलं भवतां साहाय्यसम्भावनामाकलय्यैवोत्थापितमस्माभिः, तस्माद् भवद्भिरस्य सहायताकरणे कदापि नालस्यमाश्रयणीयम्। आलोच्यतां तावत् किमिदं नाम वार्षिकं सार्धरूपकम् १॥) इति। नहीदं बहुभाररूपं भविष्यति। अस्य द्वितीयो मयूखो (V. P.) वी० पी० पोस्टद्वारा प्रहेष्यते। येषाञ्च जिघृक्षा न भवेत् ते कृपया पूर्वमेव सूचयन्तु येन कार्यालयस्य मुधा व्ययो न स्यादिति शम्।

(सम्पादकः)

प्रमादशुद्धिः

				पृ०	प०
पठनीयम्।	...	...	...		
न्यायशा०।	...	...	...	५	१
यत्रानेक०।	...	...	...	५	१२
विदाङ्कु०।	...	...	...	८	२१
विदध०।	...	...	...	१६	५
न्यध्यगीषत।	...	...	...	१७	१४
इत्थं।	...	...	...	२६	२०
नुपपत्तेः।	...	...	...	२८	२
भिधायि०।	...	...	...	३०	९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

UDYOTAH REGISTER L. NO. 2304

वार्षिकमूल्यम् १॥)
सार्धरूपकम्

प्रतिखण्डमूल्यम् ≡)
आनकत्रयम्

उद्योतः

पञ्चनदीयसंस्कृतसाहित्यपरिषदो

मासिकं मुखपत्रम् ।

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नादराद्,
अज्ञानान्धतमोविनाशपटुता-विख्यात-विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्,
"उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥१॥

प्रथमवर्षे— १ | आषाढसङ्क्रान्त्याम् । वि० सं० १९८५ / जून सं० १९२८ | चतुर्थो मयूखः ४

सम्पादकः—
कवितार्किक (-तन्त्रचक्रवर्त्ति-) नृसिंहदेवशास्त्री दर्शनाचार्यः ।
सहकारिसम्पादकः—
विद्याभास्करपण्डितपरमेश्वरानन्दशास्त्री साहित्योपाध्यायः ।
प्रकाशकः—
परिषन्मन्त्री पं० जगदीशशास्त्री व्याकरणतीर्थः

(उद्योत कार्यालय जौडेमोरी लाहौर)
" Udyot " Office Jaure Mori Lahore.

श्रीकृष्णदीक्षितप्रबन्धेन "बाम्बे मैशीन प्रेस मोहनलाल रोड लाहौर"
इत्याख्ये स्थाने मुद्रितः । पं० जगदीशशास्त्रिणा च उद्योत-
कार्यालयात् "जौडेमोरी लाहौर" इत्यतः प्रकाशितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतस्य कतिचन नियमाः

१—अस्य मासिकपत्रस्य अग्रिमं वार्षिकं देयम् (भारते, ब्रह्मदेशे सिंहले च)—१॥)सार्धरूपकम् ।

२—प्रेषणव्ययो ग्राहकैर्न देयः ।

३—प्रबन्धादिकं समालोचनार्थं ग्रन्थादिकञ्च सम्पादकसमीपे, मूल्यादिकं च प्रकाशकसमीपे निर्दिष्टस्थाने प्रेषणीयम् ।

४—विज्ञापनपत्रादिमुद्रापणव्यवहारविषयोऽपि कार्यालये प्रकाशकसमीपाद्विवेचनीयः ।

५—पत्रं प्रतिसङ्क्रान्ति प्रकाश्येत । येन खलु ग्राहकेण यथाकालं सङ्ख्या नाधिगम्येत तेन तन्मासस्य तृतीयसप्ताहाभ्यन्तर एव कार्यालयाद्विवेच्यम्, नातः परं कस्याप्यभियोगः श्रूयेत, किन्तु तेन प्रथमं स्वपोष्टस्थानं परिशोध्यैव प्रष्टव्यम् । विवेकार्थं ग्राहकसङ्ख्या चावश्यं लेख्या ।

६—ग्राहकैः स्वस्थानादिकं स्पष्टमेव लेख्यम्।

७—एतस्य ग्राहका अपि साधारणसभ्येषु गण्येरन् ।

८—प्रेषितलेखाः प्रायो यथाक्रमं मुद्राप्येरन् । लेखकैर्न्यूनातिन्यूनं पक्षात्पूर्वमेव लेखाः प्रहीयेरन् । राजविरुद्धान्दोलनलेखाश्च न गृह्येरन् ।

विषयसूची

(प्रबन्धानां गुणदोषयोः प्रबन्धलेखका एव प्रतिभुवः)

विषयः	पत्राङ्कः
१—भगवच्चिन्तनम्	१
२—अमृतसरीयपण्डितमण्डलस्य तृतीयवार्षिकोत्सववृत्तान्तः ...	२—१२
३—अभिनन्दनपत्रम्	५—
४—सभापतेरभिभाषणम्	६—
५—द्वितीयदिवसाधिवेशनम्	९—१
६—निबन्धा हीरालालशास्त्री	११
७—श्रीपञ्चनदीयसंस्कृतसाहित्यपरिषदः प्रथमवार्षिकाधिवेशनम् ...	१२—१
८—अहो ! काशीस्थपण्डितानां दुरभिनिवेशः—ले०—सम्पादकः ...	१७—२
९—सम्पादकीयटिप्पणयः	२३—२
१०—अस्थानभ्रमस्य दूरीकरणम्—ले०—हंसराजः	२५—२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ ज्ञानस्य शक्तिः
पुस्तक सं० संस्कृत उद्यो०
आगत सं० १(२)
तिथि०
गुरुकुल ग्रन्थालय काँगडी.

उद्योतः

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नाराद् अज्ञानान्धतमोविनाशपटुता-विख्यात-विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन् "उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥

प्रथमवर्षे- १ | आषाढसङ्क्रान्त्याम् । वि० सं० १९८५ जून सं० १९२८ | चतुर्थो मयूखः ४

भगवच्चिन्तनम्

अपां वनानां[1] चरतान्तरूणां धराधराणाममृतः स्वधीर्यः ।
राजेव गर्भो यमने समर्थः स एव पूज्यः परमः पिता नः ॥ १ ॥

अङ्गे यस्य[2] त्रयस्त्रिंशद्देवा गात्राणि भेजिरे ।
तान्देवांस्तश्च देवेशं केऽपि ब्रह्मविदो विदुः ॥ २ ॥

पूर्णादुत्पद्यते[3] पूर्णं पूर्णं पूर्णेन सिच्यते ।

१—"गर्भो यो अपां गर्भो वनानां"—(ऋ० १ । ७० । २)
१—"यस्य त्रयस्त्रिंशद्देवा"—(अथर्व० १० । ७ । २७)
३—"पूर्णात् पूर्णमुदचति"—(अथर्व० १० । ८ । २९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतः ।

तमेव पूर्णज्ञानीथ यस्मात्पूर्णमिदञ्जगत् ॥ ३ ॥

सप्तभिर्विभक्तिभिः श्रीशम्भुस्तवः ॥

श्रीशम्भुः परमः सदैव तनुताच्छैवं महो मेऽतुलं
श्रीशम्भुं वटुवेषधारिणमहं नित्यं श्रये निर्मलम् ।
देवाश्चापि पुरन्दरप्रभृतयः श्रीशम्भुना रक्षिताः
भक्तानुग्रहकारिणे च महते श्रीशम्भवे मे नमः ॥ १ ॥
श्रीशम्भोः सकलं जगत्समुदितं स्थास्न्वादिकं यद्भुवि
श्रीशम्भोरियमस्त्यपारमहिमा लीलाजगन्निर्मितिः ।
श्रीशम्भौ लयमेति सर्वमखिलां मायां स्वयं शासति
श्रीशम्भो ! मम दुःखमत्रनिखिलं दूरीक्रिया नित्यशः ॥ २ ॥

अमृतसरीयपण्डितमण्डलस्य तृतीयवार्षिकोत्सववृत्तान्तः ।

वि० सं० १९८५—सौरज्येष्ठमासस्य एकादश्यां द्वादश्याञ्च तारकायां बुधे गुरौ च वासरे एतदनुसारं मईमासस्य २३श्यां २४श्याञ्च तारकायां दिनद्वयं यावन्मध्याह्नोत्तरं चतुर्नदनादारभ्य सप्तवादनावधि उद्योतसम्पादकानां श्रीपूज्य-पण्डितवर्यकवितार्किक-दर्शनाचार्य-नृसिंहदेवशास्त्रिणां साभापत्ये अमृतसरीय-पण्डितमण्डलस्य तृतीयो वार्षिकोत्सवो दुर्गार्यनसरोवरतटे[1] महता समारोहेण समजायत । अनेकेषां पण्डितानामनेकेषां छात्राणामितरेषाञ्च संस्कृतानुरागिणां धर्मबुद्ध्यापि संस्कृतशब्दश्रवणाय उपस्थितानाञ्जनानां समवायेन सर्वं मण्डप-स्थानं महदेव सङ्कुलं सदपूर्वां कामपि शोभां प्रकटयाम्बभूव[2] । तत्रैष कार्यक्रमः-प्रधानाज्ञया पूर्वं गीतिपाठादिव्यवहारे कृते तदनु स्वागतकारिण्याः सभायाः सभापतिपदं भूषयतां पण्डित-प्रकाण्डानां श्रीधरमायाधारिशास्त्रिणां वक्तृताऽभूत् । तथाहि—

"यां मेधां देवगणाः पितरश्चोपासते,तया मामद्य मेधयाऽग्ने मेधाविनं कुरु"

नोपासिता मदमपास्य मया महान्तो, देवार्चनं न विधिवद्विहितं कदाचित् ।
तीर्थानि चास्तिकधिया नच सेवितानि तस्मात्त्वमेव शरणं मम शङ्खपाणे !॥

अयि ! विबुधभारतीविलासासादिताहृदयानन्दाः ! सललविद्याविनोद-

---

१ "दुर्ग्याणा" इति प्रसिद्धं नाम । २—हर्षसूचनायैवम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैशद्यसम्पाद्यमानाविरलगद्यपद्यावालीविरचनचटुलचातुर्यचञ्चरीकाः? पारिषद्याः पण्डितवर्याश्च !

विद्यमानेष्वपि पण्डितप्रकाण्डेषु यदत्राऽनधिकारिणमपि मां निर्विचितवन्तः स्वागतकारिणीसदस्या, उपयुक्तन्तु–इदमेवावर्तिष्ट यदपर एव कश्चिद्विपश्चिद् भारमिमं निरवहत्, परन्तथापि महतामादेशोऽनतिक्रमणीय इति कृत्वा सेवकत्वेन सेवाभारमिममुद्वोढुं समुद्युक्तोऽस्मि ।

मान्याः ? इदं हि पण्डितमण्डलस्य तृतीयं वार्षिकाधिवेशनमितः पूर्वमधिवेशनद्वयमजनिष्ट, तत्र प्रथमाधिवेशने पं० हरिदत्तशर्माणो व्याकरणतीर्थाः प्रधानपदमलमकुर्वन् परस्मिंश्च स्वर्गवासिनः पण्डितप्रकाण्डाः पण्डितसर्वदयालुशर्माणः ।

महानुभावाः ! नाविदितमिदं श्रीचरणानां यदद्यत्वे संस्कृतज्ञानां कीदृशी दशा, नाद्यत्वे विद्वत्प्रियः गुणग्राही भोजनृपः, नापि च तादृशाः श्रेष्ठिनः, येहि विदुषस्समुत्साहयेयुः, तमेतमभावं तामेतान्न्यूनताञ्चापनेतुं मण्डलस्यास्य स्थापनं समभूत्, विगतसंस्कृतप्रचारेऽप्यमुष्मिन् समये "सङ्घे शक्तिः कलौ युगे" इति नयेन सङ्घीभूताः विद्वांसः सर्वं कर्तुमीशते, गताब्दे मध्ये मध्ये पाक्षिकं मासिकं वा कदापि कदापि मण्डलस्यास्याधिवेशनं समजायत, तत्र च विदुषामुपस्थितिर्न सन्तोषप्रदाऽवर्तत, मन्ये इतः परं स्वकर्तव्यं जानन्तः पण्डिताः संस्कृतानुरागिणश्च मण्डलस्योन्नत्यै उदेश्यपूर्त्यै च बद्धपरिकराः वर्तिष्यन्ते ।

श्रीचरणाः नेदं विस्मर्त्तव्यम, यन् मण्डलमिदं विदुषां कृतेऽलौकिकं बलम, न तत् किमपि कर्त्तव्यं यद्धि नानेन सेत्स्यति । किं बहुना विचार्यतान्तावत् विश्वविद्यालयाध्यक्षैः कीदृशी व्यवहृतिः परीक्षाविषये विधीयते याचोचिता न भाति । पण्डितानां वाचस्तथा न श्रूयन्ते यथा च ताः श्रोतव्याः । कस्यामपि पाठशालायामधीयानोऽत्रैव स्याच्चेत् तत एव शुल्कादिकं गृहीत्वा परीक्षामुत्तरति । परं प्रमाणपत्रे दूरे आस्तामध्यापकस्य नाम अपितु पाठशालानामापि न निर्दिश्यते अथ च किमपि पत्रमत्यावश्यकमपि किं न प्रेषितं भवेत् विश्वविद्यालये न तदुत्तरं प्रदीयते विश्वविद्यालयाध्यक्षैः, सतीषु अपि भूयसीषु संस्कृतपाठशालासु न तत्र विश्वविद्यालये तदध्यक्षैः हिन्दीलेखकः कश्चित् संस्कृतपाठशालासुकरतायै रक्ष्यते, संस्कृतपरीक्ष्यपुस्तकनिर्वाचकसंसदि (बोर्ड) प्राय एम० ए० उपाधिधारिण एव रक्षिता भवन्ति, बहुधा ते यस्य कस्यापि अनुरोधेन पुस्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्योपयोगितामनुपयोगितामविविच्यैव यस्यां कस्यामपि परीक्षायां अनुपयोगि-अपि तत् पुस्तकं नियुक्तं विदधति । सत्यमियमेवावस्थापरीक्षकनिर्वाचनस्य । कियदाश्चर्यं येन स्वप्नेऽपि न तत् पुस्तकं व्यलोकि असौ हि तत् पुस्तकं कथं परीक्षेत । किं बहुनाऽस्मिन् वत्सरे एव तादृशानि पत्राणि बहूनि सन्ति एवेति नाविदितं विदुषाम्, इत्येताः अन्या अपि त्रुटीरपनेतुं मण्डलमेव प्रभवति इतिदृढः प्रत्ययः ।

किञ्च योहि ज्योतिः शास्त्रकर्मकाण्डादीनां प्रायोऽभाव एव दृष्टिपथमवतरति, तमपनीय ज्योतिःशास्त्रकर्मकाण्डादीनाम्प्रचारमपि भवतां मण्डलमेव सम्पादयिष्यति ।

समयस्याल्पत्वात्—स्थालीपुलाकन्यायेन सर्वमन्यत् ज्ञास्यन्ति स्वयं विद्वांस इति च मत्वा नात्र विषये विस्तरो विधीयते ।

अस्मिंश्च पण्डितमण्डलस्य तृतीयवार्षिकाधिवेशने मण्डलीयस्वागतकारिणीसभासदां विशेषाऽभ्यर्थनया श्रीमन्तोऽमितमतिमन्तः कवितार्किकाः श्रीपं०नृसिंहदेवशास्त्रिणो दर्शनाचार्याः प्राच्यविद्यालयदर्शनाध्यापकाः सभापतेरासनस्वीकृत्या भृशमन्वगृह्णन्, आशासे च सभापतिमहोदयाः तान् तान् अभिनवान् मार्गान् उपदेक्ष्यन्ति येषु चलन्मण्डलीमदमुन्नतिशिखरं समारोक्ष्यति । अन्तेचेयं सविनयमन्यर्थना-यद्गच्छतः स्खलनमिति दिशा स्खलितं क्षमिष्यन्ते सहृदयाः । सज्जनाः ! सम्प्रति श्रीचरणाः सभापतिमहोदयाः सभापतेरासनमलङ्कृत्य यथाक्रमं कार्यनिर्वहणेनान्ते च निजोपदेशामृतेन पावयन्तु, आप्याययन्तु चास्मानित्यभ्यर्थ्यते—

एवं स्वागतकारिण्याः सभापतिमहोदयस्य वक्तृतायां समाप्तायां कौलवामाचार्यवर्यश्रीहरिदत्तशर्मशास्त्रिभिरनुमोदने कृते समागतजनसङ्घक्रियमाणसहर्षतालिकाध्वनिपुरःसरं दर्शनाचार्यैः सभापतिपदे सम्भूषिते, मन्त्रिणा च पुरतः स्थापिते कार्यक्रमे सभापतिमहोदया महत्या योग्यतया कार्यं निरवहन् । तत्र प्रथमं निम्नलिखिताः प्रस्तावाः सम्भूताः ।

१मः प्रस्तावः—अमृतसराभिधानायां नगर्यां सुप्रसिद्धानां विदुषां पण्डितमण्डलस्य भूतपूर्वाणां सभापतीनां श्रीपण्डितसर्वदयालुनाम्नां मृत्युविषये पण्डितमण्डलमिदं हार्दिकं शोकं प्रकटयति, तेषां परिवारेण च सह महतीं सहानुभूतिं प्रदर्शयति, भगवान् पण्डितानामात्मानं सुखयेत् तेषां परिवारे चोत्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोत्तरं कुशलमेव वर्धयेदित्याशास्महे । प्रस्तोतारः सभापतिमहोदया एव । अनुमोदकाः समर्थकाश्च मायाधारिशास्त्रिणः । सर्वसम्मत्या पाशीभूतोऽयं प्रस्तावः ।

२यः प्रस्तावः—इहत्यं पण्डितमण्डलं पञ्चापयूनिवर्सिटीपरिषदं सानुरोधमभ्यर्थयते यच्छकुन्तलाप्रभृतिनाटकग्रन्थानामध्ययनाध्यापनेन च कन्यानामन्तःकरणे दुष्प्रभावो जायते, पाठकाश्च पाठनकाले सङ्कोचेन पाठयन्त आञ्जस्येन ग्रन्थमर्मप्रकाशने नैव समर्था भवन्ति, अतः प्राज्ञादिपरीक्षासु नाटकस्थाने कुमारीणां कृते किमपि वैकल्पिकं पत्रं स्थापनीयं येनेदं दूषणं समुत्सारितं भवेत् । प्रस्तोतारः नृसिंहदत्तशास्त्रिणः—अनुमोदयितारः—श्रीसीतारामशास्त्रिणः । समर्थकाः—मुन्शीरामशास्त्रिणः सर्वसम्मत्या चायमपि प्रस्तावः पाशीभूतः ।

३यः प्रस्तावः—

पञ्चापयूनिवर्सिटीपरिषदा नियतीकृतेषु पुस्तकेषु सरलकथातरङ्गिणीपुस्तकं महदशुद्धं वर्त्तते पाठ्यपुस्तकत्वादस्य पं० यू० परिषदोऽदूरदर्शिता भाति,या च नोचिता,दुःखयति च सहृदयान्, अत इदं मण्डलं सविनयं बलपूर्वकं रजिष्ट्रारमहोदयमनुरोधयति । यदेवंविधानां पुस्तकानां बहिष्कारमापाद्य तत्स्थाने समीचीनानां पुस्तकानां निवेशनमवश्यकर्त्तव्यं येन छात्राणां हृदि शास्त्रविरुद्धाः कुसंस्कारा नोत्पद्येरन् ।

प्रस्तावकः—दौलतराम शास्त्री (मन्त्री) पण्डितमण्डलस्य

समर्थकः—पं० मायाधारी शास्त्री ।

अनुमोदकः—पं० नृसिंहदत्तशास्त्री । (गभर्णमेण्ठसकूलस्य मुख्याध्यापकः)

सर्वसम्मत्या पाशतां प्राप्ते तृतीयेऽपि प्रस्तावे पण्डितमण्डलस्य सभापतिकार्यं निर्वहन्तः श्रीमायाधारिशास्त्रिणोऽभिनन्दनपत्रमपाठिषुः—

श्रीः

अभिनन्दनपत्रम्

अयि ! असीमशेमुषीमुषितदोषव्रातसमासादितसन्मार्गैकव्रताः ! अभिनवबालहितकृदागमरहस्यप्रकाशननिरताः ! अहर्निशं समस्तशास्त्रार्थविभावनपरिभूतभानुपादाः ! श्रीपादाः ! कवितार्किकाः ! दर्शनाचार्याः ! सभापतिमहोदयाः ! श्रीनृसिंहदेवशास्त्रिणः ! श्रीचरणानां विश्वविदिता योग्यता कस्य हि विचार-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जुषोविदुषो नास्ति विदिता, न्यायमुक्तावलीसदृशे नितान्तं कठिने ग्रन्थे प्रभाभिधां सरलां टीकां तदुपरि च सौभाग्यवतीनाम्नीं विवृतिञ्च विरच्य न केवलं विद्यार्थिन एवोपाकुर्वन् श्रीलाः अपितु संस्कृतविद्वांसोऽपि । प्रस्तावचन्द्रिकां श्रीमत्प्रणीतां वीक्ष्य परीक्षार्थिनां प्रस्तावविभीषिका खपुष्पायते, किं बहुना काव्यादर्शटीका शिवराजविजयपताका—ऋग्वेदोपोद्घातविवृतिः,इत्यादिभिर्ग्रन्थैः संस्कृतसमाजो सातिशयमुपकृतः । उद्योताभिधं मासिकसंस्कृतपत्रं सम्पाद्य श्रीचरणैः कियानुन्नमितः पञ्चापप्रान्तीयसंस्कृतविद्वद्वर्गः—

अद्वितीयाः संस्कृतसाहित्यानुरागिणः श्रीमन्त इति श्रीमतां संस्कृत-साहित्यसेवां श्रीमत्प्रणीतग्रन्थान् दर्शं दर्शं को न जानीते । पण्डितमण्डलस्याभ्य-र्थनया सभापतिपदं स्वीकुर्वद्भिः श्रीमद्भिः चिरमनुगृहीतं मण्डलमिदम् । अतो मण्डलमिदं हार्दिकान् धन्यवादान् विदधाति ।

वशंवदस्य अमृतसरीयपण्डितमण्डलस्य

❀सभापतेरभिभाषणम् ।

अयि ! सारस्वतोद्यानवाटिकासुमनायमानाः ! मानाऽमानविवेकधुरावह-नक्षमाः ! विपश्चिदपश्चिमाः ! शास्त्रिवर्याः ! पण्डितवर्याः ! दयनीयाः ! प्रियाः ! छात्राः ! अन्ये संस्कृतानुरागिणश्च ।

महानुभावाः ! अत्राऽन्यत्र वा पञ्चापप्रदेशे सन्त्यनेके विद्वांसः सभापति-कृत्यनिर्वहणक्षमा मत्तोऽपि विशेषविज्ञाः, तथापि श्रीमद्भिर्निहितं मच्छिरसि कार्यभारं "निजं कर्त्तव्यमेव" इति मत्वाऽहं तद्वोढुं प्रवर्त्ते ।

विलक्षण एवाऽयं कलिः कालः समुपागतः, यत्र संस्कृताध्येतॄणां न तादृश आदरः, न च प्रशस्तकृत्येषु गणना, नापि च कश्चन जीवनक्षमः क्वाचित्क उप-योगो यथा पूर्वस्मिन् काले सर्वमिदमाञ्जस्येन विशेषतो भारते वर्षे प्रावर्त्तिष्ट । यद्यप्यस्माकं ब्राह्मणानामिवेतरेषामपि कदाचित् संस्कृतभाषाध्ययनं तद्द्वारा आहारविहारव्यवहारसाधनकृत्यमासीत्, परन्तु—

गीर्वाणवाण्णाः संरक्षणपूर्वकं देशजात्याद्युद्धारभारोऽग्रणीत्वाद्यज्ञेष्वग्रा-

---

* सम्भाषणमिदं धाराप्रवाहमेकघण्टापर्यन्तमभूद्वाचनिकमेव, इदन्तु प्रायः शब्दतोऽर्थश्च साररूपतया गृहीतम् । (मन्त्री पण्डितमण्डलस्य)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विव विधात्रा निहितो ब्राह्मणनां शिरःस्वेव व्यराजत् । परमद्यत्वे ब्राह्मणतावैमुख्यकारणाद्वा युगप्रभावात्सर्वासु वर्णाश्रमधर्मादिशक्तीषूपक्षीयमाणासु स्वं स्वं ह्रासमालोक्य तास्ता जातयः कालोपयोगिनं सङ्घटनं विधाय स्वकीयानां बाधानां समूलोन्मूलनाय "सङ्घे शक्तिः कलौ युगे" इत्यभियुक्तोक्तिमनुरुध्य यतस्ततः सप्रयत्नाः सिद्धफलाश्च दरीदृश्यन्ते । किमधिकं वक्तव्यम्–मेघानां मेधानां धीवराणामधीवराणां दिवाकीर्त्तीनां रजकानामन्त्यजानामन्तेवसायिनामपि च सङ्घटनं सम्पन्नम्, केवलं वयमेवैके तादृशा निरुत्साहा जानन्तोऽपि नैजं दुःखं यतस्ततस्तिरस्कारं सुरभारत्या ह्रासञ्च, घोरामेव निद्रां देवीं भजामहे, न च जागरणश्रियं श्रयामहे । इत्थं परस्परं कलहायमानाश्च न केवलं देशोन्नतिमार्गे कण्टकायमाना भवामः प्रत्युत स्वीयैहिकामुष्मिकसुखादप्यात्मानं प्रतार्यैव तिष्ठामहे, परैश्च परिभूयामहे । तस्मादस्माभिरपि सारस्वतसमाजसंरक्षणाय परभाषाभाषिकृतपराभवनिवर्हणाय चावश्यं सर्वतः प्रथममेव सङ्घटनं कर्त्तव्यमासीत् । आस्तां तावदनया चिन्तया "गतं न शोचामि" इति "दिवाभ्रान्तोऽपि रात्रौ चेद् गृहमित्वासुखी भवेत्" इति चाभाणकं पर्यालोचयन्तः सम्प्रत्यपि पारस्परिकद्वेषानलसमुद्भूतमुष्णिमानं परित्यज्य प्रेमामृतसरोवरे निमज्जन्तः सङ्घटनकर्मणि निरता भविष्यामश्चेत्तर्ह्यवश्यमेवास्माकं गतमपि सारस्वतं महः सहैवोजोबलसमृद्धिभिरेधमानं न केवलमस्मद्धितायैव भविष्यति किन्तु हीनां दीनां दशां गतस्य "सौवर्णी चटिकेयम्" इत्यस्मद्धस्तगतैव तिष्ठेदिति सकलाऽन्यदेशदृष्टिनिविष्टस्यास्य भारतस्याभिजनस्य पुनरभ्युद्धाराय महते च श्रेयसे कल्पयिष्यते । अपि नाम कार्यकालस्खलितिरियंदोषभूतापि सम्प्रति भूषणभूतैव जातेति मन्तव्यम् । यथा तत्र २ नगर्यां पूर्वेषां पूर्वेषां प्रासादानां निर्माणे जायमाने नानाविधकलाकौशले च समुद्भूते अन्तिमस्य प्रासादस्य रचना सर्वापेक्षयाऽलौकिकी सुदृढा सर्वमनोमोहिनी भवतीति सर्वेषां दृष्टचरं न बहूपपादनार्हं, तद्वत्कालातीतमपीदमास्माकीनं सङ्घटनं बहुगुणदोषविवेचनादर्शप्राप्तिहेतोः सर्वेषामग्रसरतां यास्यतीति दृढा नः प्रत्याशा । किन्त्वत्र–पण्डितमण्डलस्य मनोयोगदानमात्रमेवापेक्ष्यते । को न जानाति, सुप्ते कण्टकविद्धे वा सिंहे शृगाला प्रभवन्ति चेत् प्रभवन्तु नाम, परं निद्रां विहाय अदम्भजम्भजृम्भापरायणे कस्यास्ति सामर्थ्यं यस्तदीयस्वातन्त्र्यभङ्गाय मनसाऽपि

२—आशयं प्रकाशयामः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिन्तयेत् अत इदमत्यावश्यकं यत् सर्वमन्यद्विहाय वयं तत्र २ संस्कृतसमाज-सङ्घटनं विदधीमहि, पञ्चनदीयसंस्कृतसाहित्यपरिषदा सर्वेषां नागराणां संस्कृतमण्डलानाञ्च सहयोगञ्चनयेमहि इत्येकमस्माकं कर्त्तव्यम् ।

२—यश्च संस्कृतसाहित्यसंरक्षणम्—अस्माकं संस्कृतसाहित्यमतिविपुलं प्राचीनं नवीनञ्चास्ति, तत्र लुप्तप्रायमप्यस्ति, विद्यमानस्योपलभ्यमानस्य च कालोपयोगिरीतिमाश्रित्याध्ययनाध्यापनं पाठ्यप्रणाल्याश्च सुगमीकरणेन तदीयकालोपयोगितासम्पादनेन च भवितुमर्हतीत्यवश्यं तत्र यत्न आस्थेयः ।

३—तृतीयं च कर्त्तव्यं प्राचीनकाले अविद्यमानानां टैलीफूनादिपदार्थानां सम्प्रति निरन्तरप्रचारभाजामभिनवकोषरचनं येनास्मत्साहित्यं परसाहित्यापेक्षया यस्मिन् कस्मिन्नप्यंशे व्यवहारसौकर्याय सङ्कीर्णभावं भजमानं नालोक्येत, स्तूयमाने प्रचार्य्ययाणेऽस्मिन् परैश्च सभ्रकुटिभङ्गमवद्यदृशा न निरीक्ष्येत ।

४—पाठशालानां च समानरूपतया पाठ्यप्रणालीचालनपूर्वकं परस्परं सम्बन्धीकरणम्—पञ्चापप्रदेशे यावत्यः पाठशालाः सन्ति तासु सर्वासु यथाधिकारं समानैव पाठ्यग्रन्थानामध्ययनं चाल्येत, सर्वाश्च ताः पाठशाला स्वाऽनुरूपमुत्तरोत्तरं सम्बद्धा एव सम्भवेयुः यथा स्कूलानां लघुविद्यालयैः सम्बन्धः तेषाञ्च महाविद्यालयैरित्येवं कृते ऐकमत्यमप्यस्माकं प्रकाशितं भविष्यति येन यूनीवर्सिटीपरिषद उपेक्षयोपस्थिताः संस्कृतोन्नतौ बाधा द्रागेव दूरीकर्त्तुं शक्येरन्—इति चतुर्थं पण्डितसमाजस्य कर्त्तव्यम् ।

५—प्रचलितायाः पाठ्यप्रणाल्याः तादृशत्रुटिनिबर्हणम्—यत्सत्यमधीवेदवेदाङ्गा अपि वयं परैः "बुद्धू" पदेनाभिधीयेमहीति भूगोलादीनमपि स्थिररीत्या परिचयकरणम्—इत्थं कृते सति साम्प्रतिकविषयाधिगमे जायमाने भाषाभेदे सत्यपि न परकृतपराभवस्य विषयतां यास्याम इति पञ्चमं पण्डितसमाजस्य कर्त्तव्यम् ।

प्रियश्रोतृमहाभागाः ! सम्प्रति अत्यन्तं कालातिपातो जातो घर्मसमयश्चायं रसशोषहेतोः खेदावहो ग्लानानीव च लक्ष्यन्ते करणानीत्यालोच्याऽन्या अपि द्वित्रा वार्त्ता अवश्यकरणीयाः सन्ति वक्तव्यास्तथापि "सर्वे संस्कृतानुरागिण उद्योतस्य पत्रस्य स्थिरतासम्पादनाय बद्धपरिकराः सम्भवन्तु, इदं भवतां सम्मेलनस्य जीवनं नामेत्याकलयन्तु । अत एतस्य रक्षणाय न्यूनान्न्यूनं षट्सहस्रमितं कोषं सपद्येव सम्पादयन्तु" चेत्युक्त्वा विरमाम्यनल्पजल्पनादित्योम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२यदिवसकृत्यम्—

यथा पूर्वस्मिन्दिवसे संस्कृतभाषाया उन्नयनमहिम्ना स्वात्मगौरवं मन्यमानं हर्षोत्फुल्लनयनारविन्दं पण्डितमण्डलं सभामण्डलमपूपुरत् तथैव द्वितीयदिवसाधिवेशनसमयेऽपि सभामण्डपं सच्छात्रगणेन पण्डितमण्डलेन सुरभारतीप्रियजनसमवेतेन पूरितमभूत् ।

आदौ सभापतिमहोदयानामाज्ञया गायनमार्त्तण्डो बुद्धिचन्द्रशर्मा मृदङ्ग-हारमोनियमवाद्याभ्यां सहैव साम गातुं प्रारभत, यदाकर्णनेन सर्वाऽपि सभा परमानन्दपारावारनिमग्नेव भित्तिलिखितचित्रमिव च व्यराजत । तदनन्तरं केचन बटवो मधुरेण स्वरेण जयदेवकवेर्गीतिमगासिषुः । ततः केचन प्रस्तावाः सम्प्रवृत्ताः । तथाहि—

(१) मुक्तावल्याः सर्व एव प्रश्नाः कठिनम्प्रकारमनुसृत्य परीक्षकेन दत्ताः, येन-सर्वसाधारणयोग्यतास्थितिरीत्या छात्रा उत्तरीतुं समर्था न भवितुमर्हन्ति । तस्माद् वयं पञ्चनदीयविश्वविद्यालयपरिषदं साग्रहमभ्यर्थयामहे यत्तया परीक्ष-कस्तथाज्ञापनीयो यथासावुत्तरनिरीक्षणकाले कोमलया दृष्ट्या निरीक्षेत ।

प्र० पं० मायाधारी शास्त्री
अनुमोदकः—पं० ऋषिनन्दनशास्त्री
समर्थकः—पं० सीतारामशास्त्री

(२) इयं पण्डितसभा रजिस्ट्रारमहोदयवृत्तिमित आकृष्य निवेदयति, यद् यथास्मिन्संवत्सरे मैट्रिकपरीक्षायाः संस्कृतप्रथमपत्रसम्पादकेन स्वयमेव नवनवाः परिभाषा विरचिताः-अथ चासम्भवप्रश्नान् पृच्छता विद्यार्थिनः सन्देहदोलामारो-पिताः, तथा भविष्यति कोपि नैवङ्कर्तुम्पारयेदिति ।

प्रस्तावकः पं० नृसिंहदत्तशास्त्री
अनुमोदकः पं० हीरालालशास्त्री
समर्थकः पं० दौलतरामशास्त्री

(३) (क) प्राज्ञपरीक्षायाः पञ्चमपत्रे (व्याकरणपत्रे) परीक्षकेण प्रथमः प्रश्नः, यस्याष्टावङ्काः सन्ति, मध्यकौमुदीमनालोक्यैव प्रदत्तो यद् द्विविधेऽपि मध्यकौ-मुदीपुस्तके सवर्णसंज्ञाऽपवादसूत्रन्नैव वर्तते, तस्मात्परीक्षकस्तस्य प्रश्नस्याङ्कान् प्रश्नान्तराङ्केषु योजयितुम्प्रेरणीय इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ख) एतत्पत्रविषये द्वितीयन्निवेदनन्त्वेतद् यत् परीक्षकेण "नोट" इति लिखित्वा सर्वेषां रूपाणां प्रश्नमध्ये साकल्येन सिद्धिप्रदर्शन एवाङ्कलाभदानम् प्रतिज्ञातम्, तच्च छात्राणाङ्कृते महदनर्थरूपञ्जातम्, यतः प्रश्नांशोत्तरणेऽपि अङ्कांशलाभनियमोऽस्ति, तस्माद्युक्तकार्यानुष्ठानायासौ महाशयो बोधनीय इति।

प्रस्तावकः पं० सीतारामशास्त्री ।
अनुमोदकः पं० लोकमणिशास्त्री ।
समर्थकः पं० हरिरामशास्त्री ।

अथ दिल्लीस्थानात् शास्त्रिपरीक्षां दातुमायाता अनन्तरामशर्मणां पुत्री "सरला" देवी सयुक्ति सप्रमाणं स्त्रीशिक्षाविषयं तथा व्याकरोत् यथा च तत्रत्यैः श्रोतृभिः सम्यङ् निश्चितं यत्प्राचामेव स्त्रीशिक्षापद्धतिर्देशमङ्गलाय सम्यगासीत्। साम्प्रतिकी पाश्चात्यदेशानुसारिणी परिपाटी तु नास्मद्देशहिताय भवितुमर्हति, नैवाऽनया पातिव्रत्यधर्मरक्षापि स्यात्, न च यद् यत्परदेशीयैः स्वं स्वं हितमाकलयद्भिः प्रचालितं स्यात् तत्सर्वेषामेव श्रेयसे भवतीति कश्चन नियमः, न हि कफवातप्रकृतीनां कृते क्युनायनं हितमिति पित्तप्रकृतीनामप्याञ्जस्येन तथैव भवेदिति। शिक्षा यथा पुरुषं साधीयांसं करोति स्त्रियमपि तथैव पवित्रभावां जनयति, केवलं प्रकारभेद एव निरीक्षणीयो भवति। सम्प्रति महानयं शोको यद् यासां ब्राह्मणपत्नीनां चरणारविन्दं स्पृष्ट्वा महिष्योऽप्यात्मसौभाग्यं मेनिरे ता एव ब्राह्मण्यः सच्छिक्षाप्रबन्धाभावादेकैकस्य हन्तकारस्य कृते इतस्ततो वीथीषु परिभ्रमन्तीति निरीक्ष्य कस्य वस्तुतत्त्वविवेचकस्य विपश्चितो हृदयं न दुनोति, तस्मादवश्यं पितृगणेन सुविचार्य वयमबला अपि समुचितं शिक्षणीया इत्यादि व्याख्यानं श्रुत्वा सर्वापि जनताऽत्यन्तं चकिता सती अस्याः सत्याः सहर्षं साधुवादं प्राकाशयत्। इत उत्तरं—सभापतेराज्ञया वामकौलवेदादिशास्त्रप्रवर्त्तकाचार्य—सर्वतन्त्रस्वतन्त्र—वेदकर्त्ता[1] व्याकरणनिष्णातो व्याकरणतीर्थो विद्यावारिधिः श्रीमान् पं० हरिदत्तशर्मा त्रिवेदी "संस्कृतसंरक्षणपूर्वकं स्वात्मनिर्भरताप्रमोदः" इत्यमुं विषयं व्याख्यातुं समुत्थितः। व्याख्यानात्पूर्वं वामाचार्यैरपि समृदङ्गसहारमोनियमवादनं वेदमन्त्रगानं कृतम्। ततः आशुकवित्वात् पूर्वं पद्यैरेवोप-

१—कश्चिन्नवीन एव वेदो रचितो भवेद्वामाचार्यैर्योऽस्माभिरद्यापि न दृष्टः, मन्ये स पौरुषेय एव स्यात्, अपौरुषेयो वेदस्तु अन्य एवेति विश्वेषां वैदिकानां सम्मतं मतम्। (सम्पा०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रान्तम्, अथ च त्रिंशत्कलाभितं गद्येन स्वविषयव्याकरणं सम्यङ्निर्वाहितम् । कालातिपातादन्येषां केषाञ्चिद्विदुषां व्याख्यानानि नाभूवन् इति चेतसि खेद एवासीत्, किन्तु सरलादेव्या व्याख्यानात्पूर्वं हीरालालाशास्त्रिणामधो लिखितो निबन्धपाठ एवावकाशमलभत । अथ सभापतिधन्यवादपूर्वकं सभाविसर्जनमभूत् ।

पण्डितमण्डलस्य मन्त्री—

ता० २६—५—२८ दौलतरामशास्त्री

(निबन्धा हीरालालशास्त्री)

अयि । श्रीमन्तो महान्तो सभापतिमहोदया अथ च विद्वांसो महाशयाः ! पण्डितवर्याः ! सम्प्रति किञ्चिन्निवेद्यते पुरतो भवतां यद् ये ये संस्कृतज्ञाः छात्रा प्राज्ञविशारदशास्त्रिपरीक्षासमुद्रात्तीर्णा अनुतीर्णा वा स्वजीवननिर्वाहाय यतस्ततो यतमाना अपि यत्र कुत्रापि भ्रमन्तः विंशत्यादिसङ्ख्याकाभी रजतमुद्राभिर्विक्रीतदेहा अकर्मण्यभावमाश्रित्य भ्रमन्तोऽपि नाश्रयं सन्तोषामृतं लभन्ते । तेषां स्वभ्रातॄणामेतादृशीं दुरवस्थामौदासीन्यमर्थहीनतां दीनतामालोक्यापि वयमत्र धरातले पाण्डित्याभिमानिनः अध्यापकाः वैयाकरणाः नैयायिकाः वेदान्तिनः ज्योतिर्विदः वैद्याः पुरोहिता धनिनः इत्यादिपदैर्यदि स्वान् स्वान् अर्थानाश्रित्य जीवामः तदा कथन्न भवेदेतादृशी दुरवस्थास्माकमिति ।

अतस्तेषां स्वभ्रातॄणां नैराश्याश्रयाणां विदुषां निराशतां हीनतां दीनतां वा प्रतिकर्तुं सर्वथा सर्वदा सर्वरूपेणस्माभिर्यतितव्यमेव तथाहि—

सर्वतः प्रागस्माभिरस्मिन्कोविदमण्डले एकां प्रस्तावरचनां विधाय समर्थनानुमोदनादिभिरलङ्कृत्य सम्प्रेषणीया विश्वविद्यालयाधिकारिणां समक्षे यद् यथा आङ्गलभाषायां 'मैडिकल-ला-डिपार्टमेण्ट-इञ्जिनारिङ्ग-बोटनी-जूलौजी,-फिलासफी-साइकौलोजीप्रभृत्यध्ययनप्रबन्धः, तत्तथैवात्रापि ज्यौतिषाचार्य्यगणितज्ञः आयुर्वेदविज्ञानविशारदः, रसायनशास्त्रज्ञः, विज्ञानविधिप्रवीणः, हस्तरेखाविज्ञानविज्ञः, इत्यादिभिरुपाधिभिरलङ्करणीया भारतीवाग्विशारदा अपीति ।

यद्येवं कृतेऽपि तत्र विश्वविद्यालयेऽस्माकमसाफल्यसंभावना भवेत्तथाप्यस्माभिर्निरुत्साहतां निरुद्योगितामपहाय स्वयमेव सर्वत्र मण्डलादिकं विधाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतच्छात्रोपकाराय यो यमिच्छति स्वविषयं, तत्तथानुरूपेण अर्थोत्पादकान् स्वान् २ विषयानुद्दिश्य अवैतनकीं वृत्तिमाश्रित्य स्वजातिगौरवादिकं लक्षयीकृत्य प्रीत्या यत्नतः पाठनीयाः स्वजातीया नवयुवकाः। येनैते किञ्चिच्चणकादिभिराजीवनं पाक्षिकीमेकादशीयाचनां प्रतोलिकासु सत्रान्नाजीवनं निमन्त्रणसर्वस्व भावं परस्परं स्पर्द्धया सङ्घर्षणमर्थहीनतां, सकृदन्नभोजनादिकं जीर्णशीर्णवसनपरिधानं, पठनेऽतैलतां विपण्यां रात्रौ जागरणम्, इत्येतादृशीं वृत्तिमपहाय शनैः स्वविषयानुरूप्येणोन्नता विविधोपाधिपदैश्चालङ्कृता पूर्णसुखिनो धनिनश्च भवेयुः।

अन्तेऽहं याचे यत्सर्वशक्तिमतः परमेश्वरस्य कृपया एतेऽस्माकं भ्रातरः नवयुवका झटिति ऐं भजन्तो बलवन्तः ह्रीं स्मरन्तः श्रीमन्तः क्लीं जपन्तो मतिमन्तः भूयासुरिति। आशास्महे वयं यदत्रमण्डले भगवता हरेण नृसिंहेन च दत्तया कृपया सर्वदा मण्डलमण्डनं भविष्यतीति शम्।

———

ॐ

श्रीपञ्चनदीयसंस्कृतसाहित्यपरिषदः—

प्रथमवार्षिकाधिवेशनम्।

श्रीमन्तः—१९२८ मई मासस्य २६-२७ दिवसयोः श्रीपञ्चनदीयसंस्कृतसाहित्यपरिषदः प्रथमं वार्षिकाधिवेशनं महता समारोहेण सम्पन्नम्। सङ्क्षेपेण तद्विवरणं चेत्थम्—

मई मासस्य २६ दिने (शनौ) सायं चतुर्वादनतः श्रीभाईनन्दगोपालमन्दिरे श्रीसनातनधर्मकालेजप्रिंसिपलपदमलङ्कुर्वाणानां श्रीरघुवरदयालुशास्त्रिणाम् एम० ए० एम०-ओ० एल० इत्युपाधिधारिणां साभापत्ये अधिवेशनस्य कार्यमुपक्रान्तम्। तत्रादौ श्रीजयरामवेदपाठिभिः सस्वरेण श्रुतिपाठेन मङ्गलाचरणे विहिते श्रीब्राह्ममहाविद्यालयच्छात्रद्वयेन संस्कृतगीत्या सभ्यानां मनांस्येकतानतामनीयन्त। तदनुसभापतेराज्ञया संमेलनस्यावश्यकतामधिकृत्य श्रीमतां विद्यावयोवृद्धानां विशालानुभवशालिनां श्रीराजारामशास्त्रिणाम्, कुशलापरनाम्नो रामचन्द्रशास्त्रिणश्च विशदं व्याख्यानमभूत्। श्रीसभापतेर्निर्देशेन सर्वे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सभ्यैरेकमत्येन पञ्चनदप्रान्तीयसंस्कृतसाहित्यसंमेलनस्यावश्यकताऽङ्गीकृता ।

ततः श्रीब्राह्ममहाविद्यालयानुसंधानविभागवर्तिभिः श्रीनत्थूरामशास्त्रिभिः सङ्गीतशास्त्रनिष्णातैः कुशलापरनाम्ना रामचन्द्रशास्त्रिणा प्रणीता—

"चिन्तय चेतः सततमुदारं व्यापकमजमविकारं हे !
आगमकारणमाश्रिततारणमखिलाधारमपारं हे ! चिन्तय० ॥
जगति मायिकमञ्जुलवेशे भोगाश्चपलासंकाशाः ।
आनन्दसागर एष विलोलति पिब सदाऽमृतसारं हे ! ॥१॥ चिन्तय० ॥
पुनरपि जननं पुनरपि मरणम् हा धिङ्मायामोहावरणम् ॥२॥ चिन्तय० ।"

इतीयं गीतिका सव्याख्यानं गीता । व्याख्यानेन च ब्रह्मपराया अपि उल्लिखितगीतिकायाः संस्कृतसाहित्यसंमेलनपरतया योजनां कुर्वाणैः शास्त्रिवरैर्यत्सत्यं चित्रीकृताश्च समुल्लासिताश्च संमोहिताश्च सभ्याः परितोषस्य परा कोटिमन्वभूवन् ।

ततः "संस्कृतोन्नतेरुपायाः" इतीमं विषयमधिकृत्य कवितार्किकदर्शनाचार्य श्रीनृसिंहदेवशास्त्रिणां विशदं च विस्तृतं च प्रौढमप्रतिबद्धसंस्कृतधाराप्रवाहश्च व्याख्यानमभूत् । यत्र तैरधोनिर्दिष्टाः षडुपायाः संस्कृतोन्नतेरभिवर्णिताः—

१—संस्कृतभाषणं सर्वैरेव संस्कृतज्ञैः सर्वत्र करणीयमित्येक उपायः ।

२—प्राज्ञपरीक्षायां हिन्दीभाषया पाठनेन परीक्षणेन च सर्वथाऽस्मिन् प्रान्ते संस्कृतस्य हानिरेव जाता, तन्निवारणायाऽत्र संस्कृतमेव माध्यमं पूर्ववद् भवेदिति सबहुमानं साऽनुरोधं पञ्चापयूनिवर्सिटीपरिषदभ्यर्थनीयेति द्वितीय उपायः ।

३—समाचारपत्राण्यवश्यमेव पठनीयानि संस्कृतस्य वृद्धये, आविष्करणीयानि संस्कृतपत्राणि, उद्योतस्य ग्राहकत्वं पञ्चापप्रान्तीयैस्त्ववश्यमेव साधनीयम् ।

४—पुरातनी नष्टप्रायापि पाठनशैली सर्वथा रक्षणीयेति चतुर्थ उपायः ।

५—सुबोधच्छात्रेभ्यो वृत्तिर्देया, पाठनीयाश्च ते विशिष्टग्रन्थाः इति पञ्चम उपायः ।

६—(क) तत्र २ संस्कृतपरिषदः स्थापनीयाः ।

(ख) सर्वेऽपि विद्वांसो मदं परिहृत्य विविधेषु विषयेषु विचारं कुर्वन्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Debate मार्गमन्यं वा तादृशं मार्गमवलम्ब्य शास्त्राणां विशिष्टा गवेषणापि कर्त्तव्या इति "क" "ख" भागद्वयविशिष्टः षष्ठ उपायः ॥

ततो मूलत्राणात् (मुलतान) तत्प्रान्तप्रतिनिधिरूपेण समागतैस्तत्रत्यश्री सनातनधर्मसंस्कृतमहाविद्यालयाध्यापकान्यतमैः श्रीचूडामणिशास्त्रिभिः कुरुक्षेत्रतः समुपागतैः श्रीछज्जूरामशास्त्रिभिश्च संस्कृतोन्नत्युपायविषय एव भाषणं व्यधीयत, यत्र संस्कृतोन्नत्युपायानां समस्तानां व्यस्तानां वा देशकालपात्राद्यनुसारप्रयोगकरणाय सर्वे संस्कृतविदो न्यवेद्यन्त प्रोदसाह्यन्त च। तदनु श्रीसभापतेरभिभाषणोत्तरं सभाविसर्जनम्। तदुत्तरञ्च द्वितीयदिवसकृत्यनिर्धारणाय विषयनिर्धारिण्याः समितेर्मिथः संमन्त्रणम्। एतद्दिवसीयमधिवेशनं विद्यावयोवृद्धैः ऊना (होश्यारपुर) संस्कृतपाठशालाप्रधानाध्यापकैः श्रीनत्थूराम शास्त्रिभिरपि स्वोपस्थित्या समलङ्कृतमभूदिइत्यधिवेशनस्य प्रथमदिवसकृत्यम्।

ततो द्वितीयदिवसे (रवौ) सायं चतुर्वादनतः पुनरधिवेशनकार्यमुपक्रान्तम् तत्र पूर्वनिर्वाचितसभापतीनां महामहोपाध्यायश्रीगणेशदत्तशास्त्रिणाम् अस्वास्थ्यवशात् साभापत्यकार्यभारं वोढुमसमर्थेषु श्रीराजारामशास्त्रिणः सर्वसंमत्या सभापतेरासनमभजन्। श्रीनत्थूरामशास्त्रिणां मङ्गलगानानन्तरम् अमृतसरात् समुपागतैर्गायनमार्तण्डैः श्रीबुद्धिचन्द्रशर्मभिः "कयानश्चित्रा—इति साममन्त्रं भैरवरागेण सातिसौष्ठवं गीतवद्भिश्चित्रीकृता सभा तदानीं प्रख्याततमैर्वैद्यप्रकाण्डैः श्रीठाकुरदत्त (मुलतानी) वैद्यशास्त्रिभिरपि स्वोपस्थित्या सभासमलङ्कृता। अनन्तरमधोलिखिता अत्यावश्यकाः प्रस्तावाः प्रास्तूयन्त, अन्वमोद्यन्त, समार्थ्यन्त, सर्वसमत्याऽङ्गीकृतिमनीयन्त च—तेषां

(स्वरूपम)

१ प्रस्तावः—उच्चग्रन्थपाठनविषयकः।

प्रस्तोता श्रीविश्वबन्धु शास्त्री एम० ए० एम० ओ० एल० श्रीब्राह्ममहाविद्यालयस्याऽऽचार्यः।

अनुमोदकः—श्रीसन्तराजो महानुभावः हजारावासी।

२ प्रस्तावः—उद्योतपोषणरूपः।

प्रस्तोता—श्रीपरमेश्वरानन्दशास्त्री

अनुमोदकः—श्री सीतारामशास्त्री (अमृतसरस्थगागरमल्लपाठशालाध्यापकान्यतमः)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३ प्रस्तावः—संस्कृतसाहित्ये इतिहासभूगोलाधुनिकानुसंधानादि नव्य-विषयसमावेशरूपः।

प्रस्तोता—श्री चारुदेवशास्त्री पाणिनीयः एम. ए. एम. ओ. एल. लवपुरीय-डी. ए. वी. कालेजसंस्कृतप्रोपसरः।

अनुमोदकः—श्रीचूडामणिशास्त्री मौलत्राणः।

४ प्रस्तावः—सर्वासां पञ्चनदीयानां संस्कृतसंस्थानां सङ्घटनपरः।

प्रस्तोता— श्रीरामलालशास्त्री श्रीब्राह्ममहाविद्यालयाध्यापकान्यतमः।

अनुमोदकः—श्री मायाधारी शास्त्री अमृतसरस्थगागरमलपाठशाला-प्रधानाध्यापकः।

समर्थकः—श्रीरामनाथयोगी शास्त्री रावलपिंडीनिकेतः।

ततः श्रीबुद्धिचन्द्रशर्मणां गानोत्तरं सर्वविदुषां मिथः परिचयालापः। ततः कार्यकारिण्याः समितेः सङ्घटना, ततः सभाविसर्जनम्। तत्राधस्तान्निर्दिष्टनामानः पदाधिकारिणो नियुक्ताः—

सभापतिः—श्रीराजारामशास्त्री (डी. ए. वी. कालेज संस्कृत प्रोपसरः)

उपसभापतिः—श्रीविश्वबन्धुशास्त्री (एम. ए. एम. ओ. एल.)

,, श्रीपरमेश्वरानन्दशास्त्री च।

मन्त्री—श्रीजगदीशशास्त्री

सहकारिमन्त्री—रामचन्द्रशास्त्री कुशलः

कोषाध्यक्षः—श्रीबालासहायशास्त्री

आयव्ययपरीक्षकः—श्री चारुदेवशास्त्री (एम. ए. एम. ओ. एल.)

सम्पादकः—श्री नृसिंहदेवशास्त्री दर्शनाचार्यः

(सहकारिसंम्पादकः—श्रीपरमेश्वरानन्दशास्त्री)

सदस्याः—

श्री चूड़ामणि शास्त्री मौलत्राणः

श्री मायाधारीशास्त्री अमृतसरस्थः

श्रीवंशीधर शास्त्री मिशनकालेजसंस्कृतप्रोपसरः।

श्रीकाशीनाथशास्त्री ज्योतिर्वित्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री बालासहाय शास्त्री पञ्जाब यूनीवर्सिटीलाईब्रेरीसंस्कृतविभागाधिकृतः ।

श्री रामचन्द्र शास्त्री (गवर्नमेंटस्कूलाध्यापकः) ।

श्री रामचन्द्रशास्त्री (डी. ए. वी. स्कूलोऽध्यापकः)

श्री टिकलालशास्त्री ,, ,,

श्री लब्धरामशास्त्री ,, ,,

श्री रघुनाथदत्तबन्धु शास्त्री (श्री सनातनधर्महाईस्कूलाध्यापकः)

श्री गोपीचन्द्र शास्त्री बी. ए. दयालसिंहकालेजसंस्कृतप्रोपसरः ।

श्री रामजीदत्तशास्त्री (श्री शीतला पाठशालाप्रधानाध्यापकः)

श्री राघवानन्दशास्त्री (वंशीधर पाठशालाध्यापकः)

अथ रात्रौ सार्धाष्टनादकाले श्रीवंशीधरमन्दिरे पुनः संगताऽभूत् सभाऽवशिष्टकार्यसम्पूर्तये । तत्र मङ्गलगानोत्तरं श्रीराजारामशास्त्रिणां साभापत्येऽधो निर्दिष्टानां प्रस्तावानां स्वीकृतौ जातायां सानन्दं संमेलनकार्यं पूर्तिमगात् ।

१ प्रस्तावः—पञ्चनदीयसंस्कृतसाहित्यपरिषत् पञ्चनदीय विश्वविद्यालयपारिषद्यान् सानुरोधं प्रार्थयते यत्—मैट्रिकपरीक्षायां क्लासिकलभाषा अपि (संस्कृतप्रभृतयः) अवश्यपाठ्यत्वेन नियम्येरन् ।

२ प्रस्तावः—पञ्चनदीयसंस्कृतसाहित्यपरिषत् पञ्चनदीयविद्यालयपारिषद्यान् सानुरोधं प्रार्थयते यत्—कलिकाताकाशीप्रभृतिषु संस्कृतपरीक्षार्थिनां कृते संस्कृतभाषायामेव प्रवेशपत्राणि भवन्ति, तथा अत्रापि संस्कृतभाषायामेव स्युः ।

३ प्रस्तावः—पञ्चनदीयसंस्कृतसाहित्यपरिषत् पञ्चनदीय विश्वविद्यालयपारिषद्यान् सानुरोधं प्रार्थयते यत् कलिकातावाराणस्यादिषु यथा प्रथमापरीक्षायां संस्कृतमेव माध्यमं तथाऽत्रापि प्राज्ञपरीक्षायां संस्कृतमेव माध्यमं स्यात्, येन च्छात्राणां विशारदादिपरीक्षासु संस्कृतमाध्यमेन लेखे व्युत्पत्तिः सौकर्यं च स्यात् । अग्रिमे वर्षे अमृतसरे मूलत्राणे वा-उत्सवसम्भावना ।

विज्ञापयितारौ—

जगदीशशास्त्री मन्त्री

रामचन्द्रशास्त्री कुशलः सहकारी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतः

अहो ! काशीस्थपण्डितानां दुरभिनिवेशः ।

अयि ! उद्योतप्रियाः ! प्रियपाठकमहाभागाः ! विदाङ्कुर्वन्त्वत्रभवन्तो यद् "भारतधर्म" इत्याख्यं साप्ताहिकं राष्ट्रियं भाषापत्रं काशीधामतो गोविन्द-शास्त्रिणां सम्पादकत्वे प्रकाशितं भवति । यस्य मायि (मई) मासस्य षष्ठ्यां तारकायां प्रकाशितस्य कस्मिंश्चित् स्तम्भे "टाऊनहालस्थले काशीस्थपण्डितानां समारोहः" इत्याकारकशीर्षकोऽनेकप्रस्तावको विस्तृतोऽस्ति लेखो मुद्रितः । तत्र काशीस्थानां महतां महतां सनातनधर्मरक्षापरिबद्धकराणां पण्डितानामधि-वेशनं महामहोपाध्यायश्रीलक्ष्मणशास्त्रिणां साभापत्येऽभूदित्येवमपाठिष्म । सनातनधार्मिकाः पण्डिता अपि स्वधर्मरक्षायै सङ्घीभूय विचारणाकरणे प्रवृत्ता इत्यस्माकं महानेव हर्षः सम्प्रवृत्तः, प्रायोऽहञ्चत्वञ्चेतिवादिनां पण्डितानां प्रसुप्ति-रेव तु धर्मरक्षायां महत्प्रतिबन्धकमासीत्, तदन्यथादर्शने तु विश्वेश्वरस्य कृपा-मेव मन्यामहे । परमस्त्ययमेकः खेदावसरोऽपि यत् तत्रानेकेषु प्रस्तावेषु स्वीकृतेष्वेकादशः प्रस्तावो हिन्दुजातेस्तम्भायमानस्य सनातनधर्ममर्मविदुषः श्रीमाननीयमदनमोहनमालवीयमहोदयस्य विरोधे समजायत । तस्य प्रस्ता-वस्याऽयमाकारः—

इयं श्रीसनातनधर्मसभा पण्डितमदनमोहनमालवीयमहोदयद्वारा प्रकटीभूतं—"प्रणवसहितस्य ॐ नमो नारायणाय—इत्यष्टाक्षरमन्त्रस्य, प्रणव-सहितस्य श्रीशिवपञ्चाक्षरस्य[1]—ॐ नमः शिवाय इत्याकाकरस्य मन्त्रस्य चोपदेशे (मान्त्रिकदीक्षादाने) अन्त्यजानां कृतेऽप्यधिकारोऽस्तीत्याकारकं मतं घोरं

१—प्रणवसहितोऽयं मन्त्रः कथं पञ्चाक्षर इति काशीस्थाः पण्डिता एव जानन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरुणद्धि, शास्त्रविरुद्धत्वात्। अपि च श्रीमन्तं मालवीयमनुरोधयति-यत् सनातनधर्माऽभिमानित्वे सति भवद्भिः शास्त्रविरुद्धमिदं कार्यं न कर्त्तव्यमिति"। अस्य प्रस्तावकः सभापतिमहोदय एव।

अमुं प्रस्तावं पठित्वाऽस्माकं चेतसि महान् कलकलः सम्पन्नः, यद्यपि मालवीयैः सहास्माकं कश्चनापि व्यक्तित्वेन विशिष्टः परिचयो नास्ति, परं यदा कदाचिद् यावन्ति तावन्ति तेषां व्याख्यानानि श्रुतानि, तत्र शास्त्रविरोधस्य गन्धोऽपि नाकर्णि। न च मालवीयमहोदयाः साधारणाः पण्डिताः सन्ति। ये प्रतिदिनं श्रीमद्भागवतमहापुराणं धर्मबुद्ध्या पठन्ति, प्रायः पुराणमिदं येषां कण्ठस्थं वेविद्यते, ये च लोकशास्त्रमर्मविज्ञजनताधुरीणा, येषाञ्च सनातनधर्मसिद्धान्तेषु न केवलं श्रद्धैव परं जागर्ति प्रत्युत येषामाचरणमपि सनातनधर्मानुसारि दृश्यते, कथन्ते सहसा किमपि शास्त्रविरुद्धं ब्रूयुरुपदिशेयुर्वेति कस्य न भवेत्सहृदयस्य सनातनधर्मानुयायिनो जनस्य हृदये विस्मयस्थानावसरः। नहि दशगजलम्बायमानावच्छेदकावच्छिन्नादिप्रतियोगितानुयोगितादिविविधवैशिष्ट्यनिवेशकरणपूर्वकनव्यन्यायदिक्प्रचलितपरिष्काररचनापाटवमेव पाण्डित्यम्, नतु प्राचीनाचार्यस्वभावसिद्धगीर्वाणवाणीविज्ञतापूर्वकशास्त्रीयराद्धान्तपौर्वापर्यवित्त्वं न पाण्डित्यमिति कश्चिदपि प्रेक्षावान् सम्भावयितुमप्युद्युक्तो भवेत्। तस्माद् यादृशां शास्त्रसिद्धान्तजुषां विदुषां सभेयं जाता, शास्त्रधर्मविज्ञतायां तत्कोटिनिविष्टतामेव मालवीयमहोदयस्य मत्वा तद्गृहीतं पक्षमेव शास्त्रसम्मततया महामहोपाध्यायलक्ष्मणशास्त्रिप्रभृतिकाशीस्थविदुषां पुरतः सङ्क्षेपेण स्थापयामः, वाञ्छामश्च तेऽस्मिन्विषये कैः कैः प्रमाणैः शास्त्रसम्मतस्याप्यस्य पक्षस्य व्यवस्थां प्रकाशयिष्यन्तीति। वस्तुतस्तु शास्त्रप्रमाणका वयं यच्छास्त्रमाह तदस्माकं प्रमाणं, न मालवीयकथनमात्रं, नवाऽन्यस्य कस्यचिद्वाचोयुक्तिमात्रमिति दृढं प्रतीमः।

तथाहि—अगस्त्यसंहितायाम्—

शुचिव्रततमाः शूद्रा धार्मिका द्विजसेवकाः।
स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः॥
लोकाश्चाण्डालपर्यन्तं सर्वेऽप्यत्राधिकारिणः॥

इत्येवं राममन्त्रे मनुष्यमात्रस्याधिकारं बोधयित्वा—

श्रुतिर्ब्रह्माह षड्वर्णं स्मृतिर्वर्णद्वयात्मकम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षड्वर्णं ब्राह्मणादीनां त्रयाणां यद्द्विवर्णकम् ॥
तदन्येषां देशिकेन वक्तव्यं तारकं परम् ॥

इत्येवं त्रैवर्णिकानां "ॐ रामाय नमः" इति षड्वर्णे पूर्ववाक्यैकवाक्यतया तदन्येषामपि मनुष्याणां रामनाममन्त्रेऽधिकारावगमः ।

नच—"यद्द्विवर्णकम् । तदन्येषां देशिकेन वक्तव्यं तारकं परम्" इत्युक्त्या त्रैवर्णिकाभिन्नानां षड्वर्णे स्पष्टमेवाधिकाराभावप्रतीतेः कथं प्रणवसहिततारकमन्त्रदीक्षायां शूद्रान्त्यजादीनामधिकारमाचक्षीथाः" इति शङ्कितुमपि शक्यम्, वक्ष्यमाणब्रह्मोत्तरखण्डीयवाक्यैकवाक्यतान्यायेन शिवरामयोर्वास्तविकभेदाभावेन भेददृष्टेर्निन्दितत्वात् षडक्षरपञ्चाक्षरद्व्यक्षरादिदीक्षादानग्रहणस्य षोडशिग्रहणवद्वैकल्पिकत्वावगमात्, द्व्यक्षरस्यापि षडक्षरादिवन्महापातकादिनाशकत्वाच्च, मुधा ब्राह्मण्यगर्वितापेक्षया निरन्तरं भगवन्तं स्मरतश्चाण्डालादेरपि उत्कर्षस्य शास्त्रतत्कृतसम्मतत्वाच्च । आ च ब्राह्मणमा च चाण्डालं ज्ञानवद्भक्तेः फलस्वरूपे वैषम्याभावबोधनमप्युक्तार्थोपोद्बलकं ज्ञेयम् ।

एतदुक्तं भवति—यथा—

अद्वैतब्रह्मसाक्षात्कारस्य फलं सर्वेषां ब्राह्मणादीनामविशिष्टं तथैव भक्तेरपि परानुरक्तिरूपाया महापातकोपपातकान्तःकरणशुद्ध्यादिफलमविशिष्टमेव शास्त्रकारैराम्नातम् । यथा ज्ञानफले नार्थवादः तथा भगवन्नामस्मरणादिरूपायां भक्तावपि नार्थवाद इति तस्मात्षडक्षरादिषु विकल्प एवास्थेयः ।

एवम्ब्रह्मोत्तरखण्डे शिवपञ्चाक्षरं प्रक्रम्य—

महापातकदावाग्निः सोऽयं मन्त्रः षडक्षरः ।
प्रणवेन विना मन्त्रः सोऽयं पञ्चाक्षरः स्मृतः ॥
स्त्रीभिः शूद्रैश्च सङ्कीर्णैर्धार्यते मुक्तिकाङ्क्षिभिः ।
नास्य दीक्षा न होमश्च न संस्कारो न तर्पणम् ॥
न कालनियमश्चात्र जप्यः सर्वैरयं मनुः ।
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥

इत्यनेन शिवपञ्चाक्षरमन्त्रे म्लेच्छादीनामप्यधिकारस्य विस्पष्टावगमाच्च सन्त्येवान्त्यजाद्या अपि तादृशमन्त्राधिकारिणः । तदेतदाविविच्यैव काशीस्थैः पण्डितैर्मालवीयानां शास्त्रविरुद्धाचरणमाकलय्य तादृशप्रस्तावस्य पाशीकरणेन हिन्दुजातेरैकमत्यबलस्यैव क्षोदः कृत इति जानीमहे । किञ्च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निन्दितचाण्डालयोनिपर्यन्तानामपि भक्तेरधिकारचिन्तायां मनुष्यमात्रस्य भक्तिमार्गाधिकारित्वादन्त्यजाद्याः सर्वेऽपि तारकादिमन्त्रदीक्षाधिकारिणो मन्तव्याः । तथाहि—"आनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत्" इति द्वितीयाध्याये द्वितीयाह्निके अष्टसप्ततितमं शाण्डिल्यभक्तिसूत्रम् । विवृतश्चैतत् स्वप्रेश्वराचार्येण-"निन्दितचाण्डालयोनिपर्यन्तं भक्तावाधिक्रियते संसारदुःखजिहासाया अविशेषात् । अथ वेदाध्ययनानधिकारात् कथमत्रैवर्णिकानां स इति चेत् तत्राह पारम्पर्यादिति । "चोदनालक्षणो धर्मः" (पू० मी० १।१।२।) इति। "शास्त्रयोनित्वात्"(ब्र०मी० १।१।३) इति च न्यायादलौकिकोऽर्थः श्रुत्यैकसमधिगम्य इत्यत्र न विप्रतिपद्यामहे, किन्तु स्त्रीशूद्रादीनामितिहासपुराणादिद्वारा चाण्डालादीनाञ्च स्मृत्याचारवदुपदेशपारम्पर्येण ज्ञानमपि श्रुतिमूलमेव भवति । यथा तेषां सामान्याऽहिंसाधर्मादिज्ञानम्, अन्यथा तदसिद्धिप्रसङ्गादिति । एवमतिस्पष्टे आम्नाते मनुष्यमात्रस्य भक्त्यधिकारे पञ्चाक्षरषडक्षरादिमन्त्रोपदेशश्चतुराननेनापि वारयितुमशक्य इति सुदृढं निश्चीयताम् । अपि च पश्यन्तु प्रियपाठकमहाभागाः—"शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः" इत्यादिमनूक्तदस्युशब्देन व्यवहृतानां व्रात्यक्षत्रियादीनां कथं धर्मे व्यवस्थापनं स्यादिति राजधर्मेषु पञ्चषष्टितमाध्याये—

यवनाः किराताः गान्धाराश्चीनाः शबरबर्बराः ।
शकास्तुषाराः कङ्काश्च पह्लवाश्चान्ध्रमद्रकाः ॥
पौण्ड्राः पुलिन्दा रमठाः काम्बोजाश्चैव सर्वशः ।
ब्रह्मक्षत्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः ॥
कथं धर्मांश्चरिष्यन्ति सर्वे विषयवासिनः ।
मद्विधैश्च कथं स्थाप्याः सर्वे वै दस्युजीविनः ॥
एतदिच्छाम्यहं श्रोतुं भगवंस्तद् ब्रवीहि मे ।
त्वं बन्धुभूतोह्यस्माकं क्षत्रियाणां सुरेश्वर ॥

इति मान्धातुरिन्द्रम्प्रति प्रश्ने—

मातापित्रोर्हि शुश्रूषा कर्त्तव्या सर्वदस्युभिः ।
आचार्यगुरुशुश्रूषा तथैवाश्रमवासिनाम् ॥
भूमिपानाञ्च शुश्रूषा कर्त्तव्या सर्वदस्युभिः ।
वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च ।
दानानि च यथाकालं द्विजेभ्यो विसृजेत्सदा ॥

इत्येवमादिना बहुना यत्र केषाञ्चित्पाकयज्ञादीनां विधानमपि दस्यूनां कृते शास्त्रसम्मतं तत्र तदन्तर्गतानां म्लेच्छादीनां मनुष्यत्वेन भक्तिमार्गाधिकारितया दर्शितरीत्या नामदीक्षा कथं वारणीया स्यादिति निष्कलमषधियः स्वयमाकलयन्तु विद्वांसः । देवीपुराणे तु—

वर्णाश्रमविभागेन देवा स्थाप्यास्तु नान्यथा ।
ब्रह्मा तु ब्राह्मणैःस्थाप्यो गायत्रीसहितः प्रभुः ॥
चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ।
भैरवोऽपि चतुर्वर्णैरन्त्यजानां तथा मतः ॥

इत्येवमादिनाऽन्त्यजानां कृते भैरवप्रतिष्ठाधिकारे ब्राह्मणानामेव च प्रतिष्ठापकत्वे दूरतः छायापातोऽप्यन्तजानां पातकहेतुरिति वदन्तोऽपि केचन प्रत्युक्ता वेदितव्याः । अपि च श्रीमद्भागवते नृसिंहस्तुतौ प्रह्लादवाक्यम्—

"विप्राद् द्विषड्गुणयुतादरविन्दनाभपादारविन्दविमुखाच्छ्वपचं वरिष्ठम् " इति मुधाजात्यभिमानं दूषयत्तादृशब्राह्मणापेक्षया चाण्डालमपि वरीयांसं प्रतिपादयन्नामस्मरणादिभक्त्यधिकारं स्पष्टमेवाख्याति । 'किरातहूणान्ध्रपुलिन्दपुल्कसाः" इत्यादि च भगवद्भक्त्या शुद्ध्यभिधानमपि प्रतिपादितार्थोपोद्बलकं न विस्मरणीयम् ।

अयमभिसन्धिः—"किरातेत्यादि" भागवतवचनबलात्सर्वेषां भगवद्भक्त्या शुद्ध्यभिधाने पुष्टीकृते राममन्त्रपञ्चाक्षरमन्त्रयोरधिकारोऽपि प्राङ्निरूपितः सर्वेषां समान एवाभाति । पितृयज्ञादयस्तु नास्तिक्यम्लेच्छसंसर्गपरिहारपूर्वकमुचितप्रायश्चित्ताऽनुष्ठानेन शुद्धानां शूद्रकमलाकरोक्तप्रयोगानुसारिणां प्राप्नुवन्ति, तेषां शूद्रसधर्मत्वात्, एवञ्चोपपादितसन्दर्भेण मूलतो म्लेच्छादीनामपि स्वनास्तिक्यादित्यागपूर्वकराममन्त्राद्यधिकारो बलादापतितो भवति । अत एव "निर्माल्यरत्नाकरे—शिवपुराणे पञ्चाक्षरमुद्दिश्य—

यस्योन्नमःशिवायेति मन्त्रोऽयं हृदि संस्थितः ।
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ॥
एतावच्छिवज्ञानमेतावत्परमं पदम् ।
यदोन्नमः शिवायेति शिववाक्यं षडक्षरम् ॥
विधिवाक्य मिदञ्चैव नार्थवादं शिवात्मकम् ।
लोकाऽनुग्रहकर्त्ता यः स मृषार्थं कथं वदेत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादि बहूक्तं सङ्गच्छते। सामान्यतोऽस्य विधिवाक्यस्य मनुष्यमात्रोद्देशेन प्रवृत्ततया अन्त्यजादेस्तत्राधिकारवारणस्य सर्वथैवाऽसम्भाव्यमानत्वात्।

अपि च सकलप्रमाणमूर्धाभिषिक्तो वेदोऽप्यस्मिन्नर्थे प्रमाणम्—

"तमु स्तोतारः पूर्व्यं यथा विदि ऋतस्य गर्भं जनुषा पिपर्त्तन। अस्य जानतो नाम चिद्विविक्तनमहस्ते विष्णो सुमतिं भजामः"। (ऋ० २।२।२६) इति

अयं मन्त्रः सकलजगदुपादानभूतस्य जगत्कर्त्तुरीश्वरस्य वेदान्तैकवेद्यस्य स्वयम्प्रकाशस्य विष्णोर्भगवतः स्तोत्राणां नाम्नाञ्च वर्णजातिसम्बधमनपेक्ष्यैव मोक्षसाधनतां प्रतिपादयन् भक्तिसाधनतामप्याचष्टे। मन्त्राक्षरार्थस्तु—हे जानन्तः=संसरणं महत्कष्टमिति स्वार्थकुशला! जनाः! तम्=अस्ति कश्चित्सकलसंसारकर्त्ता जगदीश्वर इत्यागोपालं प्रसिद्धम् देवम्=द्योतनात्मकम् पूर्व्यम्=पुरातनम् सनातनमित्यर्थः। (एतेन स्वाधिष्ठातृत्वं कर्त्तृत्वञ्च भगवतः सिद्धं भवति) ऋतस्य गर्भम्=उपनिषदां तज्जन्यस्य ज्ञानस्य वा (गर्भे) जठरे वर्त्तमानत्वेन गर्भं वेदान्तैकवेद्यम्प्रत्यगभिन्नं परमात्मानमित्यर्थः स्तोतारः=स्तुध्वमितिपुरुषव्यत्ययः। ननु—एवं वैदिकैरेव मन्त्रैः स्तोतव्यमिति नियमे समायातं तर्हि त्रैवर्णिकाधिकारेणैवेति शङ्कां व्युदस्यन्निवाह-"यथाविदि" इति। यथाविदि=यथाज्ञानं तथा स्तोतारः स्तुध्वम् नच वैदिकैरेव मन्त्रैः स्तोत्रैः स्तोतव्यमिति कश्चिदस्ति नियमः किन्तु—यथा जानीत तथा स्तुध्वं श्रौतैरागमिकैः पौराणैः प्राकृतैर्वा स्तोत्रैरिति। श्रौतैरेव स्तोतव्यमिति नियमे सति भगवत्प्रेमनिष्ठत्रैवर्णिकभिन्नाधिकारिजनाधिकारविप्लवापत्तिरनिवार्या, सकलजगदुद्धरणक्षमस्य महेशितुर्वैषम्यनैर्घृण्यादिदोषपङ्ककलङ्किता च दुरुद्धरा आपद्येत, "तद्वाग्विलासो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि" इत्येवञ्जातीयकम्भागवतादिपुराणोपबृंहणवाक्यजातं च निपीड्येत, तस्माद्यथाज्ञानं सर्वेषामेव भगवतः स्तवने तन्नामजपने चाधिकारः। कथं निरतिशयस्य सर्वगुणातीतस्य शब्दप्रवृत्तिनिमित्तधर्मशून्यस्य स्वे महिम्नि प्रतिष्ठितस्य ब्रह्मणो येन केन वा स्तोत्रेण यथाकथञ्चिद्वा स्तुतिर्भवितुमर्हति येनेत्थमुपदिश्यते? अत आह—"जनुषा पिपर्तन" इति जनुषा=जन्मना अनेकविधेनावतारूपेण स्वच्छन्दया दैव्या मायया रचितेन स्वरूपेण पिपर्त्तन=पूरयत वर्णयतेत्यर्थः वर्णितञ्च तथैव व्यासादिभिर्महर्षिभिस्ततोऽर्वाक्तनैश्च कैश्चन स्तुतिकुसुमाञ्जलिप्रभृतिकाव्यनिर्मातृभिरपि महाकविभिस्तथैवेति नासम्भवोपदेशः। यद्येवमपि सामर्थ्यं न भवेत्कस्याचित् तदा किं कुर्यादित्याह—अस्य=भगवतः नाम=नामानि चिद्विविक्तन=सदा कीर्त्तयत वेदादिमंत्रानधिकारे स्वयं वा तादृशभगवत्स्तुति-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रचनासामर्थ्याभावे वा शास्त्रप्रसिद्धानि भगवतो नामान्येव कीर्त्तनीयानीत्यर्थः। अत एव सर्वसामान्याधिकारमुद्दिश्य—"विष्णोर्नामसहस्रं मे शृणु पापभयापहम्" इत्याद्युपक्रम्य "यानि नामानि गौणानि विख्यातानि महात्मनः। ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये" इत्याद्युक्त्वा "ॐ विश्वं विष्णुर्वषट्कार" इत्यादि नाम्नां सहस्रमनुशशासानुशासनिके पर्वाणि वेदविदामग्रेसरो भगवान् व्यासः।

एवमुपदिश्य प्रार्थनाप्रकारमाह—विष्णो!=हे व्यापनशील! ते=तव महः= प्रकाशं सुमतिम्=त्वत्स्वरूपप्रकाशिकां वा बुद्धिं भजामः=भजेमहि ब्रह्मविद्यामाशासानाः कीर्त्तयेम येनास्माकं सकलसंसारानर्थनिवृत्तिः सुकरा सम्पद्येतेतिभावः। इत्थं मन्त्रलिङ्गादनेकपुराणोपपुराणेतिहासादिवाक्योपबृंहितात् सप्रणवनामजापे प्रणवं विनैव वा यथारुचि भगवन्नाममात्रे सर्वेषामेव समानोऽधिकारः। अन्यान्यपि बहूनि वाक्यान्युक्तार्थप्रतिपादकानि, यानि स्वावसरे प्रकाशयिष्यामः।

एतेन "ओंनमो नारायणाय" इत्यष्टाक्षरमन्त्रोपि व्याख्यातः, समानन्यायात्। तस्माद् द्वेषबुद्धिं परिहाय विश्वेश्वरपुर्यां निवसद्भिः पण्डितवर्यैरसौ प्रस्तावः परावर्त्तनीय * इत्यतिसङ्क्षेपः।

सम्पादकीयटिप्पणयः

निर्जलैकादशी बर्करादिनी[1] च—

अस्मिन्संवत्सरे निर्जलैकादशी बर्करादिनी च हिन्दूनां मुसलमानानाञ्च वार्षिकधर्मोत्सवदिनं सहैव जातम्। पूर्वमेव रक्षिपुरुष (पुलिस) प्रबन्धो दीप्तिकामेश्वराज्ञया Deputy Commissioner (द्विपुटीकामेश्वराज्ञया) तत्र २ सम्यगासीत्। किन्त्वस्मिन्दिवसे प्रातरेव रक्षिपुरुषप्रधानाध्यक्षः कतिपयैः सादिभिः सह विपणिमार्गेषु भ्रमितुमारभत। क्वचित् क्वचिच्च ओणरायरिमैजिष्ट्रेटा नागरन्यायाध्यक्षोऽपि च शान्तिमुपष्टम्भयितुं भ्रमन्ति स्मेति दृष्टं श्रुतञ्च।

सूर्योदयेऽपि तमः, गुप्तश्चोरितश्च। वैशाखमासस्य पूर्णिमायां प्रकाशिते सूर्योदये उद्योतेन सह भ्रातृभावं प्रकाशयद्भिर्मान्यवरैः सूर्योदयसम्पादकैश्चैत्रमासस्य उद्योतस्य सम्पादकीयटिप्पणीषु परानुवादग्रन्थस्य पूर्वोत्तरसङ्गतिमपर्यालोच्यै-

---

* अधिकन्तु सत्यामावश्यकतायां निरूपयिष्यते।

१—"बकरीद' इति प्रसिद्धं नाम।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वोद्योतसम्पादकसम्बन्धिसनातनमर्यादापालने कथञ्चित् सन्दिग्धमिवाचरितमाभातीति तत्तमो मा प्रसाङ्क्षीदिति सूर्योदयसम्पादकाः सानुनयं सम्पादनकलामनुस्मार्यन्ते यत्कृपयाऽत्र भवद्भिरध उपरि सर्वं सम्यङ्निरीक्ष्यैव सम्पाद्यम् । यच्चोद्योतप्रथमलिङ्गमहत्त्वविषये सूर्योदयसम्पादकानां गुप्तश्चोरितं प्रतीयते तदपि श्रीमतां हृदयस्य सङ्कोचीकरणसमुत्थं विज्ञेयम् । परम्पराचोदितचोरितचोदने सर्वासां चोदनानां विप्लवापत्तेः । समानप्रतिभाशक्तिपातने च सकलानां महाकवीनां चोरत्वापत्तेश्च । उद्योतोयं भवद्भिः क्रोडीकृत इति नङ्क्ष्यति लेशतोऽपि तम इति कोटिशो धन्यवादार्हाः सूर्योदयसम्पादकाः ।

जनसङ्ख्या—सकलसंसारस्य जनसङ्ख्या सप्ततिकोट्यधिकैकार्बुदपरिमिता वर्त्तते । तथाहि—भारतस्य (३२) द्वात्रिंशत्कोटिः[1] । ब्रिटेनस्य (४॥) सार्धचतुष्कोटिः, जापानस्य (६॥) सार्धषट्कोटिः, जरमणस्य (५) पञ्चकोटिः, फ्रांसस्य (४) चतुष्कोटिः, इटल्याः (४) चतुष्कोटिः, रूसस्य (१४॥) सार्धा चतुर्दशकोटिः, चीनस्य (४०) चत्वारिंशत्कोटिः, आमरीकायाः (११॥) सार्धैकादशकोटिर्जनसङ्ख्या विद्यते ।

भाषाभाषिणां सङ्ख्या—हिन्दीभाषिणो (१०) दशकोटिमिताः[2] । एवम्-बङ्गभाषिणां (५) पञ्चकोटिः, तैलगूभाषिणां (२॥) सार्धकोटिद्वयम्, महाराष्ट्रभाषिणां (२) द्वे कोटी, तामिलभाषिणां (२) द्वे कोटी, पञ्जाबीभाषिणां (१।) सपादकोटिः, मारवाड़ीभाषिणां (१।) सपादकोटिः, कर्णाट (कनाडी) भाषिणा(१)मेका कोटिः, उडियाभाषिणा(१)मेका कोटिः, ब्राह्मीभाषिणा (१) मप्येका कोटिः सङ्ख्याविज्ञातव्या ।

आयुषः फलिता गणना—आङ्ग्लानां १५ पञ्चदशवर्षमितम्, आमेरिकाणां ५५ पञ्चपञ्चाशत्, न्यूज़ीलैण्डे ६० (वर्षाणां) षष्टिः, फ्रांसवासिनां ४८ अष्टचत्वारिंशत्, जयप्राणानां (जापानवासिनां) ४४ चतुश्चत्वारिंशत्, भारतवासिनान्तु २३ त्रयोविंशतिर्वर्षाणामायुः फलितं भवति[3] ।

शिक्षा—जरमणिदेशे प्रतिशतं (३६॥) सार्धैकोनचत्वारिंशत्संङ्ख्याः पुरुषाः प्राप्तशिक्षा भवन्ति । (सावशेषम्)

१—हा ! भारतसङ्ख्ये ! शोच्यासि देवैः, हतास्यविद्यया, नष्टास्यैनैकमत्येन ।

२—हिन्दीभाषाभाषिणां सङ्ख्या सर्वतोऽप्यतिशायिनी, त्वर्धताश्चास्याः सार्वभौमता, परं मा वधीत् स्वजनन्या देववाण्या जीवनम् ।

३—एतेषां राष्ट्रियव्यवहारविज्ञानाभावात् सदाचारप्रच्यवनाच्च त्रयोविंशतिवर्षसङ्ख्या फलितमप्यायुर्निष्फलमेव याति । यत एते परस्परकलहप्रिया जातिदेशाभिमानशून्याश्च ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अस्थानभ्रमस्य दूरीकरणम्'

(ले० हंसराजः—शीतलामन्दिरम्)

'लवपुरी'य 'उद्योत'स्य तृतीयमयूखे "काव्यवैशिष्ट्यपरीक्षणा"त्मक लेखे 'प्रमाणत्रयपक्षे हि प्रत्यक्षानुमानाभ्यामविषयीकृतस्य पदार्थमात्रस्य शास्त्ररूप-प्रमाणेन विषयीकरणनियमो हि प्रमेयत्वस्य केवलान्वयित्वं संरक्षयन् "शास्त्र-योनित्वात्" इत्यादौ सुप्रसिद्धेन शास्त्रपदप्रतिपाद्येन वेदराशिना प्रत्यक्षानुमा-मानाभ्याम् अगम्यस्य प्रमेयमात्रस्य विषयीकृतत्वम् निश्चाययन् काव्यजातस्य वेदाद्युक्तार्थानुवादकत्वेन शास्त्रकार्य्यकारित्वम् दृढयत्येव, इति मूललेखमुद्दिश्य 'कश्चित्' अनुद्घाटितचक्षुः 'अस्थानेऽनुपयोगिभिश्च बहुभिर्जल्पै श्रमं तन्वते, श्रोतॄणामितिवस्तुविप्लवकृतः सर्वेऽपि टीकाकृतः इतिटीकाकृल्लक्षणलक्ष्यभूतः वक्ष्यमाणाम् टिप्पणीं व्यधात्।

तथाहि—यदि प्रत्यक्षानुमानाभ्यामविषयीकृता अर्था न सन्ति तदा तु प्रमेयत्वस्य केवलान्वयित्वम् केन वार्यत ? अथ सन्ति तर्हि ईश्वरीयप्रत्यक्षवि-षयत्वादपि तेषां प्रमेयत्वस्य केवलान्वयित्वम् स्वयम् सुरक्षितमेवेति कोऽय-मभिनवस्तर्कप्रकारो यच्छास्त्ररूपप्रमाणेन विषयीकरणनियमः प्रमेयत्वस्य केवलान्वयित्वसंरक्षणाय आदृतः महाशयैः। ये च वैदिका शास्त्रपृथक्प्रमाण-त्वेन न स्वीकुर्वन्ति तेऽपि प्रमेयत्वस्य केवलान्वयित्वम् स्वीकुर्वत एवेति "यदि शास्त्रप्रमाणविषयीकरणत्वात्मकनियमः न स्यात् तर्हि प्रमेयत्वनिष्ठकेवलान्वयि-त्वनियमोऽपि न स्यात्" इति तर्को दुर्घटायते इति सूक्ष्मया धिया धारयन्तु दर्शनमर्मज्ञुषो विद्वांसः'। इति। अत्र दर्शनमर्मज्ञुषोऽस्य टिप्पणीकृतः द्रष्टव्य मिदानीं दर्शनमर्मदर्शनम्।

तथाहि—मूले 'प्रमाणत्रयपक्षे हि' इत्युपक्रम्य प्रवृत्ते लेखे 'अनुमान' शब्दः शब्दप्रमाणम् स्वस्मिन् अनन्तर्भाव्य प्रवृत्त इति न तिरोहितम्। तथा प्रत्यक्ष-शब्दः—ईश्वरप्रत्यक्षेतरप्रत्यक्षपर इत्यपि सुस्पष्टम्, ईश्वरस्य प्रमाणत्रयाद्यन-पेक्षणात् तथा च 'यदि प्रत्यक्षानुमानाभ्यामविषयीकृता अर्थाः न सन्ति तदातु प्रमेयत्वस्य केवलान्वयि केन वार्यत' इति टिप्पणीलेखः शब्दप्रमाणस्य अनुमानेऽ-न्तर्भावम् सम्पाद्य प्रवर्तितः ? असम्पाद्य वा ? आद्ये मूलमदृष्ट्वा मूलाशयमनालोच्य केवलं पाठकप्रतारणायै लेखः फलति। द्वितीये—'शब्दो हि भूतं भवन्तम भविष्य-न्तम विप्रकृष्टम् सूक्ष्मम् व्यवहितमित्येवं जातीयम् अर्थं शक्नोत्यवगमयितुम् नान्यत् (अनुमानादि)किञ्च(कुतः)नेन्द्रियम्'इत्यादिशाबरभाष्य श्लोकवार्तिकादिविरोधात्। अनुभवविरोधात्। 'सर्वस्य लोचनं शास्त्रम्' यस्य नास्ति अन्ध एव सः। इत्यादि विरोधाच्च। तस्मात्तुच्छमेतत् अग्रे च 'अथ सन्ति तर्हि—ईश्वरीयप्रत्यक्ष विषयत्वादपि प्रमेयत्वस्य केवलान्वयित्वम् सुरक्षितमिति लेखनीविलासः।

१—कीदृशोऽयमशुद्धो लेख इति स्वयं पश्यन्तु पण्डिताः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो !! दर्शनमर्मदृष्टिः.....प्रमाणत्रयादिसापेक्षप्रमातृनिष्ठ-प्रमातृतानिरूपितप्रमेयताया केवलान्वयित्वविचारे ईश्वरीयप्रत्यक्षविषयतया केवलान्वयित्ववर्णनम् 'आम्रान् पृष्टः कोविदारानाचष्टे' इति न्यायमनुसरति ।

अथ 'ये च वैदिकाः शास्त्रं पृथक् प्रमाणत्वेन न स्वीकुर्वन्ति तेऽपि प्रमेयत्वस्य केवलान्वयित्वम् स्वीकुर्वन्ति' इत्यादिवर्णनम् अत्रापि पूर्ववदेव विकल्पः—किं शास्त्रप्रमाणस्य-अनुमाने-अन्तर्भावं संपाद्य लेखप्रवृत्तिरसंपाद्य वा ?

चेदाद्यस्तर्हि प्रकृतप्रकरणविरोधः । चेद्द्वितीयः तर्हि, भवानेव जानातु तादृशं रहस्यम् यदुपासितगुरुचरणानाम् पुरतो गगनकुसुमायते । अथ यदुक्तम् 'अभिनवस्तर्कप्रकार' इति तत्तथैवांगीकुर्मः, अशास्त्रज्ञानामभिनवः, शास्त्रज्ञानान्तु नूतनं स्वकीयं वा किञ्चित्-नास्त्येव यच्छास्त्रदर्शितम् तत्पुरातनमेवेति ।

तथा 'उद्योताशीः' पद्याधो मुखे पुष्पमादाय प्रवृत्ते लेखे—उक्तम्—तथा 'रघुवर माथुर नागर श्रील श्रीशारदावन्धो' इत्यादीनि काव्यादर्शीयकुसुमप्रतिमापद्यान्यपि शुद्धानि मन्तव्यानि ।

उद्योताशीः पद्यस्थे 'कार्योद्गारिप्रवृत्तिजातघटनासार' इति पदे—(सूर्यप्रकाशपक्षे) कार्यपर्य्यवसायिप्रवृत्तिमात्रसंपादनलफक इत्यर्थके, उद्योतपुस्तकपक्षे कर्त्तव्यप्रकाशकवृत्तान्तजातैकत्रीकरणफलक इत्यर्थके श्लेषेणार्थद्वयबोधनाय 'प्रवृत्ति' शब्दे निवेशितेऽपि गुरुत्वम् पूर्वस्य न भवति 'वर्णो गुरुर्मतो ह्रेप्रे पादान्ते चापि वा लघु' इत्यनुशासनात् ।

तथा 'सूर्यालम्बनविस्वगञ्चनगुणोह्युद्योत इत्यत्र पुस्तकपक्षे-सूरयः-विद्वाँसः आलम्बनं यस्य तादृशः, विश्वगञ्चनगुणः (सर्वत्रप्रसरणरूपः) यस्य एतादृशार्थस्य हेतुगर्भतया बोधनाय प्रयुक्तः हि शब्दः नानर्थत्वं भजते । न वा श्रुतिवैरस्यं 'कातार्थ्यम् इत्यादिवत् कठोरसंयोगाभावादितिवस्तुस्थितिः । तथा चात्र यथाऽनपेक्षितगुरुत्वरूपदोषः व्यर्थपदत्वादिदोषो वा नास्ति एवमेव 'रघुवर माथुर नागर श्रील' इत्यत्र नागरशब्दात्ये गुरुत्वं नास्तीति लेखकाशयः अत्रोच्यते—किमत्र दृष्टान्तमात्रेण गुरुत्वाभावो वर्ण्यते उत उक्तप्रमाणेन ? दृष्टान्तमात्रेण चेत्तर्हि सर्वत्रैवाव्यवस्थाप्रसंगः, शास्त्रकृतनियमवैपर्य्यापत्तिश्च उक्तप्रमाणेनेतिचेत् न, अनेन हि प्रमाणेन केवलम् ह्रे प्रे परतो विकल्पेन गुरुत्वं विधीयते । तथा पादान्तलघोर्विकल्पेन गुरुत्वं विधीयते नतु गुरोर्लघुत्वं विधीयते। तथा च प्रकृते श्रीशब्दे परे पूर्वस्य गुरुत्वं केन वार्येत । अथ विशिष्टानुशासनाभावेऽपि अल्पव्ययेनसुन्दरी ग्राम्यजनो मिष्टमश्नाति' इति दृष्टान्तमात्रेण यथैवान्त्ये तथैवादौ संयोगः क्रमसंज्ञकः, तस्मिन् परे तु पूर्वस्य लघोर्न गुरुता भवेत् इत्येवमुक्तौतु 'विकसितसहकारभारहारि प्रमुदितसौरभ आगतः वसन्तः' इत्यादि साहित्यदर्पणकाव्यप्रकाशकृदादीनामुक्तय, [illegible] इति तस्मान्नुच्छं यत्किञ्चिदेतत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

UDYOTAH REGISTER L. NO. 2304

वार्षिकमूल्यम् १॥)
सार्धरूपकम्

प्रतिखण्डमूल्यम् ≡)
आनकत्रयम्

उद्योतः

पञ्चनदीयसंस्कृतसाहित्यपरिषदो

मासिकं मुखपत्रम् ।

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नादराद्,
अज्ञानान्धतमोविनाशपटुता–विख्यात–विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्,
"उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥१॥

प्रथमवर्षे– १ | आषाढसङ्क्रान्त्याम् । वि० सं० १९८५ जून सं० १९२८ | पञ्चमो मयूखः ५

सम्पादकः—
कवितार्किक (-तन्त्रचक्रवर्त्ति-) नृसिंहदेवशास्त्री दर्शनाचार्यः ।
सहकारिसम्पादकः—
विद्याभास्करपण्डितपरमेश्वरानन्दशास्त्री साहित्योपाध्यायः ।
प्रकाशकः—
परिषन्मन्त्री पं० जगदीशशास्त्री व्याकरणतीर्थः

(उद्योत कार्यालय जौडेमोरी लाहौर)
" Udyot " Office Jaure Mori Lahore.

श्रीकृष्णदीक्षितप्रबन्धेन "बाम्बे मशीन प्रेस मोहनलाल रोड लाहौर" इत्याख्ये स्थाने मुद्रितः । पं० जगदीशशास्त्रिणा च उद्योत-कार्यालयात् "जौडेमोरी लाहौर" इत्यतः प्रकाशितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतस्य कतिचन नियमाः

१—अस्य मासिकपत्रस्य अग्रिमं वार्षिकं देयम् (भारते, ब्रह्मदेशे सिंहले च)—१॥)सार्धरूपकम् ।

२—प्रेषणव्ययो ग्राहकैर्न देयः ।

३—प्रबन्धादिकं समालोचनार्थं ग्रन्थादिकञ्च सम्पादकसमीपे, मूल्यादिकं च प्रकाशकसमीपे निर्दिष्टस्थाने प्रेषणीयम् ।

४—विज्ञापनपत्रादिमुद्रापणव्यवहारविषयोऽपि कार्यालये प्रकाशकसमीपाद्विवेचनीयः ।

५—पत्रं प्रतिसङ्क्रान्ति प्रकाश्येत । येन खलु ग्राहकेण यथाकालं सङ्ख्या नाधिगम्येत तेन तन्मासस्य तृतीयसप्ताहाभ्यन्तर एव कार्यालयाद्विवेच्यम्, नातः परं कस्याप्यभियोगः श्रूयेत, किन्तु तेन प्रथमं स्वपोष्टस्थानं परिशोध्यैव प्रेष्टव्यम् । विवेकार्थं ग्राहकसङ्ख्या चावश्यं लेख्या ।

६—ग्राहकैः स्वस्थानादिकं स्पष्टमेव लेख्यम्।

७—एतस्य ग्राहका अपि साधारणसभ्येषु गण्येरन् ।

८—प्रेषितलेखाः प्रायो यथाक्रमं मुद्राप्येरन् । लेखकैर्न्यूनातिन्यूनं पक्षात्पूर्वमेव लेखाः प्रहीयेरन् । राजविरुद्धान्दोलनलेखाश्च न गृह्येरन् ।

विषयसूची

(प्रबन्धानां गुणदोषयोः प्रबन्धलेखका एव प्रतिभुवः)

विषयः	पत्राङ्कः
१—प्रार्थना ।	१
२—सर्वभाषादिभूता संस्कृतभाषा—लेखकः श्रीयुत पं० जगदीशशास्त्री व्याकरणतीर्थः	२
३—बाणसूक्तिविवेचना—ले०, श्रीयुत ईश्वरचंद्रशर्मा ब्रह्मचारी ।	६
४—वेदावश्यकर्त्तव्यत्वम्—ले०, श्री पं० हरिदत्तशर्मा त्रिवेदी व्याकरणतीर्थो वामाचार्यः	१०
५—प्राचामाचार्य्याणां विज्ञानम्—ले०, पं० जगदीशशास्त्री व्याकरणतीर्थः	१
६—भ्रान्तिसंशोधनम्—ले०, श्रीयुत पं० मुकुंदमिश्रः (वैज्ञानिकः) दरभंगा ।	१
७—सदुपदेशः	१
८—संस्कृतशिक्षा—ले०, पं० छज्जूरामशास्त्री लायलपुर ।	१
९—प्रज्ञाचक्षुःसरोवरे मिथ्यामुक्ताशी हंसः ।	१७
१०—सम्पादकीयम्	२
११—समालोचना ।	२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतः

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नाराद् अज्ञानान्धतमोविनाशपटुता-विख्यात-विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन् "उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥

प्रथमवर्षे- १ | श्रावणसङ्क्रान्त्याम् । वि० सं० १९८५ जून सं० १९२८ | पञ्चमो मयूखः ५

प्रार्थना

[1] विश्वानि देव ! सवितर्दुरितानि यानि
विश्वेश ! तानि भगवन् ! परितो जहीहि ।
भद्राणि यानि मनसा तव वीक्षितानि
सर्वाणि तानि सततं कृपया निधेहि ॥१॥

अभ्यर्थना

[2] गन्धर्वो यः सर्वलोकाधिपश्च द्यावाभूमी पालयन् विश्वबन्धुः ।
दिव्यं देवं तं नराः ! पूजयन्तां नान्यः पन्था श्चित्तसंशोधनाय ॥२॥

१—"विश्वानि देव सवितर्दुरितानि"—(ऋ० ५ । ८२ । ५) इति ।

२—"दिव्यो गन्धर्वो"—(ऋ० २ । २ । १) इत्यादि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मंस्तन्त्वा यौमि भूयो नमस्ते दिव्यैर्मन्त्रैस्तेऽर्चनां संविदध्याम् ।
आशीर्वादं देहि मह्यं विभोऽद्य त्वामुज्झित्वा नान्यदेवं श्रयेऽहम् ॥३॥

सर्वभाषादिभूता संस्कृतभाषा ।

(पूर्वतोऽनुवृत्तम्)

(ले०—श्रीयुत पं० जगदीशशास्त्री व्याकरणतीर्थः)

तासाञ्च पाश्चात्यजातीनां शासितजातिषु राज्यधुरां स्थिरां कर्तुं तत्साहित्ये तदीयनैसर्गिकमनुरागमनेकैरुपायैरपनीय तन्मनोजयाय स्वसाहित्यप्रचारो विधेय इत्यस्ति द्रढीयनाग्रहः, न चासौ कल्पनातल्पशायी, किन्तु सदा सर्वत्र दर्शित-फलः, ब्रह्मास्त्रमिवामोघः । अतएवैताभिः पाश्चात्यजातिभिः प्रभूतेन वित्तव्ययेन विजितजनपदेषु तदीयसाहित्यदूषका उपदेशकाः प्रहीयन्ते । तैश्च परसाहित्यदूषकैः कैश्चिद्भद्रपुरुषैरस्मत्साहित्येऽपि दृष्टिपातः कृतः । तेषां महाशयानां विचारस्य चत्वारः कल्पाः । (१) सर्गादौ किञ्चिन्नासीद् भाषापदाभिधेयं वस्त्विति प्रथमः । (२) अनुकरणेभ्यः शब्दोत्पत्तिरिति द्वितीयः । (३) भारतीयानामार्य्याणाम्पूर्वजा नैतद्देशीया अभूवन्निति तृतीयः । (४) संस्कृतभाषातः प्रागपि काचिदेका वागासी-दिति चतुर्थः । न तत्र प्रथमः सम्भवदुक्तिकः । भाषाऽभावे जायमानस्य कस्यापि ज्ञानस्यादृष्टचरत्वात् । तथा चोक्तं हरिणा—

"न सोऽस्ति प्रत्ययोलोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" इति । ज्ञानाभावे चाहारविहाररूपसकलव्यवहारसमुच्छेदः । तत्समुच्छेदे च सङ्घजीविमानवप्राणिजीवनासम्भवः । नाहि सिंहादिहिंस्रपशुवदे-काकी जीवन् दृष्टो मानवप्राणी केनचित् क्वचित् । ततश्च साम्प्रतमिव सर्गादावपि सकलव्यवहारहेतुभूता काचिद् भाषाऽवश्यमनुमेया, अनुकरणेभ्यः शब्दोत्पत्ति-रपि न विचारसहा । यत एकस्यैवार्थस्यैकस्मिन् वासरे सत्यवसरेऽसकृदभिधा-नायैकोऽपि मानवः पृथगानुपूर्वीकमनियतध्वनिसमूहं मुहुर्व्याहरन्नुन्मत्त इवोपेक्ष्येत प्रत्येयैः । यत्रैकस्येतादृशी दुर्व्यवस्था तत्र कैवाशा समाजव्यवस्थायाः । दृश्यते चासर्गादद्ययावदनवच्छिन्ना समाजव्यवस्था । तस्मादनुकरणाच्छब्दोत्पत्तिमभि-काङ्क्षन् "बृद्धिमिच्छतो मूलमपि नष्टं हा कष्टम्" इति न्यायमनुवदति । तदत्र—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"सर्वेषान्तु स नामानि कर्माणि च पृथक् पृथक् । वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे । (मनु० १—२१) इति मनुना दर्शितो मार्ग एव शरणम् । ऋजुमार्गं परित्यज्य विषमेण पथा गमनन्तु न कस्मैचित्स्वस्थचित्ताय रोचते ।

भारताद् बहिरेव पूर्वीयगोलार्धस्य मध्यप्रदेशे क्वचिदासीत्प्रथमं निवासस्थानमार्य्यजातेः पूर्वजानाम् । न्यवसत्तदा तत्रैकैव जातिः । तस्याः सन्ततिर्बहुषु भुवः प्रदेशेषु यथेच्छमवात्सीत् । तत्तत्प्रदेशेषु गतायास्तस्या भाषाऽपि बहुधाभेदङ्गता । तस्मादेव प्रदेशात् काचिच्छाखा तत्र २ स्वावासान् रचयन्ती जीवनोपयोगिसाधनानां सौलभ्यं तत्प्राचुर्य्यञ्चोपलभ्य भारतं नाम वर्षमुपाससाद । तत एव तस्या देवानां नदीनां नदानां च नामानि पूर्वोज्झितप्रदेशस्य देवनदीनदनामभिः समानानि श्रुतिषु श्रूयन्ते । कञ्चित्सम्बन्धं विना नैतदुपपद्यत इति पाश्चात्यानां विदुषां स्वमतोपष्टम्भायाऽपूर्वावाचो युक्तिः । इयं चान्या वाचोयुक्तिर्यत्—पूर्वीयगोलार्धस्य केन्द्रभूतस्थानासन्नतरेषु केषुचित् प्रदेशेषु व्यवह्रियमाणानां भाषाणां संस्कृतभाषया साम्यं तासां संस्कृतस्य च एक भाषोद्भवत्वानुमाने निदानम् । अस्मिन् कल्पे पाश्चात्यानां मिथः सदृशानि विरुद्धानि च सन्ति यद्यपि बहूनि मतानि तथापि प्रधानमल्लनिबर्हणन्यायेन तेष्वेकस्मिन्नपि परीक्षिते सर्वाणि तानि परीक्षितानि भवन्तीत्येकमेव परीक्षणीयम् । तद्यथा—भारतादेव विजयिन्यार्यजातिस्तेषु तेषु देशेषु स्वानुपनिवेशानुपकल्पयामासेति भारतीयपण्डितानां सम्मतिरेव ज्यायसी यतोऽत्र वेदपुराणस्मृत्यादिप्राचीनशास्त्रेषु बहूनि प्रमाणानि सन्ति प्रत्नतमेतिवृत्तविषयकसत्यानृतत्वविनिश्चयायाधुनिककल्पितयुक्त्यपेक्षया प्रत्नतमशास्त्रप्रमाणमेव गरीयः । यथा अद्यतनतत्तद्दैशिकवृत्तघटनाक्रमनिश्चयाय दैशिकपरत्ववतामपेक्षया दैशिकाऽपरत्ववतां वचांसि भवन्ति भूय आदृतानि तथा कालिकपरत्ववतीतिवृत्ते कालिकपरत्ववतां वचनान्येवोपादेयानि न कालिकापरत्ववताम्—तथाहि—दिग्विजयाय प्रस्थितेन सगरेण राज्ञा भारतीयमहासागरतटवर्तिषु समस्तद्वीपेषु कृतः स्वाधिकारः । एतद्वृतं भारतस्यादिपर्वणि विस्तरेण वर्णितम् । कुरुक्षेत्रीययुद्धात्प्राक् पाण्डवैर्दिग्विजयार्थं प्रथमप्रस्थानेन चीन-त्रिविष्टप-मञ्जुलीय-पारस्यादिदेशेषु स्थापितः स्वाधिकारः । द्वितीयेन प्रयाणेन मिश्रादिदेशेषु समारोपिता विजयवैजयन्त्यः । वृत्तमिदं भारतीयसभापर्वणि स्पष्टम् । स्वायम्भुवमनुसुतेन प्रियव्रतेन सकलापि वसुमती विजिता सप्तधा विभज्य स्वसुतेभ्यो दायतया दत्ता च । वनपर्वाणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाण्डुना कुन्त्यै उत्तरमेरुवासिनीनां नद्या विलासिनीनामवस्था वर्णिता। ऋग्वेदे च सुदासभुज्युप्रभृतीनां राज्ञां विजयवृत्तान्ता विस्तरेण निरूपिताः। करनलअलकाटमहोदयेनापि भारतीयार्य्यगणेन स्वसभ्यतायाः शिल्पकलायाश्च मिश्रादिदेशेषु विस्तारोऽकारीत्युक्तम्। पाश्चात्यपण्डितो मुयरमहोदयस्तु संस्कृतटेस्टनामकनिबन्धे प्रोवाच यन्न कदाचिदार्य्यजातिः प्रतीच्यादिशो भारतमुपागता। अपि तु—भारतीयार्य्यगणसन्ततेरेवानेकपाश्चात्यसभ्यजातीनाम्प्रादुर्भावः। नाप्युत्तरस्या न वा उत्तरपश्चिमाया आशाया अप्यार्या भारतमुपसेदुः। यतः प्राक्काले न प्रतीच्यामवसत् कापि सभ्या जातिर्यतःप्रादुर्बभूवार्य्याणां सभ्यता धर्मौ वा। भाषातत्त्वस्येतिहासे प्राचीनसंस्कृतसाहित्ये वा नैवंविधं प्रमाणं विद्यते येनैतत्सिद्ध्येत् यद्विदेशोद्भवाया जातेरुत्पत्तिरार्य्याणाम्। भारतभिन्नाद् द्वीपान्तराद्वा भारतोपसरणं तेषामितिमनुस्मृतिटीकाकारेण कुल्लूकभट्टेनार्य्यावर्तशब्दस्यार्य्या आवर्तन्ते पुनः २ मृत्वोत्पद्यन्ते यत्र सोयमार्यावर्त इति निर्वचनं कृतं तेनैतत्स्फुटमवगम्यते यत्तत्समयेऽप्यार्य्याणां कुतश्चिदागमनस्य नासीच्चर्चा। किन्तु साम्राज्यविस्तारार्थं वाणिज्यार्थं वा विदेशमुपसृत्य मृतानामपि भारतभूमावेव पुनरपि जायते जन्मेत्येव प्रसिद्धिरासीत्।

साम्राज्यवाणिज्यविस्तारावेव न तदानीन्तनार्य्याणां बहिर्गमनप्रयोजकावास्ताम्, किन्तु भारतभूमिपालैः सङ्ग्रामेषु विजित्य स्वराज्यान्निःसारितानां राज्यविरोधिनां राजन्यानां तदन्येषाञ्चापि बहूनाम्भारतीयानामनेकशो भारताद्बहिर्गमनमभवत्। तथा च विष्णुपुराणम्॥ अ० ४—३ अं० ३

ततो बाहुर्योसौ हैहयतालजङ्घादिभिरवजितोऽन्तर्वत्न्या महिष्या सह वनं प्रविवेश १५ तस्याश्चास पत्न्या गर्भस्तम्भनाय गरो दत्तस्तेनास्या गर्भः सप्तवर्षाणि जठर एव तस्थौ सच बाहुर्वृद्धभावादौर्वाश्रमसमीपे ममार १६ सा तस्य भार्या चितां कृत्वा तमारोप्यानुमरणकृतनिश्चयाभूत्। अथैनामतीतानागतवर्तमानकालवेदी भगवानौर्वः स्वस्मादाश्रमान्निर्याय अब्रवीदलमेतेनासद्ग्रहेणाखिलभूमण्डलपतिवीर्य्यपराक्रमोऽनेकयज्ञकृदरातिपक्षक्षयकर्ता तवोदरे चक्रवर्ती तिष्ठति मैवं मैवं साहसाध्यवसायिनी भवत्वित्युक्ते च सा तस्मादनुमरणनिर्बन्धाद्विरराम १६ तेनैव भगवता स्वाश्रममानीय कतिपयदिनान्तरे च सहैव तेन गरेणातितेजस्वी बालको जज्ञे। तस्यौर्वो जातकर्मादिकां क्रियां निष्पाद्य सगर इति नाम चकार कृतोपयनञ्चैनमौर्वो वेदाञ्छास्त्राण्यशेषाणि अस्त्रञ्चाग्नेय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भार्गवाख्यमध्यापयामास। उत्पन्नबुद्धिश्च मातरमपृच्छत्। अम्ब! कथमत्र वयं क्व तातस्ततोऽस्माकं क इत्येवमादिपृच्छतस्तन्माता सर्वमवोचत। ततः पितृराज्यहरणामर्षितो हैहयतालजङ्घादिवधाय प्रतिज्ञामकरोत्। प्रायशश्च हैहयतालजङ्घाञ्जघान शकयवनकम्बोजपारदपल्हवा हन्यमानास्तत्कुलकुरुं वसिष्ठं शरणं ययुः १८ अथैतान् वसिष्ठो जीवन् मृतकान् कृत्वा सगरमाह। वत्स! अलमेभिरतिजीवन्मृतकैरनुमृतैः १९ एते च मयैव त्वत्प्रतिज्ञापरिपालनाय निजधर्मद्विजसङ्गपरित्यागं कारिताः २० स तथेति तद्गुरुवचनमभिनन्द्य तेषां वेशान्यत्वमकारयत्। यवनान् मुण्डितशिरसोर्ध्वमुण्डाञ् छकान् प्रलम्बकेशान् परदान् पह्लवांश्च श्मश्रुधरान् निःस्वाध्यायवषट्कारानेतानन्यांश्च क्षत्रियांश्चकार। ते च निजधर्मपरित्यागाद् ब्राह्मणैश्च परित्यक्ता म्लेच्छतां ययुः। सगरोऽपि स्वमधिष्ठानमागम्याखलितचक्रः सप्तद्वीपवतीमिमामुर्वीं प्रशशास॥ २१॥

उक्तश्च मनुस्मृतावपि—

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः।
वृषलत्वं गता लोके ब्राह्मणाऽदर्शनेन च॥
पौण्ड्रकाश्चौण्ड्रद्रविडाः काम्बोजा यवनाः शकाः।
पारदाः पल्हवाश्चीनाः किराता दरदाः खशाः॥
मुखबाहूरूपज्जानां या लोके जातयो बहिः।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः॥ (इति)

जात्या अधिकृतेषु प्रदेशेषु तदीयभाषाया शासकभावानाञ्च ग्रहणं स्वप्रभूणां मनस्तोषाय स्वयमेव कुरुते शास्यजातिवर्ग इति न तिरोहितमितिहासविद्भ्यो विद्वद्भ्यो विस्पष्टञ्चैतदद्य भारतेऽवलोक्यत इति।

एवञ्चोद्धृतानुद्धृतानां प्राच्यपाश्चात्यानेकविद्वत्तमसम्मतीनामयमेव सारः, यद् भारतीयानां तत्तद्देशेषु गमनमेव तत्र तत्र भाषासाम्यप्रयोजकं न ततस्तत आगमनमिति।

यदप्युच्यते संस्कृतभाषातः प्रागेका काचित् वागासीत् सैव संस्कृतस्यापि *जननीपदप्रतिष्ठामापेदे इति तदत्यन्तमसत्। नहि तादृशो वाचः सद्भावे भाषासाम्यतोऽतिरिक्तं किञ्चित्प्रमाणं पश्यामः। तत्साम्यनिर्वाहिका उपपत्तयश्च दर्शिता

* संस्कृतभाषा च आदिमायास्तस्या (असत्स्वरूपकल्पायाः) ज्येष्ठा पुत्रीत्याचक्षते तद्विदः। (सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एव । यत्र क्वचन पाश्चात्यैर्विपश्चिद्भिः साम्यव्यभिचारो दर्शितस्तत्रापि तेषामेव साम्यभेदानभिज्ञता न तु साम्यस्यैवासत्त्वम् । तद्यथा संस्कृते कण्ठताल्वाद्यभिघातजन्या वर्णाः, वर्णसंघातः पदम्, पदसंघातो वाक्यम्, वाक्यसंघातो महावाक्यम्, समयसव्यपेक्षबोधकत्वं पदानामित्यादिकस्य सहस्रधा साम्यस्य सत्त्वेऽपि नास्ति साम्यमित्युक्तिः साहसमात्रम् । अथैतादृशं साम्यं भाषाणां मिथो जन्यजनकभावे न नियामकमित्युच्येतान्यैः । भवद्भिर्दर्शितमेव तथास्त्वित्यस्माभिरपि वक्तुं सुकरम् । साम्याभावेऽपि नास्माकं किञ्चिद्धीयते—यतः—

पारंपर्य्यादपभ्रंशा विगुणेष्वभिधातृषु—
प्रसिद्धिं मागता येन तेषां साधुरवाचकः ॥
दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः ।
अनित्यदर्शिनान्त्वस्मिन् वादे बुद्धिविपर्य्ययः ॥

इत्यलं विज्ञेषु ।

बाणसूक्तिविवेचना ।

द्वितीयमयूखस्य १५ पृष्ठतोऽनुवृत्तम् ।

(ले०—ईश्वरचन्द्रशर्म्मा[1] ब्रह्मचारी)

शशिकरनिकरसितसरलशिरोरुहसटालां सैंहीमिवानिष्कपटपराक्रमरसरचितां संक्रान्तो जीवन्नेवजातिम् । (सिंहनादः) (ह० च० पृ० १८९)

जल्पति च किरणपक्ष्मलस्फुरदन्तप्रभानिघातावस्तृतम् ।
विनयप्रणतं वहन्संमुखागतधवलकेसरसटामिव मुखम् ॥

(से० ब० ४ आश्वासक ३८ श्लो०)

पुटपाकविद्धहेमेव पुराणं वस्तु गद्ये मनोहरं संवृत्तम् । दशनविसृत्वरप्रभोत्प्रेक्षितसटापेक्षया शिरोरुहरूपसटाहेतुककेसरिजातिप्रवेशोत्प्रेक्षा केसरित्वं भूम्ना विशदयति । गद्ये "निष्कपटपराक्रप्ररसरचिताम्" इति पदेन काचिदन्यैवच्छविस्समुन्मिषति । न केवलं सिंहाकारसादृश्यमपि तु केसर्येव पुरोवर्ती लोचनगोचरो भवति । अयमभिसन्धिः—

कस्यामपि प्रतिमायां सटासंयोजनैस्सिंहवेशः प्रतीयते । अपरत्र सिंह-

---

१—ईश्वरचन्द्रशर्मणां सञ्चिकापठने तत्संशोधने च यादृशं कष्टमस्माभिरनुभूतं वयमेव जानीमः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरीरं निर्माय सटासम्बन्धपूर्वकं जीवः प्रवेशितः । पूर्वत्र सादृश्यं प्रत्यक्षं परं भेदोऽपि धियमवगाहते । उत्तरत्र तु केसर्येव पुरोवर्तते उत कृत्रिमं शरीरं सजीवं विहितमिति निपुणपरीक्षकोऽपि नावगन्तुमलम् । भूतेन्द्रियवशिनो योगिनो मृतशरीरेषु योगर्द्धिनिष्पादितशरीरेषु वा प्रतिश्य उच्चावचजातीयप्राणितां बिभ्रति । गद्येऽपि वश्यवाक्कविराजवाणालौकिकप्रतिभासामर्थ्येन सिंहनादस्सिंहतांगतो गर्जति । सर्वतंत्रस्वतंत्रवाचस्पतिमिश्रैस्तात्पर्यटीकायामभिहितम्—"अचिन्त्यसामर्थ्यातिशयो हि समाधिः" इति । वयमभिदध्मः—अचिन्त्यसामर्थ्यातिशया कवि-प्रतिभा ।

वाणः कालिदासश्च—

भगवतःकालिदासस्य काव्यमास्वाद्य विद्याविद्योतमानस्वान्तैरखिलैरपि जीवनस्य सफलत्वमुररीकृतम् । तेषां सरसमृदुरचनां मुहुर्मुहुः पठतोऽपि पिपासा न शाम्यति प्रत्युत वर्द्धते । महाकविः क्षेमेन्द्रः कविकर्मणीदं प्रथमतया प्रवर्तमानेभ्यो भगवत्कालिदासप्रणीतप्रबन्धाभ्यासमुपायत्वेन निर्दिशति । भट्टवाणेनैवानन्दनिमग्नेन श्रीकालिदाससूक्तीनामर्थगाम्भीर्यप्रसादसौभाग्यं नवोद्भिन्नमञ्जर्युपमानेनोपश्लोकितम्—

निर्गतासु नवा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥

भगवत्कालिदाससंदृब्धा भावा बाणरचनायां दृश्यन्ते । अत्रोदाह्रियन्ते—

ततः शुचेव मुक्तकण्ठमारटत्सु कृकवाकुकुलेषु गृहगिरितरुशिखरेभ्यः पातयत्सु आत्मनं मन्दिरमयूरेषु, परित्यक्तनिजनिवासेषु च वनाय प्रस्थितेषु पत्ररथकुलेषु, सद्यस्तनूभूते ताम्यति तमसि, मन्दीभूतात्मस्नेहेषु अभावमभिलषत्सु प्रदीपेषु, स्फुरदरुणवल्कलप्रावृतवपुषि प्रव्रज्यामिव प्रतिपन्ने नभसि । (पृ० ध० १७१ पृ०)

उभयोरपि पार्श्ववर्तिनां तुमुलेनार्तरवेण वेजिताः ।
विहगाः कमलाकरालयाः समदुःखा इव तत्र चुक्रुशुः ॥१०३९॥
विलपन्निति कोशलाधिपः करुणार्थग्रथितं प्रियां प्रति ।
अकरोत्पृथिवीरुहानपि स्रुतशाखारसवाष्पदुर्दिनान् ॥८७०॥
नृत्यं मयूरा कुसुमानि वृक्षा दर्भानुपात्तान्विजहुर्हरिण्यः ।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमासीद्रुदितं वनेऽपि ॥१४-६९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विचित्रचारित्रं मनो हर्षशोकादितरङ्गपरम्परापरिप्लवमानं सर्वमपि दृश्यजातं स्वसमानदशमेवेक्षते । दृश्यभावनिमग्नतावर्णनं हृदयस्पृशा क्रमेण विरलानामेव भाग्ये । प्राकृतिकदृश्यरामणीयकोल्लेखातिनिपुणानामपि सन्दर्भेषु रीतिरेषा न दृश्यते । कैश्चिदत्र प्रयतितमपि परमत्यल्पं, तथात्वेऽपि शब्दार्थौ विरूपतां गमितौ । कविकुलवन्द्येन भगवता कालिदासेनेदृशवर्णना हृदयहारिणी कृता । वाणस्तु इतरापरिशीलितक्रमेण सञ्चरन्नस्मिन्नर्थे सर्वमपि काव्यं विच्छायं कुरुते । चिरं विस्तृतवर्णनास्वादैकतानं चित्तं न किंचिदन्यज्जानाति । अत्रैवालोच्यताम्—पद्यप्रतिपादितार्थो शाणोत्तेजितमहातणिरिवान्यादृशी कमनीयतामाकलयति गद्ये । सीताविलायसम्बन्धितृतीयपद्यसदृशार्थोऽभिज्ञानशाकुन्तलेऽपि निबद्धः ।

उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः ॥

शकुन्तलायाः पतिगृहप्रस्थानावसरे प्रियंवदोच्चारितेयमार्या । "नृत्यं मयूराः" "परित्यक्तनर्तना मयूराः" इति च "दर्भानुपात्तान्विजहुर्हरिण्यः" "उद्गलितदर्भकवलाः" इति च न भिद्यते । "कुसुमानि वृक्षा" इत्येतत् "अवसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः" इत्येवमुत्प्रेक्षयालङ्कृत्य परिवर्तितम् ।

इदानीं वाणवक्रिमा निरीक्ष्यताम्—इन्दुमत्यां परलोकगतायां विहगानां सर्वथा निमीलितलोचने महाराजप्रभाकरवर्द्धने प्रभातोत्थितकुक्कुटानां च शोकनिमित्तकाक्रन्दनोत्प्रेक्षोभयत्र समा । इतः परं वाणचमत्कारोऽतिविलक्षणः । पद्ये पशुपक्षिणां नृत्यभोजने दूरीभूते तरवश्चाश्रुकलुषिताननाः, परं वाणस्य भवनकेकिनः गलद्बाष्पप्रवाहैः पानभोजनहानैर्वा धृतिधारणासमर्थास्तनुमपि जिहासन्ति । इतरवत् त्रिभिरपि तत्रैव रोदं रोदं न शान्तं किन्तु समुत्सृत्य निवासभुवमरण्यपन्था आश्रितः । अचेतनाः शुचेत्यं लक्ष्यन्ते—तमसः प्राणाः एव यियासन्ति । दीपाः मरणं प्रतीक्षन्ते । पद्ये तरुलतानामश्रूणि सन्ति । परं मुमूर्षा न कस्यापि प्रागेव तु चेष्टा । गगनशोकोऽप्यत्यधिकः । अश्रवः कियत्यापि कालकलया खे लयं यास्यन्ति । परं प्रव्रज्या जीवनपर्यन्तमवस्थास्यते । एतत्प्रसङ्गस्थ मिदं वाक्यमपि रमणीयतमम् ।

कुलपुत्रेषु इव परित्यक्तनिजकलत्रेषु कृतकरुणप्रलापेषु बनान्तानश्रयत्सु दुःखितेषु चक्रवाकेषु । + + +

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोका विलपन्ति परं तत्रैव, न वने प्रतिष्ठन्ते । मयूरैर्न नर्तनमपि तु प्रिया त्यक्ता यस्यां सर्वेऽपि विलासा आश्रिताः । कुलपुत्रोपमापि नितान्तमनुरूपा ।

विस्तृतवर्णनस्यायमल्पीयानंशः । हृदयमस्य वेत्ति रसं यद्द्रवीभूतं स्पन्दते शृङ्गारान्तरसप्रमेयरचनैरद्वितीयेनाचार्यगोवर्द्धनेन सूक्तम् ।

जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि । प्रागल्भ्यमधिकमाप्तुं वाणी वाणो बभूवेति ॥

गद्यम्—कदाचिन्मकरकेतुकनकनाराचपरम्पराभिरिव कामिनीकरपुट-विनिर्गताभिः कुङ्कुमलाक्षाधाराभिः पिंजरीक्रियमाणकायो लाक्षाजलछटा प्रहारपाटलीकृतदुकूलो मृगमदजलविन्दुशबलचन्दनस्थासकः कनकशृङ्गको-शैश्चिरं चिक्रीड+तारापीडः । (का० ११६ पृ०)

\+ + + +

पद्यम्—

वर्णोदकः कांचनशृङ्गमुक्तैस्तमायताक्ष्यः प्रणयादसिञ्चन् ।

तथागतः सोऽतितरां बभासे सधातुनिष्यन्द इवाद्रिराजः ॥१६७०॥

\+ + + +

वस्त्वेकं वर्णनायां भेदः । धातुरञ्जितमहीधरीयमानीरवर्णं प्रकाशयन्त्यपि शृङ्गारप्रतिकूलमद्रिसन्निभविशालत्वं तुङ्गत्वं च द्योतयन्ती नोचिता । गद्ये रमणी-योत्प्रेक्षयार्थोऽनुप्राणितः ।

यथा २ कुङ्कुमजलधाराः शरीरे पतन्ति तथा २ मदकनकमयविशिखा-घातेनेव शृङ्गारो दिदीपे इति क्रमवर्द्धमानसौभाग्यं गद्य एव राजते । कुङ्कुमला-क्षाकस्तूरीमिश्रितोदकरञ्जितकायकान्तिश्च चक्षुर्बध्नाति ।

महाकविमाघोऽस्मिन्नर्थे निरूप्यताम्—

मुग्धत्वादविदितकैतवप्रयोगा गच्छन्त्यः सपदि पराजयं तरुण्यः ।

ताः कान्तैस्सहकरपुष्करेरिताम्बुव्यात्युक्षीमभिसरणग्लहामदीव्यन् ॥[1]

(शि० व० ८--३२)

अत्र तरुणीनां मौग्ध्यं प्रतिपादितम् परं प्रथितं बालानाम् । अभिसारण-सूचिता कान्ततरुणीनां जलकेल्यासक्तिरुत्तरोत्तरमेधमानशृङ्गारमनुगन्तुं नालम् । सदिहच्छविरपि नात्र विद्यते प्रसादः परं पदानां तनूकृतः ।

१—व्यतिहारेणोक्षणम् । (सम्पा०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गद्यम्—"यस्य त्रिभुवनभुजो भुजशौण्डरूपस्य भवनकमलिनीचक्रवाकीकोपकुटिलकटाक्षितोऽपि भयचकितारुणपरिवर्तितरथो नाज्ञया विना रविरस्तमव्राजीत्"। (ह० च)

\+ + + +

पद्यम्—

पुरे तावन्तमेवास्य तनोति रविरातपम्।
दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥ २—३३ ॥

(कुमारसम्भवम्)

\+ + + +

अत्रापि दूरगामिनातिवक्रेणापि बाणेन विद्धं लक्ष्यम्। तत्र तारकत्रस्तो भानुः कोमलातपः, अत्र दशैवान्या। मास्तु तीव्रतापो मृदुतापेनापि दिवसं परिचरन्सायमस्ताचलगमने बिभेति। भुजशौण्डनरकस्य तु का कथा भवनचक्रवाकीकोपशोणापाङ्गवीक्षितस्यारुणो रथं परावर्तयति। सोऽयमीदृशः प्रतापो येनानुजीविनामवनाभितपरोत्साहस्तेजःप्रसरः ॥ (सावशेषम्)

वेदावश्यकर्त्तव्यत्वम्।

(ले० श्रीयुतहरिदत्तशर्मा त्रिवेदी व्याकरणतीर्थो वामाचार्यः)

संगिरन्ते[1] हि वादिदिग्दन्तिमदावलेपनिर्हेपाः पूर्वमीमांसाशेमुषीमुषितहृदयसारा मीमांसकत्वाभिमानिनो वेदानामकृतकत्वम् तेषां मूलगवेषणे न केनचित्किंचिदपि प्रमाणजालालवालायितं वालायिताचरणमिव समुदितमपि वेदः कृतको न भवति अस्मर्यमाणकर्तृकत्वादिति तेषां ग्रन्थग्रन्थिनिबद्धमसंपन्नमनुमानं न मञ्जु मञ्जीरशिञ्जायमानं वाग्वादिनीचरणकमलसविधे वाक्यत्वाद्धि सकर्तृकत्वेसिद्धे कर्तृनामनिष्कासनस्य पाश्चात्यैः सम्पादयितुं सुशकत्वेन अविच्छिन्नकर्तृनामलेखनपरिपाटीशून्यत्वसंशयविषयत्वोपाधिकत्वेन निर्बलत्वात्पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधिकत्वात् पूर्वोक्तसकर्तृकत्वसाधकवाक्यत्वहेतो

१—यथादृष्टं तथैव मुद्रितं बोध्यम्। केचित्सम्पादक कृते संशोधने कुपिता अपि भवन्तीत्यस्माभिरसौ मार्गः प्रायः परित्यक्तः। (सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपक्षत्वासम्भवात् तत्प्रतिपक्षकत्वेनाकर्तृकत्वसाध्यसिद्धिप्रतिबन्धात् स्वरूपासिद्धिश्च भागवतादौ व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधमिति, व्यासस्योक्तेः वेदोत्सादमवेक्ष्य प्रतिमन्वन्तरं चैषाश्रुतिरन्या विधीयते इत्युदयनोदितपुराणान्तर वाक्याच्च किञ्च वेदः पुराणमूलको भवितुमर्हति तत्स्मृतिपूर्वकोत्पत्तिकत्वात् भाषाभेदविदां भाषान्तरशब्दस्मरणपूर्वक संस्कृतश्लोकनिर्माणस्येव यद्यत्स्मरण पूर्वकोत्पत्तिकं तत्तन्मूलकमिति सामान्यव्याप्त्या तत्स्मृतिपूर्वकवाक्यजातमात्रस्य स्मरणतद्विषयशकतदर्थप्रयोज्यत्वावधारणसिद्धेः तदभिहितं मत्स्यपुराणे श्रीकृष्णवादरायणेन परमविद्येश्वरावतारेण तृतीयाध्याये तपश्चचार प्रथमममराणां पितामहः आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः २ श्लो–इत्युपक्रम्य पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणास्मृतम् । नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम् ३ । अनन्तरं च वक्त्रेभ्योवेदास्तस्य विनिर्गताः मीमांसान्यायविद्याश्च प्रमाणाष्टकसंयुताः ४ ॥ इत्येवः मुक्तेः सृष्ट्यादिसमसमये ब्रह्मणाऽपि पुराणस्मरणपूर्वकवेदानुमानं भाषणं च विहितं तत्प्रतिभानुसारि च किंचित् २ स्वोपयोगिमन्त्रजातमृषिभिर्भूलोके स्मृतम् । सर्वं विज्ञायमहर्षिजाते ब्रह्महृद्गतं च भूलोकब्रह्मणा परमपरमेश्वरेणज्ञानावतारेण व्यासेन पुराणरचनापूर्वकं वेदानामकारिनिर्माणं पुराणतन्मूलकत्वबोधनाय बीजवृक्षवदनादिपरम्परा धारादर्शनाय तत्सकलमूलबीजं च भैरवोदितबीजरूपबीजजालमेवेति बीजतट्टीकाख्यपुराणमूलकएववेद इति प्रवाहोनादिपरम्परयाजायते स्वतन्त्रेश्वरेच्छानियमेन अक्षरविद्याशिक्षणे हि विन्दुनादात्मकमेव सर्वं विन्दु० नाद (।) समुद्भवमक्षरजातं शिक्षयिष्यते एतन्निबन्धसमाप्त्युत्तर मुद्योते प्रकाशस्थानलाभे अतएव स्वकृतत्वं व्यासवेदस्य सर्वस्य भागवते प्रथमस्कन्धे तुर्याध्याये चातुर्होत्रं कर्मशुद्धं प्रजानां वीक्ष्य वैदिकं व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधमित्युदितम् । नचैकस्यैव पूर्व सिद्धस्य वेदस्य भागान्विभज्य पाठनमात्रं तदर्थ इति भ्रमणीयम् व्यदधादित्येकभावनायामाख्यातांशधातु (मी० मने तिङ्) प्रतिपाद्यायां चतुर्विधत्वविशिष्टवेदस्य कर्मत्वप्रतिपत्तेः (मीमांसकमते साधनत्वप्रमितेः) न च लोहितोष्णीषा ऋत्विजः प्रचरन्तीतिवद्ग्धदहनन्यायेन विशेषणमात्रेऽपि पर्यवसानं ह्रासाभावे भागाना । मसिद्धत्वेन वेदस्यचदृष्टान्तवैषम्यात् । नच वेदमेकं स्मृतवानितिशेषः तथात्तं चतुर्विधं व्यदधादि त्यन्वयस्य योग्यताशेषपूर्त्तौ मानाभावाद्वाक्यभेदा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पत्तेश्च विध्यनुवादविरोधरूपजैमिनिसिद्धान्तदूषणग्रासावशेषात् (इतः परं वह्वशि(१)ष्टो निबन्ध एषजैमिनिसूत्रयथार्थार्थप्रकाशनभागपर्यन्तः ।

प्राचामाचार्य्याणां विज्ञानम् ।

(ले०—पं० जगदीशशास्त्री व्याकरणतीर्थः)

प्रियपाठकमहाभागाः ! अस्मदाचार्य्यवर्य्यैः सर्वेषु विषयेष्वनेके निबन्धा रचिता येषु प्रभूता विनष्टा नष्टशिष्टा अप्यस्मदुपेक्षया अवश्यं नङ्क्ष्यन्तीति नात्र सन्देहावसरः । अस्मदाचार्य्यैर्निर्मितानादाय ग्रन्थान् पाश्चात्या विद्वांसः प्रभूतेनाल्पेन वा कालेन तत्र तत्र निरूपितं विषयजातं सम्यक् परीक्ष्य किञ्चिदिव नामरूपादिकं परिवर्त्य विपणौ विक्रीय स्वयं प्रचुरं वित्तमुपार्जन्ति जनानां च दुःखं निवार्य्य पुण्यभाजोयशोभाजश्च भवन्ति । साम्प्रतं मूषकमशकमक्षिकामत्कुणादीनां निवारणार्थं कानिचित् चूर्णानि (पाउडर) लभ्यन्ते । तानि च वैदेशिकवैद्यैः (डाक्टर) एवास्मत्पण्यवीथिकासु प्रहीयन्ते । अस्माकं वैद्या अपि आचार्य्यनिर्मितेषु ग्रन्थेषु लिखितान् योगान् परीक्ष्य तेषां प्रचारायोद्युञ्जीरंश्चेत् तदा मन्येऽस्माकमाचार्य्याणां गौरवं ग्रन्थानां रक्षा धनपुण्ययशोलाभादयश्च स्युः ।

सम्प्रत्युपलभ्यमानि मूषकमशकादिनिवारकाणि चूर्णाणि पूर्वमस्मत्पूर्वजैरेवाभ्यूहितानि न पाश्चात्यैः । अस्यैवार्थस्य विशदीकरणायाधस्तनः पाठः पाठकमहोदयेभ्य उपहारीक्रियते दीयतामितोवधानं विशेषतो वैद्यैः । प्रत्येकं योगं परीक्ष्य तत्फलमुद्योते प्रकाशनीयमिति सानुनयं सानुरोधं च प्रार्थ्यन्ते वैद्यवराः—

(अथ मूषकमत्कुणादिकृतगृहक्लेशनिवारणम्)

१—तक्रपिष्टेन तालेन क्षिपेत् पुत्तलिकाकृतिम्
तामाघ्राय गृहाद् यान्ति मक्षिका नात्र संशयः ॥

२—गुडार्कदुग्धकुल्माषतिलचूर्णसमन्वितम्
अर्कपत्रेषु विन्यस्तं मूषिकान्तकरं गृहे ॥

---

(१) अवशिष्टनिबन्धमुद्रणोत्तरमवश्यमस्मिन्विषये विद्वांसो विवेचनां विधास्यन्तीति सम्भाव्यते उपयुक्ततरोयं वेदविवेचनाविषयः । वयन्तु विद्वज्जनविचारणोत्तरं स्वसिद्धान्तं प्रकाशयिष्यामः । वामाचार्यमहाशयाः शीघ्रमेवाऽवशिष्टं प्रेषयन्तु । परं लेखो नातिदीर्घः स्यात् । (सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३—धुस्तूरबीजचूर्णञ्च विकंपं पेषितं जलैः
तैरेव विषपाषाणं तिलतैलेन पेषितम् ॥
वटिकां स्थापयेद् गेहे जलं रात्रौ निरुन्धयेत्
भक्षणात् पञ्चतां यान्ति तृष्णार्ता मूषिका ध्रुवम् ॥

४—तालकं छागविण्मूत्रं सपलाण्डु सुपेषितम्
आलिप्य संमुखं तेन सजीवन्तु विसर्जयेत् ।
तं दृष्ट्वैव गृहं त्यक्त्वा पलायन्ते हि मूषिकाः ॥

५—मार्जारस्य मलं तालं पिष्ट्वा लिम्पेच्च मूषकम् ।
तमाघ्राय गृहं त्यक्त्वा सद्यो निर्यान्ति मूषकाः

६—गन्धकं हरितालञ्च ब्राह्मी त्रिकटुकं समम् ॥
रवौ नृमूत्रतः पिष्ट्वा लिप्त्वा मूषन्तु पूर्ववत्

७—मघाया ब्रुध्नकं क्षेत्रे स्थापयेन्मधुकोद्भवम् ॥
पक्षिणां मूषिकाणाञ्च जायते तुण्डबन्धनम्

८—मूषकाकर्षणं दीपं साम्बरीगुडतैलतः ॥
कुलीरवसया पूर्णः कृतस्तस्यैव कर्परः
दीपो मत्कुणसङ्घातं रात्रावा कर्षयेद् ध्रुवम् ॥
स्थलं कुभाजटां बध्वा शयनात् यान्ति मत्कुणाः

९—रोहिषतृणपुष्पाणि वन्हिमध्ये निवेशयेत् ॥
तद्दीपदर्शनादेव क्षिप्रं नश्यन्ति मत्कुणाः

१०—अर्कतूलमयीं वर्तीं भावयेद् यावकेन च ॥
क्षिप्ता सा कटु तैलेन निः शेषा यान्ति मत्कुणाः

११—अर्जुनस्य फलं पुष्पं लाक्षा श्रीवासगुग्गुलुः ॥
श्वेतापराजितामूलं भल्लातकविडंगकम्
धूपः सर्जरसोपेतः प्रदेयो गृहमध्यतः ॥
सर्पाश्च मत्कुणा मूषा गन्धाद्यान्ति दिशो दश

१२—गुडश्रीवासभल्लातविडंगं त्रिफलायुतम् ॥
लाक्षा रसोऽर्क पुष्पञ्च धूपान्मशकमत्कुणान्
नाशयेन्नात्र सन्देहः सर्पमूषकवृश्चिकान् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३—मुस्तसिद्धार्थभल्लातकपिकच्छुफलं गुडम्
चूर्णं भानुफलोपेतं दहेत्सर्वसरान्वितम् ॥
मत्कुणा मशकाः सर्पा मूषका विषकीटकाः
पलायन्ते गृहं त्यक्त्वा यथा युद्धेषु कातराः ॥
१४—राजवृक्षफलं बद्धं खट्वायां मत्कुणापहम्
१५—लाक्षासर्जरसोशीरसर्षपाः पत्रकं पुरम् ।
भल्लातकं विडंगानि रेणुका पुष्करं तथा
अर्जुनस्य तु पुष्पाणि समं चूर्णं प्रधूपयेत् ।
सर्पकीटकलूतानि पलायन्ते न संशयः
दर्दुरान् मशकान् हन्ति धूपाद्वा गृहधारणात्
इति श्रीपार्वतीपुत्रनित्यनाथसिद्धविरचिते रसरत्नान्तर्गते
मन्त्रखण्डे एकादशोऽध्यायः ॥

भ्रान्तिसंशोधनम् ।

(ले०—पण्डित मुकुन्दमिश्रः (वैज्ञानिकः) भुवनेश्वरी विद्याभवन देपुरा दरभङ्गा)

साम्प्रतं प्रकाशितबृहज्जातके तट्टीकाकर्त्तुर्माननीयभट्टोत्पलस्य बृहज्जातकटीकारचनाकाल आधुनिकटिप्पणीकर्त्रा परिवर्त्तित इति परन्त्वत्राऽस्माकमिदं वक्तव्यमस्ति यद्यदि भट्टोत्पलेन १६८८ शाक वर्षे बृहज्जातकस्य टीका कृता तर्हि केशवीयजातक पद्धतेष्टीकाकर्त्रा दैवज्ञश्रीदिवाकरेण, स्वोच्चोनोद्युचरोङ्गभात्समधिकोग्राह्य इत्यादि श्लोकटीकायां "हित्वावक्रमित्यस्य व्याख्यावसरे भट्टोत्पलेनाप्युक्तम्" तथा च तस्यैव श्लोकस्य टीकायां "यत्तु बृहज्जातकटीकायां भूम्याः पुत्रं वर्जयित्वेत्यादि" एवमन्येषामपि श्लोकानां बहूनां टीकायां भट्टोत्पलस्य मतानि गृहीतानि परन्तु दिवाकरदैवज्ञस्य प्रौढमनोरमाटीकारचनाकालः १५४८ शकाब्दः, एतेन किमायाति यत् १६८८ शाकवर्षात् १४० वर्षमिततोपि पूर्वमेव भट्टोत्पलस्य सत्त्वात् १६८८ शाकवर्षे बृहज्जातकोपरि तेन टीका न कृतेति सिद्ध्यति, तथा च प्रौढमनोरमाटीकायामेव "केशवतः परमप्राचीनेन भट्टोत्पलेनेत्यादि" दिवाकरदैवज्ञलेखादेवस्पष्टमवगम्यते यद् गणेशदैवज्ञादुत्पलः पूर्वकालीनः, गणेशदैवज्ञेन १४४२ शाकवर्षे ग्रहलाघवमकारि, तथा मुहूर्त्तचिन्तामणेः पीयूषधारा टीका गोविन्द

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवज्ञेन १५२५ शाकवर्षे कृता परन्तु पीयूषधाराटीकायां "जन्मोत्थं च विलोक्येत्यादि व्याख्यावसरे योयो भावः स्वामिदृष्ट इत्यादिभट्टोत्पलमतमङ्गीकृतम्" तथा च "आदौ सम्पूज्य रत्नादिभिरित्यादिव्याख्यावसरेऽपि भट्टोत्पलमतमङ्गीकृतम् ।" एतेन च १६८८ शाकवर्षात्पूर्वमेव १६३ वर्षे भट्टोत्पलस्य सत्तासीत्, तथा परमपूज्यमाननीयगुरुवर पं० श्रीसुधाकरद्विवेदिमहामहोपाध्यायेन सूर्यसिद्धान्तस्य भूमिकायां भट्टोत्पलस्य बृज्जातकटीकाकालः ८८८ शाकवर्षीयो लिखितः, एतेन किमायाति यत् १६८८ शाकवर्षे भट्टोत्पलेन बृहज्जातकस्य टीका न कृतेति सिद्धान्तः । लेखमिमं दृष्ट्वा सम्प्रतिप्रकाशितबृहज्जातकसंशोधकेन क्रोधो न करणीय एतावता तस्य संशोधकत्वे नहि काचिदापत्तिर्भविष्यति,मत्कथनस्येदं तात्पर्यं यद्वस्वष्टाष्टिमिते शाके इति पाठः साधुरिति कथमिति स्वयमेवगवेषणां कृत्वा संशोधकेन पुस्तकस्य द्वितीयसंस्करणे सच पाठः संस्कर्त्तव्य इति ।

सदुपदेशः ।

(ले०—पण्डित मुकुन्दमिश्रः (वैज्ञाविकः) प्रधानाध्यापकः भुवनेश्वरीविद्याभवन देपुरा, दरभङ्गा)

विदितमेवास्ति सर्वेषां सूर्योदयपाठकानां यद्गताग्रहणमासीयामावास्याप्रकाशितसूर्योदये "पण्डितप्रवरश्रीनीलाम्बरझाकृतगोलीयरेखागणितस्य टीकाकर्त्तुः परिशिष्टस्थेष्टचापोपरि चापीयसमत्रिभुजरचनप्रकारस्य खण्डनं मत्कृतं विलोक्य मुखे सति किमपि वक्तव्यमिति मत्वा पं० अनूपमिश्रेण बलात्तद्विरुद्धलेखः प्रकाशितः"—

तत्रोक्तपण्डितमहाशयेनेदमेव प्रधानकारणं दत्तं यद्गोलत्रिबाहौ खरसाग्निभागादल्पा भुजानामपि संयुतिः स्यादिति । परमिष्टचापोपरि चापीयसमत्रिभुजरचनातोऽर्वागेवोक्तत्रिभुजे भुजत्रययोगो भांशाल्पोभवतीति तत्कृतपरिशिष्टान्न सिद्ध्यति । यतस्तत्परिशिष्टे चापीयसमत्रिभुजरचनानन्तरं चापीयत्रिभुजे भुजयोरन्तरं तृतीयभुजादल्पं भवतीति लिखितमस्ति । परं चापीयत्रिभुजे भुजयोरन्तरं तृतीयभुजादल्पं भवति वा भुजयोर्योगस्तृतीयभुजादधिको भवत्यनयोरेकस्य सिद्धत्वे द्वितीयस्यापि सिद्धिः । उक्तत्रिभुजे भुजयोर्योगस्तृतीयभुजादधिकोभवति" सहायतां गृहीता भवति तेनोक्तपण्डितकथनं न युक्तमिति विज्ञैर्ज्ञेयम् । अथेष्टचापस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२० समत्वे तदधिकत्वे च तदुपरि चापीयसमत्रिभुजरचनायाः खण्डनं परिभाषाबलेनैव यथाभवेत्तथाकर्त्तव्यमिति मनसि धृत्वा मया तत्खण्डनं प्रदर्शितम् । तथाचे"तन्मनोभ्रान्तिजातमन्यन्नेति" ति यदुक्तं तत्रास्माकमयमाशयो यदुक्तपण्डितसदृशानां महाशयानां यदि न्यस्तवृत्तद्वयं महद्वृत्ताद्भिन्नं भवेत्तदा को दोष इति रूपाऽशङ्का भवेत्तदर्थं न्यस्तवृत्तद्वयं महद्वृत्ताद्भिन्नं स्वीकृत्य तत्खण्डनं मया प्रदर्शितम् । महद्वृत्तीयेष्टचापस्य १२० समत्वे तदधिकत्वेचे (निर्दिष्टविन्दुत दृष्टचापसमानं चापं कर्त्तव्यम्) तिपरिशिष्टलेखोपि व्यभिचरिष्यति । पं० अनूमिश्रमहाशय ! निरर्थकलेखेन किमपि फलं न भवति । मत्कृतखण्डनं भवद्भिः शिरसा धार्यमिति ।

संस्कृतशिक्षा ।

(ले० कुरुक्षेत्रीय पं० छज्जूरामशास्त्री कविरत्नविद्यासागरः
प्रिंसिपल—ऋषिकुलमहाविद्यालय लायलपुर)

कृत्वा यो मां काव्यकारेषु रत्नम् (कविरत्नम्) चक्रे 'विद्यासागरं' चापि भूयः ।
ख्यातिं निन्ये तत्पदाभ्यां च लोके, तस्मिन्सोमे शङ्करे मे रतिः स्तात् ॥ १ ॥

अहो प्रभावः कालस्य यया सर्वे सुशिक्षिताः ।
तस्याः संस्कृतशिक्षाया नादरः साम्प्रतं क्वचित् ॥ २ ॥
ज्ञातव्यं नाम शिक्षाया लक्ष्म विज्ञानशालिता ।
ज्ञातव्याः शिक्षितास्तेहि येषां विज्ञानमद्भुतम् ॥ ३ ॥
अस्माभिर्यच्च शिक्षाया द्रव्योपार्जनमेव हि ।
फलं सम्भाव्यते तत्तु नातीव हृदयङ्गमम् ॥ ४ ॥
आङ्गलीय शिक्षावेत्तारो द्विगुणं वा चतुर्गुणम् ।
अस्मत्किलोपार्जयन्ति धनं प्रतिदिनं यतः ॥ ५ ॥
सम्मानलब्धिरप्येकं शिक्षाफलमनुत्तमम् ।
परं संस्कृतशिक्षायाः सापि नैव विलोक्यते ॥ ६ ॥
कुर्वन्ति साम्प्रतं छात्राः शब्दज्ञाने परिश्रमम् ।
शीघ्रता पारवश्येन ह्रासोऽर्थस्य ततोऽभवत् ॥ ७ ॥
अर्थविज्ञानमालंब्य नूनं पाश्चात्यपण्डिताः ।
धूम्रयानादियन्त्राणि आविष्कुर्वन्त्यनेकशः ॥ ८ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरा संस्कृतशिक्षायाः फलमर्थज्ञता परम् ।
मन्यते स्म ततोऽस्माकमादरः सर्वतोऽभवत् ॥ ९ ॥
इदानीमाङ्गलशिक्षायाः प्रणालीमवलम्ब्य नः ।
परीक्षोद्देशमात्रेण शास्त्रपाठे प्रवर्तनम् ॥ १० ॥
शिक्षापरीक्षयोर्मध्ये परीक्षैव गरीयसी ।
मन्यते साम्प्रतं यस्मात्परीक्षामात्रशिक्षणम् ॥ ११ ॥
यदि ग्रन्थपदार्थो न ज्ञायते शुकवत्ततः ।
सर्वो ग्रन्थः समुद्घुष्यः किमर्थेन प्रयोजनम् ॥ १२ ॥
गतानुगतिकन्यायात्पाठ्यते पठ्यते बुधैः ।
तत्सर्वार्थपरिज्ञाने न कैश्चिदपि यत्यते ॥ १३ ॥
एवं संस्कृतशिक्षायाः वयमेव समुन्नतौ ।
उद्घाट्य चक्षुर्द्रष्टव्य मभूम प्रतिबन्धकाः ॥ १४ ॥
सर्वोपयोगिविज्ञानं यतोऽस्याः सम्भवेत्पुनः ।
तथा प्रयत्नः कर्तव्यो ममैषा प्रार्थना जनाः ॥ १५ ॥

प्रज्ञाचक्षुःसरोवरे मिथ्यामुक्ताशी हंसः ।

अयि ! उद्योतप्रियाः ! प्रियपाठकमहाभागाः ! विदाङ्कुर्वन्त्वत्रभवन्तो यद्-उद्योतस्य चतुर्थे मयूखे "अस्थानभ्रमस्य दूरीकरणम्" इतिशीर्षको लेखो मुद्रितः पठितश्च भविष्यति प्रायः सर्वैरेव विवेचनाचणैर्यत्र व्यक्तिगताक्षेपो दूरीत्या वान्तो लेखकेन, घृणितशब्दैश्च सम्पादकोपरि दुर्भावधारा तथा प्रवाहिता यथा च श्रीमतां पुरतः तेषां शब्दानां पुनरनुवादकरणेऽपि महती घृणैवायाति । यद्यप्येवंविधदुर्ललितलेखस्य मुद्रणप्रतिषेधेऽपि सर्वथा सम्पादकस्वातन्त्र्यं तथाप्यत्रत्यस्थितिमनुसन्धानानामुद्योतप्रबन्धकानां मतमनुरुध्य तस्य मुद्रणमचीकरम् । वस्तुतोऽयं लेखो माधवभाण्डारीमहोदयानामेव यतस्तैर्मया सहैतद्विषये वार्त्तालापङ्कुर्वाणैः प्रकारान्तरेण स्वयं तथैव स्वीकृतम् । आस्तां तावदनया

१—एतेषां हृदि स्वयूथ्याऽहिताचरणकरणस्य महानभिमानो यत एतेषां वाक्यानि श्रुतिसमतयैव प्रमाणीकुर्वन्ति केचिन्महोदयाः निरपराधानामप्यस्माकं वचःसु च न तथा श्रद्धधते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिन्तया, वयन्तु[२] तादृशघृणितशब्दानुपेक्ष्य[३] शास्त्रीयं तत्त्वमेव विदुषां पुरतः स्थापयामो येन सारासारविवेकधिषणावधीरितविबुधाचार्यविचार्यकार्यसाहित्या विबुधेन्द्रा द्रक्ष्यन्ति यदस्य भाण्डारीमहोदयानां हंसस्य पक्षयोः कीदृशं शास्त्रव्योमनि उड्डयनबलमस्तीति । भाण्डारीमहोदयनिर्मितोद्योताशीःपद्ये "कार्योद्गारिप्रवृत्तिजातघटनासार"–इति पदे "रि" इत्यक्षरस्य संयुक्तादित्वाद्गुरुत्वे जायत एव छन्दोभङ्गो यदि अस्यापवादस्थलं न स्वीक्रियेत प्रजापतिनापि तस्य साधनं कर्त्तुं न पार्येत । यथाचात्र छन्दोभङ्गदोषाभावसमाधानमपवादशास्त्रेणोद्योतेऽपि प्रदर्शितं तथैव मन्निर्मिते काव्यादर्शीयकुसुमप्रतिमासमर्पणरूपे "रघुवर ! माथुर ! नागर ! श्रीलश्रीशारदाबन्धो !" इत्याकारके पद्येऽपि दोषाभाव एव मन्तव्यो भवितुमर्हति, यमजानद्भिरेव माधवशास्त्रिभिर्हठाद्वा महत्सु मुधा स्वप्रभावनिपातनहेतोर्वा पद्यमिदं छन्दोभङ्गदोषदूषितमिति क्वचित्पत्रे लिखितं क्वचिद्दत्तश्च, स्वयन्त्वस्मिन् पद्ये शास्त्रिभिस्तथैव स्खलितम् । एतेषां हितमाचरतैव उद्योतप्रबन्धकान्यतमेन केनचिद्विदुषा तृतीयमयूखस्य सप्तमे पुटके "ननु"—इत्यादिलेखं कुर्वता तथा दोषाभावः सुसमाहितो यथा द्वयोरेव पण्डितयोः कवितायां न कैश्चिदपि दोषबुद्धिः करणीयेत्येतावता हितमेवामीषामाचरितं स्यात् । किन्तु टिप्पणसूचनाबोधनकरी रेखा प्रमादान्न तत्र मुद्रिता । तादृशं हितमनाकलय्यैव हितेऽप्यहितां धियं दधानाः श्रीमाधवशास्त्रिणो मयि बहु कुपिताः सन्तः, अस्तव्यस्तादिकमप्यवोचन् । अहञ्च "पण्डितकलहप्रेक्षासमाजघटनयेतरे फलभाजो भवन्ति, पण्डिताश्च लोकदृष्टौ पुरैव गलितमाना अतीवघृणास्पदं लभन्ते" इत्यालोचयन् शान्तिमेवाशिश्रियम् । एवमुपेक्षामन्दिरे विराजमानेऽपि मयि श्रीमन्तो भाण्डारीमहोदया मिथ्यामार्गेण हंसद्वारा स्वपक्षबलप्रदर्शनं कृतवन्तो मम श्लोके

महान्तोऽपि सन्तः । परं शास्त्रविषये कस्यचिदुपरि मुधा बलात्करणं कथं शोभावहमिति स्वयं विवेचयन्तु विवेचनपटवः पण्डितसुरपतय इति न वयं स्वमुखादधिकं स्वविषये वक्तुमुचितं मन्यामहे । (सम्पा०)

२—माधवशास्त्रिणां मानकृतः ।

३—सम्पादको श्रीमन्तं माधवशास्त्रिणं **"महाशयैः" "श्रीयुतै"** रित्येवमादिभिः सुप्रतिष्ठितैरादरसूचकैः शब्दैर्लिखत्यामन्त्रयते च माधवशास्त्रिमहोदयस्तु—**"कश्चित्—अनुद्घाटितचक्षुः"** इत्यादिभिरपमानसूचकैः शब्दै र्व्यवहरति व्यवहारयति चेति अहो सुप्रशस्या—एतेषां विज्ञता, माननीयाश्चैते महतां पदवीं प्राप्ताः । (सम्पा०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैव दोषधियं व्यवातिष्ठिपन्त । माञ्च शास्त्रार्थायाऽपि समाह्वयन्त । भवतु सम्प्रत्यहं हंसमेव सम्बोधयन् "शास्त्रं हंसपक्षवलं समर्थयति ? आहो ! नरकेसरिक्रान्तिमेव परिपोषयतीति" विभावयंश्च प्रकृतमनुसरामि ।

अयि ! हंस[1] ! "उद्योताशीःपद्यस्थे "कार्योद्गारिप्रवृत्ति गातघटनासार"—इति पदे-(सूर्यप्रकाशपक्षे) कार्यपर्यवसायिप्रवृत्तिमात्रफलके इत्यर्थके, उद्योतपुस्तकपक्षे कर्त्तव्यप्रकाशवृत्तान्तजातैकत्रीकरणफलक इत्यर्थके श्लेषेणार्थद्वयबोधानाय 'प्रवृत्ति' शब्दे निवेशितेऽपि गुरुत्वमपूर्वस्य न भवति "वर्णो गुरुर्मतो ह्रेप्रे पादान्ते चापि वा लघु इत्यनुशासनात्" इत्याचक्षीथाः तत्तवच्छन्दःशास्त्रगगनतरङ्गिणीसन्तरणाऽनभिज्ञतानिबन्धनसमुत्थानं प्रकटयतीत्यनादेयम । यतो नहि क्वचिदपि छन्दःशास्त्रे श्लेषस्थले संयुक्ताद्यस्य गुरुत्वाभावो भवतीति नियमो दृश्यते ।

अत्र भवल्लिखितस्यायं प्रयोगः प्रतिफलति—"कार्योद्गारिप्रवृत्ति"—इत्याद्यं पद्यं छन्दोभङ्गात्मकदोषाभाववत् श्लेषेणार्थद्वयबोधकपदवत्त्वात् येनध्वस्तेत्यादिपद्यवत्" इति । परञ्चात्र "तथा शास्त्रकारानुशिष्टत्व" मुपाधिः । यत्र यत्र छन्दोभङ्गात्मकदोषाभावः तत्र तत्र शास्त्रकारानुशिष्टत्वं यथा "प्राप्तनाभिह्रदमज्जनमाशु" इत्यादाविति साध्यव्यापकता । यत्र २ श्लेषेणार्थद्वयबोधकपदवत्त्वं तत्र २ तथा शास्त्रकारानुशिष्टत्वं नास्तीति साधनाव्यापकतेति सोपाधिकहेतोः कथं साध्यप्रसिद्धिरिति बुद्धिनेत्रे उन्मीलयतु भवान् । अथ "ह्रेप्रे' इति विशिष्टमर्थद्वयबोधकपदवत्त्वं हेतूकरोषि तदापि तथैवोपाधिरायास्यति विशिष्टवैशिष्ट्यस्यापि तादृशस्य छन्दःशास्त्रकाराऽननुमतत्वादिति बुद्धिनेत्रमुद्घाट्यालोच्यतां गुरु र्वा कश्चन विशिष्ट उपास्यतामित्येव शासनीयोऽसि प्रिय ! हंस !

यत्तु—"रघुवर माथुर" इत्याद्यारभ्य 'लेखकाशय" इत्यन्तं लिखित्वा "अत्रोच्यते—किमत्र दृष्टान्तमात्रेण गुरुत्वाभावो वर्ण्यते ? उत उक्तप्रमाणेन ? दृष्टान्तमात्रेण चेत्तर्हि सर्वत्रैवाऽव्यवस्थाप्रसंगः[2], शास्त्रकृतनियमवैयर्थ्यापत्तिश्च उक्तप्रमाणेनेति चेत् न अनेन हि प्रमाणेन केवलं ह्रेप्रेपरतो विकल्पेन गुरुत्वं विधीयते तथाच पादान्तलघो[3] विकल्पेन गुरुत्वं विधीयते नतु गुरोर्लघुत्वं विधीयते

---

१ यद्यहं हंसपक्षेषु क्रमणं कुर्या तदा तत्र कियत्यो व्याकरणस्खलितय इति साधुप्रकटितं स्यात् परं ग्रन्थगौरवादित उपेक्षे । (सम्पा०)

२ "प्रसङ्ग" इति लेखनीये "प्रसंग" इति लिखन् वैयाकरणखसूचितां प्रकटयति ।

३ आलोचयन्तु पण्डिता अस्य शास्त्रिताम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाच श्रीशब्दे परे पूर्वस्य गुरुत्वं केन वार्येत" इक्तन्तमुक्तम्। अत्र ब्रूमः मुधैव ते विकल्पकरणाभिमानः। प्रकृते—(रघुवर ! माथुर ! नागर ! श्रील ! श्रीशारदावन्धो !) इत्यत्र श्रीशब्दस्य पादादिवर्णत्वात् तद्वर्त्तिनः संयोगस्य क्रमसञ्ज्ञकतया पूर्ववर्त्तिनो गुरोरपि-आचार्यैर्लघुताया इष्टत्वात्। तदेतत् वृत्तरत्नाकरस्य परिभाषाध्याये "पादादाविह वर्णस्य"—इत्युक्त्वा "तरुणं सर्षपशाकं नवौदनं पिच्छलानि च दधीनि। अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति" इत्युदाहृतम्। तथाचोक्तक्रमसञ्ज्ञकसंयोगनियमानुसारं यथाऽत्र "सुन्दरि" इति सम्बुद्धिपदं "ग्रा" इति संयोगपरत्वाद् अन्ते गुरु सदपि लघुभावङ्गतम् अर्थात् रेफोत्तरवर्त्तिन इकारस्य लघुता जाता येन छन्दोभङ्गभीतिः स्वप्नेऽपि न भवितुमर्हति तद्वदत्रापि दोषो न भविष्यति। यद्येतावता अपराधस्तदा पूर्वाचार्याणामेवेति स्वयं विवेच्यम्।

अपिचैतादृशं छन्दोभङ्गाऽभिधानमत्यन्तमेव विदुषां बुद्धावसामञ्जस्यमावहति, यतः "प्रहेवा" इति पिङ्गलमुन्युक्तनियममनुसन्धाय वृत्तरत्नाकरव्याख्यां कुर्वाणो "नारायणभट्टः" "इदञ्चोपलक्षणं प्रशब्दे ह्रेशब्दे च परतोऽपादान्तस्थस्यापि लघुतायाः कविप्रयोगे दर्शनात्। तथाच कुमारसम्भवे गृहीतप्रत्युद्गमनीयवस्त्रा"—(कुमा०) "प्राप्तनाभिह्रदमज्जनमाशु"—(माघ०) इति चोक्त्वा × × × अन्ये तु संयोगमात्रे परभूते लघुत्वमतीवप्रयत्नतयेत्याहुः, अत एव सरस्वतीकण्ठाभरणे उक्तम्—यदा तीव्रप्रयत्नेन संयोगादेरगौरवम्। न छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः" इत्यादि बहु व्याख्यातवान्। तथा च "प्रहे" इति रेफसंयोग इतरहलां रेफसंयोगमप्युपलक्षयतीति[1] तदनुरोधेन सर्वत्र महाकविप्रयोगेषु तादृशगुरुलघुभावस्य वैकल्पिकत्वेनेष्टत्वात् तथैव छन्दोमञ्जर्यादिष्वपि समाहितत्वाच्च वद कथं "रघुवर ! माथुर ! नागर ! श्रील !"—इत्याद्यात्मके मामकीने पद्ये दोषमुद्भावयसि शास्त्रपरिचर्यामजानानो भवानिति। एवञ्च सुव्यवस्थितेऽस्मिञ्शास्त्रराजमार्गे न कोपि विषयवियर्यासो[2] भवितुमर्हतीत्यत्र सन्तः सन्तु साक्षिणः।

एतेन—"तथा च प्रकृते श्रीशब्दे परे पूर्वस्य गुरुत्वं केन वार्येत" इत्यपि व्युदस्तम्

---

१ आधुनिका अपि टीकाकाराः कुशलापरपर्यायाः श्रीरामचन्द्रशास्त्रिणः, काव्यतीर्थाः श्रीरामप्रपन्नशास्त्रिणश्चापि एवमेव व्याख्यान्ति।

२ विषयोदेशः, शास्त्रप्रतिपाद्योऽर्थश्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"सुन्दरिग्रा" इत्यत्रेव क्रमसञ्ज्ञकसंयोगस्य विद्यमानतया गुरुभावस्य वैकल्पिकत्वात्। यत्तु—"अथ विशिष्टानुशासनाऽभावेऽपि + + +"इति दृष्टान्तमात्रेण" इत्याद्यलिखस्तत्तु जले निमज्जतोऽसहायस्य दूर्वादलावलम्बनायितमात्रम्, सत्यपि सुस्पष्टे दर्शिते उभयप्रकारके शास्त्रमार्गे विशिष्टानुशासनाभावं वदन् हतपक्षो हंसः केनोपमेय इति न जानीमः। यदपि "यथैवादौ तथैवान्त्ये संयोगः क्रमसञ्ज्ञकः" इत्यादि विन्यस्य "विकसितसहकारभारहारि प्रमुदित सौरभ आगतः[1] वसन्तः" इत्यादि साहित्यदर्पणकारकाव्यप्रकाशकृदारीनामुक्तयः[2], व्याकुप्येरन् इति तस्मात्तुच्छं यत्किञ्चिदेतत्" इत्युक्तं तद्दुरुक्तं काव्यप्रकाशकारादीनां भावानवबोधनात्। हतवृत्तस्य अप्राप्तगुरुभावान्तलघुरूपं भेदमुदाहरन्तः काव्यप्रकाशकारादयो"हारिप्रमुदितसौरभे"ति पाठं न्यभांत्सुर्येनाऽसौ दोषो न स्यात् अर्थात् "वा पादान्ते" इति शास्त्रं वसन्ततिलकेन्द्रवज्रादिवृत्तपरमेव, प्रकृते च पुष्पिताग्राभिधे छन्दसि बन्धशैथिल्यरूपदूषकताबीजसत्त्वाद्धतवृत्ताख्यो दोषः, दर्शितरीत्या पाठान्तरनिवेशे तु नास्ति, संयोगादित्वेन गुरुत्वे बन्धशैथल्यात्मकबीजाभावात्। नह्येतावता क्रमसञ्ज्ञकसंयोगस्य विषयापलाप एव काव्यप्रकाशकृदादीनामिष्टः अन्यथा—"पुरःस्थितेन तेन स्याल्लघुताऽपि क्वचिद् गुरोः"। "क्वचिदिति व्यवस्थितविकल्पार्थम्" इत्येवमाद्याः छन्दःशास्त्रकाराणामुक्तयोऽपि नितान्तं पीड्येरन्। तस्मादत्र तव विषयविभागाज्ञानमेव तुच्छोक्तौ कारणमिति युक्तमुक्तं प्रज्ञाचक्षुः सरोवरे मिथ्यामुक्ताशी हंसः। अपि च—

"ह्रस्वोगुरुर्वा पादान्ते पूर्वयोगाद्विसर्गतः। अनुस्वारादृयञ्जनात्स्याज्जिह्वामूलीयतस्तथा॥

इत्याग्नेयपुराणमप्यस्मत्प्रतिपादितार्थोपोद्बलकमिति सूक्ष्मदृशाऽऽलोचनीयम्। एतदुक्तं भवति—छन्दःशास्त्रे यत्पादान्तेऽपि लघोर्गुरुभाव उक्तस्तत्सर्वत्र द्वितीयचतुर्थपादविषयकमेव विज्ञेयम्। प्रथमतृतीयपादविषये तु वसन्ततिलकादावेव, तस्मात् "प्रमुदित" इति इति पाठे निवेशिते नैव छन्दोभङ्गभीतिः संयुक्तादित्वेन प्राप्तगुरुभावात्। एवं विकसितेत्यत्र लघोर्गुरुभाव इष्ट आसीद् येन पाठान्तरनिवेशेनेष्टिः पूरिता। "रघुवर! माथुर! नागर! श्रील! श्रीशारदाबन्धो!" इत्यत्र तु "अल्पव्ययेन सुन्दरि"—इत्यत्रेव संयुक्तादित्वेन स्वतःप्राप्ते गुरुभावे, मात्राधिक्येन चच्छन्दोभङ्गे प्राप्ते सति छन्दःशास्त्रकारैः क्रमसञ्ज्ञकसंयोगपरिभाषां रचयित्वा व्यवस्थितविकल्पविधया गुरोरपि लघुभाव आदृतो येन छन्दःशास्त्रान-

---

१, २—अत्र पश्यन्तु पण्डिताः (सम्पा०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिमतस्यच्छन्दोभङ्गस्याभावेन तन्नामकछन्दोलक्षणविषयता नापोदिता भवतीत्येवञ्जातीयकं रहस्यमज्ञात्वा विषमं दृष्टान्तमुपन्यस्यतो हंसस्य एकः पक्षो नितान्तं खण्डित इत्याकलयन्तु* पाठकमहाभागाः । (सम्पादकः)

सम्पादकीयम्

पञ्चनदीयसंस्कृतसाहित्यस्याऽसाधारणे ऽधिनिवेशने प्रशस्तो विचारः ।

परिषदियं सम्यगालोचयति यदस्माकं दुर्दैवविपाकाद्वा हिन्दुजनतायाः प्रमादाद्वा उत्तरोत्तरं संस्कृतभाषाया अवनतिरेव दृष्टिविषयताभागिनी भवतीति को न जानाति संस्कृतप्रियः प्रेक्षावान् । पञ्चापयूनिवर्सिटीपरिषदप्येतस्मिन्विषये विशिष्टं ध्यानं न ददाति । केवलं शास्त्रिपरीक्षोत्तरणावधिरेव पञ्चापप्रान्ते वैदुष्यस्य परा सीमाऽवधार्यते कैश्चनाऽबहुविज्ञैः साम्प्रतिकैः । ये तु प्राक्तनीं पद्धतिमनुसृत्य स्वातन्त्र्येण शास्त्राण्यध्यगीषत ते दत्तपरीक्षा अदत्तपरीक्षा वा सन्तु, परन्तु त एव विशिष्टा विद्वांसोऽङ्गुलीगणनार्हा कतिपये पञ्चापप्रान्ते दृश्यन्ते । अथ—"मूले नष्टे नैव शाखा न पत्रम्" इति न्यायमालोचयन्ती परिषदियं निश्चिनोति यत्-शास्त्रिपरीक्षामुत्तीर्य अनुत्तीर्य वा अधिकारिणः आकरग्रन्थाध्ययनेच्छवो ये तत्र २ शास्त्रे वयं विशिष्टाः पण्डिताः स्यामेति कामयन्ते तदर्थमवश्यं कश्चन प्रबन्धः करणीय इति परिषदः कर्त्तव्यम् । एतस्मिन् विचारे परिपुष्टे सर्वसम्मत्या प्राचीनाकरग्रन्थसंरक्षणपूर्वकसंस्कृतवृद्धिहेतवे तत्तद्विषयाध्यापनाय ते ते पण्डिता नियतीभूताः । तथाहि—

वेदविषयः—

मन्त्रब्राह्मणादिपाठने— श्रीयुत पं० राजारामशास्त्री ।

---

* अस्मत्प्रदर्शितसमाधानस्योत्तरप्रत्युत्तरशृङ्खलायां समाप्तायां प्रमेयत्वस्य केवलान्वयित्वसम्बन्धिविचारात्मकहंसीयद्वितीयपक्षबलसमीक्षां विधास्यामः । परममुं लेखमितोऽग्रे उद्योते प्रकाशयितुं न बहु कामयामहे । किन्तु स्वातन्त्र्येणैव पृथक प्रकाशनीयं स्यादिति युक्तमाभाति (सम्पा०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रौतसूत्रप्रातिशाख्यादि पाठने— ,, ,, ,,

निरुक्तस्य—श्रीयुतविश्वबन्धुराचार्यः (एम० ए०)

व्याकरणे—महाभाष्यशेखरादीनां—श्रीयुतजगदीशशास्त्री (व्याकरणतीर्थः)

दर्शने—(वेदान्ते)—सूत्रभाष्योपनिषदादीनां

खण्डनखण्डखाद्यादीनाञ्च—नृसिंहदेवशास्त्री (उद्योतसम्पादकः)

पूर्वमीमांसायाः— ,, ,, ,,

न्याये वैशेषिके च—

वार्त्तिकतात्पर्यटीकादीनां—श्रीयुत परमेश्वरानन्दशास्त्री (साहित्योपाध्यायः)

साहित्ये-रसगङ्गाधरादीनां—श्रीयुतरामचन्द्रशास्त्री (कुशलः)

एते विद्वांसो बहुमूल्यं स्वीयं समयमेतस्मिञ्शुभे कर्मणि सहर्षमर्पयिष्यन्ति। अस्य कृत्यस्याऽनुष्ठानं ग्रैष्मावकाशोत्तरं पिपठिषूणां प्राप्तेषु निवेदनपत्रेषु परिषदा नियतीकृते स्थाने भविष्यतीति जानन्तु शास्त्ररसिकाः।

सुप्रभातम्—

को न जानाति यत् "सुप्रभातं" नाम संस्कृतमासिकपत्रं काशीधामतो महत्या आरभट्या सुसज्जं प्रकाशमानं प्रतिमासं नेत्रयोरासेचनकञ्जायते। अस्य कीदृशः सुन्दर आकारः? कीदृशी छविः? सञ्चालकवर्गश्चास्य कथं सुस्वभावो महोद्योगश्चेति प्रतिकृतिदर्शनादपि सर्वथा हृदयमावर्जयन्ति। अस्मिंश्च महामहनीयानां पण्डितवर्याणां सन्दब्धा उदात्ततरा लेखाः प्रकाशिता भवन्ति। अस्य विशिष्टमङ्कं दर्शं दर्शं सन्तुष्टतरोप्यन्तरात्मा भूयो भूयो दर्शनोत्कण्ठां नैव जहाति। संस्कृतानुरागिणोऽस्यापि ग्राहकतां स्वीकृत्य संस्कृतसाहित्यवर्धनाय दत्तोत्साहाः सम्भवन्तु। यथा आङ्ग्लभाषापाठकानां छात्राणामाङ्ग्लसमाचारपत्रपाठे उत्साहमीक्षामहे न तथा संस्कृताध्येतॄणां विद्यार्थिनां हर्षस्कर्षमालोकामहे इति महान्तं खेदमनुभवामः। एते छात्रा हृदयस्य सङ्कीर्णतामालस्यं दौर्बल्यं पारस्परिकं विद्वेषञ्च परिहाय, पण्डिताश्च कृतशास्त्रपरिश्रमा अपि "आँ ऊँ" इत्येवमुपेक्षां परित्यज्य यदि मनागपि समाचारपत्रपठनगुणगणानालोचयेयुर्नूनं परीक्षापारावारोऽप्यमीषां कृते गोष्पदीभवेत्, नानाविधसंस्कृतशब्दकोषस्य मस्तिष्कपिटिकायां सञ्चितस्य महत्साहाय्यञ्च भवेद् भाषणे लेखने कल्पने च। पण्डिताश्च साम्प्रतिकनवनवविवेचनापटवाः सम्भवेयुः वर्त्तमानशैलीमनुरुध्य स्वकीयाऽसाधारणप्रतिभोद्योतिनो लेखान्दत्वा छात्रान्पटूंश्च सम्पादयेयुः। नहि दारिद्र्यस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परां काष्ठां प्राप्तोऽपि कश्चन च्छात्रो गीर्वाणवाणीसाहाय्यकरणाय प्रतिवर्षं द्विमुद्रा व्ययीकरणायापि नालम्भवतीति कोपि विचारवान् विश्वासङ्कर्त्तुं पारयते । यदि दाधिकपुटिकाप्राशनादिविषयकव्ययात् किञ्चित्किञ्चिदुद्धृत्य पणादिकं, निमन्त्रणदक्षिणालाभाद्वा किञ्चिन्निष्कास्य सर्वदिक्काः छात्राः सुप्रभात-सूर्योदयोद्योतादीनां संस्कृतपत्राणां ग्राहकतामङ्गीकुर्युः अथवा स्वस्वप्रान्तीयसंस्कृतपत्रस्य विशेषतो ग्राहकभावं व्रजेयुस्तदेषत्करोऽयं पत्रप्रकाशनप्रकारप्रचारः सम्भवेत् तत्तत्पत्रप्रबन्धकमहोदयानाम्, गीर्वाणवाणी च द्रागेव भारते वर्षेऽभिवर्धेतेत्यस्माकं परो विश्वासः । सुप्रभातविशिष्टाङ्कस्य मूल्यम् ।।।) द्वादशाणकाः प्राप्तिस्थानम्—मैनेजर सुप्रभात कार्यालय वनारस सिटी ।

औदार्यम्—

पञ्चनदीयाढ्यजनप्रमुखभूतैरतिप्रसिद्धैः लवपुरीयसनातनधर्मसभायाः पुरातनैः स्थिरैः सभापतिभीरायवहादुररामशरणदासमहोदयैः उद्योतपत्रस्य साहाय्यकरणाय सम्प्रति एकं शतं १००) दत्वा महदौदार्यं प्रकाशितम् । एते महानुभावाः पञ्चापप्रान्तीयवदान्येषु सुप्रसिद्धाः संस्कृतानुरागिणश्च सन्ति । लवपुरीयसनातनधर्मसभासञ्चालनभारोऽपि विशेषतोऽमीषामेव शिरसि निहितो वर्त्तते । इतोग्रेऽप्युद्योतस्यामीषु महती साहाय्यसम्भावना । एवञ्चैते उद्योतस्य संरक्षकाः सम्पन्नाः । उद्योतसरस्वती एतेषां महानुभावानां प्रतीक्ष्याणां महान्तं धन्यवादं प्रकटीकरोति, अवशिष्टानपि संस्कृतप्रेमिणो दानशूरान्बोधयति च यत्तेऽपि संस्कृतसेवाशिक्षाप्रकारं रायवहादुरपद्धतिमनुसरन्तः समवगच्छन्त्विति ।

समालोचना ।

सङ्कल्पसारप्रभा—

झङ्गनिवासिपण्डित गौरीशङ्करशास्त्रिसङ्कलिता "सङ्कल्पसारप्रभा" इति नामकं लघुकायं पुस्तकं दृष्टम् । अत्र सामान्यतो विशेषतश्च प्रायः सर्वेषां सङ्कल्पानां रीतिः प्रदर्शिता । अल्पपठिता अप्युपाध्याया एतद्द्वारा साहाय्यं प्राप्य शुद्धमार्गेण सङ्कल्पं पठन्तो यजमानस्य स्वस्य च हितं कर्त्तुं पारयेरन् । अशुद्धं पठितमविधिकृतश्च द्वयोरपि नाशाय भवतीति मत्वा ये उपाध्यायकर्मनिरताः सुसंस्कृतरीत्या गवादिदानानां सङ्कल्पजिज्ञासवस्तेऽवश्यममुं ग्रन्थं स्वकृत्यग्रन्थावल्यां स्थापयन्तु क्वचित् क्वचिच्च भाषयाऽपि कर्त्तव्यार्थप्रकारो ग्रन्थकर्त्रा निर्दिष्टो येनात्यल्पपठिता अपि उपाध्याया उपकारिताः । पुस्तकस्याकारो मनोहरे मूल्यम् ।-) पञ्चाणकाः । प्राप्तिस्थानम्—गौरीशङ्कर शास्त्री—झङ्ग ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकसन्ध्याभाष्यम्—

श्रीमन्निखिलशास्त्रनिष्णातपण्डितस्वामिहरिप्रसादवैदिकमुनिविरचितं बहु सुन्दराकारं निर्णयसागरमुद्रितं "वैदिकसन्ध्याभाष्य"मादितः समाप्तिं यावद् अनेकवारमपाठिषम् । अद्याप्ये तत्पुस्तकं स्वालोच्यात्यावश्यकग्रन्थावल्यामेव न्यवीविशश्च । यद्यपि श्रीयुतस्वामिहरिप्रसादानां मम च मतमत्यन्तविलक्षणम्, तथाप्येतेषां पाण्डित्यमत्यन्तं प्रशंसनीयमस्तीति नात्र मे सन्देहः । एतैः सर्वदर्शनोपरि टीकाः रचिताः । ब्रह्मसूत्रोपरि विशदा विपुला गम्भीरार्था च वृत्तिर्व्यरचि । एतेषां लेखनशैली बहुधा पतञ्जलिमुनिं श्रीशङ्कराचार्यञ्चानुहरति, तत्तत्प्रकरणानुषङ्गिणीनां मन्त्रश्रुतीनां ब्राह्मणश्रुतीनां प्रचुरः सङ्ग्रहस्तत्र २ दृश्यते, येन एतेषामननुयायिनामपि विचारणाकरणे महांल्लाभो भवितुमर्हति, कालान्तरे च तत्तद्विषये विपुला समालोचना विधास्यते । परमहं सम्प्रति भूयो भूयो वैदिकसन्ध्याभाष्यं पठन् सुप्रसन्नचित्तः सर्वथैव वक्तुमुत्सहे यद् आर्यसमाजसिद्धान्तोपकारि यथैत्सन्ध्याभाष्यं वर्त्तते न तथा स्वामिदयानन्दकृता अर्था हृदयभावावर्जकाः सन्देहनिवारकाश्च विद्यन्ते । अनेकानि सनातनसन्ध्याभाष्याणि ममान्तिके वर्त्तन्ते कदाचित् कदाचिन्ममापि हृदये सन्ध्याभाष्यरचने कामः प्रादुरभवत् परं सनातनधर्मावलम्बिनोऽपि मम हृदयमिदं सन्ध्याभाष्यं दृष्ट्वा बहु प्रसादमालम्बते मुग्धभावञ्चातनुते । इदन्तु वै चित्र्यं यदस्य भाष्यस्य रचना निगूढं निरीक्ष्यमाणापि नात्यन्तं सनातनसिद्धान्तं विरुणद्धि । यदिचार्यसमाजस्य सनातनधर्मावलम्बिजनतायाश्चैकैवेयं सन्ध्यापद्धतिरस्तीत्युच्येत तावताऽपिनार्थवादोऽयं मन्यताम्, यतो विनियोगानां परमेश्वरध्यानप्रकारस्य च तथैवाश्यकता प्रत्यपादि ग्रन्थकर्त्रा यथा च सनातनसिद्धान्ते विद्यते । प्राञ्जलस्यास्य भाष्यस्य पाठकरणे उत्तरोत्तरं मेधा देदीप्यते । शोणिते च कश्चनाऽपूर्वो नूतन इव विश्वाससञ्चारातिशयो लक्ष्यते । तत्सनातनैरसनातनैर्वासर्वैरपि पण्डितैरवश्यमिदं पुस्तकं क्रेतव्यं पठनीयञ्चेति निर्मलहृदयेनाहं ब्रवीमि । एतस्य प्राप्तिस्थानम्—"मैनेजर महेश औषधालय पापडमंडी शाहआलमी दरवाजा—लाहौर" इति । मूल्यम् ॥) अष्टावानकाः ।

अन्यान्यपि कानिचित्पुस्तकानि समालोचनार्थं प्राप्तानि सम्प्रति कार्यगौरवहेतोस्तेषां समालोचनाऽवसरं नाऽलभम्, ग्रैष्मावकाशोत्तरं तद्विधास्य इति सन्तोषं धारयन्तु पुस्तकप्रेषयितारो महाशयाः ।

१—यदा पूर्वस्मिन् वयसि—एते काश्यामस्सीघट्टे न्यवात्सुः तदा सनातनधर्मानुयायिदशायाममीभिर्मूर्त्तिपूजानामकं प्रौढयुक्त्युपेतं पुस्तकं रचितं, पण्डितैरवश्यं पठनीयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवश्यपठनीयम् ।

१९२९ ईशवीयेऽब्दे विशारदपरीक्षायां शास्त्रिपरीक्षायाञ्च सरलाकौमुद्यनुसार सिद्धान्तकौमुद्यनुसारञ्चोभयथाऽपि पाठपद्धतिरस्ति । इतोऽग्रे १९३० प्रभृतिवर्षेषु सिद्धान्तकौमुद्याः पूर्वार्धं विशारदपरीक्षायां, तस्या एव—उत्तरार्धञ्च स्वरवैदिक्यन्तं शास्त्रिपरीक्षायां नियतं वर्त्तत इति जानीत ।

अयि ! उद्योतग्राहकाः !—

जानन्त्येवात्रभवन्तो यदुद्योतस्य नवीन एवायमारम्भः, तदुल्लासश्च तरुणः, मूलधनञ्चाद्यापि न सम्पन्नं, ग्राहकाणां सङ्ख्या प्रतिदिनं वर्धमानापि सन्तोषजनिका न जाता । परमयमुद्योतः सिते पक्षे कलानाथ इवोत्तरोत्तरमेधमानो नियत एव समये विविधाभिर्लेखकलाभिर्ग्राहकाणां मनःकैरवाणि विकासयतीति प्रत्यक्षदृष्टमेतत् । धनसाध्यं कार्यञ्च धनेनैव सेद्धुमर्हतीत्यपि न बहु समर्थनार्हम् । यदि चायमुद्योत आढ्यतरयजमान इव पूर्णवसुराशिः स्याद् अवश्यं ग्राहकपुरोहितेभ्य अमावस्याहन्तकारमिवात्मानमुपढौकयेत् । तत्तु नास्तीत्युक्तप्रायमेव । तस्माद्यैर्ग्राहकैरस्य वार्षिकं १॥) न प्रेषितं कृपया ते शीघ्रमेव धनादेश (मनीआर्डर) द्वारा तत्प्रेषयन्तु येन कार्यालये उद्योतप्रकाशनसाधने कोऽपि प्रतिबन्धो न सम्भवेत् । लवपुरीया ग्राहकास्तु अस्मत्प्रार्थनायां ध्यानमेव न ददते येषाञ्चोद्योतकार्यालयसेवाकरणं मुख्यं प्रत्यासन्नञ्च कर्त्तव्यमस्ति। सम्प्रति पञ्चमोऽयं मयूखो भवतां सेवायामुपस्थितो भवति इत उत्तरञ्च द्वयोर्मासयो र्युगपदेव मयूखद्वयी प्रकाशयिष्यते, यतो ग्रैष्मावकाशः संवृत्तः कार्यकारिवर्गश्च सर्वोऽपि गृहङ्गत इति ग्राहकैर्विश्वस्तचित्तैः स्थेयमित्युक्तमपि भवतां दृढतायै निवेद्यते । यदि ग्राहकैर्न वार्षिकं प्रेषयिष्यते तर्हि V. P. करणेन तेषामेव शिरस्यधिकव्ययभारो भविष्यतीत्यपि न विस्मरणीयम् । उद्योतचतुर्थमयूखीयभ्रमसंशोधनं पुनः करिष्यते ।

(सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

UDYOTAM REGISTER L. NO. 2304

वार्षिकमूल्यम् १॥)
सार्धरूपकम्

प्रतिखण्डमूल्यम् ≡)
आनकत्रयम्

उद्योतः

पञ्चनदीयसंस्कृतसाहित्यपरिषदो
मासिकं मुखपत्रम् ।

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नादराद्,
अज्ञानान्धतमोविनाशपटुता–विख्यात–विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्,
"उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥१॥

प्रथमवर्षे– १ | भाद्राश्विनसङ्क्रान्त्याम् वि०सं०१९८५ अगस्त, सितम्बर सं० १९२८ | षष्ठःसप्तमश्चमयूखः ६–७

सम्पादकः—
कवितार्किक (-तन्त्रचक्रवर्त्ति-) नृसिंहदेवशास्त्री दर्शनाचार्यः ।
सहकारिसम्पादकः—
विद्याभास्करपण्डितपरमेश्वरानन्दशास्त्री साहित्योपाध्यायः ।
प्रकाशकः—
परिषन्मन्त्री पं० जगदीशशास्त्री व्याकरणतीर्थः
(उद्योत कार्यालय जौडेमोरी लाहौर)
" Udyot " Office Jaure Mori Lahore.

श्रीकृष्णदीक्षितप्रबन्धेन "बाम्बे मैशीन प्रेस मोहनलाल रोड लाहौर"
इत्याख्ये स्थाने मुद्रितः । पं० जगदीशशास्त्रिणा च उद्योत-
कार्यालयात् "जौडेमोरी लाहौर" इत्यतः प्रकाशितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतस्य कतिचन नियमाः

१—अस्य मासिकपत्रस्य अग्रिमं वार्षिकं देयम् (भारते, ब्रह्मदेशे सिंहले च)—१॥) सार्धरूपकम् ।

२—प्रेषणव्ययो ग्राहकैर्न देयः ।

३—प्रबन्धादिकं समालोचनार्थं ग्रन्थादिकञ्च सम्पादकसमीपे, मूल्यादिकं च प्रकाशकसमीपे निर्दिष्टस्थाने प्रेषणीयम् ।

४—विज्ञापनपत्रादिमुद्रापणव्यवहारविषयोऽपि कार्यालये प्रकाशकसमीपाद्विवेचनीयः ।

५—पत्रं प्रतिसङ्क्रान्ति प्रकाश्येत । येन खलु ग्राहकेण यथाकालं सङ्ख्या नाधिगम्येत तेन तन्मासस्य तृतीयसप्ताहाभ्यन्तर एव कार्यालयाद्विवेच्यम्, नातः परं कस्याप्यभियोगः श्रूयेत, किन्तु तेन प्रथमं स्वपोष्टस्थानं परिशोध्यैव प्रष्टव्यम् । विवेकार्थं ग्राहकसङ्ख्या चावश्यं लेख्या ।

६—ग्राहकैः स्वस्थानादिकं स्पष्टमेव लेख्यम्।

७—एतस्य ग्राहका अपि साधारणसभ्येषु गण्येरन् ।

८—प्रेषितलेखाः प्रायो यथाक्रमं मुद्राप्येरन् । लेखकैर्न्यूनातिन्यूनं पक्षात्पूर्वमेव लेखाः प्रहीयेरन् । राजविरुद्धान्दोलनलेखाश्च न गृह्येरन् ।

विषयसूची

(प्रबन्धानां गुणदोषयोः प्रबन्धलेखका एव प्रतिभुवः)

विषयः	पत्राङ्कः
१—औपनिषदं विज्ञानम् ।	१
२—धर्मः ।	२
३—पञ्चममयूखस्य १० पृष्टतोऽनुवृतम्—ले०, श्रीयुत ईश्वरचंद्रशर्मा ब्रह्मचारी ।	८
४—गीर्वाण-वाणी कथं व्यावहारिकत्वमश्नुवीत—ले०, श्री पं० दीनानाथजीशास्त्री	१३
५—संस्कृतभाषणम्—ले०, पं० बारूरामजी शर्मा शास्त्री शामचौरासी होश्यारपुर ।	२०
६—मनोरञ्जनम्—लेखकः, सहकारी सम्पादकः ।	२३
७—भारतगीतिः——ले०, श्री पं० विष्णुशर्मा विद्यार्थी O. C.	२४
८—द्वौ ग्रामीणौ उपाध्यायौ—ले०, श्री सीताराम विशारदः O. C. लाहौर ।	२५
९—श्रीशिवाष्टकम्—लेखकः, श्रीयुत पं० गौरीशंकर शास्त्री झंगनिवासी ।	२६
१०—संस्कृतभाषाया उन्नतेर्मूलम्—ले०, श्री दुर्गादत्तपन्तो वेदाचार्यः ।	२७
११—सम्पादकीयम्	३०
१२—सङ्गृहीता विचित्राः समाचाराः ।	३४
१३—रक्षाबन्धनम् ।	३६
१४—काऽवश्यकता समाचारपत्राणाम्—ले०, श्रीज्येष्ठानन्द शा०श्रे० मुलतान ।	३७
१५—श्रीकृष्णावतारः ।	३९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नाराद् अज्ञानान्धतमोविनाशपटुता–विख्यात–विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन् "उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥

प्रथमवर्षे- १	भाद्राश्विनसङ्क्रान्त्योः वि० सं० १९८५ अगस्त, सितम्बर—सं० १९२८	पृष्ठः सप्तमश्च मयूखः ६—७

औपनिषदं विज्ञानम् ।

ईशेन वास्यं यदिदं हि सर्वं चरन्तदन्यन्ननु सांवृतं[1] च ।
तन्नामरूपात्मकमस्ति मिथ्या परस्परानात्मतया प्रतीतम् ॥१॥
धनं[2] न कस्यास्ति विचारयध्वं गर्धा कुतः स्याद्यदि नास्ति तथ्यम् ।
त्यक्तेन भोगं[3] कुरुतात्मविज्ञा ! जिहीत गर्धामसुखैकरूपाम् ॥२॥
सन्ध्याग्निहोत्रादिसुकर्मजातं निष्कामबुद्ध्या[4] विदधीत धीरः[5] ।
एवं कृते बन्धनहेतुकं स्यान्न कर्ममात्रं श्रुतिरित्थमाह ॥३॥

१—आविद्यिकम् । २—भोग्यजातमित्यत्र तात्पर्यम् । ३—सन्न्यासं श्रुतिरभिप्रैति । ४—परमेश्वरार्पणबुद्ध्या । ५—विवेकी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्धेन[1] घोरेण समावृताँस्ताँल्लोकानसुर्यास्तमसा समुत्थान् ।
कर्त्तृत्वभोक्तृत्वमहाभिमान-मत्ता अधीराः सततं व्रजन्ति ॥४॥
अनेजदेकं मनसो बलिष्ठं यच्चक्षुराद्या न निभालयन्ति ।
देवा[2] हि तज्ज्योतिरनन्तमाद्यमविक्रियं निर्गुणमद्वितीयम् ॥५॥
अज्ञानिनां[3] तत् क्रियया विशिष्टं तदक्रियं ज्ञानिधिया प्रतीतम् ।
तदेव दूरे तदु हान्तिकेऽपि स्वयम्प्रभं सर्वरसञ्च शुक्रम् ॥६॥
योऽध्यस्तभावं प्रविलाप्य सूरिर्भूतानि सर्वाणि महान्ति सन्ति ।
आत्मन्यनन्ते परमे च तिष्ठेन्नासौ[4] जुगुप्सां[5] कुरुते मनस्वी ॥७॥
अस्तङ्गता यस्य भिदाप्रतीतिः साक्षात्कृते स्वात्मनि सत्प्रतीचि ।
तस्यैकभावं भजतो न शोक-मोहौ भवेतां श्रुतिघोषणेत्थम् ॥८॥
आकाशवद्व्यापि तदस्ति शुक्रं ब्रह्माऽद्वितीयं किल कामहीनम् ।
अज्ञानपङ्काऽस्पृगपापविद्धं द्रष्टा मनीषी परिभूः स्वयम्भूः ॥९॥
यथाश्रुतज्ञानविधानुरूपं व्यधात् स विश्वं सकलप्रजाभ्यः ।
तदर्थजातं श्रुतिमार्गरूपं भोगाय मोक्षाय च दीनबन्धुः ॥१०॥
स एव सर्वैर्भवरोग-शान्त्या उपास्य एकः परमेश्वरोऽसौ ।
स्वाभाविकी ज्ञानबलक्रिया च शक्तिर्यदीया विविधास्त्यनन्ता ॥११॥

(सम्पादकः)

धर्म

'मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणात्' इत्यत्र सर्वेषां तीर्थकराणां समानैव प्रतिपत्तिः । लक्षणञ्च—'सजातीयविजातीयव्यावर्त्तकोऽसाधारणो धर्मविशेष' इति लक्षणविद आचक्षते । यथा 'सास्नादिमत्त्वं' गोर्धर्मिणः । लक्षणद्वारा लक्षणीयपदार्थस्य सम्भावनायां सत्यां पुनस्तस्य प्रमाणैरवधारणं वेविद्यते । यथा च दर्शितलक्षणेन गोर्धर्मिणः सम्भावनायां तदुत्तरं चक्षुरादिभिर्निश्चयः 'इयमेव गौ' रिति । परमयं

१—अन्धपदोपलक्षिततमसा । २—चक्षुरादीनीन्द्रियाणीत्यर्थः । ३—निर्धर्मके आत्मनि सर्वधर्माणामाध्यासिक्येव प्रतीतिरिति तु परमार्थः । ४—जीवन्मुक्तः स्यादिति तु हृदयम् । ५—शरीरतापमनुतप्तो न भवतीति भावः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवहारप्रकारो लौकिकेष्वेव गवादिपदार्थेषु घटते, नतु लोकप्रमाणातीतेषु धर्मादिपदार्थेष्वपीति धर्मस्य लक्षणासम्भव एवापतितः। एतदभिप्रेत्यैवाऽभ्यधायि पूर्वमीमांसाभाष्यकारेण शबरमुनिना 'धर्मःप्रसिद्धो वा स्यादप्रसिद्धो वा स चेदप्रसिद्धः न जिज्ञासितव्यः अथाप्रसिद्धो नतराम्' इति। अर्थादुभयपक्षेऽपि सन्देहाभावाद् विचारशास्त्रमिदमनारम्भणीयमेवेति सर्वथा अज्ञातपदार्थे जिज्ञासाप्रवृत्तिश्च लोकन्यायविरुद्धैव। ये तु क्रियाविशेषमेव धर्मं मन्यन्ते तेषां मते दधिव्रीह्यादिविहितद्रव्येष्वव्याप्तिः प्रस्फुटैव। नच ते दध्यादयो गुणपदार्थाः धर्मस्यालक्ष्यभूता एवेति वक्तुमपि शक्नुमः, तदनुष्ठानप्रवृत्ते पुंसि 'धार्म्मिकोऽयम्' इति सकलास्तिकप्रतीतेः। नहि यो न यत्कारी भवति स तत्कारीत्युच्यतेऽभ्रान्तैः। नचैकस्मिन्विषये[1] सर्वे सर्वदा भवन्ति भ्रान्ताः। तस्मात् क्रियामेव धर्मं मन्वाना गुणपदार्थेष्वव्याप्तिं नोद्धरेयुः, अन्यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यादिविषयवाक्यीयाधिकरणमीमांसाया असङ्गतिर्दुर्वारा। अथ 'विहितत्वं धर्मत्वम्' इति ब्रूषे तदा विवाहादिसमयेऽभ्यनुज्ञाविधिविषयभूतानामनृतभाषणादीनामपि धर्मत्वापत्तिः। नच गूढाभिसन्धिमद्भिर्धर्मशास्त्रकारैः अनृतभाषणादीनि तानि धर्मत्वेन स्वीक्रियन्ते इत्याद्यनेकविधेष्वाक्षेपेषु सत्सु— 'वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म' इति धर्मलक्षणसिद्धान्तः। वेदप्रतिपाद्येषु स्वर्गादिफलेष्वतिव्याप्तिवारणाय 'प्रयोजनवत्' इति पदं लक्षणे विनिविष्टम्। स्वर्गादिकं वेदप्रतिपाद्यं स्वयं प्रयोजनात्मकं सदपि नतु प्रयोजनवत्। तृप्त्यादिप्रयोजनवदर्थेषु भोजनादिष्वतिप्रसक्तिनिरासाय 'वेदप्रतिपाद्य' पदनिवेशः। भोजनादीनि स्वयमेव रागतः प्राप्तानीति न वेदप्रतिपाद्यानि। यत्र तु—

अष्टौ ग्रासामुनेर्भक्ष्याः षोडशारण्यवासिनाम्।
द्वात्रिंशत्तु गृहस्थस्य यथेष्टं ब्रह्मचारिणाम्॥ इति—

"सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्" इत्यादि च तत्र तत्र भोजनादिविधानमुपलभामहे धर्मग्रन्थेषु[2] तन्नियमविध्यभिप्रायेण नात्यन्ताप्राप्त्यभिप्रायेण, यथा च सन्ध्याज्योतिष्टोमादिष्विति ध्येयम्। तस्माद्भोजनादिव्यावृत्त्यर्थमेव लक्षणे 'वेदप्रतिपाद्य' पदविनिवेश इति सुष्ठु। एवं कृतेऽपि धर्मलक्षणे नरकाद्यनर्थप्राप्ति-

---

१—यस्मिन् कस्मिंश्चिद्विषये इत्याशयः।

२—नियमांशे तु धर्मत्वं प्रदर्शितधर्मलक्षणाक्रान्तमेवेति मन्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेतुभूतेषु स्वयमनर्थरूपेषु श्येनादियागेषु अतिव्याप्तिर्दुर्वारा तेषामपि 'श्येनेनाभिचरन् यजेत' इत्यादिवेदवाक्यप्रतिपाद्यत्वात्। एतद्दोषपरिजिहीर्षया लक्षणेऽर्थपदनिवेशो बोध्यः। तथा च पारमर्षं सूत्रम् 'चोदनालक्षणोऽर्थो धर्मः' (पू० मी० १।१।२) इति।

यत्तु—"विधिप्राप्ते दोषानवकाशः" इति न्यायेन श्येनस्य स्वात्मना नानर्थरूपत्वं, किन्तु तज्जन्यो यः शत्रुवधस्तज्जन्यस्य नरकस्यैवानर्थरूपत्वम्। अथवा—अभिचारस्यैवानर्थरूपत्वं तत्सम्बन्धेन श्येनोऽनर्थो नतु साक्षात्, हिंसा च निषिद्धा, तस्मादेवमनर्थरूपे श्येनेऽतिप्रसक्तिवारणाय लक्षणेऽ"र्थ" पदं दत्तम्। अन्यथा—फलस्य वेदप्रतिपाद्यत्वे तदुद्देश्यतया फलार्थिनां यागादिकर्मसु प्रवृत्तेरनुपपत्तेः, नहीन्द्रियागोचरस्य स्वर्गादिफलस्य किमपि ज्ञापकं लौकिकं प्रमाणमुपलभामहे यन्निश्चयेन तदर्थिनस्तत्र प्रवर्त्तेरन्निति, अतः श्येनयागजन्याभिचारात्मकफलस्य (शत्रुवधस्य) वेदप्रतिपाद्यत्वेन श्येनेऽतिव्याप्तिवारणायाऽर्थपदोपादनन्तु व्यर्थं दर्शितरीत्या तत्रातिप्रसक्तेरभावात्, अर्थात् विहितस्य=वेदप्रतिपाद्यस्य समीहितसाधनस्य श्येनस्य तु धर्मत्वमेव। एतस्मिन्मतेऽर्थपदव्यावर्त्याः कलञ्जभक्षणादया एव निषिद्धा वेदितव्याः, फलतोऽनर्थहेतुत्वेनैव शिष्टानां श्येनादावधर्मत्वेन व्यवहारः। तदुक्तम्—

फलतोऽपि च यत्कर्म नानर्थेनानुबध्यते।
केवलप्रीतिहेतुत्वात्तद्धर्म इति कथ्यते॥

इत्येकआहुः[२]।

परेतु[१]—सर्वत्र फलसाधनेषु रागत एव पुमांसः प्रवर्त्तन्तेऽतो नियोगो न प्रवर्त्तकः। अत एव रागजन्यप्रवृत्तिविषयत्वाच्छ्येनस्य "श्येनेनाभिचरन् यजेत" इति विधिस्तत्रोदासीन एव तिष्ठति। एवमुक्तो विधिः श्येनस्यानर्थहेतुतां प्रतिक्षेप्तुं नैव समर्थः। क्रत्वङ्गभूतायामग्निषोमीयहिंसायान्तु न फलसाधनत्वं मन्यामहे येनामीषां श्येनसमकक्षावत्त्वं सम्पनीपद्येत, अग्नीषोमीयादौ फलसाधनत्वाभावादेव रागाभावः, ततो"ऽग्नीषोमीयं पशुमालभेत" इति विधिरेव तत्र प्रवर्त्तकः। अयमत्र सारः—प्रधानभूता हिंसैवानर्थजनयित्री न क्रत्वङ्गभूतापीति, तस्माद्धिंसामिश्रत्वेनापि ज्योतिष्टोमादीनां नित्यानां नैव दुष्टत्वम्, (न हि कुष्ठादिमहारोगि-

---

१ भाट्टं पक्षमभिप्रेत्य आह—इत्येक आहुः" इति।

२—प्राभाकरं पक्षमुत्थापयति—"परेत्वि"ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्वहणक्षमचरकादिशास्त्रोपदिष्टमहायोगाङ्गभूतमहाविषादीनां सम्मिलितानां दुष्टत्वं[1] प्रमाणसम्प्रतिपन्नं, कस्यापीष्टं वा प्रेक्षावतः) इति ज्योतिष्टोमाग्नीषोमीयादीनां श्येनादियागतो महद्वैषम्यम्। तस्मात्—"चोदनालक्षणोऽर्थो धर्मः" (पू० मी० १।१।२) इति सूत्रोक्तार्थपदव्यावर्त्यानां श्येनादीनामधर्मत्वमेव अर्थात् श्येनाद्यनर्थे एवातिप्रसक्तिवारणार्थं धर्मलक्षणे "अर्थ" पदमुपात्तमिति वदन्ति।

अन्ये[2] तु—कृतिसाध्यत्वमिष्टसाधनत्वं[3] बलवदनिष्टाऽननुबन्धित्वञ्चेति[4] त्रयं विध्यर्थे मन्वानाः क्रत्वर्थायां हिंसायां साक्षान्निषेधाभावात् प्रायश्चित्तानुपदेशाच्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवदनिष्टाऽननुबन्धित्वञ्चैतत्त्रयमपि विधिना बोध्यते अतो क्रत्वर्था हिंसा नैवाऽनर्थभूता, अपितु प्रधानभूतैव सा "मा[5] हिंस्यात् सर्वा भूतानि" (छां०) "अजां मा[6] हिंसीः" (यजु०) "गां मा हिꣳसीः" (यजु०) इत्यादिश्रुतिशतप्रतिपाद्या। श्येनाद्याभिचारिकं कर्म तु साक्षादेव निषिद्धत्वात् प्रायश्चित्तोपदेशाच्चानर्थहेतुत्वमेवेति कृतिसाध्यतामिष्टसाधनतां बोधयन्नपि श्येनविधिर्बलवदनिष्टाननुबन्धित्वबोधने नैव क्षमः अर्थात् श्येनस्यानर्थहेतुतां नैव वारयति तस्मादुपपन्नं श्येनाग्नीषोमादीनां[7] वैषम्यम्। एतस्मिन्नपि पक्षे श्येनाद्यनर्थफलकमेव सौत्रमर्थपदम्।

१—प्रत्युत तादृशमहाविषाद्या रोगनिर्वहणक्षमतयोपकारमेव जनयन्ति नत्वपकारं, तद्वत् क्रतुस्वरूपोपकारकत्वेन यागीयहिंसायामपि ज्ञेयमित्याशयं मन्यते।

२—तार्किणां मतमाह—"अन्येत्वि"ति। ३—अर्थहेतुत्वमित्यर्थः। ४—अनर्थाऽहेतुत्वमित्यर्थः। ५—सामान्यनिषेधमाह—"मा हिंस्यादि"ति। ६—विशेषनिषेधमाह—"अजां मा" इत्यादि।

७—साङ्ख्यास्तु—काम्यानामिव नित्यानामपि दर्शपूर्णमासज्योतिष्टोमादीनां व्रीहिपश्वादिहिंसामिश्रितत्वेन त्याज्यत्वं मन्यमानाः विहितस्यापि निषिद्धत्वं निषिद्धस्यापि च विहितत्वं श्येनादिवदङ्गीकुर्वन्ति। एतेषां मते तु सर्वत्र दोषवत्सु कर्मसु रागद्वेषादिवशीकृतस्तत्तद्दोषसहिष्णुरेवाधिक्रियते। अतः श्येनादितौल्यमेव ज्योतिष्टोमादीनाम्। अहिंसाधर्मस्तु सर्वतो ज्यायान्। उक्तञ्च महाभारते—

जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते।
अहिंसया हि भूतानां जपयज्ञः प्रवर्त्तते॥ इत्याहुः।

अत्रत्योविस्तरः प्रकृताऽनुपयुक्तत्वान्न कृतोऽतोऽन्यतोऽनुसन्धेयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमसारग्राहिणस्तु--श्येनयागफलभूतः शत्रुवधाख्योऽभिचारः लोकप्रमाणसिद्धः, लौकिकोपायसाध्योऽपि, तत्र रागत एव पुंसां प्रवृत्तिदर्शनात् किन्त्वनुज्ञारूपेण श्येनयागे साधनतामात्रमेव वेदेन बोध्यते नत्वपूर्वविधिरूपतया। एवञ्च 'वेदप्रतिपाद्यत्व'पदेनैव श्येनेतिप्रसक्तिवारणसम्भवे पुनरर्थपदोपादानं निरर्थकमेवाभातीति तथापि 'अर्थ' पदनिवेशेन अनर्थसाधनत्वेनैव श्येनादीनामनर्थत्वं नतु स्वरूपसत्तयेति बुबोधयिषितमतस्तदुपादानं न व्यर्थम्।

अयमत्राभिसन्धिः[1]। चोदनासूत्रे-'पुरुषप्रवृत्तिबोधक वाक्यं चोदनेत्यभिधीयते। ततश्च "बलवदनिष्टाजनकत्वे सति पुरुषप्रवृत्तिबोधकवाक्यप्रतिपाद्यत्वं धर्मत्वम्" इति धर्मलक्षणं (तार्किकौपनिषदसिद्धान्तेन) फलति। 'श्येनेनाभिचरन् यजेत' गृहस्थः सदृशीं भार्यामुपेयात्' इत्यादिवचसां निवृत्तावेव तात्पर्यम्। प्रबलरागद्वेषदोषदूषितान्तःकरणोऽपि विषादिना शत्रुं न हन्यात्, बलवत्तरकामकलुषितमना अपि सवर्णभार्यातिरिक्तायां स्त्रियां न प्रवर्त्तेत इति प्रवृत्तिबोधकान्यपि फलतो निवृत्तिं प्रतिपादयन्ति। यतः तत्र तत्र सर्वापि प्रवृत्ती रागत एव। इत्थं यद्यपि श्येनादीनि कर्माणि हिंसा, स्त्रीसंसर्गप्रतिपादकानि च वाक्यानि क्षीणतां द्वारीकृत्य परमपुरुषार्थायोग्यत्वात्मकबलवदनिष्टजनकत्वेन न शुद्धं धर्मं प्रतिपादयन्ति तथापि परमतात्पर्यभूतनिवृत्तिपरत्वेन तेषामपि धर्मे पर्यवसानमवार्यमेव। तस्मात् 'साक्षात् परम्परया वा यन्निःश्रेयससाधनं तदेव धर्मः। अतएव 'य एव निःश्रेयसकरः स एष धर्मशब्देनोच्यते' इति मीमांसाभाष्ये शबरमुनिनामुक्तिरपि सङ्गच्छते। एतस्मिन् पक्षे सर्वाणि श्रौतानि स्मार्त्तानि वा कर्माणि, सर्वाश्चोपास्तयः, श्रवणादिसाधनपूर्वकं तत्त्वज्ञानं साक्षात् परम्परया निःश्रेयसहेतुत्वात् धर्म एवेति साम्प्रदायिकानां परः परामर्शः। एवञ्च 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः' (वै०१। आ० १। सू० २) 'चोदनालक्षणोऽर्थो धर्मः' (पू० मी० अ० १। पा० १। सू० २) इत्यादिपारमर्षसूत्राणामेकवाक्यतापि पर्यवसिता भवति। श्रुतिरपि च—'एष पन्था एतत्कर्मैतद् ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येत्तन्नातीयात् न ह्यत्यायन् पूर्वे, येऽत्यायँस्ते पराबभूवुः' (ऐतरेयारण्यक० २। आ०। अ० १। खँ० १) इत्येवञ्जातीयका दर्शितस्वरूपं धर्मं प्रतिपादयन्ती भवन्ती परममवलम्बनमास्तिकानाम्। एषैव च रीतिर्विशिष्य सर्वेषु लौकिकालौकिकफलकेषु श्रौतेषु स्मार्त्तेषु वा कर्मसु तात्पर्यमुद्रया योजनीया। एतेन "हिंसाप्रधानान्

१--परमसारग्राहिणामेवाभिसन्धिमुद्घाटयति—"अयमि"ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदान् प्रकल्प्य उदरम्भरिभिर्ब्राह्मणैरेव धनिकाः प्रतार्यन्ते" इत्याकारकाः कलुषितहृदयेन कृताः सौगतार्हताद्याक्षेपाः सुदूरमुत्सारणीयाः, तैरपि तेषु तेषु कर्मसु गृहिणो योजयद्भिरस्मद्दर्शितमार्गस्यैवानुसरणशरणकरणात् । तथाहि--दिगम्बराम्नाये 'सागारधर्मामृते'—(अ० २ । श्लो० ४०) ।

सत्रमप्यनुकम्प्यानां सृजेदनुजिघृक्षया ।
चिकित्साशालवद्दुष्ये त्रेज्यायै वाटिकाद्यपि ॥

इत्यादिना कस्मिंश्चिदंशेऽनुज्ञाता हिंसा फलतो निवर्त्तनया नैव दोषमावहति । अतएवोक्तात्पूर्वं 'निर्माप्यं जिनचैत्यतद्गृहमठस्वाध्यायशालादिकम्' एतच्छ्लोकीयस्वोपज्ञव्याख्यायां "भव्यकुमुदचन्द्रिका"ख्यायां स्वयमेव पण्डितप्रवरेण 'आशाधरेण' उक्तम्--'एतेन चैत्यालयादिनिर्मापणे सावद्यदोषशङ्का निरस्ता । यदाह-"तत्पापमपि न पापं यत्र महान् धर्मसम्बन्ध" इति, तस्माद्धङ्गयन्तरेण हिंसादिदोषेभ्यो व्यावर्त्तयद् वैदिकं शास्त्रं कुत्रापि न दुष्यति । अतएव श्रीभगवद्गीताया अष्टादशाध्याये सप्तमं श्लोकं टीकयन्तो श्रीमधुसूदनमुनयः--'विहितस्यापि निषिद्धत्वं निषिद्धस्यापि च विहितत्वं श्येनादिवदुपपन्नमेव । यथा हि 'श्येनेनाभिचरन् यजेत' इत्याद्यभिचारविधिना विहितोऽपि श्येनादिः 'न हिंस्यात् सर्वा भूतानि' इति निषेधविषयत्वादनर्थहेतुरेव, तद्दोषसहिष्णोरेव च रागद्वेषादिवशीकृतस्य तत्राधिकारः । एवं ज्योतिष्टोमादावपि । तथा चोक्तं मनुना—

जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्नवा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥

इति वदता मैत्रीमहिंसां प्रशंसता हिंसाया दुष्टत्वमेव प्रतिपादितम् । यद्यप्ययं ग्रन्थः तत्र पूर्वपक्षविधयोक्तः तथापि सकलपक्षीयैकवाक्यताकरणे सति दर्शितधर्मलक्षणानुसारमुक्त एव राद्धान्तः फलतीति तदेतत्प्रकरणान्तरे हिंसाऽहिंसास्वरूपनिर्णयावसरे सुनिपुणं भणिष्यामः । तस्मात्—"वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म" इति सुश्लिष्टं धर्मलक्षणमितिसङ्क्षेपः[1] । (सम्पादकः)

———

१ धर्मप्रस्तावोऽयं सर्वसाधारणतयोपकारं जनयन्विशेषतः शास्त्रिपरीक्षायां गृहीतमीमांसाशास्त्रानुपकरोतीति सुध्यातव्यम् । परं धर्मस्य गतिः सूक्ष्मतरेति न विस्मर्त्तव्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चममयूखस्य १० पृष्ठतोऽनुवृत्तम्

"बाणो भारविश्च"

(ले० श्रीयुत—ईश्वरचन्द्रशर्मा ब्रह्मचारी)

गद्यम्—शनैश्शनैश्चन्द्रदर्शनान्मन्दमन्दस्मिताया दशनप्रभेव ज्योत्स्ना निःपततन्ती निशाया मुखशोभामकरोत् । (का० री०)

\+ + +

पद्यम्—

उज्झती शुचमिवाशु तमिस्रा मन्तिकं व्रजति तारकराजे ।
दिक्प्रसादगुणमण्डनमूहे रश्मिहासविशदं मुखमैन्द्री ॥ ९-१८ ॥

(किरातार्जुनीयम्)

पद्ये दृष्ट एव प्रियेऽपगतशोकाया उज्ज्वलाननाया नायिकाया व्यवहार ऐन्द्रीचन्द्रयोः प्रदर्शितः । अत्रैन्द्रीपदं पूर्वदिशीन्द्रभार्यात्वं प्रत्याययतीति विधावन्तिकगामिनि तत्प्रसक्तिर्नौचित्यमनुसरति । परकीयाव्यवहारारोपेण तत्समर्थनं क्रियमाणं नातितोषकरम् ।

कविराजवाणस्य पदानि हृदयमाघ्नन्तीव, चन्दनजलच्छटाभिरिव निषिञ्चन्ति । झटिति हासापेक्षया मन्दं मन्दं स्मयोऽतिमनोरमो "विलासः" । यावद् यावदिन्दुरुपसर्पति तावत्तावद्रजनी मोदपूरिता स्मयते । यावच्च स्मयते तावदेव कलानिधिरुत्कण्ठते इति "शनैः शनैः" इत्यनेन 'मन्दमन्देत्यनेन च प्रतीयते । अत एव पद्यरश्मिहासाद्दशनप्रभोपमात्यन्तं हृदयं परिष्वजति ।

विस्तरो वाणवर्णनानां चमत्कारातिशये हेतुरितिवदन्तः पश्यन्तु यद्यपेक्षयातिन्यूनपदैरिदं वर्णनम् । पद्यमपि महाकविभारवेः यत्रेदं प्रसिद्ध्यति "भारवेरर्थगौरवम्" इति ।

बाणो वाक्पतिराजश्च ।

गद्यम्—आलोहिनीमधरप्रभामनङ्गाग्नेः प्रदहतोहृदयादूर्ध्वसंसर्पिणीं शिखामिवादाय निष्पतद्भिरुच्छ्वासैस्तरलीकृतासन्नलताकुसुमकेसरम्-पुण्डरीकम् । का०॥

पद्यम्—

\+ + +

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुच्यन्ते प्रेरितोद्वेलकेसरामूललुलितमकरन्दाः ।
निभृतं लीलाकुवलयप्रतिष्ठिताः कथमपि निश्वासाः ॥ (गौडवध०)

पद्ये—महाराजयशोवर्मकृतसमरमालोक्य शौर्यानुरागिणीनामप्सरसां कामोद्भूतचेष्टावर्णनम् । गद्ये—पुण्डरीकस्यातिभूमिगतास्मरदशा निरूपिता । पाणिपद्मकेसरोत्कम्पिनामपेक्षया समीपवर्त्तिवल्लरीपुष्पकेसराणि विधूनयन्तः श्वासा दैर्घ्ये जवे चाग्रेसराः । रसमवपाल्याप्यसरोनिश्वासा निकटस्थबहुपुष्पकेसराणि तरलयन्तःपुण्डरीकनिश्वासान्नानुधावितुं क्षमाः । अधरारुणकान्त्युत्प्रेक्षितकामाग्निज्वालया तप्तश्वासाघातजनितकेसरम्लानता चञ्चति । एवं सहृदयवेद्योऽर्थस्तुलनामतीतः । गद्यम्—उत्पतद्भिरिव दिवसकररथतुरगरुषा पक्षायमाणमण्डनचामरमालैर्गगनतलं-तुरङ्गैः । (६० च-) ५८ पृ०

× × × ×

पद्यम्—ये चंचलचामरपक्ष्मलैः शोभन्ते कर्णतालैः ।
उत्पतनतरलपक्षा इव त्रिदशगजयुद्धबुद्ध्या ॥ २६७ ॥ (गौ० व०)

करिणां गर्वयुद्धौत्सुक्ये प्रकाशयन्ती वाक्पतिराजोत्प्रेक्षा वाणोपज्ञा । अश्वस्थाने हस्तिनामुत्पतने न कापि नूतनता । स्वगुणप्रथितगौरवप्राणिनां समरकृतपरिभवेनेतरोत्कर्षः स्फुटो जायते । वाणेनाहवेच्छया परपरिभवो नानाविधाभिः प्रतिपादितः १ वाक्पतिराजो वाणस्यैकं प्रकारमनुकुर्वन्नपरभङ्गीमारचयितुं न शशाक । वाणशैल्यो दृश्यन्ताम्—हरिणौघैः श्रवसोर्निकर्ष इत्थम्—उपहसद्भिरिव सृक्कपुटप्रसृतफेनाट्टहासेन जवजडजङ्घां हरिणजातिम्, आकारयद्भिरिव संघट्टहेतोः हर्षहेषितेन उच्चैःश्रवसम्-तुरङ्गैः । (ह० च० ५८ पृ०) हरिणापेक्षया जवातिशय उच्चैःश्रवोपेक्षया च बलाधिक्यं व्यङ्ग्यम् । दिग्गजैर्योद्धुं दर्पशातोत्कण्ठा चैवं निबद्धा—आहवायोदस्तहस्ततया दिग्वारणानिवाह्वयन्तम् (ह० च० ६५ पृ०) इन्द्रायुधाभिधानाश्वस्य वर्णनमीक्ष्यताम् । गरुडस्तर्ज्यते । अतिनिष्ठुरेण मुहुर्मुहुः प्रकम्पितोदररन्ध्रेण हेषारवेण पूरितभुवनोदरविवरेण निर्भर्त्सयन्तमिवालीकवेगदुर्विदग्धं गरुत्मन्तम् । (का० री० ५४ पृ०)

वाणः त्रिविक्रमश्च ।

गद्यम्—यत्र च कन्यकाजनस्य कपोलतलालोक एव मुखप्रक्षालनम् । लोचनान्येव कर्णोत्पलानि,हसितच्छवय एवाङ्गरागा, निश्वासा एवाधिवासगन्धयुक्तयः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधरद्युतिरेव कुङ्कुममुखानुलेपनम्, आलापाः एव तंत्रीनिनादाः, भुजलता एव चम्पकवैकक्ष्यमालाः, करतलान्येव लीलाकमलानि, स्तना एव दर्पणाः, निजदेहप्रभैवांशुकावगुण्ठनम्, जघनस्थलान्येव विलासमणिशिलामयानि, कोमलाङ्गुलिराग एव चरणालक्तकरसः, नखमणिमरीचय एव कुट्टिमोपहारकुसुमप्रकराः । का० री०

× × × ×

गद्यम्—यासां तारुण्यमेव सर्वाङ्गेषु शोभार्थमाभरणम् उत्तुङ्गस्तनमण्डललावण्यमेव मुखकमलावलोकनाय दर्पणः, तारतरनयनकान्तिरेव मुखमण्डलमण्डनाय चन्दनललाटिका, भ्रूभङ्गा एव विभ्रमाय मृगमदपत्रभङ्गाः, कटाक्षा एव युवजनजयाय परमास्त्राणि, बन्धूककुसुमकान्तिदन्तच्छद एव लोकलोचनमोहनाय माहेन्द्रमणिः, मुखकमलपरिमलागतमधुकरमधुरझङ्कार एव विनोदाय वीणाध्वनिः । (न० म्पू०)

× × × ×

बाणकृतहेमकूटकन्यासौन्दर्यवर्णनमाश्रित्य त्रिविक्रमेण दक्षिणविलासिनीलावण्यं प्रदर्शितमित्युभयं पठतां सपद्येव स्फुरति । त्रिविक्रमेण पूर्वं यौवनस्य सर्वाङ्गीणालङ्कारत्वं प्रतिपाद्याङ्गानां भूषणानि पृथगपि निर्दिष्टानि । तदिदं नात्युचितम् । "स्तना एव दर्पणाः" इत्यस्य "उत्तुङ्गस्तनमण्डललावण्यमेव मुखकमलावलोकनाय दर्पणः„ इतीदं शब्दाडम्बरपरिवर्धितमनुकरणम् । मस्तकं प्रति निस्सरणमाश्रित्य नेत्रहुतौ चन्दनललाटिकात्वं रूपितं परं पुरः पार्श्वयोर्वा प्रचरणं दृष्टेर्निसर्गं, उर्द्धगमनं तु यत्ननिष्पाद्यम् । श्रवणकुवलयीभावेन नयनयोर्दैर्घ्यं कान्तिभूयस्त्वं च व्यज्यते । चम्पूकृतः कटाक्षाणां परमास्त्रता कुण्ठितेव क्षीयते । त्रिविक्रमेण बन्धूकपुष्पसादृश्येन ओष्ठारुणिमैव सूचितः । बाणेन त्वोष्ठप्रसृतशोणरुचः कुङ्कुमोद्वर्तनत्वं विधायाननलावण्यमुल्लासितम् । मध्याह्ने ज्योतिरिङ्गणप्रभैवैतत्पुरो महेन्द्रमणिर्न स्फुरति । बाणस्य "आलापाः एव तंत्रीनिनादा, इत्येतत् मुखकमलपरिमलागतमधुकरमधुरझङ्कार एव विनोदाय वीणाध्वतिः„ इतीत्थं प्रसारितं परमालापमाधुर्यमधरीकृतम् । युवतिवचोमाधुर्यं किं मन्दं येन रोलम्बझङ्कृतिरपेक्ष्यते । मुखकमलपरिमलस्तु बाणहासानिश्वासयोस्साम्ये न शक्तः ।

गद्यम्—एककर्णावसक्तदन्तपत्रप्रभाधवलितकपोलमण्डलां उद्यादिन्दुकिरणावच्छुरितमुखीमिव विभावरीं–मातङ्गकुमारीम् । (का० २१ पृ०)

× × × ×

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गद्यम्--काश्चिदुभयश्रवणासक्तदन्तिदन्तपत्रप्रभाधवलितमुखमण्डलाः सुरसरित्सलिलसंवलितकालिन्दीजलदेवता इव नर्मदयामन्त्रिताः । (न० च०)

× × ×

चम्प्वां किरातकामिनीनां कादम्बर्यां चण्डालकन्यायाश्च वर्णनम् । चम्पूकृता "एक" पदस्थाने "उभयेति" "कपोल" स्थाने 'मुखे' ति विन्यस्य एककर्णावसक्तदन्तपत्रप्रभाधवलितकपोलमण्डलाम्' इतीदं "उभयश्रवणावसक्तदन्तिदन्तपत्रप्रभाधवलितमुखमण्डलाः" इत्येवं कृतम् । चम्पूकृतोपमान्तरमाश्रितम् । तत्रानुरूप्यं न सर्वात्मना । भागीरथीमिलिता यमुना मुखवदुन्नतांश एव न संसृज्यतेऽपि तु सर्वथा । अपरत्र श्यामरजनीमुखं ताराराजोद्भासितम् इति श्यामलचण्डालकुमारीदन्तपत्रेण सह मनोरमानुरूपता । अतिचमत्कृतममुमुपमानोपमेयभावमालोक्य शक्यं वक्तुं "रत्नं समागच्छति काञ्चनेन"। इति ।

बाणः सुबन्धुश्च ।

तुलनाविषयस्सुबन्धुर्बाणादर्वाक्तनः । निरूपितं चैतच्छ्रीमता कृष्णमाचार्येण वासवदत्ताभूमिकायां सप्रमाणम् ।

पद्यम्-स्तनयुगमश्रुस्नातं समीतरवर्तिहृदयशोकाग्नेः ।

चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ॥ (का० ११ श्लो० २६ पृ०)

× × ×

गद्यम्-यस्य च प्रतापानलदग्धदयितानां रिपुस्त्रीणां करतलताडनभीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः । (बा० द०)

× × ×

सुबन्धुगद्ये कन्दर्पकेतुप्रतापवर्णना, कादम्बर्यां वैशम्पायनाभिधानशुकाविहितशूद्रकस्तुतिः । अभिनवभट्टबाणशब्दतर्कालंकारवात्स्यचक्रवर्तीत्यादिविरुद्भूषितैः श्रीकृष्णमाचार्यैः सुबन्धुभाव इत्थमभिव्यञ्जितः । अयं भावः । कन्दर्पकेतोः प्रतापानलेन रिपुस्त्रीणां दयितदाहात् तद्दयिता मास्म नाम वयमपि दग्धा भूमेति मन्यमाना मुक्ताहाराः अनलतप्तानां च तदपनोदनाय मेघोपसरणमेव शरणमिति पयोधरपरिसरपरिग्रहणे कृतमतयः,"अहो बत विपर्यस्तभागधेयानां क्वनु भविष्यति निर्वृतिः । यतो वयमितःपरमेताभिरेव करतलेन ताडयिष्यामहे इति भीताःपयोधरपरिसरं मुमुचुरिति कादम्बर्या अयं भावो मनोरमतमः । हारहानापेक्षयाऽश्रुहृदयशोकाग्निभ्यां रिपुनारीसंतापप्राचुर्यं द्योत्यते । व्रतेनौदासीन्यजुष्टा शान्तिस्तया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शत्रुस्त्रीणां दारुणसंतापस्तेन करुणा संवेद्या । सा शूद्रकप्रतापं प्रकाश्य वीरेऽङ्गभावं भजतीत्यनुपमोभावव्यतिकरः । वासवदत्तायां क्वेयं चमत्कृतिः । लोकप्रसिद्धाग्निजलव्यवहारे कौतुकातिरिक्तं न किंचित् । शत्रुकामिनीतापो वर्तते परं हृदयोत्कम्पितस्थिरानिरन्तरता नास्ति ।

गद्यम्—यस्यां च संध्यारागारुणा इव सिन्धूरमणिकुट्टिमेषु प्रारब्धनीलकमलिनीपरिमण्डला इव मरकतवेदिकासु गगनतलप्रसृतासु इव वैदूर्यमणिभूमिषु तिमिरपटलविघटनोद्यता इव कृष्णागुरुधूममण्डलेषु, अभिभूततारकापङ्क्त्य इव मुक्ताप्रालम्बेषु विकचकमलचुम्बिन इव नितम्बिनीमुखेषु प्रभातचन्द्रिकामध्यपतिता इव स्फटिकभित्तिप्रभासु, गगनसिन्धुतरङ्गावलम्बिन इव सितपताकांशुकेषु पल्लविता इव सूर्यकान्तोपलेषु, राहुमुखकुहरप्रविष्टा इवेन्द्रनीलवातायनविवरेषु विराजन्ते रविगभस्तयः । (का०)

× × × ×

गद्यम्—माञ्जिष्ठचामर इव दिग्गजेषु महाभारतसमररुधिरोद्गार इव कुरुक्षेत्रेषु सुरधनुविलेप इव जलच्छेदेषु, काषायपट इव शाक्याश्रमशाखिशिखासु कौसुम्भराग इव ध्वजपटपल्लवेषु, फलपाक इव कर्कन्धुषु कुङ्कुमरस इव व्योमसौधाङ्गणे, संचरदरुणयवनिकापट इव कालनटस्य, बालप्रवालभङ्गारुणे प्रसरति बालातपे । (वा० द०)

× × × ×

भास्करकिरणपतनस्थानानि सुबन्धुवाणयोर्भिन्नानि सुबन्धुना वैभातिकपाटलातपारुणवर्ण एवानेकशोणार्थसादृश्येनाभिहितः वाणेन न केवलमरुणिमा किन्तु नैल्यसारल्यप्रसारादयोऽपि स्फुरन्त इव पुरो निहिताः । सुबन्धुर्बालातपं क्वचन माञ्जिष्ठचामरं कुहचन रुधिरप्रवाहं वा संभावयति । दीधितयः कुत्रापि पतेयुः स एव शोणवर्ण ईक्ष्यते । अन्योत्प्रेक्षास्वप्ययमेवार्थः । वाणस्तु—नानावस्तुषु पतन्तीनां नवनवां त्विषमुद्भावयति । पताकावसनेषु बालातपसंसर्गे सुबन्धुःकौसुम्भरागमीक्ष्यते । वाण आह—मन्दाकिनीकल्लोलेषु प्लवन्ते । पवनाकम्पितवसनतयांशूनामपि तरङ्गितत्वं भासते पताकानामौन्नत्यातिशयो वस्त्राणामतितानवं वैमल्यञ्च प्रस्फुरति । अरुणानीलाश्च तरलिता मन्दकान्तयश्च प्रसरन्त्यो गुहानिविष्टाश्च शबला रवेरंशवोऽरुणातपाद्रमणीयतमाः । (सावशेषम्)

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गीर्व्वाण-वाणी कथं व्यावहारिकत्वमश्नुवीत ।

(निबन्धा—श्री दीनानाथ शर्म्मा शास्त्री सारस्वतः । मुलतानस्थ-
श्री सनातनधर्म्म-संस्कृत कालेजाऽध्यापकः ।)

अयि सुरसरस्वतीसरस्वदवगाहनाऽतिशयाऽऽत्तनिर्म्मलशेमुषीका × प्रणयि-पाठकमहाभागाः ! सर्व्वाऽनुभव-विषये विषयेऽत्र नाऽस्ति कोऽपि निह्नवो नाम; यद्-

"इह शिष्टाऽनुशिष्टानां शिष्टानामपि सर्व्वथा ।
वाचामेव प्रसादेन लोक-यात्रा प्रवर्तते ॥
इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योति रासंसारं न दीप्यते ॥

काव्यादर्शः १ । ३—४

नाऽत्र संशीतिर्, यत्—शब्दाह्वयज्योतिषा विना पुमान् चक्षुष्मान् अपि अन्धः; मुखकलनोऽपि मूकः; सश्रवा अप्येडः *; सपादोऽपि पङ्गुः; साकारोऽपि निराकारः; अपशुरपि पाशवाऽनपेतः । तस्य तनूर्विग्रहिणी मूर्खता तस्य पुंसः सत्ता मूर्तिमती अज्ञता । किमिव निरुच्यते; तथात्वे (ज्योतिरभावे) सति संसृति-व्यवहृतिसृतिरपि शाकल्यमत (लोप) मेव अश्नुवीत; सर्वत्रैव अज्ञता-सन्तमसस्य भानं तस्यैव च प्राज्यं राज्यं प्रसृतिसृतिमियात् । परं परमात्मना इत्थम्भावे मनुष्यपश्वो × पारस्परिकभिदाकठिनिमानमवसाय अलम्पुरुषीणम्+इदं शब्दाख्य ज्योतिर्मनुष्यायैव वैशिष्ट्येन वितीर्ण्णम् । अमुनैव ज्योतिषा मनुतनुजनुर्व्विविधां वाचं वाचं वाचं स्वकीयाभिसन्धीन् व्यक्तीकर्तुं प्रभुः; सर्व्वपथीनाश्च संसृति-व्यवहृतीर्निष्पादयितुञ्चाऽलम्भूष्णुः; तेनैव † भूमिष्ठोऽपि जनो विहायसि विहरतो विहायसोऽपि (पक्षिणोऽपि) अतिशय्य विहायसो (गगनस्य) वृत्तं वेवेत्ति । किं भूयसा—इदमीयेनैव 'उद्योतेन' ग्रन्थग्रन्थनं विधाय तत्र उपदेशपर्य्यवसायीनि सभ्यताऽनपायीनि च वचांसि समुपन्यस्य निजप्रसृमरयश-आसत्तिव्याजेनैव पुमान् इतरान् अपि उपकर्तुमीष्टे; स्वकीयाञ्चाऽपि सत्पथप्रवृत्तिमनपाकृत्य 'एका क्रिया द्व्यर्थकरी प्रसिद्धा' इत्याभाणकस्योदाहरणं जायते ।

---

* एडः—बधिरः । + 'अषडचाशितङ्ग्वलङ्कर्म्माऽलम्पुरुषाध्यु- इति खः ।

† 'अम्बाम्बगोभूमी'ति सस्य षः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृतमन्तर्गडुलेनाऽनेन सर्व्वाऽविसँव्वादि-विषयविस्तरेण । कथनस्येदमेव तात्पर्यम्; यद्—विश्वस्याऽस्य विश्वस्य किञ्चित्तारतम्येन वाणी एव उपजीव्या; सैव बुभुत्सिता । अद्यत्वे यद्यपि वाणी-भूमा जाग्रद्[1] दृश्यते; तेन का वाणी उपजीव्या, का च न इति सन्देग्धुं क्षम्यते; तथापि अनादिसादित्वेनैव उपजीव्योपजीवकत्वभिदा विशदमध्यवसातुं शक्यत एव वाणीनाम् । सर्व्वाऽविसँवादि-प्राचीनताऽञ्चिता गीर्वाणवाण्येव इतरासामुपजीव्या भाषाणामित्यत्र न काऽपि विप्रतिपत्तिर्निष्पक्षसमालोचनापथेन व्याटीकमानानामितरभाषाभाषिणामपि ऐदंयुगीनानां मनुतनुजनुषाम् । अमुष्यामेव भाषायां सर्वत × प्राचीना वेदा धर्म्मशास्त्राणि पुराणानि दर्शनानि च वैशद्येन सन्दृब्धानीति को न वेद । न किलेयं भाषा केवलगीर्वाणानामेव वाणी; प्रत्युत दनुतनुजनुषां (दैत्यानां) मनुतनुजनुषा (मनुष्याणा) मप्येषैव चिरन्ता[2] वाणी मातृभाषीभूता ।

यादृशो मधुरिमा, यादृशी साहित्याऽतिशयितता, यादृशं ज्ञानम् यादृग् लाभो यादृग् गौरवञ्च एतस्यां सौपर्व्वण्यां वाण्यां दृक्-प्राघुणकायते; न खलु तादृक्त्वमितरभाषासु अक्षिलक्ष्यीक्रियते इति ध्रुवमभिप्रेम × प्रतीमश्च ।

तथापि कियत × खेदस्य व्यतिकरो यद्—अद्यत्वे सैव सुरगवी असेव वर्तते । या जातु मातृभाषात्वमानमानशे; सैव अधुना परकीयेवास्माभिर्लक्ष्यते । या प्राक् कदाचित् सर्व्वाङ्गीणं कार्त्स्न्यं, प्राचीनताञ्च सर्व्वपथीनामाचकलत्; सैव अधुना प्राकृत्या भाषाया अपि अर्व्वाचीना मन्यते; एवञ्च नैयून्यौपयिकी सम्मन्य अव्यवहाराऽऽस्पदम् उरीक्रियते । तदीयहसिम्ने तदरातयस्तु चेष्टन्तामेव परं परविषादस्याऽयं व्यतिकरो यद्—अदसीया अकृतज्ञाः संस्कृतज्ञा बन्धवोऽपि तदीये हसिम्नि सहायभूताः सन्ति । इतरथा विचार्यताम्—सत्यपि तदितरभाषीयसँव्वादपत्रबंहिम्नि कथं स्यात् तदीय (संस्कृतभाषीय)-विविधपत्राणामसत्ता, सत्तायामपि तदीयग्राहकनैयूनी । ये केऽपि बिभ्रत्यपि ग्राहकत्वं संस्कृतपत्राणां पराऽऽग्रहग्रहिलत्वाऽकूपारपारवश्यात् तेऽपि संस्कृतपत्रस्थान् निबन्धान् वलोकयन्त्यपि न, तथैव बद्धान्येव तिष्ठन्ति पत्राणि तेषाम्; इतश्च महाविद्वांसस्तेषु तांस्तान् निबन्धान् वलोकमाना अपि तत्र स्वनिबद्धनिबन्धाऽर्प्पणे च न जाने

---

१ भूमा 'वहोर्लोपो भू च इति इमनिच आदेर्लोपः, इमनिचि पुंस्त्वम्; जाग्रदित्यत्राऽभ्यस्तत्वाद् नुमोऽभावः । २ 'चिरपरुद' इति त्रः स्त्रियां टाप् । ३ 'तत्सर्वादेः पथ्यङ्ग'-इति खः टाप् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वकीयं कमपि † लघिमानमिवाऽऽकलयन्ति । वत !!! कीदृशी शोच्या दशा । इत्थङ्कारं कारंकारं तु मृतत्वव्यपदेश्या(Dead Language) देवगवी मृतत्वव्यपदेशमनपाकृत्यैव स्वकीयमिमम् अन्यप्रत्तोपाधिम्[1] इतोऽपि वैशिष्ट्येन द्रढयेत् ।

प्रणयि-पाठक महाभागाः ! वाच्यामिमां दुरवस्थां निभाल्याऽस्मदीयस्वान्तं बलवत् प्रेङ्खति । हा ! किमु नाऽयं विषण्णताव्यतिकरो यद्-अस्मदीया आर्य्या एव आर्य्यभाषायै क्रुध्येयुः, द्रह्येयुर्वा । ते इतरा भाषास्तु कण्ठाऽऽभरणभूताः कुर्व्वताम्, परं स्वकीयामधीयतामेव न, तदध्ययनमारिप्सन्तामपि न ! हा ! किमु समयवैपरीत्यमजनि ? नहि—तथैव सूर्य्यः प्राचि उदेति, प्रतीचि च अस्तत्वमेति, तादृश्येव दिनानि, तादृश्य एव निशः, तथैव पुंसामाकृतयः, न किल पुंशिरस्सु शृङ्गजनिरजनि । तत् कदाचित् सँस्कृतभाषायामेव दोषः स्याद् ? नहि—नाऽत्र आङ्गलभाषावद् उच्चारणपार्थक्यम्, यवनानीवद्वा[2] अक्षरह्रासः । अपि वा गीर्व्वाणवाणी उदरपोषणायैव नाऽलं स्याद् ? नहि—एतदपि न विचारसहम्, इतरभाषास्वपि अद्यत्वे तादवस्थ्याऽनपायात् । तद् अपि नाम संस्कृतवाचि काठिन्यभूयिष्ठता जागरिता[3] स्याद् ? मैवम्-एतदप्यतिस्थवीयो वचः, अद्यत्वे तदीयमहासौकर्य्यप्रयत्नस्य दृक्पथाऽनुभूयमानत्वाद् ।

एतन्निदानविवेके च सर्व्वतः प्राग् एतदीयहसिमनिदानमिदमेवाऽध्यवसीयते, यद्—वर्तमानो राजा नाऽमूं प्राधान्येन व्यवातिष्ठिपद् । 'यथा राजा तथा प्रजा' इत्याभाणक एतदुदाहरणक एव । हा ! क्व गतोऽसावस्मदिष्टो[4] दिष्टो (ऽनेहा) यदा भोजराजराज्यमासाञ्चक्रे यदध्युषितचरी धारानगरी सत्यं तेनैव संस्कृतभक्तेन राजन्वती ववृते । तदा गीर्व्वाणवाण्याः प्राधान्यं प्रादुरासिष्ट । तत्रत्याः कुविन्दा अपि—

"भूपाल मौलिमणिरञ्जित पादपीठ !
हे साहसाङ्क ! कवयानि वयानि यानि ?"

एतादृशि पद्यान्यशुश्रवन्[1] । अद्यत्वे यद्यपि वर्तमानराज्यस्यैव सत्तातो

---

† सत्यमुक्तं, निबन्धार्थं प्रार्थ्यमाना अपि पत्रोत्तरदानेपि स्वकं लघिमानमाकलयन्ते । (सम्पा०)

१ 'क्यन्तोघु' रिति शास्त्रेण 'उपाधिः' पुंसि । २ यवनानी—यवनलिपिः । ३ जागरिता—'जाग्रोऽविचिण्' इति किति गुणः । ४ अस्माकमिष्टः काल इति अस्मदिष्टो दिष्टः ।

१ णिच्त्वाद् वृद्धावावादेशे 'णौ चङ्य—' इति ह्रस्वः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुद्रायन्त्रादि अवातरत्, तेन, तेन तत्तद्भाषाप्रचारप्रसारभूयिष्ठतायां सुमहत् सौविध्यमलम्भि, तथाऽपि नैतन्मात्रेणैव संस्कृतभाषाया अनुभूयमानम् अप्राधान्यं निराकर्तुं शक्यते। यद्यद्यप्रभृत्येव राजसमाजसम्बद्धेषु कार्य्येषु गीर्व्वाणवाणी-समुपयोग आदिश्येत राजद्वारेण, तर्ह्येव ह्यस्तोऽद्य सुरगव्याः प्रचारभूयस्त्वे महदन्तरं प्रसज्येत। इदञ्चाऽस्माकम् एतत्कारणविदुषां विदुषामेव कर्तव्यम्, यत्-तेऽस्याः प्राधान्येन राजाऽऽश्रयाऽऽसक्तौ आपार्ष्णि आमस्तकञ्च स्वेदस्रावं विदधत आकार्तार्थ्यं भगीरथप्रयत्नं न मुञ्चेयुः, यावतो बलिदानस्य प्रयोजनीयता निष्पद्येत, यावत्कालस्य अपव्यय एव कुतो न जागृयाद्[२]. राजाऽक्षिगतौ[३] एव कामं स्युः, परमेतदकृत्वा श्वासं न गृह्णीयुः। इत्थम्भावे गीर्व्वाणवाण्या व्यावहारिकता निकामं निष्पद्येत।

अव्यावहारिकत्वे द्वैतीयीकं कारणमिदमेव चकास्ति, यद्—अद्यत्वे पुरेव वयं न केनाऽपि सह गीर्व्वाणवाण्यां सँल्लपामः। अद्यत्वे केनाऽपि साकं यदि संस्कृत उद्येत, तर्ह्यसावनेन स्वपरीक्षामेवाऽवसाय अमर्षं वर्षं वर्षं वाचमेव स्वकीयां यच्छति। कियतश्शोकस्याऽवसरः। इतरे च स्वकीया एव संस्स्कृते संल्लपतामेव कृते सोत्प्रासोक्तीर्वितन्वते। अभिदधति च—ब्राह्मणानामियं भाषा, अद्यत्वेऽमुष्याः का प्रयोजनीयता-इति। परं ते नैतज्जानन्ति, यद्—विप्र-योग-विप्रयोगं प्राप्यैवाऽवसीदतीयं वाक्। अपरे च महोदयाः सँस्कृतसँल्लापोत्साहि-नामेव भाषणेषु प्रतिपदं च्युतसंस्कृतीरेव प्रदर्श्य स्वशौर्य्यं मन्वाना एतद्विषये सोत्साहानपि निरुत्साहान्निर्म्मान्ति। तेनैव व्यावहारिकता नाऽस्या निष्पद्यते नाम भाषायाः। ततोऽस्या व्यावहारिकत्वैषणायाम् अस्माभिरिमे दोषा अपाकर-णीयाः। तदा निरवग्रहः स्यादमुष्याः प्रसारः।

अव्यावहारिकतायां तार्तीयीकी[४] दिक् संस्कृतज्ञानां प्राज्ञानामपि पार्श्वेऽसं-स्कृतपत्रलेखनं नाम। एतन्निरासेऽपि चेष्टनीयम्। प्रतिजानीरन् सँस्कृतज्ञा यद्—यदि प्राज्ञीयस्य पार्श्वेन, तर्हि विशारद-शास्त्रिविद्याऽर्थिजनसन्निधौ तु संस्कृत एव पत्रव्यवहृतिं विदध्युः। कामं तत्र संस्कृतम् अनलङ्कृति नीरसं न नव्यपद-

---

२ जागृयाद्—विधिलिङि यासुटो ङित्त्वाद् न गुणः, आशीर्लिङि तु कित्त्वात् 'जाग्रोऽ-' इति गुणो भवत्येव। ३ अक्षिगतो द्वेष्यः। ४ अत्र 'तीयादीकक् स्वार्थे' 'नञ्स्नञीकक' इति ङीप्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सँव्वलितं साधारण्यपरीतं वा स्याद्, न काऽपि तेन हानिः । एवं सति सर्व्वे सोत्साहाः सन्तः संस्कृतप्रसारे कारणं स्युः ।

अव्यावहारिकत्वे तुरीयं बीजं छात्राणामनुत्साहनम् । छात्रा एव सुरसरस्वतीतरोर्मूलम् । तादवस्थ्ये यथैवैते संस्कारं लभेरन्; यौवनेऽपि तादृक्षं विन्देरन् । छात्रतायामेव इमे स्वकलितललितपदावलीगुम्फितलेखाऽऽदिकार्थमुत्साहनीयाः । तत्तत्पत्रसम्पादकानामपि विधेयम्; यत् तेऽशुद्धिपरीतानपि छात्रनिबन्धान् साधु सम्पाद्य स्वस्वपत्रेऽवश्यं प्रकाशयन्तु, आवश्यकतायां जागरूकायां सत्यां पुरस्कारप्रदानमपि कुर्व्वीरन्; येन छात्रा अपि सोत्साहाः सन्तो भविष्यल्लेखकास्तथा तत्तत्पत्रग्राहकवर्द्धयितारश्च स्युः । यतो भवति हि छात्राणां स्वमुद्रितलेखस्य अन्यान् प्रति प्रदर्शयितुं महीयान् स्वाभाविकाऽनुरागः । तेन ते तानि तानि पत्राणि अन्यान् ग्राहयितुं बलवत् प्रयुञ्जते । छात्राश्च छात्राणां वचांसि श्रद्दधत्यपि । एवं पत्राणां ग्राहकवृद्धिश्छात्राणाञ्च निबन्धबन्धनादिषु च महान् पटिमा प्रसज्येत । एवम्—'एका क्रिया द्व्यर्थकरी प्रसिद्धा'—भवेत् । तद्व्याजेनैव गीर्व्वाणवाण्यपि व्यावहारिकत्वमश्नुवीत । अकृते एवमस्माभिर्दृष्टम्—यल् लेखचणा अपि छात्राः सम्पादकौदासीन्येन स्वपूर्व्वलेखाऽप्रकाशनान्निरुत्साहाः सन्तो भविष्यत्कृते जाड्यस्य पात्रं भवन्ति; अथ च तत्पत्रस्य द्विषन्तो जायन्ते । 'जडा मा भूवन्' इति छात्रा ईदृगर्थेषु प्रोत्साहनीयाः । अयमपि साधीयान् उपायो व्यावहारिकत्वविधाने भारतभारत्याः ।

पञ्चमो हेतुरविसृत्वरताया विद्यते वर्तमानप्रचलितशब्दानां संस्कृतकोषेष्वनुपलम्भः । संस्कृतविद्वद्भिरेतदर्थं सुमहच्चेष्टनीयम् । महाकोषद्वयीनिर्म्मितिर्ध्रुवमपेक्ष्यते; यस्यामार्य्यभाषाया गीर्व्वाणवाणीपदानि, संस्कृतपदानाञ्च हैन्दवभाषापदानि कार्त्स्न्येनैव प्राप्येरन् । ते विद्वांसश्च प्रचलितांस्तांस्ताञ्च्छब्दान् प्रायस्तत्सदृशसंस्कृतिमतो विदध्युः; तत्प्रचारञ्च कुर्व्वन्तु । एतद्विषये 'महामहोपाध्यायपण्डितशिवदत्तशर्म्माणो दाधिमथा' धन्यवादभाजनम्[1] । यदि तेषां जीवनं परमेशाऽनुकम्पया दीर्घं स्याद्; यत्कृतेऽभ्यर्थ्यते परेशः; तर्हि 'नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्' इति निष्पत्स्यत एव; सर्व्व एव आङ्गलोर्दुशब्दाश्च संस्कारं लम्भिता भविष्यन्ति । यथा—'मास्टर' इत्यस्य

१ अत्र 'परवाल्लिङ्गं द्वन्द्वतत्पु०' इति क्लीबता, एकत्वप्राधान्यादेकवचनम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृते 'मास्तर' इति, 'आदमी' त्यस्य 'आदमी'ति,–'मनजूरी' इत्यस्य 'मञ्जूरीकारः' इति, 'मदद' इत्यस्य 'मदद' इति, 'मोटर' इत्यस्य 'मृत्तर' इति, 'दरजी' इत्यस्य दरयोजी' "ओरिएण्टल कौलेज" इत्यस्य "आर्यान्तलकालेज" इत्यादि, ईदृशां पदानां प्रचारसन्निधौ[२] सति निष्प्रतिबन्धमेव व्यवह्रियेत सुरवाक्।

षष्ठं सुमहत् कारणं वर्व्वर्ति अमुष्या × प्रचारनैयून्ये संस्कृतपत्राणां नैयूनी, ग्राहकाणामौदासीनी च। प्रतिप्रान्तं प्रतिनगरञ्चाऽपेक्षिता वर्तते दैनिक-साप्ताहिक-पाक्षिक-मासिकाऽऽदिविविधविषयमयसंस्कृतपत्राऽऽविर्भाव-प्रयोजनीयता; तद्ग्राहकवृद्धौ चेष्टा च। यत्र केवलम् 'अस्ति' भवती त्यवच्छिन्नाः साधारण्यपरीता एव सर्वे लेखा नेष्यन्ते। क्वचिज्जटिलत्वमपि; कुहचिद्बन्धशैथिल्यमपि; कुहचिदनुप्रासयमकश्लेषविरोधाऽऽदिशाब्दिकाऽलङ्कृतिच्छटाऽपि, अपरत्र अर्थगरिमाऽपि; कुत्रचन ताद्धितिककार्दन्तिकाऽऽदिवैयाकरणविशिष्टमञ्जुलपदोपेतताऽपि, क्वचन साधारण्यमपि, कुत्रचिद् अपह्नुत्युत्प्रेक्षाऽतिशयोक्तिवक्रोक्त्यादिभिर्वैलक्षण्यमप्यावश्यकम् *। अकृत एवं केवलसौकर्य्याऽऽदृतावेव सत्यां प्राचीनेषु काव्येषु शीघ्रं प्रवृत्ती रुचिर्वा न भवितुं शक्येत साहित्योन्नतिमभिलाषुकाणां विद्यार्थिनाम्। एवङ्कारञ्च विशिष्टा साहिती लुप्यतैव क्रमशः। परं नेष्टमेतद्। समये २ च प्रहेलिकाचित्रबन्धाऽऽदिविविधप्रश्नमनोरञ्जक-लघुलघूपन्यासाश्च विरचय्य प्रकाश्येरन्। अथ चैतादृक् पत्राऽविर्भावात् प्राक् स्थिरकोषनैयत्येऽपि अवश्यं प्रणिधेलिमम[३]। एतद्विषयेऽप्रणिधानादेव पत्राणि दैनन्दिनम अकाल एव कालकवलीभूय ग्राहकाणामनास्थाऽऽस्पदं भवन्ति। अथ च एतत्सम्बन्धे स्थानस्थाने गीर्व्वाणवाणी सम्मेलननिवेशनाऽऽवश्यकताऽवश्यं जरीजृम्भ्यते तानि सम्मेलनानि च तत्तत्पत्रप्रचाराय विविधोपायराशिभिर्य्यथाऽऽङ्गलभाषाप्रचारो जातस्तथैव औपयिकानि प्रयुञ्जीरन्। एतत् सुमहद् हर्षाऽऽस्पदम्; यत पाण्डित्यनिकषायमाणानां महामहोपाध्यायानां श्रद्धेयपण्डितगिरिधरशर्म्मचतुर्वेदन्यायव्याकरणाचार्य्याणां शुभनाम एतद्विषये सर्वत × प्राग् ग्रहीतुं शक्यते

---

२ क्यन्तघुत्वात् पुंस्त्वम्।

* मयाप्ययमर्थो मान्यते, अनुष्ठितमपि च प्रायो गद्यं पद्यञ्च लिखता, परं केषाञ्चन प्रतिकूलवृत्तीरालोच्य सम्प्रत्युदास्यते। [सम्पा०]

३ 'केलिमर उपसंख्यानं' तव्यदर्थे; 'आतो लोप' इत्यालोपः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येषामेव शुभप्रेरणया संस्कृतसाहित्यसम्मेलने अल्पेतरत् कार्यजातं जातम् । एवञ्च तेषामेवाऽनुकरणीयशुभनोदनयैव लवपुरे 'पञ्चनदीयसंस्कृतसाहित्यपरिषद्' अवतीर्णा । या च 'उद्योत' मचिरमेव प्रासोष्ट । अस्तु—इदमपि पत्रं चेद् अनुग्राहकाणां ग्राहकाणां भूमानमासीदेत्; तद्द्वारैव च लक्ष्यं सनातनधर्मप्रचारमपि महत्या आरभट्या कुर्व्वीत; बृहन्निबन्धृणां रोचकनिबन्धानपि प्राप्नुयात् तद् नाऽत्र संशीतिः, पञ्चनदे भूयान् संस्कृताऽनुराग × प्रवर्द्धेत ।

सप्तमं कारणमव्यावहारिकत्वस्य विश्वविद्यालयेषु एतदप्राधान्यम् । पञ्चापविश्वविद्यालय एवाऽत्र निदर्शने द्रष्टव्यः । असौ विद्यार्थि-क्रमिकसङ्ख्याया प्रशस्तिपत्रे सर्वविधपत्रोत्तरादिके परिणामे च संस्कृतेतरामेव भाषां प्रयुङ्क्ते । संस्कृतपरीक्षासम्बद्धे कार्य्यकलापे तु संस्कृतेतरभाषोपयोगोऽन्याय्य एव । एतदर्थं संस्कृतज्ञैरवधेयम् ।

अन्तिमे कारणे च धनिनामुपेक्षा, पण्डितानामालस्याऽऽदिकञ्च परिगणनीयम् । धनिका हि वारवधूलास्येषु द्यूतमद्यतमालपत्रादिसेवनेषु लोकमत(वोट) भिक्षायाञ्च लक्षशो नाशयन्ति; यदि इयदेव द्रव्यं संस्कृतप्रचारकर्मणि व्ययीस्यात्; तर्हि गीर्व्वाणवाणी समूला वरीवृत्येत । पण्डितानामालस्यञ्च विश्वविश्रुतमेव । नैतेषु उत्साहः, न व्याख्यान्ति; न वा लेखलेखने उत्सहन्ते; न कार्य्याऽन्तरेष्वन्यानुत्साहयन्ति, न नास्तिकानुत्तरन्ति सर्व्वत्रैवेमे घृणाहशा विलोक्यन्ते; क्व च नाऽपि पाठशालानां वृद्धिमादर्शतां वा न कुर्वन्ति । यद्यपि न सर्व्वे इदंन्यक्कारभाजनम्; तथाऽपि सर्व्वत × प्राप्यमाणो न्यक्कार एव एतदालस्येऽन्यप्रमाणाऽनपेक्षं स्वत×प्रमाणम् ।

पाठकमहाभागाः ! लेखविस्तीर्णिरजानि । अस्माकं वैयर्थ्यसँव्वलितो द्राविमा नेष्टः । कथनस्याऽभिसन्धिरयमेव; यद्—उपर्युक्तयुक्तकारणमूलिकैव स्याद् गैर्व्वाण्या वाण्या अभिवृद्धिः । यदि वयमेव संस्कृतज्ञा × कृतज्ञाः सन्तोऽमुष्याः सौपर्वण्या वाण्या व्यावहारिकत्वविधाने उपर्युक्तानुपायान् आवापोद्वापाभ्याम् (अन्वयव्यतिरेकाभ्यां) नाचरिष्यामः; तर्हि तदितरभाषिण एव कस्मादकस्मादस्मिन् पथि विना स्वार्थमुपेयुः । अत × परमुखाऽपेक्षिततारूपतुन्दपरिमृजतां विहाय अस्माभिर्यथाक्षमतम एतस्या × प्रसारण एव बद्धपरिकरैर्भाव्यम् अन्यथा लोकोऽस्मानित्थमाक्षेप्स्यति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीरक्षीरविवेके हंसाऽऽलस्यं त्वमेव तनुषे चेद् ।
विश्वस्मिन्नधुनाऽन्यः कुलव्रतं पालयिष्यति कः" ॥

इति । ईदृश्यां निन्दायाश्च 'सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते' इति भगवद्—भग-वद्वचः स्मारंस्मारम् अस्माभिः स्वजीवनचन्द्रे लाञ्छनाऽवकाश एव नार्प्पणीयः; येन दोषराशय ॲ प्रादुःष्युः । तदैव भविष्यति भविष्यति अस्मज्जीवितस्य वास्तविक 'उद्योतो' द्योत इति निश्चप्रचम इति किमु विस्तीर्णपरिषेपणेन ॥ इति दिक् ॥

———

सँस्कृतभाषणम् ।

(ले० श्रीवारूरामशर्मा शास्त्री स० ध० हाईस्कूल–शामचौरासी–होश्यारपुर)

महानुभावाः ? एकदा भारतीयाभ्युदयकालेऽमुष्मिन्निखिले भारते सुरभात्यैवाऽभूद् आबालगोपालं वाङ्मयो व्यवहारो जनेषु । महामान्या महर्षयोऽस्या भारत्या व्यवहारम् ऐहिकामुष्मिकाऽभ्युदयकारणमवर्णयन् । नचैतदवितथम् 'एकः शब्दः सुष्ठु युयुक्तः सम्यज्ज्ञातः स्वर्गेलोके च कामधुग्भवती'ति श्रुतेः ।

परमहो ! महोदयाः ! यस्याः व्यवहारं सकलकल्मषमोषकमाह भगवती श्रुतिस्तामेवाद्य जनाः क्वचिदप्यभाष्यमाणामनीक्षमाणाः 'मृतभाषे' यमित्युद्गिरन्तोऽनुकम्पन्तेऽस्मासु ।

'मृतभाषा' इति कथने पूर्वमियं जीवितासीद् इत्युनुमन्येताऽपि परं यदि कश्चिदिमां सर्वथैव अभाषामभिदधीत ततो न शक्येताऽस्या अस्मत्प्रमुखैरालस्यसखैः भाषात्वं साधयितुम् । अस्तु—अस्माकं पुरोधुनाऽवतिष्ठते पथ-द्वयम् :— अनुमोदेमहि 'मृतमाषे' यमित्यपरोक्तं वचः, जीवितां वा दर्शयेमाऽमरपदप्रदायिनीं मातरं सुरभारतीम् । मन्महे न मर्षयेत कश्चिदपि ऋषिवंशजः मुमूर्षोरपि जीवनं संचारयितुर्मातुः सुरभारत्या 'मृत' पद व्यपदेशम् । यदि नाम भवोद्भवोप्तबीजाया पाणिनीयादिव्याकरणाऽऽलवालिताया वर्षपूगतपःसञ्चितार्षविचारप्रवाहसिञ्चितायाः सुरभारत्याः कृते 'मृत' पदं व्यह्रियेत ततः पदे २ उच्चारणेऽपि प्रलयभावजर्जरितमूलानाम् इंग्लिशादीनां कृतेऽवश्यं व्यवह्रियेत 'मृततम' पदम् ।

परं नायं शापस्याऽऽत्मश्लाघाया वा समयः । विचारणीयमेतदस्माभिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमेनां जनेषु दर्शयेम जीवन्तीम् । असङ्ख्यैर्न्यायवेदान्तसांख्यादिदर्शनैः साङ्गोपाङ्गैर्वेदैरन्यैश्च ग्रन्थैः समृद्धायाः सुरभारत्या नापेक्ष्यते ग्रन्थान्तरसंवर्द्धनेन जागरूकत्वप्रदर्शनम् ।

केवलमपेक्ष्यते भाषणप्रचारः । नास्त्यधुनाऽपि संस्कृताध्येतॄणां सङ्ख्यायां न्यूनता । न केवलं राष्ट्रीयेषु अपितु राजकीयाऽऽँग्लविद्यालयेष्वपि लब्धस्थानेयं सुरभारती । अमरपदप्रदायिन्या 'मृत' त्वव्यपदेशकमेकमेव कारणम् 'संस्कृतवित्सु सुरगिरा भाषणाभावः ! अपहृते त्वस्मिन् नावरुन्धीत कोऽपि अमरपदव्यपदेशं सुरभारत्याः ।

परं सँस्कृतभाषणेऽद्यत्वे महदिदं काठिन्यम्—१ शुद्धसंस्कृतभाषणेऽनभ्यासादशुद्धंप्रयुञ्जानानस्मानभियुञ्जीत कश्चित् । २ सुरगिरो ह्रासमनुलब्धाऽऽविष्कृतिजन्मनां वस्तूनां सुरगिरि वाचकशब्दाभावात्कैः शब्दैस्तान्युच्येरन् ? । दृश्यन्ते हि बहूनि द्रव्याणि संस्कृतह्रासानन्तरमेव लब्धजन्मानि । यथाः-

परिधेयेषु—कोटबूट,पतलूनकमीजप्रभृतयः । यानेषु-मोटर-रेल-साईकिल प्रभृतयः । बिस्कुट प्रभृतय श्चान्नेषु । अमीषाञ्च संस्कृतकोशे वाचकशब्दान्वेषणमतिशयीत शुद्धजले बालुकायां वा घृततैलान्वेषणम् !

अत्रोच्यते—उभयविधायामपि विप्रतिपत्तौ अनुकर्त्तव्या अस्माभिरींग्लिशविदः । ते हि पञ्चषाण्यप्यधीत्य वाक्यानि अनर्गलं भाषन्ते इग्लिशम्, वयं पुनरधीत्य द्वादशभिर्वर्षैर्व्याकरणं शरणं मन्महेऽशुद्धिभ्यो बिभ्यतः संस्कृतभाषणतो मौनम् । ओ ? इतोऽप्यधिकमेधेताऽस्मद्विधानां कृते कारणं लज्जायाः ? किं भोः ? जरद्वैयाकरणाः इहैव पर्यवसायिषत व्याकरणाध्ययनश्रमस्य !

मा भैषुरशुद्धिभ्यः । अप्रचलितया गिरा व्यवहरन् न कोपि हीयतेऽशुद्धिभ्यः । बहवस्तावत् सर्वथैव स्खलितनियममींग्लिशं व्यवहरन्ति भाषातत्त्वविद्भिरींग्लिशज्ञैः । वयं संस्कृतविद एव संस्कृतव्याकरणनियमस्खलनाद्बिभ्यतोऽपि समीहितसिद्धये व्यवहराम एव प्रान्तान्तरं गताःप्रतिमात्रंच्युतया तत्तद्देशीयभाषया । मान्याः ! विहितेक्षणाः क्षणं निवर्णयत किमु वयं नाऽभाषिष्महि कदाचिदपरदेशीयामशुद्धां पदावलिम् ? । यदि तथ्यं नाम इदम ? अवोचाम कदापि अपरप्रान्तीयां पदावलिं ततः किमपराद्धं प्रतिमात्रं कलमषंकषया देवभाषया ? । किञ्च भोः भोः ? अदर्शदेव लेखकः वाराणसीमारभ्य लवपुरं कालि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काताश्च यावदेकैकशोनैकशो विदुषः न जहाति संस्कृतभाषणाऽशुद्धिः कृतस्वाध्यायं महामहोपाध्यायमपि। (अनयाऽनास्पदीकृतान् कृतिनः क्षमामेष याचमानो वस्तुस्थितिमभ्यधाल्लेखकः)।

सँस्कृतमार्तण्डाऽभ्युदये व्याकरण-दर्शनं विमर्शनायाभूद् भाषातत्त्वस्य। तदेव कालान्तरे पर्यणंसीद् दण्डादण्डि योधने। परिणते निदाघमार्त्तण्डमण्डले स्थण्डिलो[1] उपविश्याऽऽगन्तुकोऽवादीद् 'वैदेशिकस्तृषार्त्तोस्मि जलं यच्छेयुर्मे' इति तमस्वागतीकृत्याऽपूरयित्वा चोदन्यां तदीयां स्वपाण्डित्यं प्रदर्शयन्तः दण्डादण्डि अकार्ष्म। प्राकृतिकोऽसौ नियमः प्रतिवस्तु। किमप्यभिधेयं शैशवमपहाय आत्मानमुन्नयन् यौवनं दुरुपयुङ्क्ते विगीते कर्मणि। तेनैव च तद्भजते क्षयम् तथैवाऽस्मदीयं व्याकरणं यौवने उत्पादितानेकजन्यम् अधुनाऽध्यशयिष्ट मरणमञ्चकम्। तन्महानुभावाः माशोचिषुः। 'अशुद्धभाषणे कश्चिदभियुञ्जीताऽस्मानि,ति विप्रतिपत्तिरपि प्लायिष्ट क्वचित्।

आँ! अवशिष्यते 'नूतने 'मोटराद्यभिधेयमभिधीयीत केन' इति। 'मोटर' फिटन' 'कोट' 'कमीज' प्रभृतयः शब्दाः पाणिनीयमुग्धबोधादिव्याकरणैः कृतसंस्काराः सप्रत्ययाः प्रयोक्तव्याः। नास्ति तत्र दोषलेशः। अन्यास्वपि भाषासु वैदेशिकाः शब्दाः सञ्जातसंस्कारप्रत्ययाः लब्धव्यवहाराश्चावलोक्यन्तेः—इंग्लिश भाषायाम्—'हिन्दूज़' 'सनातनिष्ट' 'घी' प्रभृतयः सप्रत्यया दृश्यन्ते व्यवह्रियन्ते च।

पञ्जावी भाषायाम्—"कोट 'दे' खिस्से चि क्लॉक 'नु' रख छड्ड" अमुष्मिन् वाक्ये 'कोट' 'क्लॉक' (इंग्लिशभाषीय) शब्दाभ्यां 'दे' 'नु' इति सम्बन्ध कर्मद्योतकौ प्रत्ययौ प्रत्यहं विदधीमहि। "कोट की जेव में घड़ी रख दे" इति वाक्येऽपि अनुदिनं प्रयुञ्ज्महि 'कोट' 'जेब' शब्दाभ्यां 'की' 'में' प्रत्ययौ। "कोटेर पाकेटे" बङ्गभाषीया अपि 'कोट' 'पाकेठ' शब्दौ सप्रत्ययौ कुर्वन्ति प्रयुञ्जते च। तत्किमपराद्धं वराकेण संस्कृतवराकेण। येन माविधायिषताऽपरभाषीयेभ्यः स्वकीयान् प्रत्ययान्। यदि नाम डाक्टरः कुर्त्तकोटिः अर्हति 'मिसमिलरं' सँस्कृतभारतीयकटिवस्त्रेण सिन्दूरविन्दुना च परिष्कृत्य हिन्दूधर्मे प्रवेशयतुं वक्तुञ्च प्राविक्षन्नतीतेऽपि कालेऽनेके विजातीया अमुष्मिन्धर्मे इति तत्किन्न प्रभवेम द्वितीयादिभिः

१—लेखक एव जानीयात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृत्य परिष्कृत्य च चन्द्रविन्दुना 'मोटराश्चालयन्तु भारतीयाः' इति दर्शयितुमभिधातुञ्च पुरापि प्रविशन्ति 'सुरङ्गा'दयः विजातीया शब्दाः सञ्जातसंस्कारा इति । किन्न स्मरत । 'करोम्यब्दुलरहीमोहं, खुदातालाप्रसादतः । पारसीकैः पदैर्युक्तं खेटकौतुक जातकम् यदि भवति मिरीखश्चास्मखाने विहोशः ।' इत्यादिकम्

परमिदमवदधताम्—१ खेटकौतुककारस्तु स्वकीयामदर्शयद्बलात्कृतिम्, मङ्गलादिशब्देषु विद्यमानेषु मिरीख 'चश्मखान' आदि प्रयोगानौचित्यात् । किन्तु यदर्थे संस्कृतकोशे शब्दानुपालम्भस्तदर्थे एवाऽपरभाषीयशब्दः प्रयोक्तव्यः एतदर्थमेवाचार्याणामुणादिप्रकरणप्रयासः । 'उपानह्' शब्दे विद्यमाने तदर्थे 'जूति' शब्दं 'कृषक' 'कृषीवल'दिशब्दमपहाय तदर्थे (कर्षणं कृषः तेनाऽनीति इति व्युत्पाद्य) 'कृषाण'[1] शब्दश्च प्रयुञ्जाना न शक्यन्ते आत्मानं रक्षितुं सतामुपहासाद् । २ 'कुर्त्तकोटिः' 'मिलरां' संस्कृत्य वैदिक्या समयूयुजत् क्रियया, न ईशवीयया न वा यवनीयया । तथैवाऽस्माभिरितरभाषीयाः शब्दाः पाणिनीयाभिर्योज्येरन् क्रियाभिः न पुनर् इंग्लिशादिभाषीयाभिः (ए मैन रैन A man ran) इत्यादिषु स्थिताभिः 'रैन' आदि क्रियाभिः । आशासेऽनेन यथाऽन्वहं वर्धयेयुः संस्कृतप्रचारं मामकाः संस्कृतविदः ।

मनोरञ्जनम् ।

(लेखकः—सहकारिसम्पादकः)

(१)

एकदा कस्यचन महोदयस्य किमपि वस्तु प्रनष्टम् । स स्वमनसि भगवन्तमेवमभ्यर्थयतेस्म—भगवन् ! यदि त्वत्प्रसादात् प्रनष्टं वस्तु लभेय तर्हि तुभ्यं नैवेद्यमुपहरिष्यामि । दैवात् तेन तद् वस्तु लब्धम् । अथ स स्वप्रतिज्ञामनुरुध्य नैवेद्यं क्रेतुं पण्यवीथिकां प्रचलितः । मध्यमार्गे ततः परावर्तमानस्य तस्य हस्ताद् तन्नैवेद्यं केनचिद् गृध्रेणाक्रम्य गृहीतम् । असहायः स वराकः सदुःखमिदमुवाच—"अहो परमात्मनस्तुच्छोजीवस्तद् वस्त्वेव बलाद् ग्रहीतुमुत्सहते, अब्रह्मण्यम्, अब्रह्मण्यम् !! असमञ्जसमसञ्जसम् !!! न खलु गृध्रापसद ! परमात्म-

---

१—यदि नाम संस्कृताभिवर्धनमिष्टतमं, तर्हि विद्यमानेष्वपि पञ्चषेषु कृषकादि शब्देषु कोशवर्धनेच्छया लेखकरीत्यैव साधिताः कृषाणादिशब्दाः कथं सापराधाः स्युरिति न जानीमः । [सम्पा०]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शापात् त्वमपि प्रणश्ये । तव पितृपादाश्च त्वदुद्देशेन मद्वद् भगवते नैवेद्य-माहर्तुमाहिण्डेरन् ।

(२)

कस्यचन धनिकस्योपवने कश्चन चौरः प्रविष्टः । तन्माली च तदानीम् आवश्यककार्यवशात् क्वचन बहिर्गतोऽभवत् । चौरः पक्वपक्वानि फलानि तोडितु-मारभत । अत्रान्तरे मालिनो भार्या तत्र प्राप्ता सा च फलतोडनव्यग्रं कंचन नूतनं पुरुषं दृष्ट्वा संजातविस्मया तमुवाच—कस्त्वमसि रे ! विनैवाज्ञां फलानि तोडयसि ।

चौरः प्रत्युवाच—अहमस्मि नवीनो माली । श्रेष्ठिमहोदयेनाहं नियुक्तः । यतश्च प्राक्तनो मालाकार एकदा चोर्यमकरोत् । इदानीञ्च श्रेष्ठिनो हर्म्ये भूयसां सभ्यजनानां समारोहः प्रवर्तते । अतस्तेनाहं कदलीः, मृद्वीकाः, आम्राणि, इतराणि च फलान्यानेतुमादिष्टः, अत एव तोडामि ।

मालिनी चेदं कर्णयोः कृत्वा सखेदं विच्छायमाननमुद्वहन्ती गृहं प्रति परावृते, चतुरश्चोरश्च यथेच्छं फलानि गृहीत्वा अविदितमपचक्राम ।

भारतीगीतिः

(सुगमगज़लरागगेया)

विजयस्व देवभाषे ! मातासि सर्ववाचाम् ।
वितर स्व-देशभक्तिं श्रद्धां च वाचि प्राचाम् ॥
सौहार्दहीनभावान् विद्वेषजाड्यग्रस्तान् ।
बद्ध्वाशु संघसूत्रे सुपथा नयाधुना नः ॥
अज्ञानलुप्तबोधान् विज्ञानमूढचित्तान् ।
दुःखौघनष्टसंज्ञान् मातः ! समुद्धर त्वम् ॥
वितनु प्रबोधभानुम् विद्योतयाऽऽथमोजः ।
शर्मास्तु शर्मदे ! नः सुरवन्दिते ! नमस्ते ॥

विष्णुशर्मा विद्यार्थी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वौ ग्रामीणौ उपाध्यायौ ।

(ले० सीताराम वर्मा विशारदः O. C. Lahore)

एकदा कश्चिदुपाध्यायो ग्रामहट्टे उपविष्टः सन् विचारयतिस्म—यद् मम गृहे भोजनाद्युपकरणं नास्ति, अतः कथं जीवयिष्यामः । अत एव मम प्रियाऽपि मया सह सरोदं कलहं व्यधित यदहं श्रोतुमपि न प्रभवामि, यद्यहं गृहे गमिष्यामि तर्हि तदेव विलापः अतोऽत्रैव स्थास्यामि-यावच्च भोजनस्य सम्भारो न भविष्यति। एवं चिन्तयत एव तस्य कश्चित् यजमानोऽपि उपययौ । उपाध्यायस्तु तमालोक्य चेतसि एव च चिचेत—सम्पन्नं कार्य्यमिति । यजमानोऽपि उपविवेश आह च—भो ! उपाध्याय ! ममात्मजायाः पाणिपीडनं श्वो विद्यते त्वया च लग्नवेला साधनीति सन्दिदेश । उपाध्यायस्तु श्रुत्वैव भृशं प्रासीदत्, ओमिति पौनःपुन्येन व्याजहार च । अथ गृहे गत्वा प्रियां बभाषे—कान्ते ! सफलं तव परिदेवनम् । प्रभात एव द्रक्ष्यसि वर्षस्य भोजनाद्युपकरणमिति । साऽपि तानि वचांसि श्रुत्वा किमपि शान्तिमुपालभत । प्रभात एव चतुर्वादनकाल उपाध्यायो जजागार । उत्थाय च इतस्ततः परिबभ्राम—अब्रवीच्च—कदानु भगवान् मरीचिमाली उदेष्यति ? कदा अहं गत्वा आनीय च प्रियां प्रसादयिष्यामि ?

एवं चिन्तयतस्तस्य गमनवेलाऽपि समजनि । मार्गे उपाध्यायोऽधावीत् । शीघ्रं तस्य कृषीवलयजमानस्य गृहमाससाद तारस्वरेण च प्रोवाच—भोः ! यजमान ! यजमान ! इति । यजमानोऽपि आगच्छतु भवान् इत्युवाच । उपाध्यायः सम्भारं प्रस्तुतं निरीक्ष्य कार्य्यं प्रारेभे । अथ कुतश्चिदुपाध्यायः कथयति स्म-अत्राणकं देहि अत्राणकम्, अत्राणकचतुष्टयम् । अत्र रुप्यकम् । अत्र मिष्टम् । अत्र तण्डुलम् इति अनेकशो ययाचे । सोऽपि सरलो नवीनः कृषीवलस्तथैव प्रायच्छत् ।

अथ उपाध्यायः किमपि विचिन्तयामास, यद् मम गृहे तूलिका नास्ति, अतस्तूलमवश्यमेव दास्यत्येष ग्रामीणः । तेऽपि उपाध्यायं स्थितं दृष्ट्वा पप्रच्छुः—उपाध्याय ! कथं तिष्ठसि ? सोऽपि सम्पन्नं कार्य्यमिति हृद्येव कथयित्वा प्रत्यगादीत्—भो यजमान ! गतमन्त्रे लिखितमस्ति यत् कार्पासं दद्यात् यजमान इति । सोऽपि समाकार्ण्य प्रियायै अचकथत् । साऽपि स्वभावसरला तथैव चकार । अथ उपाध्यायः सर्वं राशीचकार । अत्रान्तरे तस्या बालिकाया मातामहोपाध्यायोऽपि तत्रैव समुपययौ । सर्वं दृष्ट्वा अचित्रीयत । प्रथम उपाध्यायस्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एवाह—हन्त ! सम्पन्नमपि कार्य्यं विनष्टम् । अपर इदमाह—भो ! यदि मङ्गलं काम्यते त्वया तर्हि अर्धभागं मे देहि अन्यथा—

यह क्या पण्डितों की रीत है वेदी मुण्ड कपा ?
कपा कपा मत करो अद्दो अध सवा ।

प्रथम उपाध्यायस्तु श्रुत्वैवमभ्यधात्—भगवन् ! तुभ्यमहमर्धभागं दास्यामि । अथ पथि गच्छतोर्द्वयोरश्वत्थवृक्ष आजगाम । तस्यैव घनछायायामेकतो भूत्वा विभेजाते । ततः स्वस्व गृहं निर्ववृताते । इति ॥

श्रीशिवाष्टकम् ।

(ओन्नमः शिवाय)

(ले०—श्रीयुतगौरीशङ्करशास्त्री झङ्गनिवासी)

श्रीगौरीपतिपादपद्मयुगलं वन्दारुभिर्वन्दितं,
श्री वृन्दारकयोगिभोगिदनुजैः संसेवितं सिद्धये ।
संसाराम्बुधिदुःखदुःखितजनानन्दैकपोतास्पदं,
ध्यात्वा मानसदर्पणे पशुपतेः स्तोत्रं मया तन्यते ॥१॥

यः सर्वत्र विराजते गगनवद् ध्यायन्ति यं योगिनो,
विश्वं येन ततञ्च यस्य महिमा सर्वत्र संस्तूयते ।
यस्मिन् दृग्विषये सतीदमखिलं मिथ्या जगद् भासते,
वन्द्योऽसौ स शिवः शिवः शिवकरः साच्चित्स्वरूपः प्रभुः ॥२॥

आधारं जगतोऽक्षरं नरवरं विश्वम्भरं निर्जरं,
साकारं विधुशेखरं वरतरं श्वेताम्बरं निर्दरम् ।
नाना दुःखहरं परं सुरवरं क्षेमङ्करं सुन्दरम,
वन्दे श्रीपरमेश्वरं स्मरहरं गङ्गाधरं शङ्करम् ॥३॥

कान्तारत्नविभूषिता गिरिसुता यस्याऽऽलये राजते,
शीर्षे यस्य विराजते त्रिपथगा[1] चन्द्रः शिरो भूषणम् ।

---

१ त्रीन् पथो गच्छति, डः (वा० ३ । २ । ४८) यद्वा त्रयाणां पथां समाहारः त्रिपथम्, तेन गच्छति, डः ।

क्षितौ तारयते मर्त्यान्नागां स्तारयतेऽप्यधः । दिवि तारयते देवांस्तेन त्रिपथगा स्मृता ॥१॥ इतिभारते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्वाह्नो वलयीकृता द्विरसना जग्धं विषं येन वै,
सोऽयं पातु हि सर्वथा प्रतिदिनं मां शङ्करः शङ्करः ॥४॥
भूत्या भूषितविग्रहः परतपा ऋद्ध्या च सिद्ध्या युतो,
भक्तेच्छापरिपूरणे सुरतरु र्नानास्तुतिप्रस्तुतः ।
नागव्यूह विराजितः सुरगुरुः संसारसारः परः,
भूतेशः कमलेक्षणो विजयते श्री राजराजो हरः ॥५॥
श्री विश्वम्भर ! विश्वनाथ ! भगवन् ! विश्वम्भर ! श्रेयसा,
श्री मत्र्यम्बक ! भोः ! तृतीयमपि वै ज्ञानाम्बकं देहि माम्[1] ।
श्री मृत्युञ्जय ! देव ! मृत्युमुखतो मां मोचयस्व प्रभो !
श्री शम्भो ! शिव ! शर्व ! ईश ! गिरिश ! स्यान्मे मनो निर्मलम् ॥६॥
श्री रुद्रो नितरां जगत्सु रमते रुद्रं च वन्दे हृदा,
रुद्रेणैव विनाशितो रतिपती रुद्राय भूयो नमः ।
रुद्राल्लोक सुरक्षणं च भगवद् रुद्रस्य माया परा,
रुद्रे स्तान्मम भावना खलु सदा श्रीरुद्र ! भीतिं जहि ॥७॥
शास्त्राज्ञापरिलङ्घनं सुरपते ! हिंसा तथा प्राणिनां,
निन्दा याचकता तथा कुमतिता सङ्गः समं दुर्जनैः ।
क्रोधो वञ्चकता मदश्च कटुता दोषास्तथाऽन्येऽपि ये,
मा स्युः किन्तु सदा मम त्वयि दृढा भक्तिर्भवेत्सात्विकी ॥८॥

संस्कृतभाषाया उन्नतेर्मूलम् ।

(ले० श्रीयुत दुर्गादत्तपन्तो वेदाचार्यः)

अयि ! माननीया ! महाभागाः !

अस्मिन् जगति हिरण्यगर्भप्रभृतयो देवासुरमनुष्यपशुपक्षिमृगसरीसृपादिस्थावरपर्यन्ताः सर्वे प्राणिनः स्वस्वप्रारब्धानुरूपसुखदुःखभोगिनो वर्तन्ते । तत्र प्रारब्धं नाम पूर्वार्जितं कर्म । तच्च द्विविधं पुण्यात्मकं पापात्मकञ्च । तत्र पुण्यात्मकवेदस्मृतिपुराणविहितम् । तद्भिन्नं शास्त्रप्रतिषिद्धमाधिव्याधि नरकादिहेतुभूतं पापात्मकम् । तत्रैहिकैश्वर्य--सम्पदादिपारलौकिकस्वर्गादि-

---

१—"देहि मे" इति युक्तमाभाति । (सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्ममरणमोक्षपूर्वकात्यन्तदुःखनिवृत्तिरूपकैवल्यसुखसंपिपादयिषुभिः सर्वदा वेद-विहितं कर्मैवाचरणीयम् ।

यद्यपि ज्ञानादेव तु कैवल्यमिति कैवल्यस्य ज्ञानैकमात्रसाध्यत्वमुपपादितं तथाऽपि चित्तशुद्धिद्वारा ज्ञानसंपादकत्वं कर्मण एवास्ति इति कैवल्यप्रयोज कत्वं कर्मण एव । तत्र ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजा निषेकादि श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः । इति भगवान् याज्ञवल्क्यः । वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् । कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च । गार्भैर्हो-मैर्जातकर्मचौडमौञ्जीनिबन्धनैः । वैजिकं गार्भिकं चैनो द्विजानामपमृज्यते । इति मनुराह । संस्कारसंस्कृतस्यैव हि पुरुषस्य भवति वैदिके कर्मणि नामाधि-कारः, अन्यथा अत उर्ध्वं त्रयोप्येते यथा कालमसंस्कृताः । सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिता नैतेरपूतैर्विधिवदापद्यापि हि कर्हिचित् । ब्राह्मान् यौनांश्च सम्बन्धान्नाचरेद् ब्राह्मणः सह । मान्या विद्वान्सः !

सर्वसम्मतं नामैतद्वर्तते यदसंस्कारसरीसृपदष्टानां पुरुषमन्यानां जनानां नहि किमपि फलं समासादयति कृतं कर्म । न चास्य कस्मिन्नपि पवित्रे विषये भवत्यधिकारः । असंस्कृताः शास्त्रीयसंस्कारैर्नराः पारलौकिकेषु वैदिकेषु च शुभोदयेषु कर्मसु न धर्मतः प्रवृत्यनुज्ञां लभन्ते । जगति जातस्य नरस्य जन्म नहि केवलं सांसारिकानि कानिचित् कार्याणि कृत्वैव कृतकृत्यतामधिगच्छति । आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः । समाप्य तत्पूर्वमुपास्तसाधनः समाश्रयेत्सद् गुरुमात्मलब्धये । नहि कदापि वैदिक संस्कारँ विनात्मबोधोऽपि भवितुमर्हति । अपि च कर्मणा समृद्धस्य बलिराजस्य सकल-देवैः सह साक्षात् भगवतोप्यन्यकर्मणोऽजेयस्य षड्गुणैश्वर्यसम्पन्नोऽपि भगवान् गृहे तस्य याच्ञाकरणपूर्वको दासीभूतोऽवतस्थे । किं तादृक्कर्मणो कर्तुमशक्यम् । अत एव भगवद् गीतायां श्रीकृष्णेनोक्तं कर्मणैव हि संसिद्धिमास्थिता जनकादयः । सर्वोऽपि वैदिकक्रियाकलापो गौतमोक्तचत्वारिंशत्संस्कारात्मक एव । एतदेव-वैदिकं कर्म ।

तत्र तावत् गौतमेन चत्वारिंशत्संस्काराः कथिताः ते यथा–गर्भाधान पुंसवनसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनानि, चत्वारि वेद-व्रतानि, स्नानं, सहधर्मचारिणीसंयोगः पञ्च महायज्ञाः, अष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः अग्न्याधेयमग्निहोत्रम्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शपूर्णमासौ, चातुर्मास्यान्याग्रायणेष्टिर्निरुढपशुबन्धः, सौत्रमणीति सप्तहविर्यज्ञसंस्थाः अग्निष्टोमाऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोप्तोर्याम इति सप्तसोमयज्ञसंस्थाः इत्येते चत्वारिंशत्संस्कारा अष्टावात्मगुणाः दया सर्वभूतेषु क्षान्ति रनसूया शौचमनायासो माङ्गल्यमकार्पण्यमस्पृहेति यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च स ब्रह्मणः सायुज्यमाप्नोति।

तत्र स्नानं समावर्तनम्। सहधर्मचारिणी संयोगो विवाहः। पार्वणः पार्वेण स्थालीपाकः। श्राद्धं मासिकश्राद्धम् अमायां तस्यैव संस्थात्वात्। श्रावणी पौर्णमासी तत्र श्रवणाकर्म। आग्रहायणी मार्गशीर्षी तत्र कर्तव्यं प्रत्यवरोहणम् चैत्री तत्र कर्तव्यः शूलगवः आश्वयुज्यश्विनी पौर्णमासी तत्रकर्तव्यमाश्वयुजी कर्मेति। आपन्नस्य द्वेष्टुरपि रक्षणं यथा—वाह्य आभ्यान्तरे वा परेण दुःख उत्पादितेऽपि तस्मिन् कोपाभावः क्षमा सैव क्षान्तिः गुणिनां गुणानाविष्करणमसूया एतद्भिन्नात्वनसूया। निन्दितसंसर्गाभक्ष्यादिपरिहारपूर्वकं स्वधर्मव्यवस्थानं शौचम्। शरीरपीडावहक्षुद्रकर्माचरणमायासस्तद्भिन्नोऽनायासः। अप्रशस्तविवर्जनपूर्वकं प्रशस्तकर्माचरणं मङ्गलं तस्य भावो माङ्गल्यम्। अदैन्यपूर्वकं सत्पात्रे भक्त्या शक्त्या च प्रत्यहं दानमकार्पण्यम्। परकीयवस्तुन्यभिलाषःस्पृहा तद्भिन्नाऽस्पृहा।

अत्र केचित् पञ्च विंशति संस्कारान् मन्यन्ते। एतेषु पूर्वोक्तेषु चत्वारिंशत्संस्कारेषु मध्ये षोडश संस्कारा एव प्राधान्येन निर्दिष्टा। तद् यथा—

गर्भाधानमतश्च पुंसवनकं सीमन्तजाताभिधे,
नामाख्यं सह निष्क्रमेण च तथान्नप्राशनं कर्म च।
चूडाख्यं व्रतवन्धकोप्यथ चतुर्वेदव्रतानां पुरः,
केशान्तः सविसर्गकः परिणयः स्यात् षोडशी कर्मणाम॥

एते गर्भाधानाद्याः षोडश संस्काराः शिखासूत्रधारिणां हिन्दूनामेव सर्वेषां परं समन्त्रकाः द्विजातीनामेव भवन्ति न पुनः शूद्राणम्—यथाह भगवान् याज्ञवल्क्यः—

ब्रह्मक्षत्रिय विट् शूद्राः वर्णास्त्वाद्या स्त्रयो द्विजाः।
निषेकादि श्मशानान्ता स्तेषां वै मन्त्रतः क्रिया॥

शूद्राणां वेदाध्ययनानविधानात् तेषां वै समन्त्रिकाः क्रियाः न भवन्ति परं मन्त्रैर्विना तेऽपि संस्कारैः संस्कृताः भवन्त्येव यथाह यमः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"शूद्रोऽप्येवं विधः कार्यो विना मन्त्रेण संस्कृत इति" ।

स्त्रीणामपि जातकर्माद्याः क्रिया अमन्त्रका एव भवन्ति तासामपि वेदाध्ययनाभावात्। यथा चोक्तम् स्मृतौ-तूष्णीमेताः क्रियाः स्त्रीणां विवाहः स समन्त्रक इति। मान्या! महाभागाः! यथा प्रतिदेशं प्रतिद्विजं प्रतिग्रामं उपदेशद्वारा वैदिकसंस्कारप्रथा प्रविचलतु तथानुष्ठीयतां-भारतवर्षे द्विजाः संस्कृता भवेयुः असँस्कृता अपि व्रात्याः शास्त्रोक्तप्रायश्चित्तादिना पवित्रीकृत्य पुनः सँस्कार्याः, एतदेव मूलं संस्कृतभाषायाः उन्नतेरिति।

केयं दशा त्वदीया ?

(ले० श्रीयुत ब्रह्मानन्दशास्त्री शुक्लः काव्यतीर्थः प्रधानाध्यापकः सनातनधर्मपाठशाला कालका)

अयि! भारतीयविद्ये! केयं दशा त्वदीया? नो दृश्यते पुरेव, शक्तिः शुभा त्वदीया ॥१॥
परितः समुल्लुलास, तव भाग्य भानुरम्ब! हा हन्त! साम्प्रतं किं, शोच्या दशा त्वदीया
तव सूनवो यया ते, शुभ्रं यशो वितेनुः। हा! कुण्ठिता किं, सा भास्त्वये त्वदीया ॥३॥
भव्यं निजं सुरूपं, प्रविहाय हाद्य दीना। जातासि वन्दनीये! केयं दशा त्वदीया ॥४॥
सा साङ्गवेदविद्या, प्रतिसद्म नो विभाति। यस्या बलेन जाता, शस्ता दशा त्वदीया ॥५॥
धिक् तांस्तवैव पुत्रान्, धनशालिनोऽपि मातः। विद्यान्तरं प्रपन्ना. वंशावली यदीया ॥६॥
जगदीश! दीनबन्धो! स्वीया दया ऽधुना तु। कार्या भवेत् यथेह, युक्ता दशैतदीया ॥७॥
आनन्दकन्द! ब्रह्मा, नन्दस्य प्रार्थनेयम्। सर्वत्र दुःखिताः किं, भुवि सन्ति ये त्वदीयाः?

सम्पादकीयम्

अयि! उद्योतप्रियाः! प्रियपाठकमहाभागाः! इतो दीयतां दृष्टिः। अस्माकं ग्रैष्मोऽवकाशः सम्प्रति अवसानङ्गतः, उद्योतकार्यस्थगनेन पलायनमेवाश्रितम्। शरीरेन्द्रियाद्यधिष्ठातृवर्गोऽपि विरतिविलामनुभूय देवाऽसुरसङ्ग्रामभूते कर्मक्षेत्रे[1]

१—यद्यपि गृहिणामवकाशेष्वप्यनवकाशहेतोः कर्मक्षेत्रबहिर्भावो नार्हति भवितुम्, तथापि कार्यवैलक्षण्यं मत्वेत्थमभ्यधाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनरवतीर्य, निजं निजं वासनाव्यूहं विरच्य, अहमहमिकयाऽसुरजये प्रवर्त्तमानः, सुरांश्च स्वाराज्ये स्थापयितुमुद्यतः स्वं स्वं महिमानं पुरतः प्रदर्शयन् अहम्भावपराभूतपरादेवतास्वरूपोऽपि प्राप्तकालपरवशतया तस्मै तस्मै फलाय कामनां दधानस्तां तां क्रियां कुर्वाण उद्योगिनामग्रेसरो भूत्वा स्वात्मानं बहु दर्शयितुमुत्सहत इति किं बहूपपादनार्हम् ?। तन्मन्ये उद्योतोद्योतसमीहाव्याप्तमनसां नव्यानां पुरातनानाञ्च ग्राहकमहोदयानां मनांसि रञ्जयितुं उद्योतभासां निचयोऽतिमात्रं प्रसरिष्यतीति स्वसाक्षिकं बहु लेखिनीव्यापारं नापेक्षते । अद्यावधि सकलमप्युद्योतसम्बन्धिलिविङ्करादिकार्यमहमेवैकलो विदधानः सम्पादनकलां यथाशक्ति निरवहम्, परं यथाऽचीकमम, तथा न समुपापीपदम् । यत एकाक्येव गृहकृत्यहयमारुह्य साधनारण्ये परिभ्रमन् बहूनां प्रस्तुतानां ग्रन्थानां टीकरचनादिकार्यं तदीयप्रूफसंशोधनादिभारञ्चाप्युदवक्षि, अतो हेतोर्यथाऽभीष्टम्–"उद्योत" समुत्कर्षं हृदि धारितमपि पूरयितुं नाशकम् । परमिदानीं सम्भाव्यते यत्कार्यभारवण्टनप्रणालीमनुरुध्य परिषच्चेन्मदीयमभ्यर्थनं स्वीकरिष्यति, यथा च सा सम्भावयति, तदाऽवश्यमितोऽप्युद्योतोद्योतो विसृत्वरो भविष्यतीति श्रद्धावित्ताः सम्भवन्तु पाठकमहाभागाः । इमौ च द्वावपि मयूखौ भाद्रपदमासस्याश्विनमासस्य च प्रकाशितौ यथाप्रतिज्ञमित्यत्राऽवधानं विधाय पञ्चमो मयूखः श्रावणमासस्य तदनुसारं जवलायि (जौलाई) मासस्य प्रकाशितोऽपि, किन्तु गृहगमनत्वरया परविश्वासमनुरुध्य ममैव प्रमादेन तत्प्रमुखपत्रे श्रावणस्थाने आषाढेति जौलाईस्थाने जूनेत्यन्यथा मुद्रितं सदिति क्षाम्यन्तु सूरिवर्याः ।

ब्राह्मणमहासम्मेलनं, तच्चालकानामुद्योते उपेक्षादृष्टिश्च—

"ब्राह्मणमहासम्मेलनं" नाम संस्कृतमासिकपत्रं काशीधामतःसमुदेतीति सूर्योदयादितः समवगम्य परं हर्षमासाद्य द्रागेवोद्योतेनाऽपि द्राविडश्रीलक्ष्मणशास्त्रिमहानुभावानां सेवायां सप्रश्रयं निवेदनमकारि यत्परीवर्त्तरूपेण पत्रमिदं प्रकाशनकालत एव प्रेषणीयं श्रीमद्भिर्यथानियमम, उद्योतोऽपि श्रीमत्सेवां प्रतिमासं विधास्यति । अपि च–स्वपत्रे उद्योतस्य समालोचना कार्या "नहि नाविको नाविकाच्छुल्कं गृह्णाति" "नापि च वैद्यो वैद्यादि"ति सुप्रसिद्धमेवैतत् । परमेवमभ्यर्थने कृतेऽप्येतस्मिन् विषये शास्त्रिमहाभागैरस्मत्प्रेषितपत्रोत्तरदानं नितान्तमेवोपेक्षितं, पत्रञ्च "ब्राह्मणमहासम्मेलनं" नाम नैव प्रेषितम् । एवं–"ब्राह्मणमहासम्मेलन" चालकानामुद्योते उपेक्षा दृष्टिः किं प्रशंसनीया स्यात् ?। वस्तुतो महाराष्ट्राः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्राविडाश्च पण्डिताः प्रायः सारस्वतानुपेक्षन्त एवेत्यस्मिन् विषये पुराकाले वारणस्यां निवसता मयाऽनेकवारमनेकविधयाऽनुभूतं तदद्याऽपि ब्राह्मणसङ्घस्यात्यन्तापेक्षाकाले तथैव दृष्टावतीर्णम्[1]। हन्त ! किमतः परं कष्टं स्यात् ।

अत्र विचारयन्तु सुरसरस्वतीप्रिया यदिदं युगान्तरमिव, सुरगवीभक्ता अल्पीयांसो तद्द्वेष्टारो महीयांसो विद्यन्ते । संस्कृतपत्रसम्पादकानामन्योन्यमेतादृशोपेक्षादृष्टिपातनं गीर्वाणवाणीहानिकरमेवाभातीति मन्यामहे । एषैव दशा कलिकातासंस्कृतसाहित्यपरिषद् इत्यतिमात्रं खिद्यते नश्चेतः ।

भ्रमसंशोधनम्—

उद्योतस्य चतुर्थे मयूखे नवमे पुटे अमृतसरपण्डितमण्डलस्य द्वितीयप्रस्तावानुमोदको हरिरामशास्त्री इति विज्ञेयम् । किन्तु हीरालालशास्त्री इति सञ्चिकालेखकप्रमादान्मुद्रितमित्येवं सूचना तत्रत्यपण्डितमण्डलमन्त्रिणाम् ।

विशेषद्रष्टव्यम्—

पञ्चनदीयसंस्कृतसाहित्यपरिषदः सदस्यानां केषाञ्चिदेव नामानि चतुर्थे मयूखेऽङ्कितान्यासन् किन्तु–विश्वेश्वरशास्त्री, नरोत्तमचन्द्रशास्त्री, पं० लक्ष्मीदास-उपाध्यायः, श्रीसन्तसिंहः (S. B.) पोस्ट वङ्गा–इत्याद्या अनेके सन्ति । कालान्तरे परिषदाज्ञया तेषां नामावली प्रकाश्येत ।

निबन्धारोऽवश्यं पठन्तु—

अपूर्णो निबन्ध उद्योतेन कदापि न स्वीक्रियेत, पङ्क्तयः सावकाशाः, अक्षराणि पठनार्हाणि च संस्युः, यदि पत्रस्यैक एव भागो लिखितो भवेत्तदा तु बहुशोभनम् । अन्यत्राङ्कितो निबन्ध उद्योते मुद्रणाय कदापि न प्रहेयः । उद्योतेन केनापि हेतुनाऽस्वीकृतस्य परावर्त्तनाय तद्योग्यं चिट्टिकापत्रं प्रहेयम, अन्यथा कोपो न विधेयः । सत्यवकाश एव प्रेषितनिबन्ध उद्योतेन प्रकाश्येत । अतिविलम्बे जाते सम्पादकः पृच्छ्येत । अतिदीर्घो निबन्धो माभूत्, काममेक एव विषयः प्रकरणशो विभज्य प्रकाश्येत ।

उद्योतप्रशंसा—

"उद्योतस्य" औचितीप्रतिपादकानि, पञ्चापप्रदेशे तदावश्यकतासमर्थकान्य-

---

१—संस्कृतपण्डितेषु स्वविद्यावर्धनेच्छया युक्तं प्रेम नास्तीति कस्य पापस्य फलम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेकानि पत्राणि समायातानि, समायान्ति च तेषामङ्कनाय अवकाशं[1] न लभामहे, परमस्य परमोपादेयतैव सर्वसार इति विदाङ्कुर्वन्तु देववाणीप्रियाः प्रियपाठक महाभागाः, तत्प्रशंसापत्रप्रेषकाश्च ।

प्राचामेव पौरोहित्यं ज्यायः—

जूनमासीयपञ्चविंशतितारकायां प्रकाशितस्य "आर्य"नामकहिन्दीसमाचारपत्रस्यान्यतमे स्तम्भे "आर्यसमाजे संस्काराणां पुरोहितानाञ्चाभावः" इत्याकारकशीर्षक एको लेखोऽस्माकं दृष्टिविषयतामापत, लेखकेन तत्र सुश्लिष्टरीत्या पौरोहित्यं समर्थितम । तथाहि–यत्र[2] विवाहादिकर्मसु नापितः स्वलागं ७) सप्त मुद्राः प्राप्नोति तत्र अधीतवेदादिशास्त्रोऽपि पुरोहितश्चत्वार्येव रूपकाणि प्राप्नोतीति, अधिकं देयं यजमानमनसि खेदमुत्पादयति चतुरधुरीणचेतसि च पीडामेव जनयति । पुरोहितश्चेद्वरणोपकरणेन सह धौतवस्त्रं याचेत तदा यजमानैस्तर्क्यते यदिदं संस्कारविधौ तु न लिखितमस्ति ? श्रद्धेयं पौरोहित्यमार्यसमाज आत्मसात्न करोतीत्यतोऽनर्थभूमिरेव । कालान्तरे चैतस्य फलमिदमेव भविष्यति यदार्यसृष्टौ पुरोहितानां सर्वथा अभाव इति । (पौरोहित्याभावे सङ्घशक्तेरभावः, तदभावे समेष्टिसमष्ट्यभावः, एतदभावे व्यष्टिविध्वंसस्तत्कृतः स्वाराज्यप्रत्याशेति सम्पादकः) तस्मादार्यजनता आर्यप्रतिनिधिसभा च भाविनीं क्षतिं मन्यमाने सावधाने भवेयाताम् । प्रतिनगरं प्रतिग्राममेक आर्यपुरोहितः स्थापनीयः तदीयसकलपरिवारपालनभारश्च स्वशिरस्येव स्थाप्यः ।

अयमाशयः—अतिसन्मानपूर्वकं वृताय स्थापिताय पुरोहिताय मासिकवेतनरूपेण[3] किमपि न देयम्, किन्तु प्रतिमासं प्रतिपर्व च आर्याः पुरोहितद्वारा नियमपूर्वकं स्वे स्वे गृहे यज्ञान् कारयन्तु, रात्रौ वान्यस्यां वेलायां वा स्वानुकूलं ततः कथा अपि शृण्वन्तु, तद्दर्शितमार्गेण च भगवन्तमप्युपासीरन्, एवं कृते तस्मै वेदविदुषे श्रद्धाभक्तिपुरःसरं तदीययाच्ञां विनैवान्नवस्त्रादि विविधद्रव्यं सकलपरिवारपालनक्षमं तस्मै दद्युः । एषैव रीतिः आर्यपुरोहितस्थितिपरिस्थित्यै सुख-

---

१—सत्यवकाशे केषाञ्चित् कियानंशः प्रकाश्येतापि ।

२—प्राय आशयतोऽनूद्यते ।

३—साम्प्रतिका आर्यसामाजिकाः सनातनसभ्याश्च प्रबन्धकृत्ये पुष्टनीतयोऽपि वैतनिक कृत्यं सम्पादयन्तं पुरोहितं पण्डितमुपदेशकं च स्वानुचरं मन्यन्त इति ममानुभवः । (सम्पा०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रदा प्रतायते । एवमादि रीत्या लेखकेन बहु लिखिता पौरोहित्यस्य परावश्यकता तदीयदृढतारक्षणपरिपाटी च तथा सूपपादिता यथा प्राचां (सनातनधर्मावलम्बिनां) पौरोहित्यमेव ज्याय आभाति । यतस्तत्रावैतनिक्येव प्रथा वर्त्तते ।

यावत्कालपर्यन्तं हिन्दुजनतायां पौरोहित्यप्राबल्यमासीत्, श्रद्धाभक्तिपुरःसरं यजमानाः पुरोहितानार्चिषुः, महाभाष्योक्तब्राह्मणलक्षणसम्पन्नान् शास्त्रमर्मवेदिनो वेदवेदिनो ब्राह्मणान् व्याससिंहासनेऽतिष्ठिपन् तावत्कालमस्मिन् धर्मे क्षतयोऽपि नैव प्रादुरभवन् । यदारभ्य श्रद्धाशून्याः, भक्तिहीनाः, स्वार्थान्धाः, ब्राह्मणदर्शनपरिभ्रष्टाः, प्रातर्ब्राह्मणशकुने प्राप्ते उपानहत्प्रदर्शनपरा विस्मृतस्वपूर्वजक्षात्रधर्मा कुवणिग्वृत्तयो यजमानकाः पण्डितान्पुरोहितान् परित्यज्य वेदोक्तविधानेन शालग्राम-शिवलिङ्गार्चनाश्च परिहाय पाखण्डपथिकान् पीवरान् कब्बरस्थानादिशवशयनपूजकानभ्यर्चितवन्तस्तदारभ्यैव सनातनमोजःप्रदं पौरोहित्यं परिभ्रष्टम् । तत आरभ्यैव विप्रैरपि वेदविद्या परित्यक्ता, एते च प्रायोऽपठितं महामूर्खं चुल्लीकण्डनीसेवाकरं मुधास्तावकमेव पुरोहितं यजन्ते । आर्यसमाजप्रभावेण वा सनातनधार्मिकाणां तमोभूतनिद्रापरिहाणेन वा यदा तदादर्शभूतं पौरोहित्यं पुनर्जागरिष्यति, तदैवैतस्य देशस्य कल्याणं भविष्यति, इतः पूर्वं स्वाराज्यकथा वाच्येव तिष्ठतीति मे मतिः । अत्रेमौ श्लोकौ भवतः—

पौरोहित्ये प्रनष्टे तु प्रनष्टं भारतं बुधाः ! । सुरक्षिते पुनस्तस्मिन्भारतं स्यात्सुरक्षितम् ॥
पौरोहित्यसुरक्षैव स्वाराज्यप्राप्ति-साधनम् । पौरोहित्यविनाशाद्वः पातकं न परं महत् ॥ इति ।

सङ्गृहीता विचित्राः समाचाराः ।

त्रयोदशसप्ताह एव गोधूमक्षेत्रसम्पत्तिः—

अमेरिकायां नूतना नूतना आविष्काराः श्रूयन्ते । अस्ति हि महान् सुप्रसिद्धः केलिफोर्नियानाम विश्वविद्यालयः (University) यत्र द्वौ कृषिविद्यापटीयांसौ महावक्तारौ विद्येते । तौ च स्वप्रयोगशालायां गोधूमबीजान्यवाप्ताम् । बीजवापं कृत्वा तेषु घर्मसञ्चारणाय विजातीयवाष्पोत्पादनसामर्थ्यवतीभिर्द्वादशसङ्ख्याभिर्दीपाधानिकाभिः (Lamp) ३०० शतत्रयकेण्डलशक्तिमन्तं कृत्रिममातपमजीजनताम्, रासायनिकैरेव तत्त्वैः क्षेत्रजीवनभूतं कृत्रिमं खाद्यमपि प्रादुरबीभवताञ्च, वृक्षपोतानां जीवातुभूतं यत्स्वाभाविकमेव भवति तद्वत् । एवं कृते सति तयोरलौकिकविद्याप्रभावेण १३ त्रयोदशसप्ताहमिते काल एव गोधूमान्नं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पन्नं जातम् । नैसर्गिकरीत्या तु पञ्चमासात्मकः कालोऽपेक्ष्यते तत्परीपाकाय । अहो ! साम्प्रतिको विज्ञानप्रभावः । किन्तु—"चरन् मार्गान् विजानाति" इति व्यासोक्तिस्तथ्यैव ।

सर्वतो बृहद्वायुयानम्—

वेलफास्टस्य "हारलैण्ड एण्ड वुल्फ कम्पनी" इत्याख्या वाणिज्यजनता एकं तादृशं सर्वतो बृहद्वायुयानं निर्मिमीते यादृशमद्यावधि धरातले केनापि नव सम्पादितमिति श्रूयते । एतस्य तुलामानं षष्टिसहस्रटनाख्यं भविष्यति । अमुष्य रचनायां पौण्डानां षड् लक्षाणि व्ययीभविष्यन्ति ।

अहो ! बत ! देशिनरेशाः कथं स्वप्रजाप्राणं हिंसन्ति—

पैरिसवासिनः सर्वेऽपि भारतीयनरेशानां समागम प्रायः प्रार्थयन्त इव कामयन्ते, विशेषतस्तत्र होटलाधिपतयो दत्तानुरागा भवन्ति । यदैते भारतीयनरेशाः फ्रांसराजधानीं प्रविशन्ति तदाऽमीषां सज्जध्वजता पातिशाहसदृशी दरीदृश्यते । एते नरेशाः स्वशोभायां क्षतिमसहमाना महतोऽपि महीयसो होटलस्यैक देशं (एकां छर्दिं) देशद्वयं (छर्दिद्वयं वा) वा स्वनिवासाय शुल्कतो गृह्णन्ति । एतेषां कृते विचित्राण्यसाधारणानि भक्ष्याणि भोज्यानि च तत्स्वामिभिः साध्यन्ते यत्कृते तन्मूल्यरूपेण एभिः प्रचुरतरं धनं तेभ्योऽर्प्यते । वर्त्तमान एव गते सप्ताहे कश्चन भारतीयो नरेशो होटलस्य विलपत्रप्रत्यर्पणे महत् कष्टमन्वभूत् । यद्यपि—यदाऽसौ पैरिसं प्राप्तवान् तदैकस्मिन् व्यङ्के (Baunk) ऽस्य तावन्मात्रं धनं राशीभूतमासीत् यावता ५०० पञ्चशतसङ्ख्याकफ्रांसीयानामेकस्य वर्षस्य निर्वाहः सम्यक् भवितुमर्हति, तथापि—दशदिवसाभ्यन्तर एव नरेशोऽयं (फैशनमाहात्म्येन) किङ्कर इव सम्पन्नः, यतः १०० एकशतसङ्ख्याकयूरोपकामिनीनां निमन्त्रणे व्यङ्कस्थं सर्वमपि राशिं नष्टतामनैषीत् ।

एतदीयसहभोजे—नानाविधेषु रमणीयतरेषु मञ्चेषु आसेचनकानि चित्रविचित्राणि कृत्रिमकुसुमानि समुदलसन् । कुट्टिमेषु स्थलारविन्दस्यातिपेलवानि पत्राणि तथा जटाजूटितानि कृतानि यथा दर्शकानां मनःसु कुथकन्थाभ्रान्तिस्तथा पदं न्यधित, यथा मयासुरनिर्मितकुट्टिममायायां दुर्योधनस्य जलस्थलभ्रमो (निखिलभारतक्षतिहेतुभूतो) बभूव । चित्रविचित्रस्थालेषु परिवेषितानामनल्पमूल्यानां भक्ष्याणां भोज्यानां चोष्याणां लेह्यानां पेयानां गणनाकरणे सहस्रमुखोऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्रीडां बभार । तत्राऽपूर्वबहुमूल्यवारुण्याः १५० पञ्चाशदुत्तरैकशतं काचकूपिका आनायिताः—

यद्व्यये व्योम-वेद-द्वि-त्रिसङ्ख्याणि रूपकाणि दत्तानि, सेयं सुरा रूसदेशादानायिता । अस्मिन् सहभोजे सम्मिलितेषु नरेषु प्रतिनरमेकशतीपूर्णा सिगारपिटिका, सम्मिलितासु नारीषु च प्रतिनारि बहुमूल्या मुक्ताद्वयी परितोषरूपेण दत्ता। भोजनसमये या "हरीरा"[1] सर्वेभ्योऽपि विभज्य व्यवहृता तत्र चतुर्दशसहस्ररूपकव्ययः समजायत, अन्ततोनिर्धनेन नरेशेन तारयन्त्रद्वारा स्वराज्यात् धनमानाय्य—होटलस्य बिलपत्रं समर्चितम्, तदैव चासौ स्वराजधानीम्प्रति प्रत्यायासीत् । तत्र तन्निवासाय नियतकालस्तु एकमास एव निर्धारित आसीत् किन्त्वनर्थव्ययकरणेन दुर्दशामासाद्य क्षिप्रमेव प्रत्यावर्त्तिष्टाऽसौ नरेशः । हन्त ! कथममी विस्मृतस्वपूर्वजचरणाः परिभ्रष्टक्षात्रतेजसो नराशा इव नरेशाः स्वप्रजाप्राणान् हिंसन्तो मात्रयाऽपि न घृणां कुर्वन्तीति महत्कष्टम् ।

रक्षाबन्धनम् ।

प्रायः प्रतिवर्षं हिन्दूनां महामहनीयानि महोत्सवदिनानि समायान्ति । येषु बहुलमेतस्मिल्लोके सुखप्रदानि सन्ति जनमनोरञ्जयन्त्यपि परलोके परमसहकारिणं परं धर्ममप्युत्पादयन्त्येव । हिन्दूनामुत्सवेषु नहि सोरस्ताडं रोदनम्, नापि परमर्मवेधनकरो वाचामुद्गारः, नच निरपराधासङ्ख्यजीवसङ्घप्राणव्यपरोपणम, नवा हाहेतिशुचां प्रवाहवारिधारावर्षणम । किन्तु-क्वचिद् भगवद्भजनम्, क्वचिदेकादशेन्द्रियवशीकारमन्त्रणा, क्वचित्सर्वसाधारणसमष्टीष्टिः, क्वचिद् भ्रातृसत्कारः, क्वचिद्भगिनीसमादरः, क्वचिज्जामातृसमर्चना, क्वचिदृषीणां तर्पणं, क्वचिद्देवानामभ्यर्चनम्, क्वचित्पितृभ्योऽन्नदानविधिरिति कियद्वर्ण्येत । तेष्वेवंविधेषु महोत्सवेषु "रक्षाबन्धन" मप्येकं पूजनीयं दिनं वर्त्तते । तादिदमुपाकर्मोत्तरकाले कर्त्तव्यरूपेण प्रतिपादितं धर्मग्रन्थेषु । उक्तञ्च हेमाद्रिग्रन्थे—

सम्प्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये । स्नानं कुर्वीत मतिमाञ्श्रुतिस्मृतिविधानतः ॥
उपाकर्मादिकं प्रोक्तमृषीणाञ्चैव तर्पणम् । शूद्राणां मन्त्ररहितं स्नानं दानं प्रशस्यते ॥

इत्युक्त्वा—"उपलिप्ते ग्रहमध्ये दत्तचतुष्के न्यसेत्कुम्भम् । पीठे तत्रोपविशेद्राजामात्यैश्च सुमुहूर्त्ते । तदनु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण । तत्र स्मार्त्तो मन्त्रः—

---

१ अस्यार्थोऽस्माभिः सम्यङ्नावगतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

येन बद्धो बली राजा दानवेन्द्रो महाबलः । तेन त्वामपि बध्नामि रक्षे माचल माचल ॥ इति ।

अयमाचारः सर्वैरेव कर्त्तव्य इति शास्त्रानुशासनम् । आचारस्यापि धर्मे प्रमाणत्वात् "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः" इत्युक्तेः । तथाहि—

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः । कर्त्तव्यो रक्षिताचारो द्विजान् सम्पूज्य शक्तितः ॥ इति

वैदिकाश्च मन्त्राः—"यदाबध्नन्दाक्षायणा"—इत्यादयः सन्ति । रक्षाबन्धन-निर्माणप्रकारोऽपि शास्त्रे कथितः । यथा—

ततोऽपराह्णसमये रक्षापोट्टलिकां शुभाम् । कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषिताम् ॥

वस्त्रैर्विचित्रैः कार्पासैः क्षौमैर्वा मलवर्जितैः । विचित्रं ग्रथितं सूत्रं स्थापयेद्भाजनोपरि ॥ इत्यादि—

स्मार्त्त, शिष्टाचारपरम्पराप्राप्तं चैतत्कर्म प्रायो वर्षपर्यन्तं सुखोदर्कं भवतीत्येतदप्यभिहितं तत्रैव । तथाहि—

अनेन विधिना यस्तु रक्षिकाबन्धमाचरेत् । स सर्वदोषरहितः सुखं संव्वत्सरं वसेत् ॥ इति ।

एवंविधशास्त्रीयकर्मविमुखत्वादेवानेकाः पीडाः सह्यन्ते साम्प्रतिकैर्हिन्दुनाम्ना व्यवह्रियमाणैर्जनैः, यतोधर्मादेव सुखं भवतीति परः सिद्धान्त इति सङ्क्षेपः ।

काऽवश्यकता समाचारपत्राणाम्

(निबन्धा ज्येष्ठानन्दः शास्त्रिश्रेणीकः सं० का० मुलतान)

अयि ! श्रीमदनवद्य-विद्या-वैशद्य-संपाद्यमान-विरलगद्यपद्यावली-विरचन-चतुल-चातुरीचञ्चरीकाः ! चिरकालमग्नसंस्कृतसाहित्योन्निनीषवः ! उद्दिधीर्षवः ! पण्डितवर्य्याः ! छात्रवर्गाश्च ! विदितचरमेव भावतां भवतां यदत्रान्यत्र सर्वत्र समाचारपत्राणामाविष्कृतिर्विस्तृतिरूपेण संसरत्यस्यां संसृत्याम् । न कदाचिदेतादृश-भाषाभावस्य नाशो यस्याः समाचार-पत्ररूपेण विवस्वन्नीकाशविकास-विकाशो न स्यात्, ईंग्लिशोर्दुपत्राणां प्रचार-प्रसार-व्यवहाराचारसमाचारे तु परा काष्ठाऽश्लिलक्षीबोभवीति, येन तज्ज्ञाः सर्वज्ञा अज्ञान् इवास्मान् जानन्ति, अन्यत् किं गुरुमुखीभाषाऽपि गुरुगौरवेण भूषाभूतभाषाभाषिता प्रकाशिता सद्योजाताऽपि विख्याताऽभवत्, तथा तस्या रक्षामप्रतिहतशक्त्याऽकुर्वन् सिंहमहोदयाः । परञ्च संस्कृतोन्नतौ संस्कृतपत्राभावच्छुरिका-छिन्न-भिन्न-दीर्ण-शीर्ण भाषाखेदच्छेदं न काश्चिद् विपश्चिद् वेद । अत एव संस्कृत च्छात्राश्च 'बुद्धू' इत्यपर

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्य्यायेणाऽभिनीताऽवगीतास्ते, तस्यैतदेव 'इदानीं भवम्' निदानम्, यद्-कीटवत् ते पुस्तकानि रटन्तो येन केनाऽप्युपायेन परीक्षोत्तीर्णतालिप्सया पुस्तकालयकीनाशनिकेतननीकाशमिव बुबुधानाः सकाशमपि न यान्ति तर्हि पठनस्य का वार्ता, तेषां मते तु पत्रपात्रता 'ग्राहकता' वृथैव व्ययता पठनं वृथैव कठिन-परिश्रमेण मस्तिष्कहसनमेव, तथाच—महामहोपाध्यायप्रमुखाणां निबन्धम अनल्पकल्पनजल्पं जानाना एतादृशो बहुशो निबन्धा स्वयमेव निबद्धा अस्माभि-रित्युपेक्षन्ते, तथाच—पत्रपठनं वृथैव समययापनमिति भणन्तोऽन्ते च किमपि कर्तुं न पारयन्ते। हा हन्त! पण्डितवर्गाश्चाप्येतादृश एव ये न कदाचित् समाचार-पत्राणामन्यपुस्तकानामध्ययनेन वा समुत्तेजयन्ति छात्रान्, नाऽपि कस्यांचित् पाठशालायां समाचारपत्राणां सुन्दरपुस्तकानां वा वाचनालयपुस्तकालयानां सुप्रबन्धो भवति, येन स्वयमेवाभिरुचिः स्याच्छात्राणाम्, परञ्च स्कूलकालजेषु यदैवाऽस्मिन् विषये दृष्टिं पातयामः, तदा पूर्णतया तेषां सुप्रबन्धमवलोक्य चकित-चकिता भवामः, ते नवपुस्तकश्रवणेनैव हि ग्रहीतुकामाः पत्रं प्रेषयन्ति, यस्यो-दर्कनिष्कर्षोयं निः सरति यन्मान्यवदान्यानां पंडितप्रकाण्डानां तथाचोद्भटानां भटानां स्वदेशहितचिन्तकानां जीवनं पाठं पाठं स्मारं स्मारंच तद्वदाचारितुं यतन्ते, तथा च समाचारपत्राणामप्यदः फलम्। यथाहि—गोलज्ञानां भूगोलखगोलयो-र्नूतनविषयकज्ञानं भवति, तथाचानुभूतविज्ञानस्य प्रभूतं ज्ञानं भवति, तथा च समालोचनात्मकविषयाणां मतविपर्यासपर्य्यासपूर्णनिरासाऽनुकूल्यप्रातिकूल्य-तथ्यातथ्यस्य ज्ञानं भवति, अपि च विद्वत्तल्लजानां समग्रप्रत्यग्रशब्दैकाग्री-करणेनाव्यग्रीभूय प्रस्तावसमग्रसुषमासामग्र्यग्रेसरीकर्तुं पारयन्ते छात्राः, तथाच—सार्वत्रिकस्थिति-घटनागृहे एव कर्णकुहरं स्पृशन्ति। अद्धा "वस्तुतः" अमीभिरेव संसारोपकृतिः, अमून्येव निद्रातन्द्राकेन्द्रीभूतान् प्रभूतान् जनान् जागरयन्ति, निर्बलान् सबलान् कारयन्ति, मृतकल्पेभ्यो यौवनं ददति, हतोत्सा-हान् उत्साहयन्ति, अन्यत् किं जाति-देशरक्षार्थममून्येवोत्साहयन्ति, अपि च भाषोन्नतिरपि पत्रैरेव भवति, यतो विविधस्वादमदतोऽवलोक्य पण्यशालाध्यक्षा अपि लालायमानाः पठितुं यतन्ते, बहुशः पठितोर्दुगुरुमुखीका अवलोक्यन्ते। पाठशालाध्यक्षाः! परञ्च हा! कष्टम्! विविधज्ञान महत्त्वसत्त्वेऽपि संस्कृतपत्रमहत्त्वं नावलोक्यते, यद्यपि चिरकालात् काशिधामतः पत्रद्वयी निःसरति तथा-ऽपि पञ्चापप्रान्ते संस्कृतपत्राभाव एवाक्ष्णोः खटखटायतेस्म, परञ्चाऽधुना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीनृसिंहकृपयोद्योतप्रकाशेनाभावराक्षसः प्रद्रावितः, योऽन्यपत्रेभ्योऽधिकतरमुपकरोति, वस्तुतः सूक्ष्मेक्षिकासध्रीचनया ऽऽलोचनयाऽन्येभ्यो महतीमुपकृतिं जनयति पत्रमिदं विशेषतया पञ्चापप्रान्तीयेभ्यस्तदपि विशेषतया छात्रेभ्य एव यतः पत्रमद× पञ्चापविश्वविद्यापीठनियतीकृतानां ग्रन्थानां समालोचनात्मकविषयान् तथाच—नियमान् तथाच विशेषसमाचारं प्रकाशयति, अतः पञ्चापप्रान्तीयेभ्य उचितमेव यत्तेऽस्योन्नतिकरणे कणेहत्य (मनोहत्य) परिश्रमं कुर्य्युः, तथा च छात्रान् धनाढ्याश्च ग्राहकतायां साहायकतायामुत्तेजयन्तु येन पत्रमद× पाक्षिकं साप्ताहिकं वा भवेत्, परीक्षाफलमप्यस्मिन् प्रकाश्येत, तथाचाधुना यथो द्योतयति सर्वचेतः सद्योजात उद्योतः, तथाग्रिमे वर्षेप्यधिकतरं प्रकाशयतु सर्वचेतः, अतोऽपि कृपालवः ! दयालवः ! कृपालवं दयालवञ्च विधाय गृहयालवः सम्भवन्तु भवन्तः । तथाचाभ्यर्थनेयं ग्राहकमहोदयेभ्यो यत्तेऽस्य गुणगानेनान्यान् समुत्तेजयन्तु, पण्डितवर्य्याश्च छात्रान् उत्साहयन्त्वितरथारण्यक्रन्दकल्पो भविष्यत्यध्यवसाय इति शुभम् ।

निबन्धोऽयं न सम्पादकमहोदयाग्रहेण न चाप्यपरपत्रेर्ष्यया द्वेषेण वा लिखितः किन्तु पञ्चापप्रान्तीयसंस्कृतपत्राभावमेवाकलय्य समाकृष्टं चेतश्चेतो (च इतो) मामिति शम् ।

———

ॐ

श्रीकृष्णावतारः ।

यदस्ति वेदसिद्धान्त-निर्मलं स्वप्रभं महः । चित्रं तद्यमुनाकुञ्ज-निकुञ्जम्प्रति धावति ॥१॥

बिभेति यस्मात्कालोऽपि यस्यान्तं न विदुः सुराः । स एव गोपीसन्त्रस्तो दाम्ना बद्धो विराजते ॥२॥

अयि ! पाठकमहाभागाः ! एवं किलानुश्रूयते—य एकोऽद्वितीयो वशी सर्वभूतान्तरात्मा जगज्जन्मादिहेतुर्निरीहो भगवान् वासुदेवः, स एव मनसाप्यचिन्त्यरचनं विरचनमिदं[1] जगद्रचयित्वा तस्य स्थित्यै मरीच्यादीन् प्रजापतीनप्युत्पादयाम्बभूव, तेभ्यश्च वेदप्रणिहितं प्रवृत्तिलक्षणं धर्ममपि यथावदुपदिदेश । अथ सनकादींश्च जनयित्वा निष्कामकर्मवैराग्योपासनोपाध्यान्नातं निवृत्तिलक्षणं धर्मं

१—नानाविधरचनोपेतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेभ्यो यथावद् ग्राहयामास । सोऽयं द्विविधोऽपि धर्मोऽभ्युदयनिःश्रेयसकारणम्-यस्याऽधिकारि ब्राह्मणादिवर्णचतुष्टयम्, सन्न्यासाद्याश्रमचतुष्टयञ्च यथायथं वर्त्तते, महद्भिर्ह्यनुष्ठीयमानोऽयं धर्मो निःसन्देहं जगतः स्थितये कल्पते । धर्मायत्ता हि जगतो मर्यादा-या किल जगतो मर्यादा देशकालाधिकारिभेदेन यादृशी वा तादृशी वा सा सर्वापि सर्वथा तत्तत्कालभवैर्नेतृभिरनुमोद्यमाना येन केनाऽपि धर्मस्वरूपेणैवावष्टब्धा सती शान्त्यपरपर्यायां स्थितिं स्थापयते नेतरथा । "धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः" इति महदुक्तेः ।

यदा तु प्रमादालस्येर्ष्यासूयाभक्ष्याऽभक्ष्याद्यविवेकबहुलतया धर्मपथात् परिभ्रष्टा भवन्ति लोभाऽभिभूतचेतसो लोकाः तदा परिपीड्यमाने द्विविधेऽपि धर्म्मे परिभूतब्राह्मण्यमहानर्थपरीतापतप्तायामार्त्ततरनादमिव मुञ्चन्त्यां धरायां तस्या एव पूर्वनिर्दिष्टाया जगतो मर्यादायाः स्वरूपं परिपिपालयिषुर्भगवान्महाविष्णुरजोऽपि जात इव, अव्ययात्मापि व्ययात्मेव, ईश्वरोऽपि क्वचिदनीश्वर इवाऽविलुप्तविज्ञानक्रियाशक्तिरघटितघटनापटीयसीं स्वां मायामवष्टभ्य यथेच्छं यथादेशं यथाकालं नानारूपैरवतरतीति वस्तुस्थितिः । यत्रेदमुक्तम—"प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते" इति "रूपं रूपं प्रतिरूपो बभूव × इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादि च ।

एवमेकदाऽसुरवरूथविमर्दिताया भुवोभारहरणाय धर्मग्लानिमपनिनीषुरनादिनिधनो भगवान् वसुदेवस्य देवक्यां जज्ञे । जातमात्र एव चात्ममहिमोपनिबन्धनानि तानि तान्यलौकिकानि कर्माण्यकार्षीत् यानि इतरजनशक्त्यसाध्यानि शृण्वतां गृणताञ्च जन्मजन्मान्तरीणकल्मषहराणि व्यासाद्यनेकमुनिभिर्महताऽऽदरेण वर्णितानि सन्ति । अहो ! तोकावस्थायामेवाऽपरिमितबलाया पूतनायाः स्तन्यपानव्याजेन प्राणापहरणं तस्यै मोक्षप्रदानञ्च, बहुविधकुप्यपरिपूर्णस्य शकटस्य त्रैमासिकपदैवापवृत्तिः, रिङ्खणं कुर्वता च महतोरपि महीयसोरर्जुनयोः स्वरूपं समूलमुन्मूल्य ताभ्यां सायुज्यप्रदानं, पीतविषतोयानां पशूनां तत्पालानाञ्चाऽनुग्रहदृष्टिवृष्ट्यैव चोज्जीवनम, स्वप्रभामोषं कुर्वत्या अपि कालिन्द्या ह्रदात् महाविषदुर्धर्षस्य कालियस्य परिस्रावणम, प्रचण्डज्वालाजालजटिलेन दावानलेन दन्दह्यमाने शुचिवने स्वमात्रैकशरणस्य स्वजनस्य परिरक्षणम, "कृष्णो मृत्तिकां भक्षयतीति" सङ्कर्षणनिवेदनमाकर्ण्य तदीयचेष्टान्तरतोऽपि खिन्नमनस्काया दाम गृहीत्वा बन्धनार्थं परिधावनेन परं परिश्रान्ताया यशोदाया विह्वलीभावं निभाल्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदुपरि परमया दयया तद्वशीभूय दाम्ना साकारस्यापि निजरूपस्याऽपरिमितिभावनं, तस्यै वदनजृम्भणव्याजेनैव त्रिलोक्याः प्रदर्शनञ्च, वरुणभयात्स्वपितुर्नन्दस्य मोक्षणम्, मुसलधारापातमभिवर्षति देवे देवेन्द्रमानभञ्जनम्, सप्तवर्षात्मके वयस्येव महामहीध्रस्य गोवर्धनस्य लीलयैव छत्राकमिव करे करणम्, मन्मथमथितमनसां गोपवधूटीनां हर्त्तुर्धनदानुगस्य शिरोहरणम्, प्रलम्बदर्दुरकेश्यरिष्टप्रभृतिमहामल्लपातनपूर्वकं कंसस्य प्राणघातनम्, कुरुमध्येऽवसादङ्गताया एकवस्त्रावृताया दुर्योधनदुराशापरिपूरणाय दुःशासनेन नग्नीक्रियमाणाया, "गोविन्द ! दामोदर ! माधवेति" स्मरन्त्याः पाञ्चाल्याः परित्राणमित्येवमाद्यनेनेकेषां मनुष्यमनसाऽप्यचिन्तनीयस्वरूपाणां कर्मणामभिनयनं भगवदवतारमन्तरा केन कर्त्तुं शक्यमिति नैवास्ति कस्यचिदप्यास्तिकजनस्य शङ्कापङ्कावकाशः। किन्तु कुतर्कज्वरजर्जरितविचाराचारव्यवहाराणां केषाञ्चिदेव स्याद्व्यामोहः।

अन्यो भागवतःकृष्णोऽन्यश्च गीताकृष्णः—

अत्र केचिदाहुः—अन्य एव भागवतकृष्णात् श्रीगीताकृष्णः। "सपर्यगाच्छुक्रमकायमव्रणम्" (यजु० ४०।८) इत्यादि श्रुतिशतप्रमाणबलात् निराकारस्य निरीहस्य सर्वशक्तिमतः सर्वज्ञस्येक्षामात्रेणैव सकलां सृष्टिं निर्मिमाणस्य पालयतः संहरतश्च भगवतः कथमविद्यादिदोषपरम्पराऽऽपतितमहानिरयस्वरूपदुःखशताकुलीक्रियमाणकपूयचरणशरीराभिसम्बन्धः ? कथं वा सर्वगतस्याऽपरिच्छिन्नस्य शरीरैकदेशे गर्भे वासः ? कथं वा नित्यतृप्तस्याप्तसमस्तकामस्येतस्ततः पर्यटाट्या ? इति तर्कशतपरिचोदनाऽस्यास्नुतया नहि भागवतः कृष्णो विष्णोरवतारो भवितुमर्हति। यतोऽसौ महाचौरः, पराङ्गनावासोऽपहारी, परदाराभिमर्शी, महाविषयलम्पटः, राधाङ्गसङ्गसमासादितानङ्गानन्दः कुब्जापरिभुक्, जरासन्धादिभयत्रस्ततया समुद्रमध्ये द्वारकानिलीन इति। गीताकृष्णो यद्यपि नेश्वरावतारः तथापि मुक्तात्मतया स्वच्छन्दो धर्मग्लानिविनिवारणाय धृतदेहो योगिराड् सदुपदेष्टा, सत्ये पथ्यजुनं प्रवर्त्तयन् यद्यद्यदाचरति श्रेष्ठ"—इति स्वयमूर्ध्वबाहुर्भूत्वा कदाचारादत्यन्तमेव दूरे वर्त्तमानः स कथं वेदशास्त्रमर्यादाविरुद्धमतिघृणितं किमपि दुर्बुद्धीनां चेष्टितमाचरेदिति। तदेतद—नाधीतशास्त्रतत्त्वानामनधिगतगुरुसम्प्रदायानामास्तिक्यभावविवर्जितानां केषाञ्चिच्चोद्यं सर्वथैव निःसारं मन्यामहे—तथाहि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एक एव गीताकृष्णः श्रीभागवतकृष्णश्च—

गीतायाम्—द्वितीयतृतीयाध्यायोक्तेऽर्थेऽप्रामाण्यशङ्काविधूननार्थं विद्यावंशसम्प्रदायमात्मनश्च भ्रमविप्रलम्भकत्वादिनिरासपूर्वकं महेश्वरत्वं सर्वज्ञत्वञ्च स्वयमेव भगवान् स्वमुखेन कीर्त्तयति—"अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया" इति । एतेन भगवद्देहस्य वसुदेवादुत्पत्तिमन्वानस्याऽर्जुनस्य (त्वम्पदार्थस्य जीवमात्रस्य) अनीश्वराऽसर्वज्ञाशङ्का परिहृता भवति । यद्यपि त्वम्पदार्थो जीवः योगी वा अयोगी वा, यः कोऽपि, स सकलोऽपि अजोऽव्ययात्मा चास्त्येवेति नात्र कस्यापि विप्रतिपत्तिः परन्तु भूतानामीश्वरस्तु महेश्वर एव । महतोऽपि महान् कश्चिद् योगी स्यात्, योगीश्वरो वा स्यात् नासौ महेश्वरः (तत्पदवाच्यो) भवितुमर्हति 'जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च" (ब्र० सू० ४ । ४ । १७) इत्यत्र योगिनां योगीश्वराणां सर्वेषामीश्वरायत्तस्वाराज्यप्राप्तीनां जगद्व्यापारवर्जमेवेश्वरत्वं प्रत्यपादि । यदि च सगुणब्रह्मोपासनाबलात्प्राप्तमहिमा कश्चिज्जीवविशेष एव श्रीकृष्णोऽभविष्यत् तदा कदाप्यात्मानं व्यासाशयविपरीतं "भूतानामीश्वरोऽपि सन्" इति महेश्वरत्वेन नैव निरदेक्ष्यत्, नापि च प्रकृत्यधिष्ठातारं स्पष्टमाख्यास्यत्, न वा सर्ववेदविदग्रेसरोव्यासोऽपि महर्षिः स्वप्रणीतब्रह्मसूत्रविरुद्धार्थं गीताशास्त्रं कदापि प्राणेष्यत् । नच श्रीकृष्णो भगवानपि गीतायां—"अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते । इति मत्वा भजन्ते मां बुधा भावसमन्विताः" इत्यादिना शतशः स्थाने स्थाने स्वस्य प्रकृतिनियन्तृतया स्फुटतरमीश्वरात्मभावमर्जुनम्प्रत्युपादेक्ष्यत् ।

नचाऽयमीश्वरात्मभावस्तद्धर्मापत्ति-लक्षणः "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" (ब्र० सू० १ । १ । ३०) इति प्रतर्द्दनाधिकरणीयसिद्धान्तसिद्धो वामदेवादिवत्प्रतिपत्तव्य इति शङ्कितुमपि शक्यम् तस्य दर्शितगीतावाक्यसिद्धश्रीकृष्णीयमहेश्वरात्मभावेन पूर्वमेव (सुदूरतो) निरस्तत्वात् । भूतेश्वरत्वं च जगत्स्रष्टुः परमेश्वरस्य[1] "मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्"० "य एको जालवानीशत ईशनीभिः"० "हिरण्यगर्भं जनयामास पूर्वम्" ० "ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्त्ति" ० इत्यादिश्रुतिशतसिद्धम् । तदेवचेहोपनिबद्धं गीताशास्त्रे श्रीकृष्णस्य परमेश्वरावतारं वदता बादरायणेन मुनिना । किञ्च—

श्रीमद्भागवतेऽपि—एकादशे श्रीकृष्णोद्धवसंवादः गीताप्रस्थानसदृश एव । यद्यदर्जुनं प्रत्युपदिष्टं भगवता तत्तदेव श्रीमुखाद् उद्धवम्प्रत्यप्युपदिदेश भूतभावनो नारायणः । (अपूर्णम्) सम्पादकः

१—जगद्व्यापारवर्जसमानाधिकरणमित्यत्र तात्पर्यं नैव विस्मरणीयम् ।

त्रुटिः—(प्रथमपृष्ठे टिप्पणे)—*"जिहीत" जानीतेत्यर्थः सर्वे गत्यर्था ज्ञानार्था अपीति सिद्धान्तात् । "जहीत" इति पाठान्तरे तु "त्यजत" इत्यर्थो बोध्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

UDYOTAH REGISTER L. NO. 2304

वार्षिकमूल्यम् १॥)
सार्धरूपकम्

प्रतिखण्डमूल्यम् =)
आनकत्रयम्

उद्योतः

पञ्चनदीयसंस्कृतसाहित्यपरिषदो
मासिकं मुखपत्रम् ।

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नादराद्,
अज्ञानान्धतमोविनाशपटुता–विख्यात–विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्,
"उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥१॥

प्रथमवर्षे— १ | कार्तिकसङ्क्रान्त्याम् वि०सं० १९८५ अक्तूबर सं० १९२८ | अष्टमो मयूखः ८

सम्पादकः—
कवितार्किक (-तन्त्रचक्रवर्त्ति-) नृसिंहदेवशास्त्री दर्शनाचार्यः ।
सहकारिसम्पादकः—
विद्याभास्करपण्डितपरमेश्वरानन्दशास्त्री साहित्योपाध्यायः ।
प्रकाशकः—
परिषन्मन्त्री पं० जगदीशशास्त्री व्याकरणतीर्थः

(उद्योत कार्यालय जौडेमोरी लाहौर)
" Udyot " Office Jaure Mori Lahore.

श्रीकृष्णदीक्षितप्रबन्धेन "बाम्बे मैशीन प्रेस मोहनलाल रोड लाहौर" इत्याख्ये स्थाने मुद्रितः । पं० जगदीशशास्त्रिणा च उद्योत-कार्यालयात् "जौडेमोरी लाहौर" इत्यतः प्रकाशितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतस्य कतिचन नियमाः

१—अस्य मासिकपत्रस्य अग्रिमं वार्षिकं देयम् (भारते, ब्रह्मदेशे सिंहले च)—१॥) सार्धरूपकम् ।

२—प्रेषणव्ययो ग्राहकैर्न देयः ।

३—प्रबन्धादिकं समालोचनार्थं ग्रन्थादिकञ्च सम्पादकसमीपे, मूल्यादिकं च प्रकाशकसमीपे निर्दिष्टस्थाने प्रेषणीयम् ।

४—विज्ञापनपत्रादिमुद्रापणव्यवहारविषयोऽपि कार्यालये प्रकाशकसमीपाद्विवेचनीयः ।

५—पत्रं प्रतिसङ्क्रान्ति प्रकाश्येत । येन खलु ग्राहकेण यथाकालं सङ्ख्या नाधिगम्येत तेन तन्मासस्य तृतीयसप्ताहाभ्यन्तर एव कार्यालयाद्विवेच्यम्, नातः परं कस्याप्यभियोगः श्रूयेत, किन्तु तेन प्रथमं स्वपोष्टस्थानं परिशोध्यैव प्रष्टव्यम् । विवेकार्थं ग्राहकसङ्ख्या चावश्यं लेख्या ।

६—ग्राहकैः स्वस्थानादिकं स्पष्टमेव लेख्यम्।

७—एतस्य ग्राहका अपि साधारणसभ्येषु गण्येरन् ।

८—प्रेषितलेखाः प्रायो यथाक्रमं मुद्राप्येरन् । लेखकैर्न्यूनातिन्यूनं पक्षात्पूर्वमेव लेखाः प्रहीयेरन् । राजविरुद्धान्दोलनलेखाश्च न गृह्येरन् ।

विषयसूची

(प्रबन्धानां गुणदोषयोः प्रबन्धलेखका एव प्रतिभुवः)

विषयः	पत्राङ्कः
१—श्रीकृष्णावतारः ।	१
२—बाणसूक्तिविवेचना	८
३—निमन्त्रित उपदेशकः—ले० बहादुरचन्द्रशास्त्री	११
४—न्यायमुक्तावली समालोचना—ले० श्री० पं० सीतारामशर्मा	१४
५—प्रत्यालोचना	१६
६—सम्पादकीयम्	२०
७—गीतिः—ले० श्रीविश्वनाथशास्त्री	२३
८—समयानुकूलमनोभावना—ले० श्रीमाधवानन्दशास्त्री	२५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

उद्योतः

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नाराद् अज्ञानान्धतमोविनाशपटुता-विख्यात-विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन् "उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥

प्रथमवर्षे- १	कार्तिकसङ्क्रान्त्याम् वि० सं० १९८५ अक्तूबर—सं० १९२८	अष्टमः मयूखः ८

श्रीकृष्णावतारः ।

(पूर्वतोऽनुवृत्तम)

तथाहि—एकादशस्य षोडशेऽध्याये—"त्वम्ब्रह्म परमं साक्षादनाद्यन्तमपावृतम्"—इत्याद्यभिधाय—

येषु येषु च भावेषु भक्त्या त्वां परमर्षयः । उपासीनाः प्रपद्यन्ते संसिद्धिं तद्वदस्व मे ॥

"याःकाश्च भूमौ दिवि वै रसायां विभूतयो दिक्षु महाविभूते" इत्येवमादि-रूपतयोद्धवेन प्रश्ने कृते सति—'श्रीभगवानुवाच"—

एवमेतदहं पृष्टः प्रश्नं प्रश्नविदांवर । युयुत्सुना विनशने सपत्नैरर्जुनेन वै ॥
ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकम् । ततो निवृत्तो हन्ताहं हतोऽयमिति लौकिकः ॥
स तदा पुरुषव्याघ्रो युक्त्या मे प्रतिबोधितः । अभ्यभाषत मामेवं यथा त्वं रणमूर्धनि ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादिनोद्धवम्प्रति गीताप्रसङ्गं ब्रुवतो भागवतकृष्णस्य गीताकृष्णस्य चैक्यमेव गम्यते ।

'ईश्वरावतारे कुतर्कचोद्योपमर्दः—

ननु—निराकारस्य निरीहस्य सर्वगतस्य महेश्वरस्य अवतार एव न घटते ? साकारत्वे निराकारत्वं, तत्तत्क्रियाकरणपरायणत्वे निरीहत्वं, गर्भादिषु प्रवेशादौ सर्वगतत्वञ्च सर्वथैव बाधकं तर्कमवोचाम, तत्कथं श्रीकृष्णस्येश्वरावतारत्वं वक्षि ? उच्यते—भ्रान्तोऽसि । निराकाराणामपि प्रकृतिपरमाण्वादीनां महदादीनाञ्च द्व्यणुकादिक्रमेण साकारतादर्शनात्, निरीहस्याप्तसमस्तकामस्यापि परमेश्वरस्य तवमते सृष्ट्यादौ प्रवृत्तिदर्शनात्, सर्वगतस्याऽऽकाशस्य घटकुड्यकरकादौ प्रवेशदर्शनाच्च नैतादृशस्य कुतर्कस्य चोद्यावसरः । नच वाच्यं प्रकृतिवत्साकारतायां परमेश्वरे परिणामवादप्रसङ्गेन विकारित्वापत्तिः, परमाण्वादिवच्चाऽभ्युपगम्यमाने आरम्भवादेन सम्भूयेश्वरवादप्रसङ्गश्च दुरुद्धर एवेति ? यतो न वयं प्रकृतेर्महदादिवत् परमेश्वस्यावतारं तद्विकारं मन्यामहे अपितु मायैव तस्य लीलाऽवतारत्वे प्रयोजिकेति ब्रूमहे । नहीन्द्रजालनिर्मितैर्विषधरादिभिरैन्द्रजालिको व्यामोहमाप्नोति, नापिच रज्ज्वाद्यधिष्ठानविवर्त्तभूतैः सर्पादिभी रज्ज्वादीनां विषधरत्वेन रूपेण लेशतः संस्पर्शः, नच बालकल्पिततलमलिनतादिना व्योम्नि परिच्छेदः । परव्यामोहनैकरूपत्वादेव मायायाः । उक्तञ्च महद्भिः—

माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं न त्वां मां द्रष्टुमर्हसि ॥ इति ॥

"दैवीह्येषा गुणमयी मम माया दुरत्यया" इत्यादि च । पराक्रान्तश्चायमर्थो गम्भीरार्थवद्भिरल्पैरेवाक्षरैः श्रीपूज्यपादैरपि—"त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिम्"—इत्येवमादिरूपेण गीताभाष्यप्रारम्भे, विवृतश्चान्दगिरिभिस्तत्रैव पूर्वपक्षमुत्थाप्य भाष्याक्षराणि योजयद्भिः—'अथैवमपि कथमीश्वररस्यानादिनिधनस्य नित्यशुद्धबुद्धमुक्तस्वभावस्य स्वभावविपरीतं जन्मादि सम्भवति, नहिं भूताना मीशिता स्वतन्त्रः स्वात्मनोऽनर्थं स्वयमेव सम्पादयितुमर्हति, नच तस्य देहादिमत्त्वे किमपि फलमुपलभ्यते—तत्राह त्रिगुणात्मि-

---

१ नह्येकः परमाणुर्द्व्यणुकादिनिर्माणे समर्थः किन्तु बहवो मिलित्वैवैकं द्व्यणुकादिकार्यमारभन्ते, एतद्दृष्टान्तेनेश्वरस्य साकारता स्वीकारेऽनेकेश्वरवादवादप्रसङ्गे प्राप्तेऽनीश्वरवाद एव पर्यवसास्यतीति गूढाभिसन्धिः पूर्वपक्षिणः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कामिति, × × × तस्याश्च प्रतिभासमात्रशरीरत्वमेव नतु वस्तुत्वमित्याह मायाम्"— इति चैवमादिना ग्रन्थजातेन[1] ।

अपि च महानयं भवतां मतिव्यामोहो यद् भगवान् अवतरन् निराकारः साकारो भवेदिति यतोऽभगवानपि (जीवो) निराकारः देहसम्बन्धेन न साकारतां बिभर्त्ति, किम्पुनर्भगवान् स्वतन्त्रो मायावशी अवतारवादे साकारः सन् विकारी भवेदिति वक्तव्यम् । यत्राऽविद्याप्रत्युपस्थापितनामरूपाद्यध्यासिनो जीवस्य कौटस्थ्यं शरीरसम्बन्धेन न व्याहन्यते,तत्र मायानियन्तुः शरीराभिसम्बन्धः कौटस्थ्यं विप्लावयेदिति कथनं मुष्टिभिर्गगनहननकल्पं साहसमात्रमेव । कथमन्यथा—

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥

"न जायते म्रियते वा विपश्चित्"—(कठ० २१८) इत्यादि ।

"अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च । नित्यः सर्वगतःस्थाणुरचलोऽयं सनातनः" ॥

इत्यादि च जीवस्वरूपविवेचनपरं श्रुतिस्मृतिवचोजातं सङ्गच्छेत, तस्माच्चितां[2] शरीराभिसम्बन्धो वस्तुतः साकारताप्रयोजक इति रिक्तं वचः । मायिनो महेश्वरस्य तु जगद्व्यापारवत्साधुपरित्राणाऽसाधुविनाश-धर्मसंस्थापनहेतुसम्भवस्वभावतया तत्तद्रूपेणाऽविर्भावस्तथा तथा परेषां नटवत् प्रतिभासमानताप्रदर्शनमेवाऽवतारत्वम्, नतु पुर्यष्टकाभिमानिजीववत् शुभाशुभकर्मवशात् गर्भादिबहिःप्रदेशादागत्य गर्भाद्यभ्यन्तरे प्रवेशो येनाऽमुष्य महामलीमसनिरयनिवासेन विविधदुःखानुभवोऽनीश्वरत्वञ्च सम्भावयितुमपि शक्येयाताम् । नहि— साकारस्वरूपाविर्भावप्रत्यायनकाले तस्य नैसर्गिकी निराकारता केनापि विकारेण संस्पृष्टा सतीश्वरत्वं व्याहन्तुमीष्टे । देवादिवच्चैतद्द्रष्टव्यम्=यथा स्वसङ्कल्पमात्राधीननानाभावानुत्सृजन्तोऽपि देवाद्या न स्वरूपात्प्रच्यवन्ते तथा भगवानपीति श्रुतिस्मृतीतिहासेभ्यः प्रतिपत्तव्यम, कथमन्यथा—

१—अन्यदपि—"यद्यपि कूटस्थः स्वतन्त्रो नित्यत्वादिलक्षणश्चायमीश्वरः स्वतो दृश्यते तथापि यथोक्तमायाशक्त्या देहादि गृहीत्वा प्राणिनामनुग्रहमादधानो न स्वभावविपर्ययं पर्येति" इति तत्रैव टीकायामुक्तम् ।

२—जीवानामीश्वरस्य चेत्याशयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः । आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥

(भाग० अ० ३ श्लो० ८) इत्यादिना लोकसीमातिलङ्घी महार्हवैडूर्यकिरीटकुण्डललसच्चतुर्भुजशङ्खचक्रगदाद्यायुधोपेतदिव्यस्वरूपप्रतिभासः वसुदेवाय देवक्यै च प्रदर्शितो वर्णितः सङ्गच्छेत, कथञ्च प्राक्तनजन्मवृत्तान्तश्रावणपूर्वकं तयोः पश्यतोरेव प्राकृतबालभावोऽपि युक्तोऽधिगम्येत । अतो यथा महाभारते श्रीकृष्णस्य सङ्कल्पमात्रेणैव द्रौपद्याः पटपरम्परोत्पत्तिस्तथैव रूपान्तराण्यपि तस्य सङ्कल्पमात्रेणेत्याह मायैवेषेति ! मायैवैषा भगवतो यदवतारादिचर्याप्रदर्शनम् ।

एतदुक्तं भवति—यथा देवदत्तस्य गेहे, यथा वा सर्पस्य बिले प्रवेशः प्रसिद्धो न तथा भगवतो गर्भादिषु प्रवेशः सम्भावनीयः, नच कस्याऽपि सनातनवैदिकसिद्धान्ताभिमानिनः सम्मतं वैतत् । किन्तु यथा जले प्रतिबिम्बभावेन प्रविष्टस्य सूर्यादेस्तद्धर्मवत्तयोपलभ्यमानत्वं तथैव परमात्मनः स्वेच्छयैव मायारचिते सङ्घातविशेषेऽधिष्ठानत्वेन प्राक्सिद्धस्यैव स्वस्वरूपस्य, (लोकानुजिघृक्षया) तादृशप्रयोजनवशात् तत्तत्सङ्घातधर्मतया तथोपलभ्यमानत्वमेव यत्र तत्र श्रुतिस्मृतीतिहासपुराणादिषु प्रवेशपदार्थो विवक्षितः । एतेन अवतारधारणे परिच्छिन्नत्वापत्तिरपि सुदूरं पराहता भवति, समानन्यायात् व्यापकस्यैकदेशित्वाऽसम्भवेऽपि एकदेशसम्भवताया[1] विरोधाभावाच्च ।

यच्च केषाञ्चिल्लोकमर्यादां पश्यतामपि मात्सर्यपट्टिकां धारयित्वा श्रीकृष्णस्य भगवतो बाललीलायां नवनीताद्यपहरणादिकं लाञ्छनमिति[2] दुर्भावना तत्तत्रत्यपूर्वापरप्रकरणपाठेनैव दत्तोत्तरास्ति, यदि न स्याद्विद्वेषदद्रूरिति न बहु क्षोदनीयतामपेक्षते । नहि परोऽपि शिष्टो नाट्यमुद्रां दर्शयन्नटश्चौर्यादिषु दण्डनीयो गर्हणीयो वा स्वस्वरूपविषये इति कोप्यनुन्मत्त उत्प्रेक्षेत । नवनीताद्यपहारश्च बाललीलैव या भगवदवतारपक्षेऽभगवदवतारपक्षे कथमपि न दुष्यति । प्रत्युत पूर्वस्मिन् पक्षेऽनुगृह्णात्येवात्मानम् पित्राप्यायनकरत्वात्तस्याः । अयमाशयः—नच प्रियादपि प्रियतरां स्वपुत्रशैशवलीलामनुभवन्तौ पितरौ तदाऽन्यदा वा पुत्रचर्यां स्मरन्तौ च कदाचिदपि तापमुपगच्छतो यदयमस्माकं वसनाद्यपहरति भाण्डादिकं वा स्फोटयतीति ।

१—यद्यपि यो व्यापको नासावेकदेशी, तथाप्यसावेकदेशेऽपि भवति ।

२—ईश्वरत्वविरुद्धम्, अनीश्वरतायाः प्रयोजकं वेति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्युत क्षणे क्षणे[1] तादृशीं लीलां पश्यतोस्तयोर्हर्षस्य काष्ठैव न भवति, यस्याः स्वरूपं कवयितुं कविरसमर्थः तार्किकश्च तर्कयितुमपि न प्रभुरिति सर्वथैवात्मजलीलानन्दः स्वानुभवैकवेद्यः । किञ्च—तादृशं सुखं यैर्नानुभूतं ते सकलसम्पत्तिभाजोऽपि हतभाग्या एव गण्यन्ते लौकिकैः। यत्रैतादृशे व्यवहारे प्राकृतं शैशवमपि न दोषजालजटिलं सम्भाव्यते तत्र कैव कथा निर्मुक्ताखिलहेयप्रत्यनीकगुणगणसम्पन्नस्य सर्वात्मभूतस्य परानन्दमातन्वतो माययैव शैशवलीलां नाटयतो यशोदाप्रभृतीनां पुत्रभावङ्गतस्यान्तरान्तरा स्वमुखमध्य एव निजं वैराजं रूपं[2] दर्शयतः श्रीकृष्णस्य भगवतो हैयङ्गवीनादिचौर्यादिकथायाः दोषभावनायाम् ।

नहि तदीयतादृशलीलया गोप्यो वा गोपा वा तङ्कनामिव प्राप्ताश्चक्रन्दिरे, नन्दादीन् प्रति वा स्वात्मजत्रासने शशङ्किरे । अथवा तदीषाः खेला बभञ्जिरे प्रत्युत तद्विरहे नीरं विना मीना इव तापं, जगदालोकं विना कोका इव शोकञ्च भेजिरे इति नातिरोहितं भागवतश्रमजुषां विदुषाम् ।

गोपीवासोऽपहारोऽपि श्रीकृष्णस्य नेश्वरत्वबाधकः—

अथ अङ्ग ! पृष्टो व्याचष्टां भवान् कथं गोपीवासोऽपहारस्तासां नग्नानां निरीक्षणञ्च भगवतः श्रीकृष्णस्यानीश्वरत्वमावहति ? किमयमीश्वरावतारत्वमभ्युगम्याऽऽक्षेपः? अनीश्वरावतारत्वमभ्युगम्य वा ? प्राकृतपुरुषत्वमभ्युगम्य वा ?। आद्यः पक्षोऽन्योन्याश्रयपराहतः । अनीश्वरतासिद्धौ वासोऽपहारादेर्दोषत्वम्, तत्सम्बन्धेन दोषत्वसिद्धौ चानीश्वरत्वमिति कथं नान्योन्याश्रयः । स्वपक्षदोषाच्च—स्वपक्षेऽप्येष दोषः प्रसज्यते निराकारोपीश्वरः सर्वेषां नग्नत्वं पश्यतीत्यनीश्वरः स्यादिति ।

१—अधोलिखिताः श्लोका अस्मिन्प्रकरणे प्रायः स्मरणीयाः—

पद्भ्यां भक्तहृदिस्थाभ्यां वन्द्याभ्यां लोकवन्दितैः । अङ्कं यस्याः समाक्रम्य भगवानपिबत्स्तनम् ॥
यातुधान्यपि सा स्वर्गमवाप जननीगतिम् । कृष्णभक्तस्तनक्षीराः किमु गावो नु मातरः ॥
पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलम् । भगवान् देवकीपुत्रः कैवल्याद्यखिलप्रदः ॥
तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणम् । न पुनः कल्पते राजन् संसारोऽज्ञानसम्भवः ॥

२—सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः । साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकम् ॥
ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च । वैकारिकाणीन्द्रियाणि मनोमात्रा गुणास्त्रयः ॥

इत्यादिना स्पष्टं वर्णितं मुखव्यादानव्याजेन स्वमातरम्प्रति वैराजरूपप्रदर्शनमपश्यन्तश्चुरादिदोषरजांसि भगवति प्रक्षिपन्तः कथमुपमेया इति स्वयमालोक्यताम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च भूयोदोषभागी भवेत् सः, पशुपक्षिकीटपतङ्गमनुष्यप्रभृतीनां भूयसामनारतं प्रजननेन्द्रियदर्शनात् तदन्तःप्रविष्टत्वाच्च । अथ निराकारत्वान्निर्लेपोऽसाविति ? । साकारत्वेऽपि केषाञ्चिन्निर्लेपता दृष्टैव यथा सूर्यादीनाम् । नहि सूर्याद्या भातिस्वभावाः खड्गमुकुरतैलाद्यालम्बनेषु तत्तद्धर्मैर्लिप्यन्ते, नहि जले विद्यमानमपि कमलदलं जलेनाऽविलीक्रियते । तस्माद् यत्किञ्चिदेतत् ।

वस्तुतस्तु—निरस्तसाम्यातिशायने सकलसौन्दर्य्यसारभाजि परमाकर्षणस्वभावे साक्षान्मन्मथमन्मथे श्रीकृष्णे बद्धसौहृदाः सौरतभावाकुलितहृदया "नन्दगोपसुतोऽस्माकं पतिर्भूयाद्" इति भावनया नन्दव्रजकुमारिकाः हविष्यं भुञ्जानाः कात्यायनीव्रतं[1] चेरुः, तस्यास्य मासिकव्रतस्यैकदा (समाप्तिदिवसे) सर्वास्तामिलित्वा पूर्ववत् कात्यायन्या अर्चनाय कालिन्द्यास्तीरे वासांस्यवतार्य तन्मनस्कतया कृष्णमुच्चैर्गायन्त्यः स्नानविधिमारेभिरे । अथ—तासां काममापूरयितुं[2] तदभिप्रेत्य सप्तहायनो योगेश्वरेश्वरो भगवानपि स्वसखैर्गोपैरावृतस्तत्रैवा ययौ । दिगम्बरतया स्नानं कुर्वतीनां सर्वासां तासां वासांस्यादाय सत्वरः कदम्बञ्चारुरोह, तस्य तादृशं चेष्टितं निरीक्ष्य हसद्भिरेव बालैः परिहासपूर्वकम्—

अत्रागत्याबलाः कामं स्वं स्वं वस्त्रं प्रगृह्यताम् ।
सत्यं ब्रवाणि नो नर्म यद्यूयं व्रतकर्शिताः ॥
न मयोदितपूर्वं वा अनृतं तदिमे विदुः ॥

इतिचाऽभिदधे । ततो लज्जया स्वदास्यं प्रकटितवतीषु जलाशयादुत्थितासु तासु ताः प्रति इत्थमचकथत् यद् विवस्त्राभिर्युष्माभिः स्नान्तीभिर्महद्देवहेलनमनुष्ठितं येन च व्रतविधानभङ्ग एव सम्पन्नः । परमनन्यभावेन मत्प्राप्त्यर्थमेव मयि रममाणासु भवतीषु सुप्रसन्नोऽहमत्रागतः । अहमेव सर्वेषां यज्ञानां भोक्ता अहमेव च प्रभुरतः ("प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्") सकलयज्ञत्रुटिपूरको मन्नमस्कारः, तस्माद् देवावज्ञाजन्यतादृशपा-

---

१—भगवांस्तु—पशुमार्गं परिहाय दृष्टि स्पर्शमात्रेणैव स्वस्वाभाविकैश्वर्यमहिम्ना ता रमयामासेति सूक्ष्मेक्षिकया द्रष्टव्यम् ।

२—नहि काचित्कन्या कमप्युत्कृष्टं वरं हृदि कृत्वा तत्प्राप्त्यै भगवतीं गौरीमर्चयन्ती दुष्यति, शिष्टा वा तां गर्हयन्ति । नापिचायमुपायः स्वयं रहोमार्गैः कौमार एवोपसृत्येष्टवरप्राप्त्यपेक्षया न वरीयानिति कश्चिज्जीवितचित्तः समाधातुं शक्नुयात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पापनुत्तये (स्वव्रतपूर्त्यर्थं) सिताञ्जलयः सत्यो मामेव प्रणमत। ताश्च भगवद्वचसि प्रत्ययमादधाना "विवस्त्रस्नानं देवहेलनमेव जातम, भगवन्नमस्कारश्च सकलदोषापनुद्" इति विज्ञाय तथैव प्रणेमुः। भगवानपि ताभ्यो वासांसि दत्वा—

"सङ्कल्पो विदितः साध्व्यो भवतीनां मदर्चनम्।
मयाऽनुमोदितः सोऽसौ सत्यो भवितुमर्हति॥
न मय्यावेशितधियां कामः कामाय कल्पते।
भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते॥"

इत्यादिना स्वस्मिन् कामभावस्यापि निवेशनं संसारदुःखात्यन्तोच्छित्तये एवेति स्पष्टमाचष्ट। तथैव चाग्रे रासमण्डलप्रकरणे[1] सूक्ष्मं निरीक्ष्यमाणे "आत्मन्यवरुद्ध सौरतः" "यस्येन्द्रियं विमथितुं कुहकैर्न विभ्व्यः" इत्याद्यनेकत्राभिहितवाक्यैकवाक्यतया स्फुटीभवतीति विज्ञेयम्।

अत्र—मात्सर्यपट्टिकामवतार्य स्वयमालोचयत्वायुष्मान् यत् प्राकृतपुरुषपक्षे[2] ऽपि सप्तहायनस्य बालस्य वस्त्राद्यभिहरणे कथं दुष्टत्वं सम्भवेत्? अप्राकृतपुरुषपक्षे तु दोषस्य गन्धोऽपि नास्ति पूर्वोत्तरप्रसङ्गसङ्गत्यैव सकलदोषनिर्वहणात्। यदि चैतादृशं भागवतं कर्म (तत्कृते एव) पापमभविष्यत् तदा भयत्रासलज्जामातृपितृताडनादिकं तदीयविद्वेषादिकञ्च सर्वमेव भगवति वर्णितमभविष्यत् नहि पापाचरणे कस्यचिद् भयत्रासादयो न जायन्ते इति वक्तुमपि शक्यम्, तवाऽनभिमतञ्च। तस्मान्नेदं (गोपीवासोपहारादि) कुतर्कचोद्यमीश्वरावतारे स्थातुमर्हति।

कुब्जापरिभोगविषये तु—सकलधन्वन्तरिधिषणाऽतीतं परात्परतरं कौशलमभिव्यज्यते भगवतो यत् साम्प्रतिका महावैज्ञानिकाः सर्जना अपि कर्त्तुं न पारयन्ते। सा सैरन्ध्री विलेपकुशला भगवतोऽलौकिकं सामर्थ्यं भक्तजनप्रियताञ्चाकर्ण्य स्वसौन्दर्याप्तिकामा तस्मै विलेपनमर्पयामास। भगवानपि तदभिप्रेतमालक्ष्य मल्लमपट्टिकादिमन्तरैव पदे पदेनाक्रम्य चिबुके पाणिनाचाक्रमन् पश्यतामेव केषाञ्चित्तामवक्रदेहाञ्चकार। अतएव तत्र केचिद् भगवन्तं "वेदपुरुषोऽयम्" इति निश्चिक्युः

१—एतद्विषये बहुवक्तव्यमवशिष्यते ग्रन्थगौरवभयान्नाधुना प्रतन्यते।

२—शिष्टं पक्षद्वयमपि विवेचयति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्व्याजभक्तायास्तस्याः स्वयमर्पितशरीरायाः क्षात्रधर्मं स्वाऽसङ्गताञ्च भावयन् तस्याः कामपूरणमपि व्यधादित्यत्र न कामप्यनुपपत्तिं पश्याम इतीदमपि कुतर्कचोद्यं पराहतमेव ।

एतेन परदाराभिमर्शित्व-महाविषयलम्पटत्व-जरासन्धादित्रासवत्त्वाद्या अपि कुतर्कचोद्या निरस्ता वेदितव्याः स्वाभाविकज्ञानलवक्रियोपेतत्वाद्भगवतः श्रीकृष्णस्येति श्रीकृष्णो भगवान् भगवदवतार एवास्तीति सर्वं सुस्थम् ।

(सम्पादकः)

बाणो धनपालश्च ।

(पूर्वतोऽनुवृत्तम्)

(ले०—श्रीयुत ईश्वरचन्द्रशर्म्मा ब्रह्मचारी)

गद्यम्—

उद्यतोदिवसकरमण्डलादिवोत्कीर्णः, तडिद्भिरिव विरचितावयवः, तप्तकनकद्रवेणेव बहिरुपलिप्तमूर्तिः आपिशङ्गावदातया देहप्रभया स्फुरन्त्या सवालातपमिव दिवसं दावानलमिव वनभुवदर्पशमयन्-हारीतः । (का० ७१ पृ०) ।

× × ×

गद्यम्—तप्ततपनीयपिङ्गलेन समन्ततः प्रसर्पता देहप्रभाप्रवाहेण सन्तर्पयन्तमिव क्षीणातपं दिवसं—विद्याधरमुनिम् । (ति० म० २० पृ०

× × ×

धनपालेन पर्यायविशेषणविशेष्याणामंशतो भेदं विधाय वाणार्थ उपात्तः । तप्तहिमद्रवकरणकलेपोत्प्रेक्षा तप्ततयनीयपिङ्गलदेहप्रभां प्रदर्श्योपमात्वेन विपरिणमिता । वाणेनाहनि वैभातिकातपो दृष्टिपथं नीतः । धनपालेन क्षीणातपाहः प्रकाशोपचयः संपादितः । बाणस्य देहप्रभोत्कर्षस्तीव्रतमो यत्र मध्यान्हप्रकाशोऽपि मन्दतामेति बालातपश्चालोक्यते । तथा च क्षीणातपोपचयं सम्पादयन्ती देहकान्ति र्बाणकान्तेरतिदुर्बला । पूर्णस्यारेर्गर्वशातनं तेजस्विता, दुर्बलाक्रमणं वीरवाह्यम् ।

एतद्वाक्यगतमेवार्थमाश्रित्य धनपालेनेयमन्या शरीरकान्तिवर्णना कृता ।

उचितप्रमाणशालिनामतिभास्वरतया तडिद्दण्डैरिव निर्मितानां पुष्परागपरमाणुमृत्तिकाभिरिव दन्तोपचयानामातपेनेन कल्पितत्वचामङ्गानामनस्फुलिङ्ग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिङ्गलेना गलता समन्ततः प्रभाजालेन ज्वलदनेकदीपिकाचन्द्रवालमिव मण्डपान्तरालं कुर्वाणम्—वैमानिकम् (ति० मं० ३० पृ०)

वाणस्य तडिद्भिरिव विरचितावयवः, इतीदं "तडिद्दण्डैरिव निर्मितानां" इत्येवमङ्गानां विशेषणीकृतम् । "उद्यतोदिवसकरमण्डलादिवोत्कीर्ण" इत्यत्र दीप्यमानप्रचण्डतेजः "आतपेनेव कल्पितत्वचा" मित्यत्तातिमन्दं संवृत्तम् । आतपादातपोत्पत्तिभूमिसूर्यमण्डलस्य प्रभातिशयो न युक्तिसिद्धः । पुष्परागपरमाणवोऽपि सूर्यप्रभाप्रतिहता न नयनगोचराः । उत्प्रेक्षाप्रज्वलितदीपिका अवशिष्टास्ता मध्यान्हे निलीयन्ते तत्कथं मनागपि तत्र आसेरन्यत्र मध्यान्हस्यापि रूपं परिवर्तते । इमं वाणार्थमेव गृहीत्वा धनपालेनापरापि तनुकान्तिवर्णना विहिता—

आभरणमणिकिरणप्रभासन्तर्पितेन प्रसर्पता सर्वतस्तप्ततपनीयद्रवाकारेण देहद्युतिप्राग्भारेण पिङ्गलीकृताखिलदिगन्तरालं सदानलमिवान्तरिक्षमादधानं—खेचरनरेन्द्रवृन्दम् (ति० म० १२४ पृ०)

इदं खेचरनरेन्द्रवृन्दवर्णनम् । वाणोक्तस्य "सप्तकनेकद्रवेणेवहिरुपलिप्तमूर्तिः" इत्यस्य "तप्ततपनीय द्रवाकारेण" इत्यत्राणेच्छाया सुस्पष्टा । वाणस्य "सदावानलमिवेति" अत्रापि । तत्र केवलं देहप्रभा परमत्राभूषणखचितरत्नद्युतिरपि संवलिता । ककुभां पीतता प्रज्वलति दावानलेन प्रकाशते ।

वाणगद्यं कौशेयाम्बरं पच्छकलीकृत्य धनपालेन शोभादूरमुदस्ता ।

वाणो बिल्हणश्च

गद्यम्—

ग्रासीकृतमृणाललताविवर संक्रामितानीव परस्परहृदयान्यादाय विघट्टमानेषु रथाङ्गनाम्नां युगलेषु । (का० २८२ पृ०)

\+ + +

मृणालसूत्रं निजवल्लभायाः समुत्सुकश्चाटुषु चक्रवाकः ।
अन्योन्यविश्लेषकयन्त्रसूत्र भ्रान्त्येव चंचुस्थितमाचकर्ष ॥ १—३४ ॥
चंचुसंपुटगृहीतमृणाली ग्रन्थिसूत्रनिवहेन रथाङ्गः ।
विप्रयोगभयतो दयितायाः कण्ठपाशमिव कर्तुमियेष ॥ ११—५ ॥

(विक्रमाङ्कदेवचरित)

\+ + +

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्लेषकयंत्रसूत्रभङ्गेन कण्ठपाशेन वा चक्रवाकविभागो नापाकर्तुं शक्यते । भानावस्तमुपेयुषि ध्रुवभावी विश्लेषः । बाणस्य कोकदंपती तथा मिलितौ मृणालसूत्रैर्यथा यत्नेनापि न विश्लेषयितुं शक्यौ । अस्तं यातु द्युमणिर्नभीतिः । हृदयमन्योन्य सन्निहितम् । सति हृदयसमागमे शरीरसम्बन्धासंबन्धावकिंचित्करौ ॥

गद्यम्—स्नानोत्थितेन मुनिजनेनार्घविधिमुपपादयतापः क्षितितले दन्तस्तमम्बरतलगतः साक्षादिव रक्तचन्दनाङ्गरागं रविरुद्वहत् । (का०)

\+ \+ \+

पद्यम्—

आरक्तमर्घ्यार्पणतत्पराणां सिद्धाङ्गनानामिव कुङ्कुमेन । बिम्बं दधे बिम्बफलप्रतिष्ठां राजीविनीजीवितवल्लभस्य ॥ १—३५ ॥

पर्यायभेदमन्तरा न कोऽपि भेदः । गद्ये मुनिजनः पद्ये सिद्धाङ्गनाः गद्ये रक्तचन्दनं पद्ये कुङ्कुमम् । गद्यरागः पद्ये प्रतिबिम्बितः । गद्यम्—

दिङ्मुखविसर्पिणि हारलतानां रश्मिजालनिमग्नशरीरतया शरीरसागरोन्मग्नवदनयेव लक्ष्म्या । (कां० १९३ पृ०)

\+ \+ \+

पद्यम्—

आविर्बभूवाथ पतिंवरा सा क्षौमाम्बरप्रस्फुरदुत्तरीया ।
मृगेक्षणा दुग्धपयोधिमुग्धतरङ्गलेखानुगतेव लक्ष्मीः ॥ ९-६४ ॥ वि-च० ॥

पद्ये लक्ष्म्या इतस्तत ऊर्मय उच्छलन्ति । गद्ये तु देहो दुग्धसमुद्रनिमग्नः आननं बहिः । क्षौमवस्त्रापेक्षया रश्मीनां तानवं विशिष्यते । तेषु मग्नापि तनुरुद्योतते । वसने स्पन्दमान एव वैशद्येनावभासः । आवरणान्तर्हितस्यापि द्योतनमौज्ज्वतेतिशयनिबन्धनम् । तरङ्गलेखासु शरीरात्किंचिदपसृत्यानुयान्तीस्वेव लक्ष्मीरालोक्यते विलहणस्य । बाणक्षीरसागरे तु कण्ठदघ्नं मग्ना यतः छविरपूर्वतामाप ।

तुलया बाणगद्येऽर्थगौरवं प्रतिपादयतां नः इतरमहाकविकाव्येषु गुणाल्पीयस्त्वं नाभिमतम् । अस्त्येव तत्रापि सहृदयहृदयङ्गमोऽर्थः । यत्र बाणप्रतिभया प्रसृतं न तत्रेतरावकाशो मनागपीत्येव प्रतिपाद्यम् ।

बाणस्य गद्यं सर्वेष्वपि गद्येषु परमातिशयं गतम् । विमलरसतरङ्गिण्यां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दार्थास्तरन्तीव । हेम्नि रत्नबन्ध इव पदानां दृढबन्धोऽतिमनोरमः । अहमहमिकया समापतन्त्योऽलङ्कृलयस्तारा इव स्फुरन्ति । कथाघटना सत्यपि विस्तरे वलक्षपक्षेन्दुकलेव क्रमवर्द्धमानकोमलकान्तिकलापा । लघुदीर्घवृत्तानि सूत्रगुम्फिताऽमितपीतारुणादिकुसुमानीव मनोहारीणि वृत्तवैचित्र्येण क्वचिन्मनोमालतीकोरकमिवोदयमानरविदीधितिसम्पर्काद्विकसति । क्वचन चकितमिवात्मानं विस्मरति । क्वचित् निशाकरकरस्पर्शस्यन्दमानचन्द्रकान्तमणिरिव द्रवीभूतं नेत्राभ्यां बहिः प्रसरति ।

के वा वयं सर्वात्मना बाणस्य गुणवर्णने । परिमितवर्णनियन्त्रितानि पदानि समस्तभुवनव्यापकोऽर्थराशिः । इन्द्रियानुभूतार्थानुसारि हृदयं अतीन्द्रियालौकिकभावस्पन्दसुन्दरो रसः । पुरुषायुषशतेनापि नाख्यातुं शक्यतेऽविकलं गुणगणः । निरूपयतां च हृदयङ्गमभिममर्थं ह्रसीयसी कालकला प्रतिबन्धमाचरति न पुनर्गुणानामवसानम् । विस्तरेणापि हिन्दीभाषया प्रतिपादयन्त आरभ्महे । देवदेवस्य वरदस्य करुणाऽश्चितदृशोवलम्बे यथावसरमुपायनीकरिष्यामोरसिक शिरोमणिषु ॥

आसक्तं जगतां विधातरि हरौ निर्धूतबाधं मनः
वाक्स्तर्कजुषो बलादपि शिरो धुन्वन्त्यसूयावताम् ॥
पाराशर्यवचांसि मे विमृशतस्तत्त्वं परं पश्यतः
श्रीमद् बाणकवीन्द्रसूक्तिरसनैस्तारुण्य मुद्योतते ॥ इति ॥

निमन्त्रित उपदेशकः ।

एकस्मिन्नविष्ठाने कश्चिदुत्सव उपतस्थे । तत्र बहव उपदेशका गाथकाश्चामन्त्रिता समवेयुः । कश्चन श्रद्धालुः पौर एकमुपदेशकं न्यमन्त्रयत्—'मम भुञ्जीत भवान्' इति । स चोमित्यङ्गीचकार ।

स पौरः केवलं पत्नीद्वितीय एवासीत् । उभौ च दम्पती प्रकृत्या लघ्वाशिनावास्ताम् । 'उपदेशकोऽपि नातिबहु खादिष्यति' इति धारणया गृहिणी परिमितमेवान्नं शश्रौ ।

अथ भोक्तुं वेला समेयाय । उपदेशकमहाशय उपस्पृश्यासनं परिजग्राह ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहिणी च द्वे रोटिके व्यञ्जनादिकञ्च पात्रे पर्यवेषयत् । सोऽशितुमारभत, अल्पेनैव च ते द्वे रोटिके अवससौ । गृहिणी तृतीयां न्यवेदयत् । स तामप्यहाय निजगाल । ततः सा चतुर्थीं समर्पयामास । सतामपि निजग्रास । अथ पञ्चमी केवलाऽवशिशेष । गृहिणी भृश मचित्रीयत—'अहो ! महाशनोऽयम्' इति । ततः सा तस्मै रोटिकार्यं मुपाहरत् । तद्विभाव्योपदेशक अहांचकार—'समीप्सतीवान्नमस्याः । तेनेयं रोटिकार्धं ददाति । नवाग्रहं करोति । तन्न भूयो भोक्तु मुचितम् ।' इति तथा निश्चित्य स भोजनादुपरराम ।

अथ भोजनानन्तरं यावदुपदेशकः पुनरुपास्पृशत् तावत् गृहिणी परमुदविजत—'किं स्वित्पुनर्भोक्तुमीहतेऽयं वृकोदरः ? ननु भोजनात्पूर्वमपि पाणिपादमधावयदयम्, सोऽयं भूयोऽपि यथापूर्वमाचरति । तन्न जाने किमस्य चेष्टितम्' इति । परन्तु सुदैवात्स भूयो नाशनायाञ्चकार । गृहिणी चाश्वासमाप ।

अथ गृहमेधी तमुपदेशकं वासगृहं निनाय, तूलकोमलायां शय्यायाञ्च शाययामास । ततो निर्वृतौ दम्पती परस्परं मन्त्रयामासतुः । प्रथमं जाया जगाद-'ननु कान्त ! सकलं सिद्धान्नमनेन तव प्राहुणिकेन कवलितम्, तदावां केनोदरं भरिष्यावः ? ततो भर्ता सविस्मयं व्याजहार—'अहो ! अतिभुङ्क्तेऽयं कृशकायोऽपि इदमित्थमिति चेदवेदिष्यम् नैनमुपदेशकपाशं न्यमन्त्रयिष्यम् । तत्किं विधेयमधुना ? ' । गृहिणी शशंस—'एवं क्रियताम्, त्वं तावदापणं याहि, सेर मात्रमुष्णदुग्धमाहर येन सम्प्रति मनाक् शान्तिः स्याज्जठराग्नेः' इति । स प्रतिशशंस—'साधु प्रिये ! तथैवातिष्ठामि' इति ।

अथ स दुग्धमानिनाय किन्तु शर्करादिकमानेतुं न चिचेत । अथ स दुग्धकमण्डलु मुपदेशकशिरोधानान्तिके पीठे निधाय सत्वरं सितामादातुं पुनरापणमभिपलायामास । गृहिणी कार्यान्तरे व्यापृताऽऽसीत् । एतस्मिन्नन्तरे यदृच्छयोपदेशकस्य चक्षुरुन्मिमील । समीपे दुग्धं विलोक्य स तर्कयाञ्चकार—'नूनं शुभेन ममातिथेयेन 'क्षुधितोऽयं सुप्तो मेऽतिथि'रिति जानता दयालुतया मदर्थं दुग्धमिदं न्यस्तम्, आदरातिशयाच्च नाहं तेन बोधितः । दिष्ट्या काले प्रबुद्धोऽस्मि' इति । तथावधारयन् स तत्पयः सतृणं पपौ ।

अथ सितामादाय गृहमेधी यावत्प्रत्याजगाम तावत्क्षीरपात्रं रिक्तं ददर्श, चकितश्च बभूव, 'ध्रुवमस्यैव दुरात्मनो वृथोपदेशकस्य दुर्विलासोऽयम्' इति च झटिति पर्यवससौ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ हताशः संजातमन्युश्च स स्विकां पत्नीमाजुहाव, निखिलं व्यतिकरं च तस्यै व्याचचक्षे। सापि पाणिना पेयं प्रतिकूलं दैवमुपालेभे, क्षुधोपबृंहितेन च सरम्भेण भर्तारं बभाषे—'किन्नौ केवलयाऽनया सितया? न्यस्यैनामपि तस्यैव शिरोधाने येन स एव हतकस्तुन्दपूरमभ्यवहरेत' इति भर्तापि समिद्धकोपानलः संजगार—'कल्य एवैनं दुर्भगमतिवाहयिष्यामि, भविष्यति च नैतादृशानभ्यागतान् परिचरिष्यामि' इति अथ सितां तत्रैव पीठेऽवस्थाप्य सपत्नीकः शयनालयं विवेश।

अस्मिन्नन्तराले स उपदेशकः पुनर्यदृच्छया जजागार। यावत्पीठे चक्षुरचारयत् तावत्सितामदर्शत्, आत्मगतञ्च कथयमास—'धिङ्माम्! कथं मन्दोऽहम्! सितामन्तरेणैव दुग्धमधयम्, इयमत्रैव पतिताऽस्थात्। कदाचिद् गृहमेधिनौ मे प्रातः परिहासं कुरुतां तत्कथं नैनामधुनैवोदरदरीं नयानि।' इति। तथा चिन्तयित्वा तां सितामपि चचर्व।

तौ दम्पती पुनः क्षुधं च मन्युञ्चान्तरात्मन्येव जारयन्तौ शेतुं चिचेष्टेते, कृच्छ्राच्च निद्रामुपेयतुः।

अथ प्रभातायामेव शर्वर्यां तौ प्रबुबुधेते, प्राघुणिकस्य च जागरणं सोत्कलिकं प्रतिपालयामासतुः। सुखसुप्तः स चिरेण बुबुधे। तदीयबोधसमकालमेव गृहमेधी तमुपससार, साकूतञ्चाभिदधे—'गम्यतां महाराज! त्वर्यताम्। उत्सवबेला वर्तते माविलम्बीभूत्। परमनुकम्पिता वयम्' इति।

भूतार्थानभिज्ञ उपदेशको यथासुखं जगाम, परं स्वप्नेपि नावजगाम—कियद्व्यलीकं विहितं मयाऽनयोर्जम्पत्योः' इति।

बहादुरचन्द्रशास्त्री।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीहरिःशरणम् ।

* समालोचना—

न्यायसिद्धान्तमुक्तावल्यास्तत्र—

श्रीनृसिंहदेवटीकायाश्च

"तुरीतन्तुसंयोगस्तु"

(का० १८)

भिन्नं विशेषणं व्यर्थं नृसिंहा देवशास्त्रिणः ।
तुकारतमसा भ्रान्ताः शिष्टं स्पष्टं वदन्ति ते ॥

अस्ति खलु न्यायसिद्धान्तमुक्तावल्यामष्टादशी कारिका, तस्यां च असमवायिकारणलक्षणे विचारितं विश्वनाथपञ्चाननेन । तच्चेत्थम्—'समवायिकारणे समवायसम्बन्धेन सम्बन्द्धं कारणमसमवायिकारणमित्येतादृशं चेदसमवायिकारणलक्षणं क्रियेत तदा तन्तुसंयोगवत्तुरीतन्तुसंयोगोऽपि पटं प्रत्यसमवायिकारणं स्यात्, असमवायिकारणनाशे कार्यनाशः" इति सिद्धान्तपरिक्षयः स्यात् । यतो यथा तन्तुसंयोगनाशे पटनाशो भवति, न तथा तुरीतन्तसंयोगनाशे पटनाशः । तुरीतन्तुसंयोगनिवृत्तौ हि लोके पट उपयुज्यते । तस्मात्तत्रातिव्याप्तिनिवृत्तये तुरीतन्तुसंयोगभिन्नत्वं विशेषणं देयम् ।' इति पूर्वं विचार्य तस्यैव तुरीतन्तुसंयोगस्य कार्यान्तरेऽसमवायिकारणत्वं दृष्ट्वा व्यवस्थितत्वं दर्शयितुमाह-'तुरीतन्तुसंयोगस्त्वि'ति । अत्रेयं व्यवस्था—पटात्मकं कार्यं प्रति तुरीतन्तुसंयोगस्यासमवायिकारणत्वे पूर्वोक्तसिद्धान्तभङ्गापत्तिस्तेन तत्र तद्भिन्नत्वविशेषणं दीयते, तुरीपटसंयोगं प्रति तु सिद्धान्तसमन्वयादसमवायिकारणत्वं स्वीक्रियत इति ।

इहैवं व्यवस्थायां स्थितायां नृसिंहदेवशास्त्रिण आहुः-"सम्प्रति तद्भिन्नत्वं विशेषणं व्यर्थं मन्यमान आह—'तुरीतन्तुसंयोगस्तु' इति ।

अत्रैवं विचार्यं, यद् यत्र पटात्मककार्यापेक्षया तुरीतन्तुसंयोगस्य असमवायिकारणत्वमापद्यते, एवं तत्र हि (पटं प्रति) तस्य (तुरीतन्तु संयोगस्य)

---

* हरियाणा शेखावटीब्रह्मचार्याश्रमवासिश्रीसीतारामशर्मकृता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वयर्थ्यशङ्कैवनास्ति कुतो वैयर्थ्यम्। एवं चेन्नास्ति वैयर्थ्यं तदा कुतो वैयर्थ्यमननम्। तथा यत्र तुरीपटसंयोगं प्रति तस्य (तुरीतन्तुसंयोगस्य) असमवायिकारणत्वे न सिद्धान्तभङ्गभीतिर्न तत्र भिन्नत्वविशेषणं दीयत एवेति न तादृशावतरणावकाश इति।

किंच नच वक्ष्यमाणोदाहरणे तादृशविशेषणापत्तिमभ्युपगम्यैवेदमवतरणं तद्व्यर्थत्वबोधनायेति वाच्यम्। अनुचितत्वस्थले व्यर्थत्वोक्तेरयुक्तत्वात्। अन्यद्ध्यनुचितत्वमन्यच्च व्यर्थत्वम्। यथा 'शीतो वह्निः' इत्यत्र शीतत्वं न व्यर्थमपि तु अनुचितमेव। वैधर्म्यात्। 'उष्णो वह्निः' इत्यत्र च नोष्णत्वमनुचितं तस्य स्वाभाव्यात्, तस्माद् व्यर्थमेव तद्वाच्यमिति। एवमिहापि तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगस्यासमवायिकारणत्वे स्थिते न वह्नानुष्णत्ववद्विशेषणं व्यर्थमपि तु तत्र शीतत्ववदनुचितमेवेति सति तस्य (तद्भिन्नत्वविशेषणस्य) व्यवस्थितत्वे व्यर्थत्ववचनमनवसरं भ्रान्तिप्रयुक्तमथवाऽज्ञातकृतमिति विभावयन्तु विचारशीलाः। अथवा तत्तत्कर्यं प्रति असमवायिकारणलक्षणे कर्त्तव्ये प्रकरणभेदान्नव्यवस्थापि। किन्तु यत्रावश्यकं तत्र नित्यं दीयते, यत्र तु न तथा न तत्र कदापि दीयत इति विचारभेद एव।

'तु' शब्दस्यभ्रामकत्वम्।

भ्रान्त्यादिकारणं तु तेषामत्रैव मुक्तावल्यां तुरीपटसंयोगं प्रतीत्युत्तरत्वेन पाठ्यस्तुरीतन्तुसंयोस्त्वित्येवं संयोगपदोत्तरत्वेन पठितस्तुशब्दः।

स हि प्रकृतपदार्थापेक्षया विजातीयपदार्थे विधेयान्तरसूचनद्वारा प्रकृतोद्देश्यव्यावृत्त्यर्थं प्रयुज्यते। यथा 'देवदत्तः पायसं भोक्तुंशक्नोति, चणकं तु न इति। अत्र देवदत्तस्य भोजनशक्तौ पायसान्नं प्रकृतं तद्विजातीयं च चणकान्नम्, इति तत्र भोजनशक्तयभावे पायसस्य व्यावृत्त्यर्थं चणकान्वितस्तुशब्दः प्रयुज्यते। तेन च पायसस्य भोज्यतापेक्षया चणकान्नस्य अभोज्यता विधेयान्तरं सूक्ष्यते। नत्वत्रैकस्मिन्देवदत्ते तुशब्दः प्रयोक्तुं युज्यते। यथा—'देवदत्तः पायसंभोक्तुं शक्नोति, देवदत्तस्तु न चणकान्न' मिति। तथैव तुरीतन्तुसंयोगः पटं प्रत्यसमवायि कारणं न भवति, तुरीपटसंयोगं प्रति तु भवत्येवेत्येवं प्रयोज्यः "तुरीतन्तुसंयोगस्तु" इत्यत्र समानपदार्थे प्रयुज्यमानो भ्रान्तिहेतुरयुक्तश्च भवति इति 'तु' शब्दस्यात्र तमस्त्वमिति ज्ञेयम्। अस्थानगतेन 'तु' शब्देन वाक्यस्यास्पष्टत्वम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्पष्टस्य सतो वाक्यस्य स्पष्टत्वकथनं भ्रान्तिकार्यम् । इति सर्वं संगृह्य इत्यमुच्यते—

भिन्नं विशेषणं व्यर्थं नृसिंहा देवशास्त्रिणः ।
तुकारतमसा भ्रान्ताः शिष्टं स्पष्टं वदन्ति ते ॥

मूले उचितः पाठस्त्वेवं प्रतीयते । यथा—अत्र यद्यपि तुरीतन्तुसंयोगोऽपि तन्तुसंयोगवद्यथोक्तलक्षणसमन्वयेन पटम्प्रति असमवायिकारणं भवितुमर्हति, एवं वेगादिकमपि अभिघातादिकं प्रति, तथापि "असमवायिकारणनाशे कार्यनाशः" इति सिद्धान्तभङ्गापत्तिभिया यथाकार्यं तुरीतन्तुसंयोगभिन्नत्वं वेगादिभिन्नत्वं च तत्र तत्र विशेषणं देयं तेन तत्र तत्रातिव्याप्तिर्निवर्त्तते ।

किंच यत्र पूर्वोक्तस्वसिद्धान्तभङ्गभयं नास्ति तत्र न असमवायिकारणलक्षणे तादृशं विशेषणं देयम् । यथा तुरीतन्तुसंयोगः पटं प्रति असमवायिकारणं न भवति, तुरीपटसंयोगं प्रति तु भवत्येव । तत्र तुरीसंयोगनाशेन तुरीपटसंयोगनाशस्य नियतत्वात् सिद्धान्तविरोधाभावान्न तद्भिन्नत्वविशेषणं देयमिति तुरीतन्तुसंयोगभिन्नत्वादिविशेषणं सिद्धान्तभङ्गाभङ्गदृष्ट्या दानादानाभ्यां व्यवस्थितम् ॥ इति ॥ शुभंभूयात् ।

विदुषांवशंवदः—सीतारामशर्मा ।

ॐ

प्रत्यालोचना

शुद्धाऽशुद्धभ्रमोत्थानमत्सरोपेतमानसाः ।
श्रीसीतारामशर्माणः स्पष्टाऽस्पष्टं वदन्ति ते ॥ १ ॥

अत्रेदं प्रत्यालोचयामः—"असमवायिकारणनाशे कार्यं[1] (द्रव्य) नाशो

१—असमवायिकारणनाशे कार्यद्रव्यनाश एव नतु कार्यनाशः, नहि भवति वेगस्य नाशेऽभिघाताख्यसंयोगनाश इति सूक्ष्मं निरीक्ष्यम् । "विनाशस्तु सर्वस्य संयोगस्यैकार्थसमवेततद्विभागात्, क्वचिच्च आश्रयविनाशादपि । तथाहि—यदा तन्त्वोः संयोगे सति अन्यतरतन्त्व्यारम्भकेंशौ (तन्त्ववयवे) कर्मोत्पद्यते तेनांशन्तराद्विभागः क्रियते, विभागाच्च तन्त्वारम्भकसंयोगविनाशः, संयोगविनाशात्तन्तुविनाशे तदाश्रिततन्त्वन्तरसंयोगस्य विनाशः" इति प्रशस्ते गुणप्रकरणे । तस्मादसमवायिकारणनाशे कार्यमात्रनाशं कथयन्ननुपासितगुरुरेव ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवति" इत्ययमस्ति न्यायसिद्धान्तः। अमुं सिद्धान्तं हृदि कृत्वा कारणत्वप्रसङ्गेन कारणसामान्यलक्षणमभिधाय तद्विभागं दर्शयन् समवायिकारणं लक्षयित्वा असमवायिकारणलक्षणमुक्तं परममूले तत्रासन्नमिति—एतद्व्याख्यायां ग्रन्थकारेण स्वयं शङ्कोत्थापिता समाहिता च। यस्यायमाशयः—यथा पटात्मककार्यसमवायिकारणीभूततन्तुप्रत्यासन्नस्य[1] तन्तुसंयोगस्याऽसमवायिकारणत्वं दर्शितलक्षणानुरोधि, तथा तुरीतन्तुसंयोगस्यापि तत्प्रत्यासन्नतयाऽसमवायिकारणत्वं[2] स्यात्। अथ ब्रूषे स्यादेवं को दोषः? तदाऽसमवायिकारणनाशे कार्य (द्रव्य) नाशनियमानुरोधेन तुरीतन्तुसंयोगनाशे पटेनापि नष्टव्यम्, नच तथा दृश्यते, तस्मात्तुरीतन्तुसंयोगेऽसमवायिकारणलक्षणस्यातिव्याप्तिमाशङ्क्य तन्निरासाय पटाऽसमवायिकारणलक्षणे "तुरीतन्तुसंयोगभिन्नत्वे सति" इति विशेषणं देयम्। अर्थात् "तन्तुसमवेतत्वे सति तुरीतन्तुसंयोगभिन्नत्वे सति पटकारणं पटाऽसमवायिकारकम्" इति वक्तव्यम्। एवं समाधाने कृतेऽपि—यदीयमाशङ्कोत्थाप्येत—"ननु—असमवायिकारणसामान्यलक्षणे "तुरीतन्तुसंयोगभिन्नत्वे सति" इति किमर्थं न दीयते तावतैव तदतिव्याप्तिनिवृत्तेस्तत्तद्विशेषलक्षणगौरवस्य व्यर्थत्वात्? इतीमां शङ्कां परिहर्त्तुमग्रिमं ग्रन्थमवतारयति—"तुरीतन्तुसंयोगस्तु" इति। तुना पूर्वपक्षव्यावृत्तिः। सामान्यलक्षणे तादृशे विशेषणे दीयमाने तुरीपटसंयोगात्मककार्यस्थले तुरीतन्तुसंयोगेऽसमवायिकारणलक्षणं न घटिष्यते[3], इष्यते तु—तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगोऽप्यसमवायिकारणमिति। तस्मात्पटाऽसमवायिकारणात्मकाऽसमवायिकारणविशेषलक्षण एवोक्तं विशेषणं धर्त्तव्यं नत्वसमवायिकारणसामान्यलक्षणे। अनया रीत्या तुरीतन्तुसंयोगभिन्नत्वनिवेशमव्यर्थं मन्यमानो मूलकारस्तथा ग्रथ्नाति[4]। एतादृशाऽभिसन्धिस्फोटणायैव प्रभाटीकाकर्त्रा (मया) अपि—

१—शङ्काग्रन्थस्य ससमामाधानस्य।

२—पटात्मककार्यम्प्रति प्रत्यासन्नतया।

३—तथाचाऽव्याप्तिः स्यात्।

४—एवञ्च प्रत्येककार्यस्याऽसमवायिकारणलक्षणे निमित्तकारणसमवायिकारणयोर्यः परस्परं संयोगस्तद्भिन्नत्वनिवेशं मन्वानः फलमुखगौरवं न दोषायेति मन्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"सम्प्रति तद्भिन्नत्वनिवेशमव्यर्थं मन्यमान आह"—"तुरीतन्तुसंयोगस्तु" इत्यवतारो दत्तः। परं प्रभाटीकायाः प्रथमसंस्करणे "—निवेशमव्यर्थं" मित्यस्य स्थाने व्यर्थमित्यशुद्धमनवधानवशाज्जातं, यस्य संशोधनं शुद्धिपत्रे प्रादर्शि। तदनालोच्यैवैवम्भूते स्पष्टेऽप्यर्थे स्वपाण्डित्यरागान्ध्यवशात्, कस्यचिदभिनवप्रतिष्ठाभिमानिनः पार्ष्णिग्राहकत्वस्वीकारात्, परोत्कर्षाऽसहिष्णुत्वाद्वा यस्मात्कस्माच्चित् कारणात् समालोचनातत्त्वमजानद्भिः[1] सीतारामशर्मभिरकाण्डताण्डवनाटनेन मुधैव क्लेशोऽर्जितः। एतेन—"किञ्च—.....तद्व्यर्थत्वबोधनाय..... इत्यादिग्रन्थोऽपि सांवृतिको वेदितव्य; अस्मत्प्रणीतावतरणे तादृशपाठाऽदर्शनात्। एवम्—"अनुचितत्वस्थल"[2]—इत्यारभ्य "भ्रान्तिप्रयुक्तमथवाऽज्ञानकृतम्" इत्यन्तोऽपि ग्रन्थः आकाशलेखनन्यायानुरोध्येवेत्याकलयन्तु; समालोचनाचणा विपश्चिदपश्चिमाः।

एवं "तु" शब्दस्य भ्रामकत्वाभिधानमपि सीतारामशर्मणां विदुषाञ्चक्षुषि धूलिप्रक्षेपणमात्रमेवेत्याभाति, दर्शितरीत्या पूर्वपक्षव्यावृत्त्यर्थत्वात्तस्य भ्रामकत्वाऽनुपपत्तेः। अथाचक्षीथाः—

"स हि प्रकृतपदार्थापेक्षया विजातीयपदार्थे विधेयान्तरसूचनद्वारा प्रकृतोद्देश्यव्यावृत्त्यर्थं प्रयुज्यते, यथा—देवदत्तः पायसं भोक्तुं शक्नोति चणकन्तु न" इत्यत्र देवदत्तस्य भोजनशक्तौ पायसान्नं प्रकृतं तद्विजातीयञ्च चणकान्नम् इति तत्र भोजनशक्त्यभावे पायसस्य व्यावृत्त्यर्थं चणकान्वितस्तु—शब्दः प्रयुज्यते, तेन च पायसस्य भोज्यतापेक्षया चणकान्नस्य अभोज्यता विधेयान्तरं सूच्यते" इत्यादि, तदपि स्वपादकुठारपातन्यायमनुरुन्धे। नहि मन्दानलस्य देवदत्तस्य भोजनशक्त्यभावे पायसस्य व्यावृत्तिर्विवक्षिता, अपितु चणकान्नस्यैवेति पांसुलपादिको हालिकोऽपि ज्ञातुं समर्थः। अत्र भवान् पण्डितोऽपि भूत्वा स्वलिखितं तुवादं स्वयं दृष्टान्ते योजयन् भोजनशक्त्यभावे चणकन्वितस्तुना पायसव्यावृत्तिं मन्वानः कथं न लज्जत इति विदुषाञ्चेतसि महाचमत्कारमातनोति। तस्मादत्रापि—देवदत्तः किं भोक्ष्यते

१—समालोचनायां गुणा दोषाश्च प्रदर्श्यन्ते, न केवलं समालोच्ये दोषबुद्धिरेवोद्भाव्यते समालोचकेन। तथासति समालोचकस्य ताटस्थ्यमुद्रा विहन्येत।

२—अत्र बहुवक्तव्यमपि ग्रन्थगौरवभयादुद्योते स्थानाभावान्न विन्यस्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति केनचित् पृष्टे पायसं भोक्ष्यते इति परेणोत्तरिते पुनर्भोजनशालायाञ्चणकान्न-सिद्धिमपि जानानः प्रथमः शङ्कते (पायसाऽपायसान्नस्योपस्थितौ) भोक्तृत्वेनोपस्थितत्वात् चणकान्नस्यापि पायसवत् सिद्धत्वात्वाच्च देवदत्तेन चणकान्नमपि कुतो न भुज्येतेति, तामिमां शङ्कां परिहरन्नपर (चणकान्नभोजने देवदत्तस्य शक्त्यभावं विद्वान्) आह—"देवदत्तः पायसान्नं भोक्तुं शक्नोति चणकान्नन्तु न" इति । तदेतेन पूर्वपक्षव्यावृत्तिं बोधयता तुना (साधकदृष्ट्या) पायसचणकान्नयोर्द्वयोः प्रकृतोद्देश्यत्वे समाने पायसवत् चणकान्नेऽपि प्राप्ता भोज्यात्मकविधेयतैव निषिध्यते नतु पायसे भोज्यत्वात्मकविधेयता व्यावर्त्यते पायसभोजनस्य देवदत्तीयशक्तिविषयत्वात्, चणकान्नस्य चातथात्वात् । अथाऽयमभिप्रायः—देवदत्तीयदृष्ट्या पायसं प्रकृतं, तद्विजातीयं च चणकान्नं, तत्राऽभोज्यतात्मकविधेयता सूचनद्वारा प्रकृतपायसनिष्ठोद्देश्यत्वव्यावृत्तिरेव तुना बोध्यत इति तत्तु भोजनशक्त्यभावे चणकव्यावृत्तौ पायसनिष्ठभोज्यत्वरूपविधेयत्वस्यैवेष्टतया "पायसस्य व्यावृत्त्यर्थम्" इति लिखता ऽत्रभवता द्रविडप्राणायाम एव नाटित इति कीदृशी ते विस्पष्टार्थलापनाभिनिवेशशीलतेति किञ्चिदन्तर्मुखता सम्पादनीया । "चणक" भोजनशक्त्यभावे सर्वथा पायसे भोज्यत्वमेव विधेयमि"ति यो भवान् स्वाभिप्रायमपि सम्यङ् नाऽवधारयति कुतस्तस्य पराभिसन्धिवेदनप्रत्याशा । इत्थं स्वग्रन्थीयोद्देश्यविधेयभावलापनप्रकारवैपरीत्यबोधनाऽक्षमतायां महानैयायिकविश्वनाथपञ्चाननग्रन्थाऽशुद्धिप्रतिपादनपरतोद्बाहुकता श्रीसीतारामशर्मणां महत्साहसिक्यम् । तस्मादत्र तुशब्दस्य नैव तमस्त्वम्, अपि तु स्थानगतत्वेनास्य तोरेतद्वाक्यार्थस्य प्रकाशकत्वम् । तथा चाऽस्य स्थानगतत्वेऽपि भ्रामकत्वेऽस्पष्टत्वाभिधानं समालोचकस्यैव भ्रान्तिरिति सर्वं सङ्गृह्येत्थमभिदध्महे—

शुद्धाशुद्धभ्रमोत्थानमत्सरोपेतमानसाः ।
श्रीसीतारामशर्माणः स्पष्टाऽस्पष्टं वदन्ति ते ॥

अतो मूले यादृशः पाठोऽस्ति तादृश एवोचितः, तत्स्थाने पाठान्तरकल्पनया ग्रन्थकारस्याऽज्ञानताप्रकटनं स्वाऽज्ञानं पूज्यतालिप्सुतां वाऽऽवेदयतीति सर्वं[1] सुस्थम् । (वाराणसेयाः प्रमुखपण्डिता अप्येतस्मिन्विषये स्वमतं लिखन्त्विति मे प्रार्थना) ।

विदुषामनुचरः—नृसिंहदेवः (सम्पादकः)

१—बहुकार्यव्यग्रतया सङ्क्षिप्तमेव लिखितम् । एभिः प्रेषितानामन्येषां निबन्धानां दर्शनाऽवसरोऽद्याऽपि न लब्धः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अयि ! माननीयाः प्रियपाठकमहाभागाः !

अनेकवारं भवत्सेवायामभ्यर्थना कृता यदर्थसाध्यं कार्यमर्थमन्तरा चलितुं न शक्नोति, कृपया ग्राहकमहोदयैर्वार्षिकमद्यापि न दत्तं ते तत्प्रेषणेनोद्योत-कार्यालयप्रतिबन्धं वारयन्तु । उत्तरोत्तरमुद्योतस्य विशेषतायै सर्वथैव यत्नश्चि-कीर्षितः । सम्प्रत्यप्युद्योतसौष्ठवतदावश्यकत्वोद्योतकान्यनेकानि पत्राणि देश-देशान्तरेभ्यः समायन्ति येषां सर्वेषां प्रकाशनायोद्योते स्थानं न लभामहे, इदमपि निवेदितप्रायम् । एतस्मिन् उद्योतचालनेऽधिकव्ययभारं शिरसि धृत्वा परिषदा १॥) सार्धरूपकं वार्षिकं स्थापितम्, यदत्यन्तमेव न्यूनमिति स्वयं विवेचयन्तु भवन्तः । अग्रिमे वर्षेऽवश्यं तद्वर्धनीयं भविष्यति यतो ग्राहकसङ्ख्याऽद्यापि सन्तोषप्रदा न जाता । मूलत्राणतः अमृतसरतश्च ग्राहकसङ्ख्यायां यादृशी धारणा कृतासीत् साऽपि न फलिता तस्मादेतद्वार्षिकप्रेषणपूर्वकं ग्राहक-सङ्ख्याभिवर्धनमवश्यमेव कुर्वन्तु भवन्त इति सादरमभ्यर्थना ।

———

विविधाः समाचाराः ।

श्रीहेमचन्द्रसूरिजैनपुस्तकालयाध्यक्षाणां श्रीदेवचन्द्रसूरिणामुद्योतेऽनुरागातिशयः—

बीकानेरस्थाने "श्रीहेमचन्द्रसूरिजैनपुस्तकालयः" इति सुप्रसिद्धो महान् पुस्तकालयो वर्त्तते यत्र जैनागम-व्याकरण-न्याय-कोषच्छन्दोऽलंकार-ज्यौतिषप्रभृतिनानाविषयकाः अनेके ग्रन्था वर्त्तन्ते, यस्य स्थापने लक्षरूपकादप्य व्यधिको व्ययो जातः । यत्र च पञ्चविंशतिसहस्ररूपकव्ययतः सङ्गृहीतानि केवलं हस्तलिखितपुस्तकान्येव वर्त्तन्ते । अस्य पुस्तकालयस्य सञ्चालकप्रधानाः श्रीदेवचन्द्रसूरयो वर्त्तन्ते । ऐते लिखन्ति—"यद् उद्योतस्याङ्कोऽतीवमञ्जुलो-यम् । दृष्ट्वा च मनो मोमुह्यते.....चतुर्मासानन्तरं रूपकशतकमुद्योतसाहाय्य-कृते मदीयकोषाधिपतिं श्रेष्ठिनं (यजमानं) प्रति कथयित्वा प्रेषयिष्यामि । नूनं सर्वे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसम्पादकाः नैव नम्रतया पत्रोत्तरं प्रेषयन्ति यथा भवद्भिः—स्वकीयं कालक्षेपं कृत्वाऽपि अहमनुगृहीतः । दत्तश्च हेयोपादेयशिक्षाप्रकारः अतः सधन्यवादेन भवन्तं स्तौम्यहम्" इत्यादि ।

एतेषामुद्योतसाहाय्यार्थं रूपकशतकप्रदानाय कृतप्रतिज्ञाणां देवचन्द्रसूरिमहोदयानामनेके धन्यवादाः क्रियन्ते, करिष्यन्ते च यैः उद्योतस्य तत्त्वं ज्ञात्वा सुरभारती समर्चनैव विहिता । यद्येतादृशा उदारहृदया महाशयाः संस्कृतरक्षायै यतेरन् तर्हि पञ्चापप्रान्ते उद्योतसंस्था सुदृढा आदर्शभूता च भवेदिति नात्रकोऽपि संशयलेशः ।

ब्राह्मणमहासम्मेलनम्—

ब्राह्मणमहासम्मेलनं नाम मासिकं संस्कृतपत्रं केवलं सनातनधर्मरक्षायै बद्धपरिकरं वाराणासीधामतः प्रतिमासं प्रकाशितं भवति । तत्रत्यः सम्पादकसङ्घः—महामहोपाध्यायः श्रीयुक्तानन्तकृष्णशास्त्री । श्रीहाराणशास्त्री ।

श्रीराजेश्वरशास्त्री द्राविडः । श्रीताराचरणभट्टाचार्यः । श्रीश्रीजीवन्यायतीर्थः एम० ए० । सम्पादकमहोदयेन एका सञ्चिका बहुप्रार्थनोत्तरमुद्योतपरिवर्त्तनं मत्वा प्रेषिताऽस्मद्दृष्टिमायाता सनातनतत्त्वजिज्ञासुभिरस्य ग्राहकैरवश्यं भाव्यम् । अस्य वार्षिकमग्रिमं मूल्यं रूपकत्रयम् ३) । प्राप्ति स्थानं—

ब्राह्मणमहासम्मेलनकार्यालयाक्षः
ब्राह्मणमहासम्मेलनकार्यालयः
१०७ दशाश्वमेधघाटरोड़
वाराणसीनगरम् ।

———

जगद्गुरुः ।

"जगद्गुरु" रिति नामकं पाक्षिकं हिन्दीभाषापत्रं काशीधामतः प्रकाशितं भविष्यति इतीदमस्यादर्शाङ्कदर्शनाज्ज्ञातमस्माभिः । अस्य सम्पादकाः केदारनाथशास्त्रिणो भूतपूर्वाः सुप्रभातसम्पादकाः सन्तीति तत एव निश्चीयते अत्र बहूपयुक्ताः औपनिषदाः सनातनधर्मोपबृंहणपराश्चान्येऽपि विषयाः प्राचुर्येण प्रकाशयिष्यन्ते आकारप्रकारश्चास्य बहुशोभनः अवश्यमस्य ग्राहकैर्भाव्य सहृदयैः । अग्रिमं वार्षिकम् २)

स्थानम्—जगद्गुरु कार्यालय c/o सुप्रभातम्, काशी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमृतसरीय-पण्डितमण्डलस्य नवीनं निर्वाचनम् ।

संरक्षकः—पं० श्री० हेमराजशास्त्री नैयायिकः ।
,, ,, पं० श्री० राजेन्द्रमिश्रः—ऐडवोकेटः ।
,, ,, पं० श्री० हरिदत्त त्रिवेदी—व्याकरणतीर्थः ।
प्रधानः—पं० श्रीधरमायाधारी-शास्त्री ।
उपप्रधानः—पं० श्री० हीरालालशास्त्री ।
,, ,, पं० श्री० भानुदत्तशास्त्री ।
मन्त्री पं० श्री० नृसिंहदत्तशास्त्री ।
सहकारी मन्त्री पं० श्री० दौलतरामशास्त्री ।
उपमन्त्री पं० श्री० सीतारामशास्त्री ।

———

अस्माकं महतीयमाशा वर्त्तते यत्—पञ्चनदीयसंस्कृतसाहित्यपरिषदो द्वितीयसम्मेलननिमन्त्रणम्—अमृतसर एव भविष्यतीति तत्रत्यं पण्डितमण्डलं सम्प्रत्येवैतस्य प्रशस्ततरस्य कार्यस्य साधनाय सोद्योगं भवतु पञ्च० सा० कार्यालये सूचनाञ्च प्रकाशयत्विति सुरभारतीमभ्यर्थयामहे ।

———

उद्योतः ।

ले० कुरुक्षेत्रीय-श्री पं० छज्जूराम शास्त्री कविरत्न विद्यासागरः ।

प्रवासिना लवपुरे स्यालकोटनिवासिना । कतितार्किकवर्येण नरसिंह मनीषिणा ॥१॥
परमेश्वरसाहाय्यात् जगदीशप्रसादतः । समुद्द्योतित उद्योतः भातुसर्वत्रभारते ॥२॥
भासमानोनिजगुणै रसमानोभुवस्तले । उद्योतोभवताद्धीरा, भवतामतितोषकृत् ॥३॥
अस्य शरीर सौन्दर्यलेखमाधुर्यरञ्जिताः । प्रशंसन्त्यन्यपत्राणि श्लाघ्यान्यपिचपण्डिताः ॥
एषोपियदिनप्रीत्यैकस्यचिच्चित्रमत्रकिम् । वीणारवः कमनसःपशोर्मोदायजायते ॥५॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गीतिः ।

(ले० श्री पं० विश्वनाथशास्त्री–पेशावरतः)

मयि दीनजने कुरुनाथ ! दयाम् । निजपादसुधाकणतृप्त्युदयाम् ॥ (टेक) ॥ १ ॥
नहि मे जननीजनकौ धनिकौ । सबलः सहजः सुखकृन्न सुहृत् ॥
न ममास्ति धनं न च ते यजनं । वृजिनं ननु येन तरामि घनम् ॥ २ ॥
गजदुःखहरे ! भगवन्नृहरे ! हर तापमरं भववार्धितरे ! ॥
अयि ! विश्वपते ! सुरसङ्गगते ! नृपचेदिपकालकरालकृते ! ॥ ३ ॥
नतपाण्डुवधूवसनावन ! हे ! रिपुगञ्जन ! भीतिविभञ्जन ! हे ! ॥
दनुतर्द्दनचक्रसुदर्शनभृक् ! बुधरञ्जन ! शुद्धनिरञ्जन ! हे ! ॥ ४ ॥
मधुसूदन ! कंसनिकन्दन ! हे ! करुणावरुणालय ! कृष्ण ! विभो !
अभिराम ! रमापतिकार्मुकभृच्—छबरी बदराशन ! रावणहृत् ! ॥ ५ ॥
गुहगौतमनार्यघहारिगुरो ! वृषलोद्धरणेप्सितकल्पतरो !
अज ! विश्वजभक्तवशीकृतहृद् ! । धनकामसुदामदरिद्रविनुत् ! ॥ ६ ॥
सुखनिर्गुण ! सर्वगुणालय ! सन् ! नवके दशमह्यजरामरचित् ! ।
अतिसूक्ष्म ! सुभूमभवादितरो ! दहरप्रबरात्मवरीय ! उरो ! ॥ ७ ॥
कमनीय ! तुरीय ! सुबोधगिरे ! मति-साक्षिधरोद्धरणादिकिरे !!
शरणागतवत्सलसर्वधृते i । सदखण्ड ! निरीह ! पर प्रकृते ! ॥ ८ ॥
द्विजविश्वपतिर्भुवनाधिपतिम् । प्रणमत्यखिलेश्वरमार्त्तगतिम् ॥ ९ ॥

अखिल-भारतवर्षीय-ब्राह्मण-महासम्मेलनम् ।

काश्याम्

(का० कृ० नवमीतो दिनत्रयम् ६-११-२८।८-११-२८)

अभ्यर्थनम् ।

महानुभावाः !

समालोच्येषु शुद्धि-विवाह-जातिपरिवृत्त्यादिषु, प्रश्नावली मुद्रापिता पण्डितप्रवराणां श्रीमतां सविध उपस्थाप्यते, यस्या उत्तराणि समालोचयितुं नत्तद्देशीयानां पण्डितानामुपसमितिरेकाऽचिरेण संघटयिष्यते ।

उपसमितिश्चेयं सम्मेलनात्पूर्वं कार्तिककृष्णप्रतिपदमारभ्य २७-१०-२८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्तिककृष्णाष्टमीपर्यन्तं सर्वेषामुत्तराणां सप्रमाणं विचारविनिमयेन तत्त्वविनिर्णयबुद्ध्या विमर्शनेन प्रारप्स्यत इत्यपि कार्यनिर्वाहकसमित्याज्ञयोपक्षिप्यते आशास्यते च पण्डितप्रवराः सर्वेऽप्याश्विनकृष्णाष्टमीतः पूर्वम् (६-१०-२८) स्वीयानामुक्तप्रश्नावल्युत्तराणां सदयं प्रेषणेनानुग्रहीष्यन्तीति । अन्ते पुनरिदं सप्रश्रयं प्रार्थ्यते, यदुत्तरसंग्रहावसरे निबन्धकाराहृतमीमांसापद्धतिरेव यद्यवलम्ब्यते, तर्हि महाननुग्रहः स्यात् ।

प्रश्नावल्या अस्याः समालोचनं ये कुर्वन्ति ये च न, तेषां सर्वेषां महासम्मेलनावसरे विचारसभावसरे वा समुपस्थाय कार्येषु सहयोगं दित्सवः तत्तत्सभाद्वारा, तत्तद्विद्यालयद्वारा, तत्तत्संस्थानद्वारा, स्वयं वा स्वनामधामाद्यचिरेण प्रेषयन्त्यिति सप्रश्रयमभ्यर्थ्य इति ।

प्रश्नावली ।

१—स्त्रीणां पुंसां वा विवाहकालः कियदवधि कुत आरभ्य शास्त्रसम्मतः ?

२—तत्र वर्तमानपरिस्थित्यनुसारेण, शास्त्रानुसारेण च नियमनं कियदवधि योग्यम् ?

३—रजःप्रवृत्त्यनन्तरं विवाहस्य मुख्यत्वमुत गौणत्वमाहोस्वित् आपत्कल्पत्वम् ?

४—ऋतुदर्शने वृषलीत्वबोधकानां वचनानां तात्पर्यं किम् ?

५—ब्राह्मणादिजातिषु अवान्तरश्रेणीनां परस्परं विवाहसम्बन्धः शास्त्रसम्मतो न वा ?

६—धर्मज्ञाः के वा कीदृशं वा धर्मपरिवर्तनं कर्तुमर्हन्ति ? (किं सङ्कोचनाख्यम् उत प्रवर्तनाख्यं धर्मपरिवर्तनम्) ।

७—विधवाविवाहो दम्पत्योर्विवाहमोक्षश्च शास्त्रदृष्ट्या योग्यः, उत विरुद्ध आहोस्विन्निन्द्यः ?

८—अस्पृश्यानामस्पृश्यत्वं जातितो वा कर्मतो वा ?

९—म्लेच्छानामन्त्यजानां च स्पर्शविषये सभाप्रवेशविषये कूपोदकग्रहणविषये देवालयप्रवेशविषये चान्येभ्यः तारतम्यरक्षणं योग्यं न वा ? यदि योग्यं तदा कीदृशं तारतम्यं रक्षणीयम् ?

१०—भागवततमदीक्षाजात्युत्कर्षप्रापिका वा न वा ?

११—यवनादिजातिः किं कर्मकृता, उत जन्मसिद्धा ?

१२—भागवतधर्मदीक्षायां जातिविशेषः प्रतिबन्धको वा न वा ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३—देवलस्मृतेः शूलपाण्यादिव्यवस्थानुसारेण प्रामाण्यं किमङ्गीकरणीमुत न ?

१४—कियदवधि म्लेच्छसंसर्गेण प्रायश्चित्तीयता ?

१५—संवत्सरपर्यन्तं म्लेच्छसंसर्गिणां तदधिककालं यावत् म्लेच्छसंसर्गिणाञ्च प्रायश्चित्तविषये व्यवहार्यताविषये च किमैकरूप्यमुत वैरूप्यम् ?

१६—व्रात्यसंस्कारः कियत्परम्परापर्यन्तं शास्त्रसिद्धः ?

१७—जातिसामान्यमैहिककर्मकृतमव्यवस्थितमुत जन्मकृतं व्यवस्थितं च ?

ब्राह्मण-महासम्मेलन-नियमा —

१—निबन्धपर्यन्तधर्मग्रन्थप्रामाण्याविरोधेनैव विचारो भवितुमर्हति ।

२—मीमांसापद्धतिरेव विचारावसरेऽवलम्बनीया ।

३—सनातनधर्मावलम्बिनो ब्राह्मणपण्डिता एव प्रतिनिधयो विचारकाश्च भवितुमर्हन्ति ।

४—चत्वारो वर्णा अपि दर्शकपदमर्हन्ति ।

५—विना प्रवेशपत्रं केषामपि सभायां न प्रवेशः ।

६—यैः खलु यस्मिन्विषये विचारः करिष्यते, तद्विषये स्वीयमतप्रकाशको निबन्धः सम्मेलनदिनस्यैकमासतः पूर्वं सम्पादकसविधे यथासंभवं प्रेषणीयः ।

७—इतो मासद्वयाभ्यन्तरे प्रतिनिधीनां नामानि संख्या च तत्तद्देशीयसनातन-धर्मसंस्थाभिः प्रेषणीयानि, येषां नाम्ना प्रवेशपत्रं यथावसरं प्रेष्येत ।

अधिकश्रावण शुद्धतृतीयायाम् शनिवासरे (१८-८-२८) } विधेयतमः— श्रीपञ्चाननतर्करत्नभट्टाचार्यः ।

समयानुकूलमनोभावना

(ले०—माधवानन्दशास्त्री बीकानेरतः)

कालः करालः कवली करोति समग्रधर्म्यांश्च समग्रलोकान् ।
भूयोऽपि कालः परमः कृपालुः करोति शीघ्रं मनुजान् स्वधर्मे ॥ १ ॥
संवीक्ष्य कालं जनुषां स्थितिञ्च प्रजानुयोग्यं गुरुभिः सुपूज्यम् ।
कुर्वन्ति कार्यं चतुराः स्वबुध्या यशो लभन्ते परमं पवित्रम् ॥ २ ॥
कालः पुरा स प्रियवाडवानां धराविभागे परिखेलमानः ।
यस्य प्रभावेण समस्तलोके सनातनः सज्जनतामवाप ॥ ३ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूदेवकर्म्मावनिरम्यमाणा मुरारिपादं मनसा स्मरन्तः ।
भैक्षीश्च वृत्तिं परिपालयन्तः कौपीनवासो भुवि धारयन्तः ॥ ४ ॥
देवीयभाषां परिपाठयन्तो धनं विना ब्रह्मणि विप्रलीनाः ।
दीना न हीना मनसा स्मरन्तः सुरामनाम प्रथितैकधाम ॥ ५ ॥
इत्थं व्यतीयुः समयं पवित्राः सन्ध्यादिभिः स्वं परमं प्रवीणाः ।
भूपालभालाङ्कितपादपद्मा लोकाधिनाथा भुवि विप्रवर्याः ॥ ६ ॥
आज्ञां तदीयां सहसानुगृह्य भृत्यावयं ब्राह्मणपुङ्गवानाम् ।
विबुध्य प्रज्ञां परिपालयन्तः श्रेष्ठाः पुरा विक्रममुख्यभूपाः ॥ ७ ॥
संसारनाथस्य जगन्नियन्तुर्भूदेवभक्तिर्न च किं प्रसिद्धा ।
स्वयं सुरेशो मनसानुवेलमानर्च विप्रान्ननुसाधुसङ्गम् ॥ ८ ॥
दिशासु तद्भासुरभूसुराणाम् धर्मो व्यराजद्विमलो विशङ्कः ।
नक्तं शशीव दिवसे खरांशुः श्रीराजहंसा इव मानसे च ॥ ९ ॥
कालप्रभावादधुना स धर्मो यातः क्षयं ब्राह्मणमूढभावात् ।
कुर्वन् विलापं परितो विमुच्य नैजाश्रुजातं गतवान् धराधः ॥ १० ॥
न्यायादिशास्त्राणि विहाय मूढाः कुर्वन्ति वैरस्य विवादभूमिम् ।
प्राप्ता भवन्तो विदुषां पुरोगाः लोकस्य दृष्टौ लघवो भवन्ति ॥ ११ ॥
वामाङ्गसङ्गे निरता विशेषात् सेवादिकार्येषु रतास्तथैव ।
पुत्रैषणां व्याकुलभावभाजो धर्म्मं स्वकीयं विबुधा लुनन्ति ॥ १२ ॥
धर्म्मं स्वकीयं विमलं विहाय मार्गं तथा स्वं मुनिमाननीयम् ।
लोभाकुला व्याकुलगात्रभागाः सन्तश्चरन्तः पशुवद्धरण्याम् ॥ १३ ॥
दारादिचिन्तानलदग्धचित्ता द्वेषादिहालाहलनष्टबोधाः ।
जाता बुधा हा ! कथमत्र धर्मः सनातनो वृद्धिमुपाददीत ॥ १४ ॥
काश्यां निवासो यदि वापरेषु क्षेत्रेषु वा स्याद्यदि किं ततः स्यात् ।
धन्याः कलौ ते विबुधा मिलित्वा धर्म्मं स्वकीयं यदि पालयन्ति ॥ १५ ॥
सङ्घेन धर्मं यदि रक्षयेयुर्बुधा मिलित्वा पटुगर्वहीनाः ।
नूनं तदासौ परमो दयालुः स्वाराज्यदः स्यादिति मे वितर्कः ॥ १६ ॥
वृत्तिं पशूनामिव शीघ्रमत्र त्यक्त्वा यतध्वं विबुधाः स्वधर्मे ।
नैवान्यथा देशसुधारधर्मः सिद्धचेदुपायैः शतधा प्रयुक्तैः ॥ १७ ॥

(शेषं पुनः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

UDYOTAH REGISTER L. NO. 2304

वार्षिकमूल्यम् १॥)
सार्धरूपकम्

प्रतिखण्डमूल्यम् ≡)
आनकत्रयम्

उद्योतः

पञ्चनदीयसंस्कृतसाहित्यपरिषदो
मासिकं मुखपत्रम् ।

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नादराद्,
अज्ञानान्धतमोविनाशपटुता-विख्यात-विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्,
"उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥१॥

प्रथमवर्षे— १	मार्गशीर्षसङ्क्रान्त्याम् वि०सं०१९८५ नवम्बर सं० १९२८	नवमो मयूखः ९

सम्पादकः—
कवितार्किक (-तन्त्रचक्रवर्त्ति-) नृसिंहदेवशास्त्री दर्शनाचार्यः ।
सहकारिसम्पादकः—
विद्याभास्करपण्डितपरमेश्वरानन्दशास्त्री साहित्योपाध्यायः ।
प्रकाशकः—
परिषन्मन्त्री पं० जगदीशशास्त्री व्याकरणतीर्थः

(उद्योत कार्यालय जौडेमोरी लाहौर)
" Udyot " Office Jaure Mori Lahore.

श्रीकृष्णदीक्षितप्रबन्धेन "बाम्बे मेशीन प्रेस मोहनलाल रोड लाहौर"
इत्याख्ये स्थाने मुद्रितः । पं० जगदीशशास्त्रिणा च उद्योत-
कार्यालयात् "जौडेमोरी लाहौर" इत्यतः प्रकाशितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतस्य कतिचन नियमाः

१—अस्य मासिकपत्रस्य अग्रिमं वार्षिकं देयम् (भारते, ब्रह्मदेशे सिंहले च)—१॥)सार्धरूपकम् ।

२—प्रेषणव्ययो ग्राहकैर्न देयः ।

३—प्रबन्धादिकं समालोचनार्थं ग्रन्थादिकञ्च सम्पादकसमीपे, मूल्यादिकं च प्रकाशकसमीपे निर्दिष्टस्थाने प्रेषणीयम् ।

४—विज्ञापनपत्रादिमुद्रापणव्यवहारविषयोऽपि कार्यालये प्रकाशकसमीपाद्विवेचनीयः ।

५—पत्रं प्रतिसङ्क्रान्ति प्रकाश्येत । येन खलु ग्राहकेण यथाकालं सङ्ख्या नाधिगम्येत तेन तन्मासस्य तृतीयसप्ताहाभ्यन्तर एव कार्यालयाद्विवेच्यम्, नातः परं कस्याप्यभियोगः श्रूयेत, किन्तु तेन प्रथमं स्वपोष्टस्थानं परिशोध्यैव प्रष्टव्यम् । विवेकार्थं ग्राहकसङ्ख्या चावश्यं लेख्या ।

६—ग्राहकैः स्वस्थानादिकं स्पष्टमेव लेख्यम्।

७—एतस्य ग्राहका अपि साधारणसभ्येषु गण्येरन् ।

८—प्रेषितलेखाः प्रायो यथाक्रमं मुद्राप्येरन् । लेखकैर्न्यूनातिन्यूनं पक्षात्पूर्वमेव लेखाः प्रहीयेरन् । राजविरुद्धान्दोलनलेखाश्च न गृह्येरन् ।

विषयसूची

(प्रबन्धानां गुणदोषयोः प्रबन्धलेखका एव प्रतिभुवः)

विषयः	पत्राङ्कः
१—भारतीयं कृषिविज्ञानम्—ले० सहकारि सम्पादकः	१—५
२—श्रीरामविजयदशमीमहोत्सवरहस्यम्—ले० श्री० नीलकण्ठशर्म्मा भृगुशास्त्री	६—७
३—गीतिः—ले० श्री० रामचन्द्रशास्त्री कुशलः	८—१०
४—औपनिषदं विज्ञानम्	११—१२
५—हैन्दव-सङ्ख्या-हसिम-निदानविमर्शः—ले० श्री० दीनानाथशर्म्मा शास्त्री	१३—१५
६—सायङ्कालः—ले० सहकारि सम्पादकः	१६
७—प्रीतिसरणिः—ले० श्रीपरमानन्दशर्म्मा शास्त्री	१७
८—सम्पादकीयम्	१८—१९
९—विविधाः समाचाराः	२०—२१
१०—दुर्गाभ्युदयनाटकम्—ले० श्री० पण्डितछज्जूरामशास्त्री कविरत्नं विद्यासागरः	२२—२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नाराद् अज्ञानान्धतमोविनाशपटुता–विख्यात–विश्वप्रभः।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन् "उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते॥

प्रथमवर्षे- १	मार्गशीर्षसङ्क्रान्त्याम् वि० सं० १९८५ अक्तूबर—सं० १९२८	नवमः मयूख ९

भारतीयं कृषिविज्ञानम्।

(सहकारिसम्पादकः)

श्रद्धेया उद्योतपाठकाः! यद्यपि लेखशीर्षकं दृष्ट्वा भवत्सु बहवो लेखकमुपहसिष्यन्ति कथयिष्यन्ति च सविस्मयोत्प्रासम्—"अहो! भारतीया अपि कदाचन विज्ञानविद आसन्, येषां परःसहस्राणि वर्षाणि वैदेशिकशासकानां चाटुकार एव व्यतीतानि, तेऽप्यद्य स्वपूर्वजान् विज्ञानविद आचक्षते! किमन्यद्, येषां कृषिप्रधानदेशवासिनामपि तान्येवाविदितप्रत्नकालप्रचलितानि आयासबहुलानि स्वल्पफलानि त्रुटितानि कृषिसाधनानि वर्तन्ते, न तत्र मात्रयापि समयानुरूपः परिवर्तः, तेऽप्यात्मनः कृषिविज्ञान् प्रतिपद्यन्ते। अहो आश्चर्यम्, अद्य कृषिविदामेव संततिः क्षुधा परिपीड्यमाना प्रतिवत्सरं परोलक्षपरिमिता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वकृषिचातुर्य दर्शयितुमिव भगवतः परेतराजस्य राजधानीमभिगच्छति। कृषिकुशलानामेव गेहे अद्य तदुपयोगिनो गवादयः पशवः केवलं जठरपिठरपूर्तये निर्दयं निहन्यन्ते। दुर्भिक्षराक्षसो यत्र क्षुत्क्षामकुक्षिरिव जनान् भक्षयितुकामः सदा स्वमुखं विदार्य जागर्ति। साधीयस्तत्रत्यानां कृषिकौशलम्" इति। परं महाभागाः! 'चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः' इति भाससुभाषितं स्मरद्भिः कदाचन सर्वजगद्गुरोरस्य भारतस्येदानीं स्वकर्मदुर्विपाकात् सर्वविषयेषु परमुखप्रेक्षिणः पारतन्त्र्यनिगडितस्यापि पुरातनं विज्ञानपाण्डित्यं न मनागपि संदेग्धव्यम्। न हि मन्दस्यापि तमस्काण्डमलीमसां निशीथिनीं निभालयतः सकलभुवनभासको भगवान् भास्करः कदाचन स्मृतिपथात् प्रच्यवते। किं च येषां द्रव्यं कालो बुद्धिः सर्वमपि पाश्चात्यसाहित्याध्ययन एव व्यत्येति, भारतीयं वाङ्मयमध्येतुं येषां समय एव न विद्यते, न ते कथमपि भारतस्य विषये कामपि सम्मतिं प्रदातुमधिकुर्वन्ति।

प्रत्येकदेशस्य जातीयगौरवम्, कलाचातुर्यम्, विज्ञाननैपुण्यं तत्साहित्यनिधावेव सुरक्षितं भवति। पूर्वं तु महामदराज्येऽस्माभिर्भूयानंशस्तस्य नैकशताब्दीसंचितस्य साहित्यनिधेरपहारितः; दैवाद् यत्किञ्चिदवशिष्टोऽपीदानीं नव्यविज्ञानप्रभाकूणिताक्षैर्मूर्खजल्पनेत्युपेक्ष्यते—तर्हि ब्रूत कथंकारं पूर्वजानां गौरवं विज्ञायेत, कथं वा तेषां सर्वविधविज्ञाननैपुण्यं विश्वस्येत। न ब्रूम इदानीमिव पुरापि मासैर्दिनैर्होराभिश्चातिक्रमणीयं दुर्गमं पन्थानं दिनैर्होराभिः पलैश्चातिक्रामन्ति बाष्पयानानि जलनिधवक्षस्थलविहारिणो महान्तो वाणिज्योपयुक्ताः सांग्रामिकाश्च बाष्पपोता (Steamers) अविद्यन्त, वैद्युतं ज्योतिः प्रज्वलत् नक्तमप्यहरकरोत्, समाचाराः परःसहस्रान् क्रोशान् क्षणेनैवातिलङ्घ्य जनान् प्रापन्, एतद्विधानि दैनिकयातायातोपयोगीनि समरकर्मालङ्कर्मीणानि च वायुयानानि व्योम्नि साधारण्येन व्यहरन्। संक्षिप्येदमेव तात्पर्यं यत् सर्वविधव्यवहारसौकर्यसम्पादका विज्ञानमूला आविष्कारा यथाद्यावलोक्यन्ते न तथा पुरा प्रचरन्ति स्म। परं तथापि सहृदयधुरीणाः! परेषां सम्पद् भूयसीत्यात्मनः स्वल्पीयस्यास्तस्याः समुपेक्षणं किं बुद्धिमतां मार्गः? किंच स्वल्पैव क्रमश उपचीयमाना भूयसी भवति। यामद्य विज्ञानविभूतिमालोकमालोकं भवच्चेतश्चित्रीयते सापि नैकेन दिनेन नैकेन वा पुरुषेण अर्जिता, अपि त्वनेके धीधौरेया इष्टकाचितिन्यायेन भूयसा कालेनेमामलभन्त। तथा च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वल्पीयस्या अपि स्वपूर्वजसंपद उत्तरोत्तरवर्धनमेव धीमतां कर्तव्यम्, न पुनरेकपदे नितरां तदुपेक्षणं नाम । एवं कृते परम्परा (Tradition) विलोपमेति । स्वपरम्परां विलोपयतामुत्थानं कस्य दृष्टचरम् ? मनाङ् निपुणं निध्यायत, एवं कुर्वन्तो निःसंशयं निरवशेषं विलोपमेष्यथ । विजित्वरजातयो विजितानां विनाशाय तत्परम्परामेव विलोप्तुं प्रयतन्त इति नैतिह्यविदामपरोक्षम् । इत्थमनेकाः पाश्चात्यजातयो वारिबुद्बुदविलोपं विलुप्ताः, न तासामिदानीं नामापि श्रूयते । पाठकाः ! क्षम्यतां प्रक्रान्ताद् सुदूरं नीताः स्थ, किं करवाणि, देशपरिस्थितिं निरीक्ष्य हृदयं ज्वलति, दुर्निवारा हृदयोद्गारा बहिराविर्भवन्त्येवेति किञ्चिदप्रासङ्गिकमपि श्रावयितुमापतितम् । साम्प्रतं प्रकृतमनुसरामि ।

प्रियपाठकाः ! किं वर्णयामि भारतीयकृषिविदां गौरवम् । आम्रादाम्रम्, कदल्याः कदली, दाडिम्या दाडिमी प्रभवतीति न तिरोहितं लौकिकानां परीक्षकाणां च । नह्यद्यत्वे सहस्रधा कथितोऽपिजनो जातु कदल्या दाडिमीसंभवम्, कुमुदबीजात् करवीरप्ररोहं वा मात्रयापि विश्वस्यात् । प्रत्युतैवं प्रकृतिविरुद्धमभिदधत् साभ्यसूयं विकृतमस्तिष्को वा, ऐन्द्रजालिको वा परप्रतारको वा लोकैर्गण्येत । परं महाशयाः ! भारतीयं प्रत्नं साहित्यमालोचयतां नैतदविदितं यद् भारतवासिनः साधारणा उपवनाधिकृता मालिनोऽपि कदल्या दाडिमीमुदपीपदन्, कुमुदबीजात् करवीरं प्रारूरुहन्, सबीजानि फलानि निर्बीजानि व्यतन्वन् । वृक्षायुर्वेदविदस्ते मनुष्येष्विवौषधिवनस्पतिष्वपि वातपित्तश्लेष्माणां वैषम्यादेव रोगोत्पत्तिमन्यन्त । प्रतिवृक्षमनुनावापि पुष्पफलोद्गमस्तेषां वामहस्तक्रीडितमभवत् । अपि श्रुतवान् कश्चिदाम्रबीजात् कण्टकारिकामुत्पद्यमानाम्, रम्भां वाम्रफलानि प्रसूयमानाम् ? परं ते तथा कर्तुमशकन् । अमेरिकावासिनो विज्ञानधुरंधरा विभिन्नरूपधरं कार्पासमुत्पादयितुं चिराद् बहु प्रयतन्ते, परमद्यापि मन्ये तेषां प्रयत्नो न फलेग्रहिरजनि । अतएव प्रायः सर्वदेशवासिनो रागाय (रञ्जनद्रव्याय) जर्मनीमुखमभिप्रेक्षन्ते । यतस्त एवेदानीमुत्कृष्टान् रागानुत्पादयितुं शक्नुवन्ति । परं पुरायुगे भारतवासिनो रासायनिकप्रयोगैः स्वयं विविधवर्णं कार्पासमुत्पादयितुमजानन्, किं न जानीयुः—

'सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्' ।

इति जात्युत्थानकरे मूलमन्त्र आसीत् तेषां दृढीयसी आस्था । परमिदं सर्वं कस्याग्रे विनिवेद्यताम् । सर्वमिदानीमरण्यरोदनायते । यद्यद्ययुगप्रादुर्भूता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परःसहस्रद्रव्यव्ययेन स्वदेशे परदेशे वा समधीतविज्ञानविशेषा अत्र विषये विचारयितुमभ्यर्थ्येरन् तर्हि ते किं कमप्युद्यममाश्रयेरन् ? भ्रातरः ! दूरमुद्यमः, ते तु भारतीयवैदुष्यमाकाशकुसुमायितं मन्वाना इदं निखिलमपि वातुलजल्पितं कल्पयन्तः श्रोतुमपि न प्रसीदन्ति । 'भारतवासिनां पूर्वजा हालिकाः सर्वथा विद्यास्पर्शविवर्जिताः' इत्यर्वाचामुपदेशस्तेषां हृदयपट्टिकायां प्रस्तररेखायते । तेषामूषरमस्तिष्कभूमावेष विचार एव न प्ररोहति यत् कदाचन भारतेऽपि डार्विनन्यूटनसदृशा विद्वांस उदपद्यन्त उत्पत्तुमर्हन्ति वा । धीराः ! डार्विनं न्यूटनमन्यं वा विद्वांसं कणेहत्याद्रियध्वम् ।

'ननु वक्तृविशेषनिस्पृहा गुणगृह्या वचने विपश्चितः' ।

इति ह्येतत्पूण्यभूमिवासिनामादर्शः । परं कालक्रमेण लुप्तावशिष्टायाः स्वसम्पदोऽवहेलनम्, तत्र परोपज्ञत्वप्रतिपादनं वा न सभ्यमानिनां पन्थाः । अहं त्वेतदात्महननिर्विशेषं मन्ये । अस्त्विदानीं प्रत्नभारतीयानां कृषिविज्ञानशाखाभूतोपवनविज्ञानसम्बन्धिनश्चमत्कारस्पृशः कांश्चिदनुभूतप्रयोगान् पाठकेभ्यो विनिवेद्य वर्धमानां तदुत्कण्ठां श्लथयामि । तत्र पूर्वम्—

क्षेत्रसंस्कारः ।

सम्यक् कृष्टे समे क्षेत्रे माषानुप्त्वा तिलांस्तथा ।
सुनिष्पन्नानपनयेत् तत्र बीजोप्तिरिष्यते ॥

बीजसंस्कारः ।

क्षीरनिषिक्तं बीजं बृहतीतिलभस्मसर्पिषा लिप्तम् ।
गोमयमृदितमथोप्तं सद्यो जायेत धूपितं वसया ॥

रोपणप्रकारः ।

हस्तप्रमाणान् पयसा सुषिक्तान् संक्रामयेन् मूलवतः समृत्कान् ।
सर्पिर्मधूशीरविडङ्गलिप्तान् विले निदध्याच्च करीषयुक्ते ॥

कदल्याः क्षीरिणां च रोपणप्रकारे विशेषः ।

कदलीक्षीरिणौ रोप्यौ मूले दत्त्वा तु गोमयम् ।

१—कण्टकारिका (कटैली) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निषेचनप्रकारः ।

हेमन्ते शिशिरे देयं जलं चैकान्तरे दिने ।
वसन्ते प्रत्यहं ग्रीष्मे सायं प्रातर्निषेचनम् ॥

वृक्षाणामजीर्णविज्ञानरीतिः ।

आलवाले स्थितं तोयं शोषं न भजते यदा ।
अजीर्णं तद् विजानीयान्न देयं तादृशे जलम् ॥

हिमाग्निबाधायाः पादपरक्षाप्रकारः ।

विद्युदाहतवृक्षस्य भूतिमादाय सर्वतः ।
रक्षार्थं विकिरेदेषां तदा न हिमबाधनम् ।
दीप्तोऽप्यग्निः शमं याति वज्रदग्धद्रुभस्मना ।

पादपविशेषाणां पोषणप्रकारः ।

खर्जूरबिल्वलकुचाः[1] सितसर्षपेण पिण्याकतश्च तुषवारिवशेन चाम्राः ।
ऐरावता[2] निचुलपत्रजलोक्षणेन सव्रीहिमांससलिलेन च यान्ति वृद्धिम् ॥

कुमुदबीजात् करवीरप्ररोहणम् ।

माहिषकरीषमूत्रैर्मृदितविशुष्कं दिनानि यत् सप्त ।
कुमुदफलबीजमुप्तं जनयति करवीरविटपं तत् ।

अनृतावपि पुष्पोद्गमप्रकारः ।

संपक्वेक्षुरसविदारिकन्दकविलिप्तमूलभागस्य ।
सिक्तस्येक्षुरसेन च तरोरकाले भवेत् कुसुमम् ।

कुमुदपुष्पाणां यथेच्छरूपतापादनप्रकारः ।

नानावर्णैर्घटितं कन्दं कुमुदस्य सूत्रसंघटितम् ।
घृतमधुविलिप्तमुप्तं सूते कुसुमं तथावर्णम् ।

निर्बीजीकरणोपायः ।

मधुयष्टिसिताकुष्ठमधुपुष्पविनिर्मितैः ।
मोदकैश्छादिते मूले निरस्थि स्यात् फलं तरोः ।

१—बड़हर ढेउ इत्यादि लोके प्रसिद्धम् । २—नारङ्गवृक्षाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रम्भाया आम्रदाडिम्युत्पादनप्रयोगः ।

नरमांसवसारक्तदन्तिदन्तविचूर्णितैः,
मिश्रितेनाम्भसा सिक्ता रम्भा चूतफला भवेत् ।
कोलशोणितमेदोभ्याम् अङ्कोल्लक्वथितेन च,
सिञ्चिता कदली सूते दाडिमीफलमुत्तमम् ॥

इत्थमनेके प्रयोगाः शार्ङ्गधरपद्धतेरुपवनविनोदप्रकरणे संगृहीताः सन्ति । एतद्विषयानुबन्धी मूलग्रन्थोऽप्यवश्यं कश्चन भवेत्, यतः पद्धतिकृता इमे संकलिताः । परमिदानीं न स उपलभ्यते, न जाने यवनराज्यकाले महामदैः स्नानजलमुष्णयितुमुपायुज्यत, उत क्वचित् संस्कृतविरक्ते दुर्दैवपरवशे निर्विद्ये वा कुले कृमिभिरभुज्यत, अजीर्यताशीर्यत वा ।

इदमपरं काठिन्यमस्ति यत् संस्कृतविद्वांसो वृत्तिकर्शिता वा कारणान्तरतो वा प्रार्थ्यमाना अपि नात्रावदधते, नवशिक्षितानां तु दशा वर्णितैव पुरस्ताद् । नात्र मनागपि तेषां विश्वासो जायते । परीक्षामकृत्वैव भवद्भिरिदं स्वीक्रियतामिति नास्माकमाग्रहः । परं भारतीयानामिदमिति सर्वं मिथ्यैवेति कस्तर्कः ।

परीक्षानिकषोपलमवतारितं तथ्यं चेत् सिध्यति, अभिनन्द्यताम् । अतथ्यं चेत् परित्यज्यताम् । परीक्षणात् पूर्वमतथ्यतापादनं सर्वथानुचितम्—तथा कुर्वतां मूढत्वद्योतकं च ।

सन्तः परीक्ष्यान्यतरद् भजन्ते, मूढः परप्रत्ययनेयबुद्धिः ।

अशास्यते भारतस्याभिमानस्थानानि श्रीजगदीशचन्द्रवसुप्रभृतयो विज्ञानाचार्या भारतीयकृषिविद्यालयाध्यापकाश्चेमानुक्तप्रयोगान् परीक्ष्य तथ्यातथ्यविनिर्णयं करिष्यन्ति । सत्यवसरे पाठकेभ्यो भारतीयवास्तुविज्ञान-नगर-दुर्गादिनिर्माणकलाप्रभृतिविषयान् यथाक्रममुपहरिष्यामः ।

ॐ श्री १०८ रामो विजयते ॥

श्रीरामविजयदशमीमहोत्सवरहस्यम् ।

(ले० श्री० नीलकण्ठशर्मा भृगुशास्त्री)

पुरा—क्रोधरूपपापवशादिह देहे रक्षोरूपमदाविर्भावेन शरीरमिदमज्ञानध्वान्तध्वस्तं सर्वथा सात्त्विककर्मविहीनं समजायत । ज्ञानेन्द्रियाणि च पञ्च मद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रधानत्वेन सात्विकीं वृत्तिं विहायाज्ञानतां भेजिरे–चक्षुर्विवेकदृष्टिशून्यं जातम् । श्रोत्रं श्रोतव्यहीनं संवृत्तम् । (आत्मा वा अरे द्रष्टव्यः श्रोतव्य इति श्रुतेः) एवं मनस्त्वगादिनिखिलमिन्द्रियजातं वैपरीत्यं समपद्यत । तदा वास्तविक-स्वकार्यनिवृत्तेषु ज्ञानेन्द्रियेषु मदेन हृतायां शुद्धायां धियां कर्मेन्द्रियाण्यपि कार्यं कर्तुमशक्तानीतस्ततो भ्रान्तानि निरुत्साहानि परमाश्रयमलब्ध्वा विश्रान्तानीव वागादीनि जोषमासन् । ततो विकलेष्विन्द्रियवर्गेषु प्राणसाहाय्यवान् जीवो विवेक-साहाय्यमुपलभ्य प्राप्तशुद्धचैतन्यबोधो मायाशबलात्सर्वं प्रपञ्चजातं मनइन्द्रिय-प्राणात्मकं जातम्, अहमुपाधिभूतस्ततो न भिन्नः । (तत्त्वमस्यहं ब्रह्मास्मि इति) प्राप्तविवेको जीवो मदं हतवान् ।

हते च तस्मिन्मदे निर्मलानि ज्ञानेन्द्रियाणि जातानि, निहते स्वशत्रौ तथैव कर्मेन्द्रियाणि शुद्धानि स्वकर्मपराण्यभूवन् । (मनसैवानुद्रष्टव्य इति श्रुतेः । तदायं जीवः प्राप्तस्वाधिकारः शान्त आसीत् । शान्तोदान्तस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्) इति श्रुतेः । प्राप्तज्ञानो विदेहकैवल्यं गत इति यथा विवेकादिना मदनाशान्मायाशबलपरमेश्वरविज्ञानाच्छुद्धचैतन्ये विलीनः पुनरावृत्तिवर्जितः आसीज्जीव इति । एवमेवमिह क्रोधजनितर्षि शापेन जयविजयौ वैकुण्ठनिलयौ विष्णुपार्षदौ शापाल्लब्धरजोभावौ रावणकुम्भकर्णनामानौ जग-त्याज्ञातौ । तयोरेको मदमूर्ती रावणाभिधो राक्षसो निखिलं जगत्पीडयामास । ज्ञानेन्द्रियरूपा देवाः पञ्च, इन्द्राग्नियमवरुणकुबेराद्या रावणमदेन निरस्ताधिकारा किंकर्तव्यविमूढा आसन् । कर्मेन्द्रियाणि च, कर्मेन्द्रियरूपो मनुजवर्गोऽपि पीडितो विमूढ इवाधारमलभमानो जलधौ सार्थ इव निरुपाय आसीत् । तदाऽयञ्जीवो हिरण्यगर्भोऽपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो मदेन रावणेन ज्ञान-कर्मेन्द्रियरूपयोर्देवमनुजयोः पीडितयोः सतोः, जीवो ब्रह्मा शुद्धबोधः स्वकारणं विष्णुमुपजगाम । रावणभरापीडिता धरा ब्रह्माणं शरणङ्गता । ब्रह्मा च देवैः सार्धं विष्णुं शरणञ्जगामेति कथा प्रसिद्धा । ब्रह्मापि विष्णुतो नो भिन्नो रजोगुणत्वात् विष्णुश्चापि सत्त्वगुणविशिष्टस्तमःप्रधानो रुद्र इत्युपनिषत्सु गीयमानत्वात् मायाशबलब्रह्मणो गुणत्रयस्य तिस्रो मूर्त्तयो विष्णुब्रह्मरुद्रा इति भिदा व्यवह्रियन्ते । ततो ब्रह्मा विष्णुशरणं गतः परमेश्वरेण विष्णुना वः कार्य्यं भुवोभारं हरिष्य इति दत्तवचनो जीवो ब्रह्मा तदा तेन ब्रह्मणा विवेकरूपिणो विष्णोः साहाय्यमुप-लब्धं, मायाशबलेन च मायया स्वशक्त्या सीतया युतेन श्रीरामेण विष्णुना रावण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपी मदो विनाशितः यदा शुद्धबुद्धौ सीतायां हृतायां देवश्रियां वा मदरूपि रावणेन हृतायां, तदा नष्टे रावणमदे ज्ञानेन्द्रियरूपा देवाः कर्मेन्द्रियारूपा मनुजाः शान्ताः प्राप्तस्वाधिकारविज्ञानाश्च सुखमनुभूय परमानन्दभाज आसन्। ततो जीवो ब्रह्मा प्राप्तस्वदेवमनुजाधिकारो विमले जगति सति शान्त आसीत् विदेहकैवल्यं स्वधाम ब्रह्मलोकनिवासं गत इति। एवं यथा विवेकवैराग्यादिना मदनाशात् मायाशबलपरमेश्वरविज्ञानात् शुद्धचैतन्ये विलीनो जीवः पुनरावृत्तिवर्जित आसीत्। एवमेव रावणरूपिरक्षोमदो विष्णुनावतीर्य्येव आश्विन-शुक्लदशम्यां विनाशितः तदा रावणरूपिमदनाशात् सर्वं जगत् निर्मलजातं एवं ये मायाशवलपरब्रह्मश्रीसीरामध्यानपूजनतद्गुणकीर्तनपराः श्रीराम विजयदशमीमहोत्सवपरास्ते स्वाज्ञानमदध्वंसात् श्रीराम एव परब्रह्मणि विलीनाः पुनरावृत्तिवर्जिता आसन् भवन्तु चेतिशम्—इत्यभ्यर्थयते यथा मम पापिन उद्धारोभवेत्तथा प्रार्थयन्तु सुधियः।

गीतिः।

(ले० श्री० रामचन्द्रशास्त्री कुशलः)

त्रितालेन भैरवरागेण गीयते।

हृदि कमले विमलं जयति धाम। हृदि०
अधिगुणमगुणमतुलमविकारं
नित्यशान्तमजमतिललाम॥ हृदि०।
त्रिभुवन-कृति-धृति-हृति-परमेकं
योगगम्यमहिमाऽव्यतिरेकम्।
अमितभूमवितताखिलविश्वं
दुरितनिवारणनिपुणनाम॥ हृदि०॥

भैरवरागपरिचयः।

"भैरवो मालकोशश्च हिण्डोलो दीपकस्तथा। श्रीरागो मेघरागश्च षडेते पुरुषाः स्मृताः॥" इत्युक्तानां षण्णां मुख्यरागाणामाद्यो भैरवरागः। अस्य दिव्यं रूपं तद्विद्भिरित्थं निरूप्यते—"गङ्गाधरः शशिकलातिलकस्त्रिनेत्रः सर्पैर्विभूषित-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तनुर्गजकृत्तिवासाः । भास्वत्त्रिशूलकर एष नृमुण्डधारी शुभ्राम्बरो जयति भैरव आदिरागः ॥" इति । अयं शान्तरसप्रधानः । अस्य गानसमय उषःकालः । अस्य गेयं स्वरूपम् ऋषभपञ्चमवर्जितैः षड्जादिस्वरैः संपद्यते (पञ्चभिः स्वरैः संपन्नत्वात् औडवसंज्ञोऽयम्) इति प्राञ्चः । यथोक्तम्-"धान्तो मान्तो रिपत्यक्तः प्रार्थनायां समस्वरः (भैरवः) " इति संगीतरत्नाकरे चतुरकल्लिनाथः । " भैरवे तु रिपौ न स्तो धादिमे न्यासमध्यमे । तत्रोक्तौ तु गनी तीव्रौ कोमलो धैवतः स्मृतः ॥" इति संगीतपारिजाते अहोबलः । अद्यत्वे त्वस्य सप्तस्वरसंपन्नं (पूर्णमेव) रूपं प्रचरति । तत्र ऋषभधैवतौ कोमलौ तदितरे च शुद्धाः प्रयुज्यन्ते । स्वरतालिकायां 'रि' इत्येवमुपरि ऋजुरेखयाङ्किताः स्वराः कोमला बोध्याः । तत्रारोहावरोहक्रमेण स्वरन्यास इत्थम्—

आरोहः—स रि ग म प ध नि स ।

अवरोहः—स नि ध प म ग रि स ।

परमद्यत्वे आलापस्पष्टतायै ऋषभधैवतौ आरोहे न प्रयुज्येते । यथा—

आरोहः—स गम पनि स । अवरोहः—सनि धप मग रि स ।

एषां स्वराणां पूर्वपश्चाद्भावेन न्यासवैचित्र्यवशात्तालवशाच्च नाना प्रकाराः समुज्जृम्भन्ते भैरवरागस्य (यथा छन्दःशास्त्रे एकस्या वृत्तजातेर्मगणप्रभृतीनां गणानां पूर्वपश्चाद्भावेन स्थितिवशात् प्रस्तारानुसारं नाना वृत्तानि संपद्यन्ते— यथैकादशाक्षराया जातेः (त्रिष्टुभः) इन्द्रवज्रोपेन्द्रवज्राप्रभृतीनि—तथैतदपि ज्ञेयम् । स चायं रागप्रस्तारः संगीतरत्नाकरे द्रष्टव्यः) ।

हनुमन्मतेन चाऽत्र गान्धारस्वरस्य प्राधान्यमुच्यते । यथोक्तम्—

"गान्धारांशग्रहन्यासो गान्धाराधिकमूर्च्छनः ।
गीयते भैरवः प्रातर्हनुमन्मतकोविदा ॥" इति ।

(गीतस्य आरम्भकः स्वरो ग्रहः, समापको न्यासः, गीते बाहुल्येन प्रयुज्यमानः स्वरोंऽशः । यथोक्तम्—"गीतादौ स्थापितो यस्तु स ग्रहस्वर उच्यते । न्यासस्वरस्तु विज्ञेयो यस्तु गीतसमापकः ॥ बहुलत्वं प्रयोगेषु सोंऽशस्वर उदाहृतः ॥" इति) ।

अधोनिर्दिष्टस्वरविन्यासोऽयं त्रितालो भैरवप्रकारः कालिङ्गः (कलिङ्गड़ा) इत्याख्यायते धैवतस्वरप्राधान्येन माधुर्यवान् भैरवः कालिङ्गो विज्ञेयः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वरतालिका ।

['रि' इत्येवमुपरि ऋजुरेखयाङ्किताः स्वराः कोमला ज्ञेयाः । मन्द्रमध्यताराख्ये सप्तकत्रये सप्तापि स्वराः सञ्चरन्ति । तत्र 'स़' इत्येवमधोबिन्दुनाङ्किताः स्वराः प्रथम (मन्द्र) सप्तकस्थाः, ' सं ' इत्येवमुपरिबिन्दुनाङ्किताः तृतीय (तार) सप्तकस्थाः, बिन्दुहीनाश्च द्वितीय (मध्य) सप्तकस्था बोध्याः । 'ध—' इत्येवं पुरोवर्तिन्यो यावत्यो रेखाः स्युस्तावत्यो मात्रास्तत्र ज्ञेयाः । 'निस़' इत्येवमधोरेखाङ्कितस्य स्वरद्वयस्यापि मात्रा एकैव बोध्या । एकद्व्यादि चिह्नं तालसूचकं बोध्यम् । यत्रैकाङ्कस्तत्समस्थानम्]

प ध
ह दि

\+ ३ १ २

म म प प ग म प प ध ध नि ध प प प प
क म ले — वि म लं — ज य ति धा — म ह दि
म म ग रि ग ग म म ग ग रि रि स स स स
अ धि गु ण म गु ण म तु ल म वि का — रम् —
स स ग ग म म प प ध ध नि ध प प प ध
नि — त्य शा — न्त म ज म ति ल ला — म ह दि

अन्तरा

\+ ३ १ २

म म म म प प नि नि सं सं सं सं रिं रिं सं सं
त्रि भु व न कृ ति धृ ति ह ति प र मे — कम् —
सं रिं रिं रिं रिं रिं रिं रिं रिं सं गं रिं सं नि ध प
यो ऽ ग ग — म्य म हि मा — व्य ति रे — कम् —
नि नि सं सं सं नि ध ध प म प प ग म प प
अ र्मि त भू — म वि त ता — खि ल वि — श्वम् —
म प नि नि सं सं रिं सं गं रिं सं नि ध प प ध
दु रि त नि वा ऽ र ण नि पु ण ना — म ह दि

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

औपनिषदं * विज्ञानम्

संसार तापानलतापतप्तः कश्चिन्मुमुक्षुः शरणं प्रपेदे ।
वेदार्थविद्[1]ज्ञं गुरुमात्मतत्त्व-निष्ठं महान्तं करुणापयोधिम् ॥ १ ॥
गुरो ! कृपालो ! भवसिन्धुपोत ! प्राज्यार्च्यपादाम्बुज ! धीरधुर्य !
बद्ध्वाऽञ्जलिं वश्चरणारविन्दे धृत्वा शिरोऽहं विनिवेदयामि ॥ २ ॥
इदं मनः केन हि कल्पनायां सन्धार्यते वाऽथ विकल्पनायाम् ।
प्राणश्च कश्चेष्टयतीह मुख्यं को वादयत्येव गिराञ्च देवीम् ॥ ३ ॥
चक्षुस्तथा श्रोत्रमहो ! महः को देवो युनक्त्येव निजक्रियायाम् ।
इत्यस्म्यहं ज्ञातुमनाः प्रभोऽद्य पुनीहि मां वागमृतप्रवाहैः ॥ ४ ॥
शिष्येण पृष्टो गुरुरित्थमाह श्रद्धां तदीयां सुनिरीक्ष्य विद्वान् ।
इहाऽऽस्व सौम्येहि वदामि तुभ्यं वेदान्तसिद्धान्तमबाध्यतत्त्वम् ॥ ५ ॥
यं धारयित्वा न पुनर्भवाय कल्पेत निर्धूतामना मनुष्यः ।
जीवँश्चरेन्मुक्तसमस्तबन्धो हिताऽहितो[2]त्तीर्ण समस्तचेष्टः ॥ ६ ॥
"श्रोत्रस्य श्रोत्रं मनसो मनो यद्" वाचश्च वाचाऽपि महासुबन्धुः ।
दृष्टे र्दृगस्त्येव स साक्षि[3]भूतो विज्ञाय यं सर्वपाशापहानिः ॥ ७ ॥
स्वस्वात्मविषये योऽयं प्रवृत्तिनियमो महान् ।
श्रोत्रादीना मिन्द्रियाणां तस्य हेतुर्विलक्षणः ॥ ८ ॥

---

* तलवकारशाखीयम् ।

१—एतेन ब्रह्मश्रोत्रियं ब्रह्मनिष्ठश्चेत्युक्तं भवति "तद्विज्ञानार्थं स गुरुमेवाऽभिगच्छेत् श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुतेः ।

२—"नैव तस्य कृते नार्थो नाऽकृतेनेह कश्चन" इति स्मृतेः ।

३—साक्षी=परानपेक्षप्रकाशश्चासौ भूतः=सत्यात्मकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेतनः सर्वसाक्षित्वाच् शेषी[४] संघातशेषकः ।
स आत्मा ब्रह्म ते रूपमिति मत्वा सुखी भव ॥ ९ ॥
न तत्र चक्षु र्न मनो न वाचा नचेन्द्रियाणामपरोऽपि वर्गः ।
शक्नोति तद्भासयितुं विरूपमशब्दमस्पर्शमनव्ययं यत् ॥ १० ॥
यतोऽनिदंरूपमशेषसाक्षि श्रोत्रादिसत्ताप्रदबाधशून्यम् ।
तद्व्याकृताऽव्याकृतभिन्नरूपं ज्ञप्तिस्वरूपन्त्विति "शुश्रुमोऽ"द्धा ॥११॥
वेदान्तविद्यापरिनिष्ठितानां वचोऽवितर्क्यं परमादरार्हम् ।
नचात्र शङ्का न भयं न पीडा नोद्वेग आर्त्तिर्निरयप्रदा वा ॥ १२ ॥
आचार्यरूपान्निगमाददुष्टाद्विद्या यदैषाऽधिगता हि सौम्य ! ।
तदैष दुःखान्तमिह प्रयाति न शुष्कतर्को नच वावदूकः ॥ १३ ॥
यदुच्यते नैव गिरां प्रपूरै र्जात्यादिधर्मेण प्रवृत्तिभाग्भिः ।
तद्ब्रह्म जात्यादिविवर्जितं यत्त्वं विद्धि नोपाधिविशिष्टरूपम् ॥ १४ ॥
यस्मिन्मनो नास्ति विकल्पनेशं मनस्तु येनैव विकल्पनार्थि ।
त्वं विद्धि तद्ब्रह्ममनन्तमाद्यं ज्योतिः स्वरूपं निजरूपमेव ॥ १५ ॥
यच्चक्षुषो व्यापृतिशून्यमेव "चक्षूंषि" शक्तानि यदीयशक्त्या ।
त्वं ब्रह्म तद्विद्धि सदा स्वभातं नेदं विशिष्टं यदुपासनीयम् ॥ १६ ॥
श्रोत्रं प्राणस्तात ! सर्वं तदन्यत् सत्तां यस्य प्राप्य सिद्धिक्षमं[२] स्यात् ।
तत्ते रूपं प्रत्यगात्माऽद्वयोऽसौ देवो नूनं चक्षुरादिं युनक्ति ॥ १७ ॥
इत्थं पीत्वाऽऽचार्यवाचासुधां तां शिष्यो जातो नित्यसौख्यानुभूतिः ।
देहे त्यक्त्वाऽध्यासवारान्विविक्ते[४] मत्वा ध्यात्वा[५] निर्विशेषो बभूव ॥ १८ ॥

(सम्पादकः)

४—अत्रायमाशयः—श्रोत्रादीनां स्वस्वविषये प्रवृत्तिनियमस्य कारणभूतः श्रोत्रादिविलक्षणश्चेतनोऽस्ति संहतानां प्रासाददिवत्परार्थत्वनियमादिति ।

१—प्रशस्तादाचार्यात् ।

२—स्वस्वकार्यक्षमम् ।

३—उपलक्षणमिदमिन्द्रियादीनामपि ।

४—नानाविधानध्यासानित्यर्थः ।

५—एतेन मनननिदिध्यासने गृहीते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हैन्दव-सङ्ख्या-ह्रसिम-निदानविमर्शः ।

निबन्द्धा—श्री दीनानाथ शर्म्मा शास्त्री सारस्वतः ।

('मुलतान'स्थ-श्री सनातनधर्म्म संस्कृतकालेजाऽध्यापकः ।)

"धर्म्म एव हतो हन्ति धर्म्मो रक्षति रक्षितः ।

तस्माद् धर्म्मो न हन्तव्यो मा नो धर्म्मो हतो वधीत्" ॥ मनुः ८ । १५

भारतेऽत्र सर्व्वतः प्राची, विश्वस्य च मूलम् आर्य्यजातिरेव वर्व्वर्ति, या ऽधुना 'हिन्दु' रिति समाख्यया व्यपदिश्यत इत्यत्र नास्ति विवरीतुं बलवत्प्रयोजनीयता, यतो नेह विसँव्वादः कस्यापि सत्याऽपलापिनोऽपि वादिनः । प्राचीनाऽनेहसि जातिरियं यादृशीमुन्नतिमुवाह, यादृक् च सङ्ख्याऽऽतिशय्यमानशे (प्रतिपेदे), मन्ये नेदमपह्नुतं भवेद् अधीतिहासं निषेदुष्या वैदुष्या दृष्ट्याः पुरस्तादिति । तत्तादवस्थ्योदाहारस्तु पिष्टपेषायितो वरीवृत्येत । तदीयैदंयुगीनदशादर्शनमेव नः सिषाधयिषितम, अतस्तदालोचनमेव साम्प्रतं साम्प्रतं लक्ष्यते ।

नेदमपिहितम् अवगाढ-वर्तमानपुगानां पुंसाम्, यद्-अद्यत्वे सैव कदाचिल्लब्धगरिष्ठवरिष्ठप्रतिष्ठा आर्य्यजातिर् असेव विद्यते, अधुना सा पदे पदे न्यक्-क्रियते, दैनन्दिनश्च ह्रसिमानं यती वर्तते, किं भूयसा प्रपञ्चनेन—इदानीम् 'आर्य्यजातिः' 'शव'श्च, पदे इमे पर्य्यायवाचके मन्येते । हंहो पाठकमहाभागाः ! कदाऽपि भवद्भिर्दुर्घटेऽस्मिन् सम्बन्धे मीमांसा (विमर्श)-स्पृशा दृशा तत्त्वं किमप्यदर्शि ?, किं वा एतन्निदानोहापोहे श्रीमद्भिः स्वमस्तिष्कव्ययो व्यधायि ? यदि नैवम्, तर्हि अवश्यमस्मत्सहाया भवन्तः ताटस्थ्येन विषयेऽमुष्मिन् प्रणिहिता भवन्तु भवन्तो भावन्तः ।

तत्राऽस्मन्मते हैन्दव-सङ्ख्याह्रसिम्नः प्रथमम् अनवद्यम् ऐदानं*-निदानं तु धर्म्मेऽदृढत्वम् इति । दृढता हि नाम द्रढिम्नो दृढं मूलम् । दृढता ज्ञानमूलिकाऽज्ञानमूलिका चेत्युभयथैव भवति । प्रथमा-उत्तमा, पश्चिमा-अधमा, परम

* ऐदानं निदानम्—इदानीम्भवं मूलकारणमित्यर्थः । अत्र 'इदानी' मिति शब्दात् 'तत्र भव' इत्यणि आदि वृद्धौ 'अव्ययानां भमात्रे टिलोप' इतीमो लोपः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उभयी एव दृढता लाभलम्भिका निष्पद्यते । अज्ञानमूलिका दृढता कर्म्ममूलक-दृढतातो नाऽतिरिच्यते (भिद्यते), अतस्तदपरपर्य्याया व्यपदिश्यते । धर्म्मे यदि केवलं ज्ञानद्रढिमा स्यात्, कर्म्मदृढता नाऽस्तु, अथवा कर्म्मदाढर्य्यं भवतु, ज्ञान-दृढत्वञ्च न भवेत्, तर्हि धर्म्मः संशीतौ पर्य्यवसास्यति । धर्म्मꣳ किम् सर्व्वत्रैव ईदृक्त्वं विजृम्भेत—यदि महाभारते ज्ञानवान् नन्दनन्दनꣳ (कृष्णꣳ) कर्म्मणेऽलम (अलङ्कर्म्मीणोऽ) र्ज्जुनश्चेमावुभावेव न अभविष्यताम्, तर्हि किं पाण्डवा अजेष्यन् ? नहि कदापि नहि । अत एव भगवती श्रुतिरपि भङ्ग्यन्तरेण अमुमेव विवृणोति अर्थम्—

"अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।
ततो भूय इव ते तमो य उ विद्यायाꣳ रताः ॥"
"विद्याञ्चाऽविद्याञ्च यस्तद्वेदोभयꣳ सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥"

यजु० । अ० ४० मं० १२-१४

अत्र अविद्यया कर्म्म प्रतिपिपादयिषितम्, विद्यया च ज्ञानमभिसन्धि-त्सितम् । वेदो विवृणुते, यत्—केवलकर्मोपासका अन्धं तमः समुपढौकन्ते, केवलज्ञानरताश्च ततोऽप्यधिकम् अन्धतमे पतन्ति । यो विद्याम् (ज्ञानम्) अविद्यां (कर्म्म) च उभयं वेद, सोऽविद्यया (कर्म्मणा) मृत्युं (भयस्थानं) तीर्त्वा विद्यया (ज्ञानेन) अमृतम् (अभीष्टम्) अश्नुते ।

अत्र माहम्मदानामुदाहरणमादीयताम्—(महतः शोकस्याऽयमवसरो यद्-अस्माभिꣳ परकीयैव जातिर्लक्ष्यरूपेणाऽत्र आदीयते, न आर्य्यजातिः, यत-स्तस्यामधुना ईदृगवस्था जागर्तिर्न जागर्ति किलाऽव्यभिचारेण । किं कुर्म्महे—वैवश्यमास्माकीनं क्षन्तव्यम् ।)

माहम्मदजातौ विद्यते वैयात्यं वृण्वानानां (मूर्खणां) सङ्ख्याप्राचुरी ते धर्म्मस्य वैधेया विधेयाः (अन्धसेवकाः), अमी स्वधर्म्मत्राणार्थम् असूनपि विगणयन्ति, अन्यैः सह विवादेऽपि बद्धसन्नाहा भवन्ति । एवञ्च कुर्व्वाणा विज-यन्तेऽपि । 'निमाज़' मपि पठन्ति, 'रोजा' सेवनमपि विदधति, इतरदपि स्वधर्म्माऽऽनुकूल्येन समाचरन्ति । द्रष्टव्यम्—अमीषामीदृशी दृढताऽज्ञानमूलि-कापि कीदृशं सूदर्कं प्रसूते । केवलज्ञानिवर्ग्गꣳ किमादेष्टुमीष्टे-किं वा विधातुं क्षमते मन्मतौ तु ज्ञानिभ्यो धर्म्मदृढा अज्ञानिन एव विशिष्यते । त एव परमात्मनो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभ्यतः सन्तः पापाऽपेता बोभुवति, सर्व्वश्च तत्तत्कार्य्यजातं वितधतः पारेगिराम् उन्नतिं* कुर्व्वते । इयमज्ञानमूलिका दृढता (कट्टरपन) माहम्मदेष्वपि भूम्ना दृश्यते, ऐशवेष्वपि । परं हिन्दुषु अधुना नाऽऽस्ते । हिन्दव इमां निन्दन्ति, ते ज्ञानमूलकद्रढिमोपासनायैव हिन्दून् प्रयुञ्जते । परम् उभयी एव विधा तेभ्यो गतगता विलोक्यते । तत्र उत्सूत्राणाम् (उच्छास्त्राणाम्) स्वतन्त्रविचारवतामेव भूमा जायमानो निध्यायते । धर्म्म-सीमावतां ते कारागारं मन्वते । एतन्मूलका एव जना व्यवस्थापकपरिषत्सु (Assembly) धर्म्मविहन्तॄन् नियमान् कार्य्य-रूपेण परिणमयितुं प्रयस्यन्ति । परमस्मन्नये तु दृढतावन्तोऽल्पेऽप्यनल्पाः अदृढाश्च अल्पेतरेऽपि अल्पे नाऽत्र काचन विचिकित्सा । प्राक्-काले तु अस्मदीय-सर्व्व-दिक्क जात्यामुभयविध एव द्रढिमाऽक्षिलक्ष्यीभवति स्म । यद्येवं तदा नाऽभविष्यत्, तर्हि कथं गोविन्द सिंहस्य लघू अपि बालकौ वरं कलेवरं समवहेल्याऽपि भित्ति-निखातं नाऽगणयिष्यताम्, कथञ्च तात्कालिका हकीकतरायादयो मृत्युमुर्य्य-करिष्यन् । तस्य द्रढिम्न एवेदं विजृम्भितम्, यद् आर्य्यजातिरद्यापि स्वसत्त कलयति, अन्यथा—तदात्वेऽपि ऐदंयुगीनविचारप्रसृत्यां सत्यामसौ जातिर्नाम-मात्रतामस्प्रक्ष्यत् । इदानीन्तने समये कथं हिन्दवो मोहमदीया ईशवीया वा भवन्ति, तत्र केचित् सतानतधर्म्मस्य अनुदारताम्, एके सरलनियमाऽभावम् इतरे कमपि अन्यं नियामकं वक्ष्यन्ति, परमयुक्तमेतद् । अस्मन्मते तत्र ज्ञानाऽज्ञान-मूलकोभयविधद्रढिम्नोऽभाव एव कारणं सेत्स्यति । अन्यथा-विचार्य्यताम्, यो हिन्दुर्हिन्दुत्वे सान्ध्यं विधिमपि नोपास्ते, स एव 'महामदो' भूत्वा 'निमाजं' पठति, किमु हिन्दुधर्म्मे 'सन्ध्या' 'अनुदारता'ऽऽसीद्, माहम्मदसम्प्रदाये च 'निमाज़' इति 'औदार्य्यं' समजनि ? किमत्र नियमानां 'कठिनिमा'ऽऽसिष्ट, तत्र अयमेव (कठिनिमा) 'सरलता'ऽजनिष्ट ? हन्त !!! एतद्दार्ढ्याऽभावादेव हिन्दवः स्वधर्म्मं जहतोऽपरमतान्याश्रयन्ति ।

पाठकाः ! केवलमस्मिन्नेव विषये बहु विवेच्यं वर्तते, परं द्राघिमाणम-वसाय त्रस्यतेऽस्माभिः । तेनेदानीं बहिष्ना दुरुपपादोऽयं विषयोऽत्र । कालाऽन्तरे पुनरत्र प्रकाशो विधास्यते । अधुनाऽग्रे गतिर्विधेया ।

---

* ईदृक्षैरेव जनैरुन्नतिमभिलक्ष्य श्रीयशोदानन्दनेनाऽपि 'गीतायां' गीतम्, यद्-"न बुद्धिभेदं जनयेद् अज्ञानां कर्म्मसङ्गिनाम् । जोषयेत् सर्व्वकर्म्माणि विद्वान् युक्तः समाचरन्" (३ । २६) इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयं कारणं हिन्दूनां सङ्ख्याह्रासिन्नि वर्तते 'विषयविलासप्रणयित्वम्'। इदमपि कारणमदृढतामूलकमेव प्राक्तनकारणाद् नाऽतिरिच्यते। उभयविधदृढताऽभावाद् धर्म्मभयं च्यवते, क्रमशो विषयविलासप्रणयश्च प्ररोहति। विषयविलासप्रणयित्वे च पुमान् अवधैसौन्दर्य्यभक्तो जञ्जन्यते, तद्रसरसने च यथा सम्भवम् उद्यच्छते। परस्ताद् इदमेव सौन्दर्य्यं धर्म्माच्च्यावयति, यतः— स्वजातीयाऽनुभूतचरसौन्दर्य्ये न कापि नव्यताऽवसीयते, परस्ताच्च परकीयजातीयसौन्दर्य्यसरसीरुहचञ्चरीकः सन् पुरुष आत्मानमपि विस्मरति। तदा को धर्म्मः× कोऽधर्म्म इति किंकर्तव्यताविमूढः सन्नुत्सूत्रताम् (उच्छृङ्खलताम्) प्रतिपद्य स्वजातिं स्वस्माद् विरहय्य सङ्ख्यानैयून्यनिदानं जायते—इति वयं प्रतीमः, अत्र स्त्रीलाभाय माहम्मदतामैशवताश्च प्रतिपद्यमानमानवा एव प्रमाणम्। अस्मदीयः सनातनोधर्म्मः संयम-शिक्षकः। अयं गृहस्थमपि पुरुषं संयच्छति[1], संन्यासिनमपि, उदूढां स्त्रीमपि नियमयति, विधवामपि। परं परकीयेषु धर्म्माभासेषु सँय्यमाऽवहेलना यादृग्* ध्रियते, नूनं सा न तिरोहिता जनानाम्। 'प्रवृत्तिरेषा भूतानाम्' इति मानवं वचोऽनुसृत्य संयमञ्चाऽनीहमाना मानवाः स्वधर्म्मं जहति। चिराय संयमव्रतिषु हिन्दुषु विषयविलासप्रणयितेयं कौतस्कुती इति संशेरते केचन, परमत्र असावदृढता एव मूलमवेतव्या। इत्थमियमपि हैन्दव-सङ्ख्याह्रासस्य महीयः कारणम्। (शेषं पुनः)

सायङ्कालः

(ले० सहकारि सम्पादकः)

प्रचलति भानौ पश्चिमसानौ क्षितिजं द्युतिततिरम्यम्।
सरति तमिस्रा विगमितघस्रा वियदुडुनिचयविचित्रम्।
घूत्कृतिपटवो घूकीबटवो—यान्त्यानन्दममन्दम्।
उदयति शान्ते रजनीकान्ते जलनिधिजलमतिवेलम्।
अलिकुललुलितं परिमलकलितं विलसति कुमुदकदम्बम्।

१—संयच्छतीति क्रियाफलस्य परगामित्वेन तिङ्।

* यादृग् इति क्विनिरूपम्, तेनेदं स्त्रीत्वेऽपि सङ्गच्छते। 'यादृशी'ति रूपं तु कञि ङीपि च ज्ञेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्रवदतिकान्तः शुभशशिकान्तः कलयति वर्षमनभ्रम् ।
सुरभिसनीरे मलयसमीरे विरहिहृदयमतिदूनम् ।
मञ्जुलविमले सरसि सुतरले मीलति पयसिज जालम् ।
नीरवशान्ते सकलदिगन्ते योगी कलयति योगम् ।
विरुदति कोके सततसशोके चन्दति चतुरचकोरः ।
निशिचर चक्रे विहरति वक्रे स्वपिति सुखं नरलोकः ।

———

प्रीतिसरणिः ।

(ले० श्रीपरमानन्दशर्मा शास्त्री "आनन्द" ऋषिकुलस्नातकः)

अभूवं भस्माहं त्वमिह न गता म्लानिमपि ताम्—
इयं दीपज्वाले ! कथय सुहृदां किं गतिरिदम् ।
वदन्तं सावादीदधिककठिना प्रीतिसरणिः,
मया प्रागेवाग्नावपि शलभ ! दत्तं निज वपुः ॥

शारदास्तवस्तबकः ।

नयान्तं सुविद्ये ! ममाज्ञानलेशम् स्व[1]कान्त्यास्तकञ्जातकान्ते ! सुकान्ते ! मुदा शारदे ! देहि बो[2]धं विशेषम् विधेहि स्वकीयं सरोजासने ! हे-सदा वाणि ! वाणीनलिन्यां निवेशम् अये शा[3]रदेन्दुप्रभे ! शारदे ! त्वम् । हृदाकाशमध्ये विदध्याः प्रवेशम् रमेतास्यचन्द्रेऽयि चद्रानने ! ते मुदा दृक्चकोरी सदा निर्निमेषम् स[4]रोऽसारसं सार—सम्भावितं नो सुवाचं विना नेदमास्यं सुवेशम् अथा"नन्द" आनन्दिनीतो विनीतो-हृदाऽहं सदा वन्दयन् कामये शम् ॥

१—भस्ता-अस्तं प्रापिता (अन्तर्भूतणिजर्थः) पयसिजस्य कान्तिर्यया तस्याः संबुद्धौ ।

२—भावकरणान्यतरार्थकघञन्ताच् छिनष्टे मत्वर्थीयः 'अच्' प्रत्ययः । विशिष्टमितिभावः असर्वोप्रयोगार्थकाद्वा शेषयते घञि शेषः-असर्वः, ततो विगतो शेषोऽसर्वो यस्मात्तम् विशेषं सर्वमिति

३—शरदि भवस्येन्दोः प्रभा-इव प्रभा यस्यास्तस्याः सम्बुद्धौ—

४—असारसं सरसिजमन्तरा-सरः सारेण सम्भावितं न, ससारं नेति सारः ।

५—आनन्दयितुं शीलमस्या इति शीलार्थे णिनिस्ततस्तसिल्प्रत्ययः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

माननीया ! उद्योतप्रियपाठकमहाभागाः ! जानन्त्येवात्रभवन्तो यदिदं युगं विलक्षणमेव सम्प्रवृत्तम, सर्वे देशाः सर्वे जनपदाः सर्वाणि नगराणि, खेटाः खर्वटा वाटाश्चापि "सङ्घः सङ्घः, सङ्घटनं सङ्घटनं, सम्मेलनं सम्मेलनम्" इति सहोहोकारं दशापि दिशो ध्वानयन्तः स्वाभीष्टोन्नतिलाभाय कृतोद्योगा एव समालोक्यन्ते। तत्र केचित्स्वधर्माऽभिवृद्धये, केचित्स्वजात्यभिवृद्धये, केचित्स्वभाषाभिवृद्धये, परे स्वसङ्घघुणकीटकल्पकुरीतिडाकिनीनिष्कालनाय कालानुपातिनीं भूमिकामारचयन्तः सन्त "आत्मानं सततं रक्षेद्" इति नीतिं निध्यायन्त एवाग्रेसरीभवन्तीति प्रत्यक्षमेव जानीध्वम् । तेषु सर्वेषु सर्वोत्तमोऽप्ययं भारतो देशो यत्रर्षिभिः सर्वधर्माधिकारो व्यवस्थापितो यत्र चास्माकं पूर्वेषां परं स्वातन्त्र्यमासीत्, यत्र जङ्घोपरि जङ्घां निधाय सुखनिद्रां भजमाना अपि भारतीयाः कलाकौशलादिविविधविज्ञानेषु सर्वोच्चतमा दक्षा अभूवन्, इदानीमस्यैव देशस्य यादृशी दुरवस्थाऽनुभूयते, किं सा केनचित् स्वप्नेऽपि सम्भाविताऽभूत् । अद्य क्षणे क्षणे रोगाः, क्षणे क्षणे शोकाः, क्षणे क्षणे मोहाः, क्षणे क्षणे दुर्भिक्षम, यत्रोदरदरीपूरणमपि दुर्घटायते भारतीयानाम् । तत् कस्य हेतोः ? तदाहि पूर्वेषां स्वदेशाऽभिमानः स्वजातिसमष्टिगौरवं, स्वधर्मप्रियशीलता, स्वभाषा (सुरभारती) समादर इत्याद्या विविधा उत्तमोत्तमा गुणाः समैधिषत, यत्र परं कारणं ब्राह्मणजातिमस्तिष्कनैर्मल्यं ब्राह्मभावौदार्य्यञ्च व्यराजिषाताम्। अद्य तु वैपरीत्ये यादृशीं घोरघोरामालस्यनिद्राकामिनीमालिङ्ग्य परिपीताऽविवेकसुराः भूसुरा यथा हीनां दीनाञ्च दशां प्राप्ताः नच तथेतरे दृष्टिगोचराः सम्भवन्ति, इत्थममीषां दुर्दशैव सुरभारतीदुर्दशायाः परं निदानं संवृत्तम,अद्याप्येतेषां मस्तिष्कानि भ्रान्तान्येव समालोक्यन्ते नह्यन्या काचन जातिस्तादृशी परपक्षदलिता दृश्यते, यथा च ब्राह्मणजातिरिदानीं परैः परिभूयते, परस्परञ्च कलहायते, परं हन्तकारमेव परं तत्त्वं मनुते, अनया च स्वार्थलाभाय स्वभ्रातृनिकारणमपि तप इवाऽनुष्ठीयते । किञ्च—

यत्र यत्रैषा यथाकथमपि पादप्रसारं करोति तत्र तत्रैवात्यन्तं निरादरमेः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाप्नोति । पुरा एतस्या एव ब्राह्मणजातेश्चरणरजांसि पवित्रतमानि मत्वा चक्रवर्त्तिनोऽपि स्वसुवर्णमुकुटेषु (तानि) निघर्षयन्ते स्म, सम्प्रतित्वेषा ब्राह्मणेतरपादधूलिधूसरितानना समवलोक्यते । हन्त ! हन्त ! किमतः परमपि कष्टम् ? । किमद्यापि न निद्रां त्यक्ष्यतीयं जातिः ? किमस्या भङ्गातरङ्गा इव नानारङ्गा विहङ्गायमाना कालाज्ञानगगनाङ्गणे डयमाना द्रक्ष्यन्ते । नहि नहि, यत एतादृशदौरवस्थ्यनिवर्हणायैव कैश्चनात्रत्यैर्विद्वद्भिः सम्भूय पञ्चनदप्रदेशे संस्कृतसमितिरेका स्थापिता यस्यां बहुविचारणोत्तरं स्वात्मरक्षैकनिदानं सुरभारतीसंरक्षणमेवेति मत्वा उद्योतनामकं संस्कृतमासिकपत्रं सर्वसम्मत्या परिषदा प्रकाशितम्, परं सन्ति केचनाद्यापि भ्रान्तमस्तिष्का येभ्यः परमोच्चादर्शभूतमप्येतत्कार्यं न रोचते । सर्वसाधारणोत्साहपरिवर्धनार्थं प्रथमं स्वकोशे हानिं सोढ्वाऽपि पत्रस्याऽस्य वार्षिकमत्यल्पमेव स्थापितं परिषदा, चिन्तितञ्च यद् ग्राहकाणां पुष्कलभावे सति नैतदसाध्यं भविष्यतीति,परमयं कीदृशः शोकावसरः—येषां संस्कृतज्ञानां पण्डितानां दुर्दान्तेऽप्येतस्मिन् समये जननीव परतरहितकारिणीयं गीर्वाणवाणी तेऽस्याः संरक्षणहेतुभूते प्रशस्तेऽस्मिन् कर्मणि नाद्यापि पूर्णतया दृष्टिमापातयन्ते अनेकवारमभ्यर्थ्यमाना अपि नच सम्भूय दृढं कोशं सम्पादयन्ते अधिकं किमुच्येत ? अद्यापि बहुभिर्ग्राहकैरस्य प्रथमवार्षिकमपि न वितीर्णमिति कष्टस्थानमिदं स्वयमालोचयन्तु पाठकमहाभागाः । यद्येवमेव ग्राहकाणां मूल्यादिप्रेषणे उपेक्षा, सभ्यानां स्थायिकोषसम्पादनसङ्घटनकर्मणि मान्थर्यञ्च स्यास्यतः तदाऽवश्यमुद्योतप्रकाशनं दुर्घटं भविष्यति । सति चैवं पञ्चनदीयपण्डितानां कथं नासिकाप्रतिष्ठा लब्धपदा स्यादिति विवेक्तुमहमसमर्थ एव । नहि केवलं प्रतिमासं यथाकथञ्चित् पत्रप्रकाशनमात्रमेवोद्योतसञ्चालकानां कृत्यमस्ति, तेषान्तु—परमोच्चमिदमुद्देश्यं नाम यद् विविधेतिहासपुराणादिग्रन्थानां गवेषणाप्रकारेण तुलनात्मकसमालोचनायां क्रियमाणायां स्वपूर्वेषां कीर्त्तिस्तम्भस्य दृढीकरणमप्यस्ति, किं शेध्वे ? यद् यद् वर्त्तमानयुगे वेदसिद्धान्ताध्वनि कण्टकायितमिवाभाति, उत्करायितं वा,तत् तत् सर्वमेव सुदूरमुत्सार्य तादृशी शुद्धा वैदिका स्थापनीया, यतः परपक्षसायकशङ्कुव्यथा स्वप्नेऽपि न सोढव्या सम्भवेत्, एतेनैव व्याजेना ऽनेके सनातनधर्मसिद्धान्ता अपि सुपरिष्कृतरूपेण प्रकाशिता भविष्यन्तीत्यर्थसिद्धमायातं भवति, तस्मादस्माभिर्दूरं गन्तव्यं नह्यत्रैव स्थातव्यम् । तदिदं सर्वं तदैव घटेत यदि यूयमस्य रक्षायै कायेन, मनसा, वाचा च साहाय्यमा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माचरेयुर्न च जानीयुर्यद् भ्राष्ट्रे पात्येतोद्योतः, प्रवहण्यां वा क्षिप्येत, नद्यां वा प्रवाह्येतेति । अतोऽहं सादरं भवतां दृष्टिममुष्मिन् पूजनीये कर्मण्याकर्षयामि कृपयाऽद्यावधि यैर्न दत्तं वार्षिकं ते तत्प्रेषणेन, स्थायिकोशार्थं धनसञ्चयकरणेन, ग्राहकसङ्ख्याऽभिवर्धनेन, तांस्ताञ्श्रेष्ठिजनान्प्रोत्साह्य तद्द्वारा साहाय्याचारणेन सर्वथा सन्नद्धाः सम्भवन्तु । अग्रिमे वर्षे चैतस्याकारप्रकारोऽमुतोऽपि विशिष्टः सम्पिपादयिषितः । एतेभ्य एव हेतुभ्यो वार्षिकमप्यस्य न्यूनान्न्यूनं रूपकाणां ३) त्रयं तिष्ठापयिषितमित्यपि निध्यायन्तु प्रियपाठकमहाभागाः ।

विविधाः समाचाराः—

धन्यवादः—

श्रीमाननीयदीवानकृष्णकिशोरमहानुभावानां परिषदा बहु धन्यवादः क्रियते, एतैः ५०) पञ्चाशन्मुद्राः उद्योतसाहाय्यरूपेण दत्ता, एते दृढतराः सनातनधर्मावलम्बिनः सन्ति । यद्येतादृशा महानुभावा दशापि मिलित्वा प्रतिवर्षमेतादृशरूपेण सुरभारतीसेवका उपलभ्येरन् तदैतस्य प्रचार ईषत्करः सम्पद्येत ।

स्तुतिकुसुमाञ्जलिः काव्यम्—

जैनाचार्यश्रीदेवचन्द्रसूरिणा विरचितं, केवलमेकाणकचिट्ठिकपत्रप्रेषणेन लब्धुं शक्यम । देवचन्द्रसूरिमहोदयानां संस्कृते महाननुरागो वर्त्तते, तत्प्रवाहेणैवैतैरल्पेष्वेषु दिवसेषु संस्कृतयोग्यता सुसम्पादिता । इदञ्च खण्डकाव्यं तेषां स्वसम्प्रदायाचार्यचरितात्मकं वर्त्तते । प्राप्तिस्थानम्—

श्री हेमचन्द्रसूरि—
जैनपुस्तकालय बीकानेर
(राजपूताना)

हर्षस्थानम्—

पञ्चापप्रान्ते सम्प्रति आयुर्वेदचिकित्सायाः प्रभाव उत्तरोत्तरं वर्द्धमानमेवालोक्यते । नवाम्बरमासस्य ९वम्यां तारकायां शाहालमीदरवाजान्तर्गतेऽप्सरोहर्म्य (परीमहल) स्थाने धन्वन्तरिजयन्ती महता समारोहेण सम्मानिता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तीर्णेभ्यो "भारद्वाजायुर्वैदिकमैडीकलकौलेज"च्छात्रेभ्य उपाधिप्रदानमपि जातम्। एतत्सञ्चालकाः श्रीमन्तो हिन्दुधर्मपक्षपातिनोऽग्रवाला लक्ष्मणदासमहोदयाः सन्ति। श्रूयते यदेतेषां सनातनधर्मे महाननुरागः। अपि नाम सनातनधर्मपक्षपातिभ्य एतादृशेभ्य आढ्यतरेभ्यो भगवान् आशीर्वादं दास्यति यदैते हीनां दीनां दशां प्राप्तस्य सनातनधर्मस्य जीर्णकलेवरकल्पार्थं कञ्चन महागवेषणालयमपि स्थापयेयुर्यत्र महान्तो महान्तो विद्वांसोः सम्भूय सकलान् हिन्दुधर्मग्रन्थान् शोधयित्वैकमत्येन धर्मप्रचारकरणेऽनलपशक्तिभाजः सम्भवेयुरिति। डी० ए० वी० कालेजेऽप्यायुर्वेदविभागस्य वार्षिक उत्सव समजनि। उत्तीर्णच्छात्रेभ्यो वाचस्पत्याद्युपाधयोऽपि वितीर्णाः, अनेन महाविद्यालयेनैतस्मिन् विभागेऽपि महती उन्नतिः समासादिता। आयुर्वेदनिर्दिष्टप्रकारेण सर्जरीकृत्यमप्यत्राल्पेनैव कालेन साधितं भविष्यतीत्यपि श्रूयते। प्राय आर्यसामाजिकानां कृत्यं दृढं दृढमूलञ्चावलोक्यते।

कुरुक्षेत्रभूमौ स्वयंसेवकाः—

लवपुरीयसनातनधर्मकौलेजीयाः शतं विद्यार्थिनः सूर्योपरागसमये कुरुक्षेत्रभूमौ स्वयंसेवकरूपेणावतीर्णाः। आङ्ग्लभाषाध्येतारोऽप्येते सुसम्पन्नसनातनधर्मसंस्काराः सेवाभावं पुरतः कृत्वा तत्र गताः। कालेजेचाष्टदिवसान्तभवकाशः संवृत्तः। कथमिदं न स्यात् यस्य सुगृहीतनामानः प्रिन्सिपलमहोदयाः— श्रीरघुवरदयालुशास्त्रिणो ब्रह्मण्याः स्वयं सनातनधर्मेऽकाट्यश्रद्धाभाजो वर्त्तन्ते। एतैश्चाल्पेनैव कालेनाऽसम्भाव्यमाना सनातनधर्मकालेजस्य विविधेषु विभागेषून्नतिः समुद्भाविता।

ओरियेण्टलकान्फरेन्ससमारोहः—

एषु दिवसेषु औरियेण्टलकालेजे श्रीमाननीय A. C. वूलनरमहोदयानां सुप्रबन्धेन औरियेण्टलकान्फरैन्ससमारोहो महत्या आरभटया सम्प्रवर्त्तते। एतेषामादेशेन पञ्चनदीयसंस्कृतसाहित्यपरिषदः प्रबन्धद्वारा वासवदत्तानाटकस्याऽभिनयोऽपि भविष्यति, तदर्थं श्रीरामचन्द्रशास्त्रिकुशलमहोदयाऽध्यक्षतायां प्रत्यहं रिहर्सलरीत्या पात्राणि सुशिक्षितानि सम्पाद्यन्ते। विशेषविवरणन्त्वागामिनि मयूखे प्रकाशितं भविष्यति।

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* ॐ *

*दुर्गाभ्युदयनाटकम् ।

लेखकः—श्री पण्डितछज्जूरामशास्त्री कविरत्नं विद्यासागरः ।

या सम्यग् विधिविधुशङ्करैर्न बुद्धा शुद्धान्तःकरणविशिष्टभक्तवेद्या ।
सानन्दं विहरति या गृहे मणीनाम् भव्यार्थं भवतु ममाद्यं साद्यदेवी ॥१॥

(नान्द्यते)

सूत्रधारः—अलमति प्रसङ्गेन ।

(नेपथ्याभिमुखमवलोक्य)

मारिष, इतस्तावत् । (प्रविश्य)

पारिपार्श्वकः—भाव,

अयमस्मि ।

सूत्र०—मारिष,

एषा सकलगुणप्राज्या विद्वत्समज्या, पूर्ववर्तिनां लब्धकीर्तीनां कवीनां दृष्टरसप्रबन्धापि निबन्धान्तरं द्रष्टुमना मनागपि न विलम्बयति ।

तदयमहमधुना—शिवप्रसादलब्धानवद्यविद्येन, सकलगुणहृद्येन, विलक्षणप्रज्ञेन, विश्वविश्रुतसमज्ञेन, पवित्रकुरुक्षेत्रदेशवास्तव्येन, कृतसुलतानचरितकाव्येन भगवदत्रिगोत्रीयलब्धप्रशंसेन, गौडवंशावतंसेन, पण्डितमोक्षरामतनूजेन सतीमामकीदेवीगर्भजेन, कर्मकाण्डमहोपाध्यायमूलचन्द्रानुजेन, पण्डितनेकीरामरामकृष्णभट्टाग्रजेन, सम्पादितसकलनित्यक्रियेण, श्रीमतीभक्तिदेवीप्रियेण, पंचदेवोपासकेन, काव्यसाहित्यन्यायव्याकरणनिरुक्तादिशास्त्राध्यापकेन विद्वत्सभासभाजितेन विद्यासागरपदालंकृतेन, श्रीमत्पण्डित—छज्जूरामशास्त्रिणा कविरत्नेन, राजदयोपनतहृदयोपेतमुनिनोपश्रावितं दुर्गाचरितमाश्रित्य ग्रथितं दुर्गाभ्युदयं नाम नाटकमादायोपतिष्ठे ।

पारि० भाव किमपि शङ्के ।

सूत्र० का नाम शङ्का ।

पारि० सकविस्तार्किकोपि श्रूयते, कवित्वतार्किकत्वयोश्च प्रायो वैयधिकरणमालोक्यते ।

---

* छायानाटकमिदमाभाति (सम्पा०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूत्र०—मारिष, न विशिष्टयुक्तिमती भवदुक्तिः ।

यतः—कर्कशे तर्कविषये कोमले काव्यवस्तुनि ।

समं लीलायते तस्य छज्जूरामस्य भारती ॥ २ ॥

किं च—स्वर्गं गते जगन्नाथे पुत्रहीना सरस्वती ।

छज्जूरामं समासाद्य भृशं सम्प्रति मोदते ॥ ३ ॥

पारि०—भाव, आगमसिद्धमपि वस्तु प्रस्तुतयुक्तिं विना न प्रेक्षावद-पेक्षणीयं भवति विशेषतो नूतनविज्ञानोन्मीलितलोचनैर्मादृशजनैरिति दृढतर-युक्तिमन्तरा भवदुक्तिरपि नारोहति प्रमाणपदवीमथ च तार्किकं कविमपि कंचि-न्निदर्शय येनाहं तव वचसि श्रद्दधे ।

सूत्र०—शृणु । तल्पं ह्यनल्पमृदुना छदेनास्तु प्रसाधितम् !

दर्भास्तृतं भूतलं वा सत्याः पत्यौ रतिः समा ॥४॥

किं च—अगाधे तार्किकत्वेऽपि कवितावाग्विलासिनौ ।

यशस्विनौ हर्षपक्षधरावत्र निदर्शनम् ॥ ५ ॥

पारि०—भाव, युक्तमुक्तमत्रभवता । परमन्यदस्ति ममातुलं कुतूहलं, तथाहि—यद्भवतोक्तं 'राजदयोपनतहृदयोपेतमुनिनोपश्रावितमिति स वृत्तान्तः कौतुकं मे कन्दलयति ।

सूत्र०—मारिष,

योवै महात्मा सकले महीतले वन्द्यः समस्तैः सुरथो नृपैरथो ।

क्षत्रर्षभः चैत्रकुलाब्धिचन्द्रः सोऽरातिवर्गेण जितः क्षितीन्द्रः ॥ ६ ॥

पारि०—श्रुतं मयैतद् वृत्तं पुराविद्भ्यः परन्तु न सम्प्रति स्मर्यते !

सूत्र०—कोलाविध्वंसिभिः शत्रुभिर्हृतसर्वस्वः स क्षितीश्वरः साम्प्रतं मे गृहे स्थातुमसाम्प्रतमिति मनसि कृत्वा मृगयाव्याजेन वातरयं हयं समारुह्य तपोवनं प्रतिययौ ।

पारि०—ततस्ततः ।

सूत्र०—तपोवनमवलोक्य, अहोरमणीयोऽयमाश्रमः प्रशान्तश्च । दृष्टेमं जाता काचिन्मे निर्वृतिः तदत्राऽवश्यं किंचिद्विश्रमितव्यमितिमुनेराश्रमं प्रविवेश । (तत्र मुनिमवलोक्य) दुरन्ततपसापहतकिल्विषततिः कश्चन यतिरपीह दृश्यते सर्वथा जातं ममात्र सफलमागमनम् इति विचार्योपसृत्यामन्देन विनयेन ववन्दे । ततो मुनिना तेनानुमतः सत्कृतश्च वनमितस्ततोऽवलोकयामास । अहो पूर्वं महो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दया अपि शत्रुणाक्रान्ता मम पुत्रकान्तादयः सम्प्रति कथमिव वर्तन्ते इति यावद्विचारयति तावत्पुरो दृष्ट्वा अये, कोऽयमत्र पवित्रधीरसमीरस्पर्शहर्षमनुभवन्नास्ते किं च श्रेष्ठाकृतिरपि विभाव्यमानशोकविकृतिः तत्सर्वथापीह न युज्यते । यतः—

मुनिसंनिधिमप्यागतो भवति न कश्चन तापी ।
हरिनाम स्मृतितो यथा तरति महानपि पापी ॥ ७ ॥

(विमृश्य) अथवा मुनि संनिधावेष गत एव न यतः—

सकलपदार्थाः सन्ति यद्यप्यधि भुवस्तलम् ।
किन्तु भाग्यरहितो जनः किं तान् लब्धुमलम् ॥ ८ ॥

(इति विचार्य) भद्र, को भवान्, क्व भवतामुष्टिः किमत्र जनसङ्गरहिते मृगहिते घोरप्रचारे कान्तारे संचारकारणम् । कथमाकृत्यापि मुग्धस्त्वं शोकदग्ध इव लक्ष्यसे इति पप्रच्छ ।

पारि०—भाव, ततः किमाह स हतोत्साहः ।

सूत्र०—एवमनुयुक्तः शोककृशः स पुरुषः एवमाह । निष्कारणबन्धो, करुणासिन्धो, सम्यगुपलक्षितं भवता, तदहमधुना सर्वमपि वृत्तं त्वच्छ्रुतं कृत्वा क्षीणशोको भवामि । यतः—

प्रेमपूर्वं पृच्छकाय जनाय व्यसनं निजम् ।
निवेद्य लोको निःशोको भवतीत्यनुशुश्रुमः ॥९॥

समाधिनामधेयोऽहं वणिक् दुर्वृत्तैः पुत्रकलत्रैः सर्वमपि मे द्रव्यजातमात्मसात्कृत्य गृहान्निष्कासितः । ततोऽहं परं विषादमापद्य वनमिदमासाद्य तिष्ठामि सम्प्रति ते कथमिव वर्तन्ते इति न जानानाः चिन्तासन्तानतप्यमानस्ततोऽपि द्विगुणतरमस्मि निर्वेदमापन्नः ।

राजा—प्राह-वयस्य, वैश्यप्रवर, विचारमूढस्त्वं मे प्रतिभासि । यतो विगुणानामपि तेषां सगुणानामिव प्रेमामृतसरसि निमज्य रज्यसि ।

वैश्यः-भद्र न जाने कथमेतत् ।

राजा (स्वगतम्) हन्त दुरन्तः खलु स्नेहोनामारिः । यद्वशादेष पश्यन्नपि न पश्यति जानानोऽपि न जानाति । भवतु । किंचिदुपदिश्य मोहमस्य क्षणमपनयामि ।

राजा—(प्रकाशम्) वयस्य ।

पुत्रमित्रकलत्रादीन्स्वार्थमात्रस्य साधकान् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञाय ज्ञानमासाद्य परमं सुखमाप्नुहि ॥ १० ॥

वैश्यः—भद्र, सम्यगुपदिष्टं भवता, परमेष तवोपदेशः मे मनोजात्वपि नो स्पृशति ।

राजा—कथमिव ।

वैश्यः—यथा वृक्षवद्धो राजा मन्त्री च परस्परं मोचयितुं न प्रभवति तथा ।

पारि०—भाव, ततः किमाह राजा ।

सूत्र०—ततो राजा (स्वगतम्) अये यादृशोऽहमस्मि पुत्रकलत्रादिस्नेहानुबन्धी तादृशः कथमनेन ज्ञातोऽस्मि । (विमृश्य) अथवा घुणाक्षरन्यायगतं सामान्याभिधानमेतत् ।

(प्रकाशम्) साधु वैश्यप्रवर साधु यथार्थमुत्प्रेक्षितं भवता । परोपदेश एवेदानीं पाण्डित्यं यथातमः समाश्रितो दीपकः परप्रकाश एव भवति तथा ।

वैश्यः—भद्र, अस्तं जिगमिषुरिदानीं भगवान्भास्वान् ।

राजा—मार्तण्डमण्डलं वीक्ष्य प्रणमति ।

वैश्य—भद्र, कोऽयमग्रे महोत्सव इव लक्ष्यते ।

राजा—(निपुणं निरूप्य) वयस्य, सर्वेऽपि वनवासिन इमे संन्यासिन इतरे च प्रेमधना जना महर्षयेऽस्मै प्रणतिपुष्पांजलीन् कुर्वन्ति । तदागच्छावामपि निकटवर्तिनं यतिनं प्रणम्य तदुपदेशवचनामृतं पास्यावः ।

वैश्यः—भद्र, अमृतं पास्याव इति कथं समीचीनं ते वचनम् ।

यतः—पातालं स्त्रीमुखं नाकः सागरश्च सुधाकरः ।
एतान्यमृतधामानि प्रवदन्ति मनीषिणः ॥ ११ ॥

पारि०—भाव, ततः किमुत्तरयामास प्रजाधीशः ।

सूत्र०—राजा प्राह—वयस्य, अविचारिताभिधानमेतत् ।

यतः—भारं पत्युर्मृतिः स्वल्प स्थितिः क्षारं क्षयो यतः ।
ततस्तेषु च मन्तव्य ममृतं न कथञ्चन ॥ १२ ॥

पारि०—भाव, साधु समाहितं राज्ञा ।

सूत्र०—अथ किम् ।

पारि०—ततस्ततः ।

सूत्र०—ततः संध्यादिसकलकृत्यमभिकृत्य स्थूलसूक्ष्माव्यवहितविप्रकृष्ट ज्ञानवांस्तत्रभवान्महर्षिर्यावत्तिष्ठति तावदेतौ द्वावपि सहितौ समुपेत्य प्रणेमतुः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजा कंचित्कालं स्थित्वा सप्रश्रयमूचे ।

भगवन् विदितवेदितव्य, कर्त्तव्यशिक्षक, किंचिदस्ति मे प्रष्टव्यं यदि श्रीमतामस्ति नियोगोपयोगः ।

मुनिराह—राजन् विश्रब्धमापृच्छस्व यदस्ति ते प्रष्टव्यम् ।

राजा—आहारो निद्राभयं रतिरेतत्सममेव ।

यदा नरेष्वथ पक्षिषु तदा भिदा खलु केव ॥ १३ ॥

मुनिः—राजन् साधु पृष्टोस्मि श्रूयताम् ।

एकस्तत्र हि विद्यते ज्ञानाज्ञानविशेषः ।

अन्यत्कर्तव्ये तयोर्भेदस्यापि न लेशः ॥ १४ ॥

राजा—तत्कथं मे राज्यं प्राज्यं मोहमज्ञस्येव विज्ञस्यापि जनयति । किं नु अयं हि वैश्यः तिरस्कृत्य पुत्रभृत्यप्रभृतिभिर्मितान्तमुज्झितोपि न तानुज्झति मनसा । तत्कथमावयोर्जानतोरप्यज्ञानवतोरिवैषा दोषाविष्कृतिः ।

मुनि—(सश्लाघम) राजन् ज्ञानवानसि । प्रसन्नोऽस्मिते मतेर्विभवोपरि । यया इमे समेपि ज्ञानवन्तो नरदेहवन्तोऽस्मिन्ममतावर्ते मोहगर्ते निपतन्ति सा एकाशक्तिर्भगवती । तत्प्रभावेणैव सर्वमपि जगदिदं मुह्यति ज्ञानिनामपि मज्जति मोहे सकलदुःखसन्दोहे पतन्ति । का कथा पुनर्वृथाभिमानिनामज्ञानिनामिति । तस्या एव च श्रुतयोनिःश्वसितं, पंचभूतानि वीक्षितं, चराचरं स्मितं, महाप्रलयः सुप्तमिति । राजा—किं नाम तस्याः । मुनिः—प्रणयकोपम ।

(क्रमशः)

निबन्धाः सावधाना भवन्तु—

अनेकवारं निबन्धृणां पुरतो निवेदितं यत्ते कृपया सुस्पष्टं विरलपङ्क्तिश्च लेखं प्रेषयन्तु, परं शोकोऽस्ति यदद्यापि केचन महाशया अत्र दृष्टिं न पातयन्तीति किञ्च—कैश्चनच्छात्रैरपि लेखाः प्रेष्यन्ते तेषामुत्साहवर्धनार्थं वयं तन्मुद्राणायापि सोत्साहा वर्त्तामहे परं प्रायस्तेऽर्थतः शब्दतश्चाप्यत्यन्तमशुद्धा भवन्ति । एवम्भूतान् लेखान्सर्वथैवोपेक्षामहे । यदि छात्राणामध्यापकास्तान्बोधयेयुस्तल्लेखांश्च शोधयित्वा प्रेषयेयुस्तदा मन्ये तेषां कृते किमपि भद्रं भवेदिति निश्चेतव्यम् ।

(सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
UDYOTAH REGISTER L. NO. 2304

वार्षिकमूल्यम् १॥)
सार्धरूपकम्

प्रतिखण्डमूल्यम् ≡)
आनकत्रयम्

उद्योतः

पञ्चनदीयसंस्कृतसाहित्यपरिषदो
मासिकं मुखपत्रम् ।

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नादराद्,
अज्ञानान्धतमोविनाशपटुता-विख्यात-विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्,
"उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥१॥

प्रथमवर्षे— १ | पौषसङ्क्रान्त्याम् वि०सं० १९८५ दिसम्बर सं० १९२८ | दशमो मयूखः १०

सम्पादकः—
कवितार्किक (तन्त्रचक्रवर्ति-) नृसिंहदेवशास्त्री दर्शनाचार्यः ।
सहकारिसम्पादकः—
विद्याभास्करपण्डितपरमेश्वरानन्दशास्त्री साहित्योपाध्यायः ।
प्रकाशकः—
परिषन्मन्त्री पं० जगदीशशास्त्री व्याकरणतीर्थः
(उद्योत कार्यालय जौडेमोरी लाहौर)
"Udyot" Office Jaure Mori Lahore.

श्रीकृष्णदीक्षितप्रबन्धेन "बाम्बे मैशीन प्रेस मोहनलाल रोड लाहौर" इत्याख्ये स्थाने मुद्रितः । पं० जगदीशशास्त्रिणा च उद्योत-कार्यालयात् "जौडेमोरी लाहौर" इत्यतः प्रकाशितः ।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतस्य कतिचन नियमाः

१—अस्य मासिकपत्रस्य अग्रिमं वार्षिकं देयम् (भारते, ब्रह्मदेशे सिंहले च)—१॥) सार्धरूपकम् ।

२—प्रेषणव्ययो ग्राहकैर्न देयः ।

३—प्रबन्धादिकं समालोचनार्थं ग्रन्थादिकञ्च सम्पादकसमीपे, मूल्यादिकं च प्रकाशकसमीपे निर्दिष्टस्थाने प्रेषणीयम् ।

४—विज्ञापनपत्रादि मुद्रापणव्यवहारविषयोऽपि कार्यालये प्रकाशकसमीपाद्विवेचनीयः ।

५—पत्रं प्रतिसङ्क्रान्ति प्रकाश्येत । येन खलु ग्राहकेण यथाकालं सङ्ख्या नाधिगम्येत तेन तन्मासस्य तृतीयसप्ताहाभ्यन्तर एव कार्यालयाद्विवेच्यम, नातः परं कस्याप्यभियोगः श्रूयेत, किन्तु तेन प्रथमं स्वपोष्टस्थानं परिशोध्यैव प्रष्टव्यम् । विवेकाथ ग्राहकसङ्ख्या चावश्यं लेख्या ।

६—ग्राहकैः स्वस्थानादिकं स्पष्टमेव लेख्यम्।

७—एतस्य ग्राहका अपि साधारणसभ्येषु गण्येरन् ।

८—प्रेषितलेखाः प्रायो यथाक्रमं मुद्राप्येरन् । लेखकैर्न्यूनातिन्यूनं पक्षात्पूर्वमेव लेखाः प्रहीयेरन्। राजविरुद्धान्दोलनलेखाश्च न गृह्येरन् ।

विषयसूची

(प्रबन्धानां गुणदोषयोः प्रबन्धलेखका एव प्रतिभुवः)

विषयः	पत्राङ्कः
१—छात्रजीवनम्—ले०—लक्ष्मीचन्द्रो वजाजो ब्रह्मचारी	१—३
२—औपनिषदं विज्ञानम्	४
३—दर्शनोऽविरोधसमीक्षा (वार्तिकम्)	५-१६
४—सम्पादकीयटिप्पणयः	१७-१९
५—इन्द्रियपञ्चकम्—ले० श्रीदेवचन्द्रसूरिः	२०
६—श्रीशस्तुतिः—ले० श्रीनारायणशङ्करशर्मा	"
७—जैनदर्शनकुञ्चिका—	२१-२३
८—दुर्गाभ्युदयनाटकम्—ले० श्री० पण्डितछज्जूरामशास्त्री कविरत्नं विद्यासागरः	२४
९—शोकाधिवेशनम्	२५
१०—सम्पादकोद्घोषणा	२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतः

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नाराद् अज्ञानान्धतमोविनाशपटुता-विख्यात-विश्वप्रभः।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन् "उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते॥

प्रथमवर्षे- १	पौषसङ्क्रान्त्याम् वि० सं० १९८५ दिसम्बर—सं० १९२८	दशमो-मयूखः १०

छात्रजीवनम्।

(ले०—लक्ष्मीचन्द्रो वजाजो ब्रह्मचारी-रत्नगढीय-ऋषिकुलम्, बीकानेर)

मान्याः!

अकारणबन्धुभिः साधुतासिन्धुभिः अस्माकं परमपूज्यैः महर्षिभिः आयुषो भागचतुष्टयं विदधद्भिः अतितमामनुगृहीतमिदं जगत्। येन यथासमयं यथाभागञ्च कर्माणि कुर्वाणा मानवाः स्वजीवितस्य साफल्यं समासादयन्ति। तेषु भागेषु प्रथमो भागो बाल्यावस्थेति व्यपदिश्यते। अयमेव विद्याभ्याससमयः छात्रजीवनञ्चोच्यते। एतस्मिन्नेव छात्रजीवने समभ्यस्यते विद्या, अस्मिन्नेव जीवने भवंति बालकस्य योगिन इव सर्वथा विषयपराङ्मुखी चेतोवृत्तिः।

एतस्मिन्नेव छात्रजीवने भवति मानवः प्रबुद्धबुद्धिर्वौढे, सविशेषो-

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुषीको वैशेषिके, विख्यातः सांख्ये, रञ्जितलोको लोकायते, प्राप्तप्रभः प्राभाकरे, शिक्षाक्षमः शिक्षायाम्, अकृतापशब्दः शब्दशास्त्रे, अभियुक्तो निरुक्ते, तत्त्ववेदी वेदान्ते, प्रसिद्धः सिद्धान्तेषु, गुणवान् गणिते, बहुलो बाहुयुद्धेषु किम्बहुना एतस्मिन्नेव छात्रजीवने भवति मानवः प्रतिच्छन्दकवच्छन्दसि, अनल्पविकल्पः कल्पज्ञाने, उपदेशको देशभाषासु, अलौकिकश्च लोकज्ञाने।

इदमेव छात्रजीवनं प्राप्तवतः पुरुषस्य न शक्नुवन्ति रसे, रसायने ग्रन्थे, शस्त्रे, शास्त्रे कलास्वपि साम्यमधिगन्तुं निपुणा अपि केऽपि लोकाः।

एतच्छात्रजीवनमेवेदृशं जीवनं यदधिजग्मिवान् पुरुषः नावकृष्यते विषयरसेन, न विलोक्यते शोकेन, न खिलीक्रियते खेलनेन, न स्मर्यते स्मरापस्मारेण नाकल्प्यते कलिना, नच निरुद्ध्यते विरुद्धक्रियाभिः। किम्बहुना–एतच्छात्रजीवनं प्राप्ते न बहुमन्यते ब्रह्मानन्दास्वादोपि मानवेन। एवदेव जीवनं समासाद्य पुराऽत्र भारते वर्षे अनेके ऋषयो महर्षयश्च बभूवुः। अधुनापि बहवः स्वकुलोद्धारकाः धर्मप्रचारका देशसुधारकाश्चाभूवन्। मर्यादापुरुषोत्तमो भगवान् रामचन्द्रः भगवति वशिष्ठे गुरावन्तेवसन् एतस्मिन्नेव जीवने चरितब्रह्मचर्यः साङ्गां सरहस्यां वेदविद्यामवेदीत्। भगवन्तं विश्वामित्रं चोपासीनः कृशाश्वमहर्षिप्रसादादासादितां निखिलां दिव्यास्त्रमन्त्रोपनिषदमेतस्मिन्नेव जीवनेऽधिगत्य मारीचसुबाहुप्रमुखान् राक्षसापसदान्निजघान। नामशेषतामनैषीच्च लोकरावणं रावणं तदनुव्रतांल्लोककण्टकान्। कर्तुमकर्तुमन्यथाकर्तुं समर्थो जगन्नाटकसूत्रधारो भगवान् यशोदानन्दनः श्रीकृष्णचन्द्रोऽपि एतेनैव छात्रजीवनेन सान्दीपनमहर्षेराश्रमे वर्तमानो निखिला अपि निरवद्या विद्याः सम्यगध्यगीष्ट। भगवान् शङ्कराचार्योऽपि छात्रजीवने एव योग्यतामायोज्य बौद्धप्रमुग्धां भारतभुवं समुददीधरत्। अहो! कीदृशः स कालः पावनो मधुरश्चासीत्।

यत्र स्थाने २ ऋषीणां महर्षीणाङ्कुलपतीनाञ्चाश्रमा आसन्। तेषु निवसन्तः असङ्ख्याताः छात्रा विद्यां पठन्तो जननीमिव जन्मभूमिं कमपि गरिमाणमारोपयन्तिस्म।

अहो! केवलं स्मरणेनैव पुरातनः परमपवित्रतमोऽसौ समयः प्रीणयति पवित्रयति, आह्लादयति, अमृतेनेवानुलिम्पति अस्माकमान्तराणि तत्त्वानि। परन्तु हा हन्त! कीदृशीयं करालस्य कालस्य कुटिलता। कोयं भारतस्य भाग्यचक्रपरीवर्तः कतमोऽयमार्यावर्तस्य दशाविपर्यासः। यदधुना सर्वमेव वस्तु

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यदेव विलोक्यते । किं किं कथ्येत किं किं वर्ण्येत, कुले, शीले, शौर्ये, वीर्ये गुणे, विद्यायां, वेषे, भूषायां, भाषायां सर्वत्रैव विषमो वज्रपातः । सुदुर्लभमिदं छात्रजीवनमधिगतवन्तो ऽप्यधुनातनाः छात्रास्तत्कलङ्कयन्ति, क्व पुरातनाः—

"उपह्वरे गिरीणां सङ्गमे नदीनां धिया विप्रोऽजायत" इत्येवं वेदैर्वर्णिता पुण्याः आश्रमाः, क्वचेदानीम् आयासमधुराभिः पदे पदे विलसितदेशिकाभिः कृत्रिमाभिः सामग्रीभिः परिपूर्णाः गगनचुम्बिनः स्कूलकालेजप्रासादाः । क्व ते धर्मधुरीणाः प्रशान्तमधुराकृतयस्तिरश्चामपि चेतःस्तु प्रसह्यार्द्रं भावं जनयन्तो महर्षयः, क्वचेमे विदेशीयवेषभूषाविभूषिता बाह्याडम्बरमेव सर्वस्वं मन्यमानाष्टीचराः माष्टराः प्रोफेसराः, रेङ्गलाराश्च । क्व ते जटामण्डलमण्डितनस्तिष्काः, यज्ञोपवीतिनः, मेखलाधराः आषाढदण्डहस्ता, उत्तरीयसंगतगात्राः शान्तमनसः सौम्याकृतयः, हृष्टाः, पुष्टाः शिष्टाः ब्रह्मचारिणश्छात्राः, क्व चैते समुन्नीतसीमन्ताः, आपादतलमस्तकं, बर्बीभिर्नद्धकायाः, उष्णीषितहेटोपिकाः मक्षिकापसारणे ऽप्यसारा छत्रीधरन्तः, कोटपटलूनबूटपूटनेकटाईकपटजालमालाधराः, आधुनिकाः स्टूडेन्टाः मिष्टराः स्कालराश्च ।

अहो कष्टम्, एतान् महर्षिवंशसंतानानाञ्चुरुट,चायकाफीसोडाब्रांडीनामभ्यासं कुर्वतः, बाबुसाहबमिष्टरादिशब्दैः व्यपहिश्यमानान् स्वमातापितरौ मूर्खौ कथयतो विलोक्य दलन्ति नो हृदयानि, सहस्रधा विदीर्यन्ते वक्षांसि, सहसा निर्गलन्ति बाष्पस्रोतांसि । अहो ! भारतस्य दौर्भाग्यविजृम्भितं विशेषतोऽस्मदीयदेशस्य राजपूतानाप्रान्तस्य यद्वत्या नवे, विनये विद्याभ्यासे योग्ये वयसि वर्तमाना बाला मातापित्रोर्वृथाप्रायेण लालनेन निरर्थकेन प्रेम्णा विद्यायाः विमुखीभवन्तो गर्दभान् हसन्तश्चरित्राणि च्यावयन्तः ब्राह्मणक्षत्रियवैश्यजातिं दूषयन्तः उभयलोकभ्रष्टाः भवन्तो विलोक्यन्ते । किमन्यदतः स्याद्विषभ्यम, किमन्यदतः स्यात्कदर्थनम्, किमन्यदतः स्याद्विडम्बनम्, किमन्यदतः स्यात्पापीयः किमन्यदतः स्याल्लाञ्छनम् । मान्याः ! परमपूज्याः ! पाठकमहाभागाः ! वयस्याः-छात्राः ! यावन्नास्य छात्रजीवनस्य सुधारः क्रियते, तावत्कुतः सुखाशाः, कुतो-देशोद्धारः कुतश्च जात्युन्नतिः । एतदतिरिक्तक्रियमाणाः प्रयत्नाः वृथैव भविष्यन्ति । केनार्कबीजं वपताऽऽम्रफलमास्वाद्यते । केन कथं सर्षपमुखे हस्तं निक्षिपताऽमृतमधिगम्यते । तदुत्तिष्ठत, जाग्रत, कुम्भकर्णनिद्रासखीमालस्यमुद्रां त्यजत । देशोद्धाराय सन्नद्धा भवन्तो बालकान् पाठयत । काम्यते यदि गोरक्षा स्त्रीरक्षा,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशजातिधर्मरक्षा तर्हि, स्वपुत्रान्, ब्रह्मचर्यव्रतपूर्वकं छात्रजीवने निधत्त । एवंकृते ऐहिकी आमुष्मकी च सुखावाप्तिर्भविष्यतीति भवत्सेवासु निवेद्य विरम्यते ।

ॐ

नमोनमः परेशाय कृष्णायानन्तशक्तये ।
विश्ववेदान्तवेद्याय बुद्धिवृत्तिविदे मुदे ॥१॥

औपनिषदं * विज्ञानम्

यदि त्वं मन्यसे ब्रह्म जानामीति विशेषतः[1] ।
सत्यं त्वं दभ्रमेवेत्थं[2] ज्ञातवानसि निश्चितम् ॥१॥
देशकालभिदातीतं भूमरूपं यदस्ति तत् ।
इदन्तया ह्यनिर्देश्यं नातो ज्ञातं त्वयाऽधुना ॥२॥
देवेषु भूतेषु चराचरेष्वथो सोपाधिकं रूपमिदन्तयेष्यते ।
तज्ज्ञानमल्पं किल विद्धि सोम्य ! मीमांस्यमेवेति[3] ततो ब्रवीमि ॥३॥
सद्ब्रह्म नित्याऽनुभवात्मरूपं प्रत्यक्स्वरूपैकरसं वदन्ति ।
वेदान्तसिद्धान्तविदां धुरीणा अकामकामा विनिवृत्ततृष्णाः ॥४॥
एवं गुरोर्वाक्यमुदारमेधो निपीय शिष्योऽथ ययौ विविक्ते ।
स्थित्वागमाऽर्थे गुरुपादपद्म-निलीनदृष्टिर्विचिचेत तत्त्वम् ॥५॥
देहेन्द्रियप्राणमनांसि बुद्धिर्नचात्मतत्त्वं वपुषोऽल्पतायाः[4] ।
विवर्त्तभावादपि चिद्विभिन्नाद्रज्जौ यथाहिर्भ्रम एष सर्वः ॥६॥
इदन्तया न तद् ब्रह्म वेद्यं नाप्यनिदन्तया ।
वेद्याऽवेद्यत्वतोऽतीतं तज्ज्ञातं साम्प्रतं मया ॥७॥

---

* तलवकारशाखीयम् । १—विषयत्वत इत्यर्थः । २—अल्पमेव । ३—"मीमांस्यमेव ते मन्ये विदितम्" इति श्रुतिः ।

४—अल्पभावादित्यर्थः "अतोऽन्यदार्त्तम्" इति श्रुतेः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञातृज्ञानज्ञेयभावाद्यतीतं येन ज्ञातं ज्ञाततत्त्वो मतोऽयम् ।
ज्ञातृज्ञानज्ञेयभावावगाहि येन ज्ञातं तं श्रुतिर्मन्दमाह ॥८॥
एवम्भूतो यो नरो भ्रान्तचित्तो भूयो भूयः संसृतेर्मार्गगामी ।
तस्य त्राणे मातृवद्दत्तदृष्टिर्वेदो द्वैतोद्भीतिभावं प्रशास्ति ॥९॥
प्रतिबोधविदितं तद् यज्ज्ञानान्मोक्षभाग्भवेत् ।
"आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्" ॥१०॥
शुद्धेन मनसा ज्ञात्वा गुरुदिष्टदिशो बुधः ।
तरत्यविद्यां धर्मात्मा ब्रह्मभावं समश्नुते ॥११॥
दुर्लभं मानुषं जन्म प्राप्य चेद् ब्रह्म नो चितम् ।
महत्यस्य विनष्टिः स्यादितिवेदानुशासनम् ॥१२॥
"भूतेषु भूतेषु विचित्य धीराः" प्रत्यञ्चमात्मानमुदारवीराः ।
लोकादमुष्मादभिमानरूपान्निवृत्त्य ते मुक्तिसुखं लभन्ते ॥१३॥

(सम्पादकः)

ॐ

* दर्शनाऽविरोधसमीक्षा

(वार्त्तिकम्)

प्रज्ञानानन्द-सन्मात्र-मद्वयं स्वप्रभं महः ।
महामायं वियद्वद्यापि चिन्तये बोधलब्धये ॥१॥
भूत-भौतिक-सर्गात्मा यदविद्या-समुत्थितः ।
तद्विद्यैव च बाध्यत्वं भजते तमहं भजे ॥२॥

५—"द्वितीयाद्वै भयं भवति" इति श्रुतेः ।

६—मुञ्जादिषीकामिव देहाद्यनात्मसङ्घान्न पृथक् कृतं विवेचितमिति यावत् । "तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण" इति कठश्रुतेः ।

* The fifth Indian Oriental Conference इत्यत्र परिषदि समर्पितोऽयं निबन्धः संस्कृतविभागस्य दुष्प्रबन्धादनादराच्चाप्राप्तकालतया न पठितः । (सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्माद्वैत-महाम्भोधेः कल्पनामारुतोद्धुताः ।
तत्रैव लीनतां यान्ति कल्पनावाद-वीचयः ॥३॥
व्याचष्टे दर्शनान् वादान्गूढान्व्यासधियोहितान् ।
गुरु-दर्शित-मार्गेण नृसिंहस्तार्किकः कविः ॥४॥
प्राच्यादि-नाना-देशेभ्यः स्रवन्त्यः सरितो यथा ।
सागरे संस्थितिं यान्ति तन्मात्राश्च भवन्ति ताः ॥५॥
तथा नाना कथा भिन्न-भिन्नराद्धान्तभाविताः ।
परे तत्त्वेऽद्वये शान्ते भजन्ते निर्वृतिं पराम् ॥६॥
आपाततो दर्शनानां विरोधो यः प्रतीयते ।
लोकेस्मिँल्लोक-हृदये नाभीष्टं तन्महात्मनाम् ॥७॥
अयमापात-विद्वेषो दर्शने प्रतिभाति यः ।
सिद्धान्तीयभिदाहेतु र्बुद्धिमान्व्यापनुत्तये ॥८॥
सत्सु सिद्धान्त-भेदेषु वादजल्पादिकाः कथाः ।
प्रवर्त्तन्तेऽन्यथा तासां रूपं निष्फलतामियात् ॥९॥
नैका मतिर्मनुष्याणां सर्वत्र सर्वदा सदा ।
दृश्यते न च भाव्येतत् स्वभावो भिद्यते यतः ॥१०॥
मन्द-मध्योत्तमाः सन्ति नराः प्रकृति-भेदतः ।
सत्त्वादि-गुणभेदेन ततस्तेषां प्रवृत्तयः ॥११॥
गुणभेदं पुरस्कृत्य शास्ति शास्त्रं हितं नृणाम् ।
तैर्थिका नैव भोगेच्छा-लम्पटा अभवन्पुरा ॥१२॥
यथाभूतार्थ-चिख्यापयिषया कृतिमत्तमाः ।
निर्भ्रान्तास्तत्त्ववेत्तारः करुणावरुणालयाः ॥१३॥
परदुःख प्रहाणेच्छानिर्मलस्वान्तवृत्तयः ।
आप्ता यथार्थवक्तारः परित्यक्त-निजार्थकाः ॥१४॥
कथमेतेऽन्यथा लोकान्विरोधार्थमुपादिशन् ।
विरोधाय प्रयासन्ते व्यधुरित्येतदद्भुतम् ॥१५॥
तस्माद्धि भूमिकाभेदं सर्वं शास्त्रं विविच्यताम् ।
न बुद्धिभेदञ्जनयेदित्याहार्जुनसारथिः ॥१६॥
इतीदं सर्व-सिद्धान्त-सार-सूत्रमसूत्रयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यैवाग्रे प्रपञ्चोऽयं ज्ञायतां मुनिपुङ्गवैः ॥१७॥
अस्मिन्नल्पीयसि ग्रन्थे श्रुतिमार्गानुयायिनाम् ।
दर्शनानि विचार्यन्ते वेदरीत्या पुमर्थता ॥१८॥
यतस्तेष्वेव मन्येत मया दर्शनशालिना ।
नास्तिकानामतस्तानि नैवात्रालोडितान्यपि[1] ॥१९॥
मदर्थित्वा विरोधस्य भावनामञ्चर्चिताम् ।
अविरोधं दर्शयिष्ये सोपपत्ति समूलकम् ॥२०॥
सङ्क्षिप्य वर्णये नात्र विस्तरो मम वाञ्छितः ।
द्रष्टव्योऽसौ "समीक्षाख्ये"[2] ग्रन्थे मद्रचिते बुधैः ॥२१॥
विश्व-दर्शन-सिद्धान्त-सम्भिदा भिदया सह ।
आवर्णि यत्र निःशङ्कं प्रादर्शि विश्व-रूपता ॥२२॥
प्रेरणार्थाद् दृशेर्धातो र्भावे वा करणे ऽथवा ।
प्रत्यये घञितिख्याते कृते "दर्शन"[3] साधनम् ॥२३॥
दृश्यतेऽनेन यत्तत्त्वं दृश्यते वेति "दर्शनम्" ।
प्रमायाः साधकं[4] यद्यद् "दर्शनं" तदिहोच्यते ॥२४॥
भावे दर्शनशब्देन प्रमैवेत्यभिधीयते ।
एवमक्षादि-मानेषु योगशक्त्या प्रवर्तते ।
"दर्शनं" पदमेतद्धि नाऽत्र कार्या विचारणा ॥२५॥
ननु वेदादिशास्त्राणि वदेयुर्दर्शनाख्यया ।
प्रमासाधनकत्वाच्च परं नैतद् व्यवस्थितम् ॥२६॥
इति चेन्न यतस्तेषु व्यवहारो न दृश्यते ।
दर्शनस्य समाख्यायाः षट्स्वेव पर्याप्तिता ॥२७॥
वस्तुतो योगरूढिर्नो मता न्यायादिदर्शने ।
मानमेयादितत्त्वार्थ-प्ररूपण-परायणे ॥८॥

१—मया आलोडितानि अभ्यस्तान्यपि अत्र नालोडितानि न विवेचितानीति तन्त्रणार्थोबोद्धव्यः ।

२—"तन्त्रचक्रवर्त्तिसमीक्षा" इति नाम्नि प्रारब्धरचने विस्तृते ग्रन्थान्तरे ।

३—"दर्शन" पदसिद्धिरित्यर्थः ।

४—करणमित्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्यायादिदर्शनेष्वस्य रूढिमेव परे जगुः ।
अन्ये तु कुशलादिवल् लक्षणार्थश्च मन्वते ॥२९॥
फले नैव विशेषः स्यात् सारदर्शनशालिनाम् ।
मतमेतत्प्रशस्तं मे भाति निष्कण्टकं यतः ॥३०॥
"दृशि" पक्षेऽपि ते ते स्युर्ग्रन्था दर्शनसञ्ज्ञया ।
व्यवहारपथम्प्राप्ता औपचारिकवर्त्मना ॥३१॥
प्रतिपाद्यश्च यत्तत्वं ग्रन्थास्तत्प्रतिपादकाः ।
तेषु दर्शितसम्बन्धात् पदं दर्शनमागतम् ॥३२॥
प्रातिस्विकपदार्थीयविषयतानिरूपिता ।
याऽस्ति विषयिता नाम तद्धत्वं "दर्शनं" मतम् ॥३३॥
परस्परं विरुन्धन्ति सर्वाण्येतानि नित्यशः ।
जिज्ञासु-मनसि भ्रान्तिं जनयन्तीति निश्चितम् ॥३४॥
बुद्धिङ्गतो विरोधोऽयं भारतक्षतिकृन्मतः ।
हूयेरंस्तु कुतो नैते[1] पण्डितैर्वडवानले ॥३५॥
सालोक्यं सार्ष्टिः सायुज्यं शुद्ध-स्वाराज्यमेव यत् ।
पाषाणकल्पं तत्सर्वं हीयतां द्राङ् नरोत्तमैः ॥३६॥
कश्चिदाह व्यवस्थातो नाना जीवाः स्वयञ्जडाः ।
मनोयोगेन ज्ञानादिगुणयुक्ता भवन्ति ते ॥३७॥
अपरे निर्गुणानाहुश्चेतनाँश्चित्स्वरूपकान् ।
आत्मनो दृशिमात्रत्वान्न तत्रातिशयो मतः ॥३८॥
एकमेवाऽद्वितीयं तद् निर्गुणं ब्रह्म वर्ण्यते ।
श्रुतिर्द्वितीयाद्वै भीतिं ब्रूते निर्दोषमात्मनः ॥३९॥
एवमात्मनि धर्माणां सत्त्वाऽसत्त्वविरोधतः ।
दूरं गता वस्तुकथा श्रौतवादाभिमानिनाम् ॥४०॥
सर्वे मुक्तिकथाकाचमालाजपपरायणाः ।
मुक्तिस्वरूपे कद्वादान् बहुशो हि लपन्ति ते ॥४१॥
एकविंशतिदुःखानां ध्वंसो मुक्तिरितीर्यते ।

१—दर्शनग्रन्थाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काणादैर्गौतमैरत्र मतसाम्यं प्रदर्शितम् ॥४२॥
यन्न दुःखेन सम्भिन्नं नच ग्रस्तमनन्तरम् ।
तादृशं स्वर्गमेवाहुर्मुक्तिं कर्मठपुङ्गवाः ॥४३॥
चितिस्वरूपावस्थानं कैवल्यं मोक्ष उच्यते ।
पातञ्जला ध्यानपरा एवमाहुर्निरर्गलम् ॥४४॥
आध्यात्मिकादिदुःखानामत्यन्तं विरतिर्मता ।
इत्येवं मुक्तिमाहुस्ते साङ्ख्यास्तत्त्वविशारदाः ॥४५॥
वैदान्तिका जगुर्मोक्षं ब्रह्मरूपेण संस्थितिम् ।
न निरोधो नचोत्पत्तिर्न बद्धो नच साधकः ॥
न मुमुक्षुर्नवैमुक्तिरित्येषा परमार्थता ॥४६॥
अजातसत्तावादोऽयं परा निष्ठा महात्मनाम् ।
वशिष्ठप्रभृतिप्रोक्ता सर्वेषामुत्तमा यतः ॥४७॥
एवं जगत्कारणेऽपि विवादो बहु दृश्यते ।
केचिदाहुर्जगन्मूलं परमाणुचतुष्टयम् ॥४८॥
प्रधानमपरे ब्रह्म शुद्धं मायाविवर्जितम् ।
अन्ये मायाविशिष्टं तत्परे निर्हेतुकं जगुः ॥४९॥
षट्पदार्थवदाः केचित् सप्ततत्त्वविदः परे ।
अन्ये षोषडशसङ्ख्याकान् पदार्थाञ्जगुरूहिनः ॥५०॥
सम्बन्धेऽपि विवादोऽस्ति वावदूकैः प्रचालितः ।
नैयायिकाः समवायं तादात्म्यमपरे जगुः ।
भेदाभेदं वदन्त्यन्ये तादात्म्यं कल्पितं परे ॥५१॥
सतः सदेव जायेत प्राहुः साङ्ख्याः सुनिश्चितम् ।
सत एवाऽसतोजन्म काणादं मतमद्भुतम् ॥५२॥
उत्पत्तिन्तामनिर्वाच्यां वदन्ति ब्रह्मवादिनः ।
अद्वैतबोधावतीर्णैर्वस्तुतोऽजातवादिनः ॥५३॥
जीव एव क्रिया कर्त्ता जीवो भोक्ता स्वकर्मणाम् ।
इत्याहुस्तर्कनिष्णाताः काणादा गौतमा अपि ॥५४॥
कर्त्री बुद्धिः पुरुषस्तु भोक्ता निर्लेपकः स्वयम् ।
अत्र नैव विशेषोऽस्ति साङ्ख्ययोगविचारिणाम् ॥५५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः" ।
कर्तृत्वादिकधर्माणां तस्मिन्नेव व्यवस्थितिः ॥५६॥
"धीर्ह्री श्री" रितिश्रुत्यैव स्पष्टमाख्यायते बुधाः ! ।
विरोधेत्वनपेक्षं स्यात् सर्वं स्मार्त्तं न संशयः ॥५७॥
तस्मादात्मा न कर्त्ताऽस्ति नच भोक्ता स्वयम्प्रभः ।
न वाचा नाऽपि मनसा गम्यः साक्ष्यद्वयोऽव्ययः ॥५८॥
इतिवेदान्तसिद्धान्त-विदुषां मतमुत्तमम् ।
त्याज्यमन्यद्धि निःसारं भणन्त्येवं विनिर्भयाः ॥५९॥
केचिच्छब्दस्य नित्यत्वं स्थापयन्त्यपरे जगुः ।
स्फोटमेव परं तत्त्वं जगतः कल्पना यतः ॥६०॥
संयोगादि-समुत्पन्नः शब्दोऽनित्यो घटादिवत् ।
इत्याख्यान्ति महातर्क-खड्ग-खण्डित-पण्डिताः ॥६१॥
ग्रन्थेऽस्मिन्नल्पवपुषि विस्तरो न प्रदर्शितः ।
नाना वादविरोधे तु वासना हेतुरुच्यते ॥६२॥
एकस्मिन्नेव दोषोऽयं दृश्यते दर्शने महान् ।
क्वचिदाभासवादोस्ति बिम्बवादः क्वचिन्मतः ॥६३॥
अवच्छेदवादोऽन्येभ्यो रोचते ब्रह्मदर्शते ।
एवं श्रौतानि सर्वाणि दर्शनानि महान्त्यपि ।
विरुद्धान्येव बोध्यानि त्याज्यानि शमभीप्सुभिः ॥६४॥
अज्ञातसम्प्रदायानामनाध्यायैकवाक्यताम् ।
गुरुवासविहीनानां चित्रा वाचाः स्रवन्ति हि ॥६५॥
सर्वो लोकः सुखाभीप्सा-व्याप्तो दुःखजिहासया ।
आप्लुतो दृश्यते लोके तथैव यतते पुनः ॥६६॥
इष्टसाधनताबुद्ध्या प्रेप्सितं प्राप्यते जनैः ।
प्रवर्त्तमानैः शब्दादि-विषयेष्विति लोक्यते ॥६७॥
एतद्विपर्यये हातुमिष्टं हीयेत तैरपि ।
सुखं वा दुःखहानं वा सर्वेषामिष्टमेव नः ॥६८॥

१—सम्प्रत्यविरोधपक्षमुत्थापयति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखञ्च सुखहानं वा कोऽपि नेच्छति मानवः।
नेदं बहूपपाद्यं स्यात् सर्वाऽनुभवसम्मतम् ॥६९॥
इष्टाऽनिष्टे स्ववाञ्छैव लोकानां शरणं मतम्।
इति विज्ञाय शास्त्रेण तत्स्वरूपं निरूप्यते ॥७०॥
इदमिष्टमिदं नेष्टं ज्ञायतां शास्त्रवर्त्मना।
"तस्माच्छास्त्रं प्रमाणन्ते कार्याऽकार्यव्यवस्थितौ"।
इत्याह भगवान् कृष्णो महायोगेश्वरो हरिः ॥७१॥
सुखं मे स्यान्नितान्तं यद् दुःखं माभूत्कदाचन।
इति कृत्वा सातिशयं सुखं यद्दुःखमेव तत् ॥७२॥
विवेकिनो विजानन्ति परिणामादिहेतुभिः।
परिणामे विषमिव सुखं यद्रारजसं स्मृतम् ॥७३॥
अनादिदुःखव्यूहेन भूतग्रामं समाप्लुतम्।
विलोक्य योगी तद्दुःख-नाशहेतुं प्रपद्यते ॥७४॥
तद्दुःखविनिवृत्त्यर्थ मुपायाः शास्त्र-वर्णिताः।
सम्यग्दर्शनरीत्यैव यथाधिकृतिवर्त्मना ॥७५॥
वातपित्तकफादीनां विकारप्रभवा भुवि।
सन्त्यनेके महारोगा रोगिणश्चाप्यनेकधा ॥७६॥
स्वास्थ्यकामा हि ते सर्वे दुःखहेत्वन्तवेदिनः।
ते देशिकेन्द्रं वैद्येन्द्रं प्राप्नुवन्ति निरामयम् ॥७७॥
कथयन्ति निजं दुःखं यथावद्विनयान्विताः।
आतुरा दीनवचसा यथा स्वास्थ्यं लभेमहि ॥७८॥
हे! भगवन्! दीनबन्धो! शरणं त्वामुपागताः।
*विधेहि, कश्मलं येन क्षिप्रं नो नश्वरं भवेत् ।७९॥
असावपि परिज्ञात-वैद्यशास्त्र-महत्त्वतः।
ज्ञात्वा निदानं रोगाणां तच्छान्त्यै यतते ततः ॥८०॥
विविधा रोगिणस्तत्र स्थितास्तन्मुख-संश्रिताः।
विविच्य तान्यथान्यायं योगं तेभ्यो ददात्यसौ ॥८१॥
तस्य तेषां यदुद्देश्य मेकमेव हि स्वस्थता।

---

* "तथा विधेहि क्षिप्रं नः कश्मलं येन नश्यतु" इति पाठान्तरम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं रोगस्वरूपेषु तत्तद्योग-विधिष्वपि ।
तत्तत्पथ्ये विपथ्ये च विद्यते ह्यन्तरं महत् ॥८२॥
नानाक्रिया-महायोग-भेदं विज्ञाय कश्चन ।
पुरस्थितो महामोहं प्राप्नुयात्तस्य सन्निधौ ॥८३॥
न दोषो वैद्यराजस्य न ज्वरार्त्तिमतां नृणाम् ।
न चिकित्सामहाशास्त्रकृतां वा निश्चितो भवेत् ॥८४॥
किन्तु तस्यैव मन्दस्य स्वाज्ञानेन विजृम्भितः ।
विरोधभावनो दोषो यथैवं ज्ञायतां तथा ॥८५॥
प्रक्रियाभेदभिन्नेषु दर्शनेषु विभाव्यताम् ।
स्थितिभेदमुपादाय वृत्तेषु निखिलेष्वपि ॥८६॥
गौरोऽहञ्च कृशोऽहं स्यां गच्छामि लङ्घयामि च ।
इति देहेन्द्रियादीनां धर्मानध्यस्य वर्तते ॥८७॥
तत्र तत्र क्रियास्वज्ञो नरो नानन्दभाक् परम् ।
ततः पुण्यञ्च पापञ्च करोति विविधं यदा ॥८८॥
ततः सुरासुरादीनां लोकानाप्नोति नित्यशः ।
घटीयन्त्रवदस्यायं संसारः सम्प्रवर्त्तते ॥८९॥
एतादृशं जनं स्थूलमतिं विज्ञाय गौतमः ।
देहादिभिन्नमात्मानं बोधयितुं प्राभवन्मुनिः ॥९०॥
मिथ्याज्ञानाद्दोषजन्म द्विधा तस्मात्प्रवर्त्तना ।
प्रवृत्तिहेतुकं जन्म जन्मनः कश्मलं महत् ॥९१॥
न ह वै सशरीरस्य पुंसो दुःखाद्यभावना ।
अशरीरं वावसन्तमित्याह श्रुतिरात्मना ॥९२॥
आत्मज्ञानं विना नास्ति दुःखात्यन्तनिवर्त्तनम् ।
इत्यत्र न विवादः स्यात् दर्शनेषु कथञ्चन ॥९३॥
श्रवणादिसाधनं तत्र तदर्थं श्रुतिचोदितम् ।
उपायेन विनोपेय-प्राप्तिर्दृष्टा न कुत्रचित् ॥९४॥
इहामुत्रविरक्तानां भावनाभावितात्मनाम् ।
उत्तमानां विना रोधं श्रुत्या ज्ञानं प्रवर्त्तते ॥९५॥
श्रुतेऽपि श्रुतिवाक्येऽस्मिन्येषां दोषवशात्पुनः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्त्वबोधो न जायेत मननं स्यात्तदर्थवत् ॥९६॥
मननप्रधाने न्याये तेषां स्यादधिकारिता।
ऋते तस्मात्प्रमेयादिसंशयाद्यनिवृत्तितः ॥९७॥
साधनाऽसाधनाभासाऽधिकारानधिकारिता।
फलाऽफलविचारश्चाऽप्युत्तरन्त्वसदुत्तरम् ॥९८॥
कथं पुनः कथाः कास्ताः कथाभासाश्च कीदृशाः।
वातपुत्रमुखादीनां मुद्रणे का प्रकारता ॥९९॥
वेदतत्त्वमहाकल्प-तरो रक्षा च कीदृशी।
कथं कण्टकशाखावत् तर्कप्राकारयोजना ॥१००॥
वेदमार्गमहाघाटी-मारकाणां हतिः कथम्।
इत्यादिरीतिप्रागल्भ्यशिक्षणे गौतमं मतम् ॥१०१॥
फलाऽविरोधिविज्ञेयं प्रेत्यभावसमर्थकम्।
काणादश्चाऽपि तद्वत्स्यात्प्रमेयार्थस्य पोषकम् ॥१०२॥
प्रमाणे सति विज्ञाते प्रमेयं सुकरं भवेत्।
विज्ञातमिति विज्ञानां परामर्शो महाधियाम् ॥१०३॥
साङ्ख्यमप्यंशतो मोक्ष-स्वरूपं प्रतिपादयत्।
आत्मज्ञानं विवेकाख्यं वक्ति तत्साधनं परम् ॥१०४॥
उच्चावचैरदृष्टैर्वा दृष्टै र्वा सुखसाधनैः।
नात्यन्तं दुःखविध्वंसो नचैकान्तमनश्वताम् ॥१०५॥
चितिशक्तिरसङ्गैव भोक्तृभावान्विता परा।
शुद्धानन्ताऽतद्विषया कूटस्था साङ्ख्यसम्मता ॥१०६॥
तत्त्वज्ञानोपयोग्येव पुरुषस्य विवेचनम्।
विवर्त्तप्रज्ञोपारोही परिणामश्च कीर्त्तितः ॥१०७॥
तस्मादस्याऽपि न स्वार्थे तात्पर्यमवसीयते।
यत्परः शब्द इत्याहुर्न्यायं न्यायविदां वराः।
अनीश्वरीयवादोऽपि श्रौते साङ्ख्ये ऽविरुद्धताम्।
भजत्येव विचारेण तत्परन्यायवर्त्मना॥
आपातदृष्ट्या भात्येषा प्रौढिस्तत्र विचारणे ॥१०८॥
येषां विक्षिप्तवृत्तीनां शास्त्रतत्त्वे परात्परे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बुद्धिः स्थैर्यं न संधत्ते तदर्थं योग ईरितः ॥१०९॥
तत्राप्यस्याधिकारस्य भेदं मत्वा विचारितः
उपायश्चित्तरोधस्य यमाद्यष्टाङ्गसाधनम् ॥११०॥
श्रुते मते च तत्त्वार्थे वृत्तिस्थैर्यकृते परे।
निदिध्यासनरूपेण भूमि स्तत्राऽवतारिता ॥१११॥
योगप्रत्युक्तिवादोऽपि न विरोधसमर्थकः।
विवक्षारहिते पक्षे चरितार्थो यतो ह्यसौ ॥११२॥
न विवक्षा प्रधानस्य योगे योगविदां मता।
अणुवादो यतस्तत्र कान्दिशीक उदीरितः ॥११३॥
अविकारिस्वरूपस्य पुरुषस्य प्रदर्शनम्।
विकारं कञ्चिदापाद्य शिष्यबुद्धौ स्थिरं भवेत् ॥११४॥
अथैवं पूर्वमीमांसा द्वादशाध्यायलक्षणी।
उत्पत्त्यादिविधे रूपं दर्शयन्ती न दुष्यति ॥११५॥
गुणकर्मार्थकर्मादिशेषशेषिप्रदर्शनम्।
क्रत्वर्थपुरुषार्थादिविधिप्राशस्त्यबोधकम् ॥११६॥
अर्थवादादिकं सर्वं तत्र यद्यद्विचारितम्।
तत्सर्वं मुपकारार्थं कर्मकाण्डस्य निश्चितम् ॥११७॥
जन्मजन्मान्तरोपात्ताः पापपर्वतराशयः।
यद्भारचूर्णितश्चित्तं मलीनं कश्मलं महत् ॥११८॥
तच्छुद्धेरुपकारार्थमिय मेव प्रदर्शयेत्।
नहि स्थूलमलापाये वस्त्रे क्षारादियोजना ॥११९॥
मीमांसिते कर्मवाक्येष्वद्धा श्रद्धाजुषां तथा।
प्रवृत्तौ जायमानायां निर्मले मानसे ततः ॥१२०॥
वैराग्यादिकसम्पत्तावधिकारः स्फुटो भवेत्।
तत्रत्यः स्वर्गवादादिर्गुडजिह्वकया मतः ॥१२१॥
एवं सङ्कर्षणं काण्डं व्याख्यातमपि मन्यताम्।
मीमांसापरभागत्वात् नात्रकार्या विचारणा ॥१२२॥
या च मूर्धाभिषिक्ताऽस्ति सर्वदर्शनशेषिणी।
मीमांसा पूजिताचार-विचारा परमोत्तमा ॥१२३॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वैर्बुधैः सम्प्रदाय-प्रवर्त्तन-महोदयैः ।
तत्र निर्मलचित्तस्य पूर्वभूमिप्रसादतः ॥१२४॥
काम्यादि-हानतो नित्यनैमित्तिक-प्रभावतः ।
इहाऽमुत्र विरक्तस्य दोषदृष्ट्या विवेकिनः ॥१२५॥
शमादिषट्सम्पत्तौ मुमुक्षोरधिकारिता ।
विवक्ष्यते शास्त्र विदां धौरेयैर्मुनिभिर्बुधाः ! ॥१२६॥
शिवं शान्ताऽद्वयं तुर्यमजरं निर्भयं पदम् ।
अखण्डानन्द-सन्दोह-चिन्मात्रं निष्प्रपञ्चकम् ॥१२७॥
ज्ञात्वा संसृतिमत्येति काष्ठा सा परमा नृणाम् ।
मुक्ते र्यतः प्राणिमात्र-मत्यन्तं प्रेम वाञ्छति ॥१२८॥
तस्यैवं परतत्त्वस्य दुर्ज्ञेयस्य कुतार्किकैः ।
शब्दमात्रैक-वेद्यस्य प्राज्ञानुभवरूपिणः ॥१२९॥
संशोधने प्रवृत्तं यद्दर्शनं परमं महत् ।
न तस्यास्ति विरोधस्य कथा कुत्रापि दर्शने ॥१३०॥
निष्प्रपञ्चे परे तत्त्वे द्वैतभाव-विवर्जिते ।
कुतो विरोधवार्तायाः सम्भवः स्याद्विचारिते ॥१३१॥
अत्राहुरद्भुतां युक्ति-मुक्ति-युक्ति विशारदाः ।
अस्ति कश्चिन्महावैद्यो वैद्यशास्त्र-परार्थवित् ॥१३२॥
पीयूषपाणिर्निर्लोभी परकश्मलवारणे ।
लग्नैकचित्त-सन्तानो रसायनविदां कविः ॥१३३॥
नानारोगातुरास्तस्य पार्श्वमायान्त्यहर्निशम् ।
नैक-रोग-परीताप-वह्नि-ज्वालाकुलाननाः ॥१३४॥
प्रभो ! मेऽस्ति महांस्तापः प्रभो ! मेऽस्ति शिरोरुजा ।
कश्चिद्वदति मे शूलं हृदये जठरे महत् ॥१३५॥
परः प्लीहानमाचष्टे तदन्यो याकृतं ज्वरम् ।
परो भगन्दरेणार्तिं कश्चिदर्शो रुजां पराम् ॥१३६॥
आर्त्तवज्वरसन्तापं तदन्यः सान्निपातिकम् ।
ब्रूतेऽन्यो गुल्मगण्डादिमन्योऽन्यामार्तिमातुरः ॥१३७॥
श्वित्रिणो दद्रुणाः केचिद् केचिन्नेत्रामयार्दिताः ।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

अङ्गसन्न्यासिनः केचित् परे क्लैब्यरुजाहताः ॥१३८॥

दृश्यते तत्र रोगाणां रोगिणाञ्चापि भिन्नता ।

विरोधो रूपहेत्वादि-परीक्षा-विषयेऽप्यसौ ॥१३९॥

औषधान्यपि कल्प्यन्ते तत्र नानाविधानि च ।

दृश्यते तत्स्वरूपेषु विरोधः सुमहानपि ॥

रोगे योगे प्रकारे च प्रत्यक्षं दृश्यते ह्यसौ ॥१४०॥

एक एवास्ति वैद्यस्तु शास्त्रं तस्य तथैव तत् ।

नाना-प्रकार-संवादमापातविमुखं बहु ॥१४१॥

स्वास्थ्यात्मके तदुद्देश्ये कस्यापि न विरोधता ।

न रोगिणां न शास्त्रस्य नच वैद्यशिरोमणेः ॥१४२॥

किन्त्वानुगुण्यमेवास्ति समानफलकाङ्क्षिणाम् ।

धातु-सात्म्य-कराणाञ्च योगानां योगिनामपि ॥१४३॥

एवं बहूनि शास्त्राणि वेदार्थस्योपबृंहणे ।

सम्प्रवृत्तानि भिन्नानि दूरतो भान्ति सूरयः ! ॥१४४॥

विषयस्य भिदा याः स्युर्याश्च ता अधिकारिणाम् ।

एकोद्देश्ये न तेषां स्याद् विरोधः सम्भवी क्वचित् ॥१४५॥

यच्चाल्प-मेधसां नूनं विरोधः सम्प्रतीयते ।

रागद्वेषान्ध-मनसा सम्प्रदाय-क्रमाऽविदाम् ॥१४६॥

नासौ प्रमाणपदवीं धत्ते वाक्यविचारणे ।

इत्यमाभाति मद्बुद्धौ स्वयञ्चापि विचार्यताम् ॥१४७॥

भगवानपि गोविन्दः श्रीमद्भागवताभिधे ।

पुराणेऽनेक-वादानां विरोधं परितो जहौ ॥१४८॥

स एव मार्गोऽद्धास्माकं हिताय परमो भवेत् ।

तस्माद् ग्रन्था अमी सर्वे पूज्या दर्शनसञ्ज्ञकाः ॥१४९॥

न्यूनान्न्यूनं द्विसहस्रं व्याख्याग्रन्थो ऽत्र वार्त्तिके ।

निर्मातुं शक्यते योऽयं मद्गुहायां विराजते ॥१५०॥

मतिभेदोह्यनिर्वार्यो ब्रह्मणाऽपि जगत्सृजा ।

विद्वांसः सारमादाय सन्तुष्यन्ति द्विरेफवत् ॥१५१॥ इति ।

इति श्री कवितार्किक (तन्त्रचक्रवर्त्ति) दर्शनाचार्य नृसिंहदेवशास्त्रिप्रणीता (तं)
" दर्शनाऽविरोधसमीक्षा" (वार्त्तिकं) समाप्ता (सम्) ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयटिप्पणयः

धन्यवादः—

श्रीहेमचन्द्रसूरिजैनपुस्तकालयाधिपतीनां श्रीदेवचन्द्रसूरीणां कोटिशो धन्यवादाः क्रियन्ते। एतै र्हि नितान्तं संस्कृतानुरागिभिरुदाराशयैः उद्योतसाहाय्यार्थं मेकशतं मुद्राणां प्रेषितम्। यद्येतादृशा महानुभावा न्यूनान्न्यूनं विंशतिसङ्ख्या अपि उद्योतसंरक्षकाः सम्भवेयुर्ग्राहकाणाञ्चान्यापि त्रिशती स्यात् तन्मन्ये पुनरुद्योतकार्यं निर्विघ्नं सञ्चलेदिति। एतेषामुदाराशयताप्रतिपादक संस्कृतानुरागितोद्भावकं भावुकाशयोपेतं प्रेषितं पत्रमविकलमेवास्माभिरधो मुद्राप्यते— तथाहि—

॥ श्रीः ॥

॥ अस्माकं विदधातु वाञ्छितफलम्-श्रीवीतरागो जिनः ॥

श्री हेमचन्द्रसूरि जैन-पुस्तकालय। बाँठियोंका उपाश्रय,
Shree Hemchandrasuri बीकानेर ताः मार्गशीर्ष कृष्णा ५, (१९२)
Jain Pustakalaya. संवत्० बाणसिद्धिनिध्येन्दुवर्षे,

अयि! कवितार्किकदर्शनाचार्यपण्डितपुङ्गवाः नृसिंहदेवशास्त्रिणः!

सौभाग्यमिदं मदीयं यन्नूनं पञ्जाबप्रान्ते लवपुरस्थमासिकपत्रमुद्योताऽभिधं प्रचलति। तस्यार्थं रूप्यकशतं धनाशेन प्रेषितं विद्यते। तद् गृह्णन्तु भवन्तो धीमन्तः, (चेत्) यदि मासिके पत्रे सर्वोपयोगिनः लेखाः प्रकाशिताः भवेयुस्तदात्ववश्यमेव जैनधर्मानुयायिनामप्युपयोगी स्यादेष उद्योतः।

विष्णुधर्मसाम्प्रदायिकाः लेखा अधिकतराः समायान्ति पत्रे, कृषिशिल्पसङ्गीतविद्याकलासम्बन्धिलेखान् यदि प्रेषका नैव प्रेषयेयुस्तथापि सम्पादकैः सहकारिसम्पादकैः प्रकाशकैश्च कृपां कृत्वा प्रतिमासं लेखाः तादृशाः प्रत्यंकं च प्रकाशयितव्याः। येन ब्राह्मणादन्यपाठकानामप्युपयोगिनो भवेयुः।

१—एतैः प्रेषिता कविता च परत्र द्रष्टव्या।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदीये समाजे नैव संस्कृतवेत्तारो विद्वांसः । येन ग्राहकतां स्वीकुर्युः । (चेत्) यदि मदीयसदृशाः पञ्चषाः वर्त्तन्ते तेऽपि बिभ्यति विष्णुसम्प्रदायगतान् लेखान् दृष्ट्वा । नाहं बिभेमि । कथं । चेतसीर्षारहितत्वात् । भारते सर्वत्रैव दरीदृश्यते साम्प्रदायिकानां पारस्परिकमतमतान्तरक्लेशः । जैनाः कथयन्ति हि वैष्णव-ग्रन्था नैव पठनीयाः । नच विप्रं प्रति पाठाध्यापनं प्रकरणीयम, शक्तिशिव-विष्णुब्रह्मोपासकाः कथयन्ति जैनग्रन्था नैवावलोकनीयाः नच पठनीयं जैन-पार्श्वे । एतादृशः दृष्टिरागो वर्त्तते । मदीयचित्ते तु नैवेति । पत्रम् प्रतिमासं नियमितरूपेणैव प्रकाशनीयम् । साध्वी खलु व्यवस्थेयम् ।

प्रतिमासमुद्योते पुस्तकालयस्य नाम संरक्षकरूपेण प्रकाशनीयम् ।

दूरस्थोऽपि समीपस्थो
यो यस्य हृदि वर्त्तते ।
यो यस्य हृदये नास्ति
समीपस्थोऽपि दूरगः ॥१॥

इत्यलम्, सुज्ञेषु
किंबहुना
भवदीयस्नेही
देवचन्द्रसूरिः ।

Fafth Indian Oriental Confernce—इत्याख्यायाः परिषदो महोत्सवः .....महता समारोहेण समजनि । दूरदूरदेशादनेके विद्वांसः समायाताः । पञ्जाबीविभागः, हिन्दीविभागः, संस्कृतविभाग इत्येवं पृथक् पृथक् भाषाविभागाः कल्पिता आसन् । आङ्ग्लानां संस्कृतोज्जीवनाय प्रवृत्तानामपि आङ्ग्लभाषामेवो-ज्जीवयतां प्रधानो विभागो (यत्रानधिगताङ्ग्लभाषस्य प्रवेशो दुर्घट आसीत्) दीप्तिशाली विशालभवनाश्चा ऽभ्राजिष्ट । परं संस्कृतविभागस्य यादृशी दुर्दशा दृष्टा तथा किं केनाऽपि लिख्येत । तामिमां प्रत्यक्षानादरसूचिकां दुर्दशामालोक्य महामहोपाध्यायकुप्पुशास्त्रिणां साभापत्ये सर्वैः पण्डितैः सम्भूय एकः प्रस्ताव उपक्रान्तः । तथाहि—

"इदं संस्कृतविदुषां सम्मेलनं सखेदं पश्यति यदस्मिन् ओरिएण्टेल-कान्फरेन्स्नाम्नि सम्मेलने संस्कृतोन्नतिमुद्दिश्य जायमानेऽपि संस्कृतस्य संस्कृतविदुषाञ्च न सम्यक् प्रवेशः, नापि समादर इति । तदेतदनौचित्यमसह-मानमिदं सम्मेलनं साऽनुरोधं सविनयञ्च कान्फरेन्स्परिचालकान् प्रार्थयते यदतोऽग्रे भाविषु सम्मेलनेषु मुख्य एव स्थाने संस्कृतनिबन्धानामपि पाठावसरो देयः । प्रौढाः संस्कृतविद्वांसश्चाप्यामन्त्रणीया इति । येन परस्परं परस्परान्वेषण-परिचयः स्यात्, एकतरपक्षमात्रोद्घोषणेन न कोऽपि लाभ इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सभापतिः—महामहोपाध्याय कुप्पुस्वामी शास्त्री ।

प्रस्तावकः—महामहोपाध्यायगिरिधरशर्म्मा चतुर्वेदी ।

अनुमोदकः—नृसिंहदेवशास्त्री उद्योतसम्पादकः ।

समर्थकः—महामहोपाध्यायहरनारायणशास्त्री ।

काशीस्थो वामदेवशास्त्री च ।

अपि च पञ्चापप्रान्तीयविदुषां कृते शोकस्थानमिदमासीद् यदस्मिन्नेव देशे सम्मेलनम्, एतद्देशीयाश्च विद्वांसो महानैयायिक श्री हेमराजप्रभृतयः—

अमृतसरमूलत्राणादिस्थानिनः पण्डितवर्या नैव आमन्त्रिताः । केवलं भाण्डारिमहोदयप्रबोधनानुसारं कतिपये (प्रसिद्धाऽप्रसिद्धाः पण्डिताः) एव आमन्त्रिताः । लवपुरवासिनोऽपि पण्डिता नादरपूर्वकं सूचिताः, इतरेषां तु का कथा । तस्य कारणमिदमेवास्ति यत् "पञ्चापप्रान्ते कोऽपि प्रौढो विद्वान् नास्ति" इति पञ्चापयूनिवर्सिटीसंस्कृतविभागीयपारिषद्यानां निर्मूलो महानेवाग्रहो वर्त्तते । विचित्रा दैवगतिः, तां को वारयेत् । प्रत्यक्षापलपिष्वप्यधिकारिषु कस्य पाण्डित्यसामर्थ्यं गण्येत । अयि ! पञ्चापपण्डिताः ! किमद्यापि निद्रां न हास्यथ । भवतामधिकाराः परैः पराक्रम्यन्ते, भवन्तश्च परैरभिभूयन्ते, परे भवदीयदेशादेव लाभं प्राप्य भवतो भवद्वैदुष्यञ्च निन्दयन्ते, परं भवन्तो घोरघोरां महानिद्रामेवोपासते । हन्त ! हन्त ! हन्त !

श्रीमार्त्तण्डपञ्चाङ्गम् ।

महानयं हर्षावसरः यत् पञ्चापदेशान्तर्गतशतद्रुनदतीरवर्त्तिरोपडनिकटस्थ "कुराली" ग्रामवास्तव्येन ज्योतिर्विदा मिश्रोपाह्व पं० "मुकुन्दवल्लभ" शर्मणा विरचितं प्रकाशितञ्च "श्रीमार्त्तण्डपञ्चाङ्गं" नाम वैक्रम सं० १९८६ कृते तिथिपत्रमस्माकं दृष्टाववतीर्णम् । एतस्य मुद्रणाद्याकारप्रकारश्चातीवशोभनः । दैवज्ञानां कृते अत्यपेक्षिताः सारण्यादिविषया बहुस्फुटीकृताः । एतस्य निर्माता विद्वान् नैव साधारणः । किन्तु—श्री पं० गोविन्ददास आपटे M. A. B. S. C. गणकचक्रचूडामणीत्याद्युपाधिधारिणां तथा ज्यौतिषयन्त्रालयाध्यक्षाणां श्रीजयपुरमहाराजाश्रितसिद्धान्तपञ्चाननपूज्य पं० केदारनाथसाहित्यभूषणानां शिष्योऽयं पूज्यो विद्वान् । एतस्य प्राप्तिस्थानम्—

पं० हरदेवशर्मा तिवारी – मैनेजर श्रीमार्त्तण्ड ज्योतिषकार्यालय
"कुराली" मुत्तसिल रोपड़ पञ्जाब

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रियपञ्चकम् ।

लेखकः—जैनाचार्यः श्री देवचन्द्रसूरिः—बीकानेर ।

स्वेच्छा-विहार-सुखतो निवसन्नगानां भक्षन्वने किशलयानि मनोहराणि ।
आरोहणाङ्कुशविनोदनबन्धनादि दन्ती त्वगिन्द्रियवशः समुपैति दुःखम् ॥१॥
तिष्ठञ्जलेऽतिविमले विपुले यथेच्छं सौख्येन भीतिरहितो रममाणचित्तः ।
गृद्धो रसेषु रसनेन्द्रियतोऽतिकष्टं निष्कारणं मरणमेति षडीक्षणोऽत्र ॥२॥
नाना-तरुप्रसवसौरभ-वासिताङ्गो घ्राणेन्द्रियेण मधुपो यमराजधिष्ण्यम् ।
गच्छत्यशुद्धमतिरत्रगतो विशक्तिं गन्धेषु पद्मसदनं समवाप्य दीनः ॥३॥
सज्जातिपुष्प कलिकेयमितीव मत्वा दीपार्चिषं हतमतिः शलभः पतित्वा ।
रूपावलोकनमना रमणीयरूपे मुग्धोवलोकनवशेन यमास्यमेति ॥४॥
दूर्वाङ्कुराशनसमृद्धवपुः कुरङ्गः क्रीडन् वनेषु हरिणीभिरसौ विलासैः ।
अत्यन्तगेयवरदत्तमना वराकः श्रोत्रेन्द्रियेण यमवर्त्ति मुखं प्रयाति ॥५॥

श्रीशस्तुतिः ।

(लेखकः नारायण शङ्करशर्मा हेब्वालकरः सुरपुरं निजामराज्यम्)

सुश्रीक्षीरोदतनयाहृच्चकोरसुधाकरः ।
श्रीमानुदधिगंभीरः पीताम्बरधरः परः ॥१॥
संनुवद्भक्त संदोहत्रिदशालयपादपः ।
सद्योगि स्वान्तपाथोजप्रद्योतनसमः प्रभुः ॥२॥
प्रतोषित सुरस्तोमः, संसारार्णवतारणः ।
सुजना नन्ददः शार्ङ्गी, धृतकौस्तुभभूषणः ॥३॥
वियत्तुल्यप्रभाकान्तः, शरच्चंद्रनिभाननः ।
पातु नः सर्वदः शौरिः सर्वदा कंजलोचनः ॥४॥

[एतच्छ्लोकप्रत्यर्धद्वितीयाक्षरसम्मेलनेन "श्रीमानुद्योतो जयतु" इत्याशीः प्रस्फुरति]

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ॐ

जैनदर्शनकुञ्चिका ।

(ले० कवितार्किक—नृसिंहदेवशास्त्री दर्शनाचार्यः)

ओरियण्टलकालेज मेगजीननवम्बर १९२६ इत्यत उद्धृता ।

स्याद्वादसिद्धान्तसुधाभिवर्षं दयाव्रतं वीतसमस्तरागम् ।
अद्वैतनिष्ठोपि सदेकभावादर्हन्मुनिं स्वे हृदि मानयामि ॥१॥

तत्रादौ जिनशब्दार्थविचारः—

'जि' जये-अस्माद्धातोः 'इण्षिञ्जिदीङुव्यविभ्यो नक्' (उ० ३।२) इत्यौणादिकसूत्रेण नकि कृते जयति संसारदुःखमिति 'जिन' इति रूपं सिद्ध्यति। व्याकरणान्तरे तु 'जीण्शीदीबुध्यविमीभ्यः कित्' (उ० २६१) इति सूत्रं पठित्वा 'न' प्रत्यये कृते रूपं साधितम्। जयति रागद्वेषमोहान् इति 'जिनः'। यदि प्रकृते व्युत्पत्तिलभ्यार्थमेव प्रवृत्तिनिमित्तभावं नीत्वा व्याकरणेनैवोक्तपदस्य शक्तिग्रह उन्नीयेत तर्हि यः कोपि यथाकथञ्चिज्जयशाली सः सर्वोपि 'जिन' पदस्यार्थः=जिनपदाभिलप्यः स्यात्, यत्किञ्चिज्जयत्वस्य सर्वत्रैव सम्भाव्यमानत्वात्। कोशात्तु—'मारजिल्लोकजिज्जिनः' (अमर०) इति, "अर्हन् जिनः पारगतस्त्रिलोकजित्" इत्यादि च कोशान्तरेष्वपि ज्ञेयम्। कालवित् चीर्णाष्टकर्मा परमेष्ठ्यधीश्वरः' (अभि० चिं०) 'जिनोर्हति च बुद्धे च पुंसि स्याज्जित्वरे त्रिषु' शब्दकल्पद्रुमे च, जिनोऽतिवृद्धे (पुरातने) 'जित्वरे' इति मेदिनी इत्यप्युक्तम् इत्येवञ्जातीयकामराभिधानचिन्तामण्याद्याद् अर्हति, बुद्धे, जयशालिनि च 'जिन' पदशक्तिर्ग्रहीतव्या भवति। तस्मात्-'शब्दानां व्युत्पत्तिनिमित्तमेव प्रवृत्तिनिमित्तं=व्यवहारस्य प्रयोजकमिति नियमो न सार्वत्रिकः। अतोऽस्य नियमस्यासार्वत्रिकत्वात् पाचकादिशब्दस्य द्वयोरैक्यसत्त्वेपि गवादिशब्दस्य व्यभिचारदर्शनात् जिनत्वरूपाखण्डोपाधिनैव जिनशब्दस्य सङ्केतग्रहः=शक्तिग्रहः। वयन्तु रूढिवत् व्युत्पत्तेरपि पदार्थोपस्थापकतायां बाधाभावात् रूढिविषयस्येव व्युत्पत्तिविषयत्वस्यापि मुख्यत्वे शास्त्रकाराणां व्यवहारदर्शनात् रूढ्या प्रतिरुद्धाया एव व्युत्पत्तेः पदार्थोपस्थापकत्वाभावाच्च यथा गवादिशब्दानां गोत्वरूपार्थे रूढिः गच्छतीति गौरिति व्युत्पत्तिलभ्यं सन्तमपि गमनकर्तृत्वरूपमर्थं प्रतिबध्नाति, तद्वत् 'जिन' पदं पङ्कजादिवद् योगरूढमेव मन्यामहे। "यन्नाम स्वावयववृत्तिलभ्येनार्थेन समं स्वार्थस्यान्वयबोधं जनयति तन्नाम योगरूढ"मिति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्षणस्य सत्त्वात् । अस्तु—यथा वा तथा वा सङ्केतग्रहस्य वृद्धव्यवहारपूर्वकत्वात् कोशप्रामाण्याच्च त्रिष्वप्यर्थेषु "जिन" पदस्य शक्तिः, हर्यादिपदवच्चास्य नानार्थकतायामपि न विरोधः । दृश्यते च 'एकान्तोपविष्टैश्च जैनै रहितैः पाशुपतैश्च पाराशरिभिर्वर्णिभिश्च' (हर्षच० ३ योच्छ्वासे) इत्यादिगद्ये शाक्यार्थे महाकविबाणप्रयुक्तो जिनशब्दः । दण्डिनापि दशकुमारचरिते अपहारवर्मणश्चरिते उक्तार्थे प्रयोग आदृतस्तत एव द्रष्टव्यः ।

अनिर्वचनीयतासर्वस्वसंरक्षणबद्धपरिकरः तार्किकमूर्धाभिषिक्तः श्रीमान् "श्रीहर्षः" संशयलक्षणखण्डनग्रन्थे खण्डनखण्डखाद्ये 'अत्यन्तासत एव तस्य प्रतिभासे जितं जिनैरसत्ख्यातिवादिभि' रिति बुद्धार्थ एव "जिन" शब्दं प्रायुङ्क्त । व्याचष्टे च तथैव नैयायिकशिरोमणिः श्रीशङ्करमिश्रः—'वादिभिर्बौद्धैर्जितमित्याह' इत्यादिना । जित्वरार्थेऽपि जिनशब्दप्रयोगः श्लेषप्रधानेषु काव्येषु मृग्यः, यशस्तिलकादिचम्पूकाव्येषु (बहुकार्यव्यग्रतया मयास्मिन्नर्थे महानायासो नासादितः) ।

आर्हतेऽर्थे 'जिन' पदव्यवहारस्तु—

जयश्रीरान्तरारीणां लेभे येन प्रशान्तितः ।
तं श्रीवीरजिनं नत्वा रसः शान्तो विभाव्यते ॥

इत्येवमाद्यध्यात्मकल्पद्रुमादिजिनग्रन्थेष्वेव बहुलमुपलभ्यते । दृश्यते अनेनेति "दर्शनम्" । दृश्यते ज्ञायते प्रमितिविषयीक्रियतेऽनेन पदार्थजातमित्यर्थः । जिनस्य दर्शनं 'जिनदर्शनम्' । जिनदर्शनमेव जैनदर्शनम् । अथवा जिनस्येदं जैनं जैनश्च तद्दर्शनं जैनदर्शनम् तस्य कुञ्चिकेव कुञ्चिका इति 'जैनदर्शनकुञ्चिका' । यथा कुञ्चिकया यन्त्रादिकमुद्घाट्य गृहान्तःस्थिताः पदार्था अनायासेनैव प्राप्तुं शक्यन्ते तत्सादृश्यादियमपि जैनाभिमतपदार्थावगमहेतुका ग्रन्थरूपा कुञ्चिका बोध्या ।

तस्याऽस्य दर्शनस्य प्रमुखसूत्राणि—

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥१॥
तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ॥२॥
तन्निसर्गादधिगमाद्वा ॥३॥
जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् ॥४॥
नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥५॥
प्रमाणनयैरधिगमः ॥६॥ इत्यादीनि (तत्त्वार्थसूत्राणि)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्यग्दर्शनादीनि दण्डचक्रादिन्यायेन मोक्षस्य साधनम्। यथा दण्डादीनि सम्भूयैव घटादीनि जनयन्ति तथैव सम्यग्दर्शनादीनां मोक्षम्प्रति समुच्चय इति कथनेनान्येषां वादिनां मतान्तराणि व्युदस्तानि, अर्थात् "चैतन्यं पुरुषस्य स्वरूपं तच्च ज्ञेयाकारपरिच्छेदपराङ्मुखमिति तस्य स्वरूपप्रतिष्ठानं केवलीभाव एव मोक्ष इति केचित्। बुद्ध्यादिसर्वगुणोच्छितिरेव स इत्यपरे । प्रदीपनिर्वाणकल्पमात्मनिर्वाणमित्यन्ये इत्यादि सर्वं खण्डितं भवति। सिद्धान्ते तु–निरवशेषनिराकृतकर्ममलकलङ्कस्याऽशरीरस्यात्मनोऽचिन्त्यस्वाभाविकज्ञानादिगुणमव्याबाधसुखमात्यन्तिकमवस्थान्तरं मोक्ष इत्युक्तं भवति ।

योऽर्थो यथाऽवस्थितस्तस्य तथाभवनं तत्त्वम् । अर्यत इति "अर्थः" तत्त्वेनार्थः "तत्त्वार्थः" । अथवा भावेन भाववतोऽभिधानं तदव्यतिरेकात् तत्त्वमेवार्थः तत्त्वार्थः सच वक्ष्यमाणो जीवादिः । तत्त्वार्थस्य श्रद्धानं तत्त्वार्थश्रद्धानं तदेव सम्यग्दर्शनम् । अथैतत्सम्यग्दर्शनम् जीवादिपदार्थविषयं कथमुत्पन्नं स्यादित्याह—तन्निसर्गादिति । अयमाशयः—

सम्यग्दर्शनेऽन्तरङ्गो हेतुर्दर्शनमोहस्योपशमः क्षयः, क्षयोपशमो वा तुल्य एव। किन्तु तस्मिन् सति यद्बाह्योपदेशादृते प्रादुर्भवति तत्–'नैसर्गिकम्'। एत देवान्यै *'प्रातिभं ज्ञान' मित्युच्यते । यत्परोपदेशपूर्वकं जीवाद्यधिगमनिमित्तं तद् "अधिगमक" मितीयानेवानयोर्विशेषः । किम्पुनस्तत्त्वं यदर्थश्रद्धानं सम्यग्दर्शनमित्युक्तम् इत्यत आह—जीवेत्यादि । अस्य विवरणप्रकार एवं बोध्यः—

जीवाजीवास्रवा बन्धसंवरावपि निर्जरा ।
मोक्षश्चेतीह तत्त्वानि सप्त स्युर्जिनशासने ॥

"तत्रोत्पादव्ययध्रौव्यं सत्" इति द्रव्यलक्षणं तत्त्वार्थसूत्रे । चेतनस्याचेतनस्य वा द्रव्यस्य स्वां जातिमजहत एव उभयनिमित्तवशात् भावान्तरावाप्तिरुत्पादः । यथा-मृत्पिण्डस्य घटपर्यायः यथा वा सुवर्णपिण्डस्य रुचकादिपर्यायः । तथा पूर्वावस्था-(पूर्वभाव) विगमनं व्ययः। यथा घटरुचकाद्युत्पत्तौ पिण्डाकृते र्विनाश.। अनादिपारि-

---

* तथाच—न्यायदर्शनस्य तृतीये द्वितीयान्हिके "प्रातिभवत्तु प्रणिधानाद्यनपेक्षे स्मार्त्ते यौगपद्यप्रसङ्ग" इति सूत्रम् ।

योगस्यापि तृतीये पादे—"प्रातिभाद्वा सर्वम्" इति योगिनः प्रातिभं ज्ञानमुक्तम्। यथा सूर्योदयसूचकारुणप्रभया सर्वो लोकः पश्यति, तद्वदित्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

णामिकस्वभावेन व्ययोत्पादाभावात् ध्रुवति स्थिरीभवतीति ध्रुवः। ध्रुवस्य भावः कर्म वा ध्रौव्यम् । यथा मृत्पिण्डघटाद्यवस्थासु मृदाद्यन्वयः तैरुत्पादव्ययध्रौव्यैर्युक्तं सत् । "सदि"ति द्रव्यमाह । यत् केनापि निमित्तवशेन पूर्वावस्थां जहाति अवस्थान्तरञ्चा-पद्यते परं सर्वथा तेषु तेषु पर्यायेषु तत्त्वं स्वरूपं नैव जहाति तदेव द्रव्यम्बोध्यातिति तु परमार्थः । नच वाच्यं भेदेऽयं युक्तशब्दो दृष्टः यथा हारेण युक्ता हारिणी कामिनी, यथा वा दण्डेन युक्तो ब्रह्मचारीति तैस्त्रिभिर्युक्तस्याभावः प्राप्नोति तत्रयातिरिक्ताऽनुपलब्धेरिति । अभेदेऽपि कथञ्चिद्भेदनयापेक्षया युक्तप्रयोगोपलब्धेः यथा—साङ्ख्यानां पुरुषस्य चैतन्यम्, यथा वा सारयुक्तः स्तम्भोऽयमिति । एवं सति तेषामविनाभावात्सद्व्यदेशो नायुक्तः । अथवा तदात्मवाच्ययं युक्तशब्दः उत्पादव्ययध्रौव्यात्मकं सदित्यर्थः । (क्रमशः)

———

* ॐ *

दुर्गाभ्युदयनाटकम् ।

लेखकः—श्री पण्डितछज्जूरामशास्त्री कविरत्नं विद्यासागरः ।

माया न सा सकलकायात्मिका किमनपायाश्रुताभगवती पुण्यापरं सकल-गुण्याभिमानततिशून्या त्वयात्रभवती । कर्त्री पुरातदनुभर्त्री ततो नु खलु हर्त्री समस्तजगतः रक्षाकरी भवतु दक्षागुणेषु तव साक्षात्कृतैकमनसा ॥१५॥

अपिच—या ऽभीकरी शुभकरी परमा च माया
तां ज्ञातु मिच्छसि यदि त्वमनन्तशक्त्याः ।
भक्त्या स्वभक्तदुरितौघविखण्डिकायाः
पादारविन्दयुगलं स्मर चण्डिकायाः ॥१६॥

किंच—राजन् सर्वमहं जानामि तपोबलेन यादृशोऽसि तन्मास्म शुचः, इदमकस्मात्पतितं दैवतन्त्रं दुःखयन्त्र मनुभूय भूयोपि लब्धसर्वस्वश्चिरकालं सुख-चक्रवालं भुक्त्वाग्रे सावर्णिकोनाम मनुर्नुतमित्रो विवस्वत्पुत्रो भविष्यसि । अथ चायं ते वयस्यो वैश्योपि प्रवरं देवीवरं लब्ध्वा बहुप्रयासंचिते वित्ते तडित्प्रख्ये सौख्ये च विरक्तो भूत्वा परमज्ञानवान्भविष्यति ।

पारि० भाव, कथमेतत्समस्तं वृत्तं मुनिना तेनावोचि ।

सूत्र० (स्मित्वा) त्रिकालज्ञत्वान्मुनीनाम् । (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोकाधिवेशनम् ।

ता० १५-१२-२८ शनौ ओरिएण्टलकालेजीयच्छात्राणां संस्कृतवाग्वर्धिन्याः समितेरेकं शोकाधिवेशनं सञ्जातम् । यत्र निखिलतन्त्रस्वतन्त्रमहामहोपाध्याय श्रीदाधिमथशिवदत्तमहोदयानां शिवपुरे (काशीधाम्नि) शिवपुरप्राप्तिसमाचारः सर्वैः सशोकं प्रकटीकृतः । दिसम्बरमासीय-१० म्यां तारकायां चन्द्रेऽहनि भौतिकं शरीरं परित्यज्य श्रीशिवः शिवं धाम प्राप्त इति लोकव्यवहारमनुरुध्य सर्वसम्मत्या श्रीरामचन्द्रशास्त्रिभिः "शोकप्रस्तावः" पठितः । तथाहि—

ओरियण्टल् कालेज—संस्कृतवाग्वर्धिनी सभा श्रीमतां श्रीडा० लक्ष्मणस्वरूपमहोदयानां साभापत्ये श्रीप्रातःस्मरणीय—महामहोपाध्याय—पं० शिवदत्तशर्मणां लोकान्तरगमनोदन्तं श्रुत्वा तेषां महात्मनां गुणसंभारान् स्मारं २ दोदूयमानहृदया भृशं शोकं प्रकाशयन्ती लोकान्तरे तेषां सर्वथा भव्यं भावयेद्भगवानिति भृशमानतेन शिरसा प्रार्थयते ।

एतद्विषये Fifth Indian Oreental Conferance विषये चावशिष्टमागामिनि मयूखे प्रकाशयिष्यामः । आगामी मयूखः "छात्रहिताङ्कः" इत्यन्वर्थनाम। स्यादिति सम्भावयामः । किञ्च—कान्फरेन्सप्रबन्धकानामाज्ञया पञ्चनदीयसंस्कृतसाहित्यपरिषदा "स्वप्नवासवदत्ता" नामाभिनयः सम्यगवतारितः, यमभिनयमालोकयन्ती तत्रोपस्थिता सर्वा जनता गीर्वाणवाण्यास्तस्यां प्रणीतानां नाटकानां तद्रचयितृणाञ्च माहात्म्यं गद्गद्गिकया गिरा गृणन्ती चकितचकितानना समभूत् ।

श्री १०८ निखिलतन्त्रस्वतन्त्रयतिवरस्वामिविश्वेश्वराश्रमाणामन्येषाञ्च आयातानि पत्राणि अवश्यप्रकाश्यानि आगामिनि मयूखे प्रकटितानि भविष्यन्ति ।

(सम्पा०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकाद्घोषणा ।

अयि ! सुरभारतीप्रियाः ! प्रियाऽप्रियविवेकवैधुर्यविधूननाय निरन्तरायतरशेमुषीदृष्टयो महानुभावाः ! विपश्चिदपश्चिमाः ! सनातनधर्मोपदेशकाः ! आर्यसमाजप्रवर्त्तकस्वामिदयानन्दभक्ताः ! कौलेजीयसंस्कृतप्रोपसराः ! विद्यालयमहाविद्यालयसंस्कृताध्यापकाः ! गृहस्थाः ! सन्न्यासिनश्च महानयं भवतां स्वप्रान्तीयसौभाग्योदयो भवद्भिर्मन्यतां यत् पञ्चापप्रान्ते गीर्वाणवाणीगौरवसंरक्षणाय, नहि नहि—पञ्चापप्रान्तीयसुरभारतीप्रियविद्वन्मण्डलीवैदुष्यप्रख्यापनायापि अयमुद्योतः सिते दले इन्दुरिवोत्तरोत्तरं समेधमानकलो दशापि दिशा आह्लादयन्, रविरिव सकलसहृदयहृदयकमलानि विकाशयंश्च राजतेतराम् । दशमास्यस्याप्यस्य गुणगणगरिमाणं निरीक्षमाणानां दूराद्दूरतरदेशनिवासिनां वैदुष्यधुराधरधौरेयाणामनेकेषां सूरिवर्याणां प्रायः पत्राणि समायान्ति येनास्य न केवलं पञ्चापप्रान्त एव पराऽवश्यकता, प्रत्युत सकलेऽपि भारते वर्षे सुरभारतीप्रचारगौरववर्द्धनायोपादेयता निश्चितं प्रतीतिपथमवतीर्णैवेति जानीध्वम् । नहीदमविदितं मन्तव्यं यद्—गीर्वाणवाण्याः परमभ्युच्चयो नाम—उद्योतस्य प्रधानं कर्त्तव्यमिति, तदनुरोधेनैव "पञ्चापप्रान्ते न कस्यापि शास्त्रस्य विशिष्टाः पण्डिताः सन्ति, एते केवलं हितोपदेशादिपाठनविज्ञानाः किञ्चानीयुर्व्याकरणादिविविधविषयाणां भाविकं स्वरूपम्" इत्याद्यात्मकस्य मिथ्याकलङ्कस्य समूलोन्मूलनं द्वितीयं कर्त्तव्यमपि प्रधानकर्त्तव्यस्य सोदरभावमेवानुरुन्धे ।

एतत्कलङ्कस्योत्थानभूमिस्तु—पञ्चापप्रान्तीययूनिवर्सिटीपरिषदः "संस्कृत बोर्ड" एवेति दृढं सम्भावयामः । यथा—अन्या यूनिवर्सिटीसञ्ज्ञिकाः परिषदः स्वदेशीयविदुषः सम्मानयन्ति, यथावसरं तान् प्रतिष्ठापयन्ति, नचेयं पञ्चापयूनिवर्सिटीपरिषत्तथा सहृदयताग्राहिणी स्वदेशीययोग्यविद्वद्भ्यो मानप्रदायिनी चेति सप्रमाणमाकलयामः[1] । सम्प्रत्येव ममान्तिके एकं पत्रमागतं यदुक्तेऽर्थे ममाऽनुभवमत्यन्तमेव पोषयति । आस्तां तावदेतत् एतादृशमलौकिकमवसरं लब्ध्वा भवन्तो मात्रयापि न प्रस्खलन्तु—विविधविषयगवेषणोपपन्नाः साम्प्रदायिका असाम्प्रदायिकाः छात्रहितकारिणो निजनिजवैदुष्यमणिमार्जनोद्द्योतकाः स्वपक्षसाधकाः परपक्षबाधका हृद्या निरवद्याश्च लेखाः प्रेषणीया भवद्भिः, सहर्षं वयं तान् यथावसरं मुद्रापयिष्यामः, येन-जीवता पुरुषेण सोढुमशक्य उपरितनः कलङ्कपङ्कः सर्वथैव धौतमूलः सम्भवेत् । आशास्यते यदिमामुद्घोषणां नूनं श्रीमन्तः कर्णगोचरीकरिष्यन्तीति शम् ।

१—एतस्मिन्विषये सति सम्भवेऽधिकं वक्ष्यामः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

UDYOTAH REGISTER L. NO. 2304

वार्षिकमूल्यम् १॥)
सार्धरूपकम्

ॐ

प्रतिखण्डमूल्यम् ≡)
आनकत्रयम्

उद्योतः

पञ्चनदीयसंस्कृतसाहित्यपरिषदो

मासिकं मुखपत्रम् ।

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नादरात्,
अज्ञानान्धतमोविनाशपटुता-विख्यात-विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्,
"उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥१॥

प्रथमवर्षे— १ | माघसङ्क्रान्त्याम् वि०सं०१९८५ जनवरी सं० १९२९ | एकादशो मयूखः ११

सम्पादकः—
कवितार्किक (-तन्त्रचक्रवर्त्ति-) नृसिंहदेवशास्त्री दर्शनाचार्यः ।
सहकारिसम्पादकः—
विद्याभास्करपण्डितपरमेश्वरानन्दशास्त्री साहित्योपाध्यायः ।
प्रकाशकः—
परिषन्मन्त्री पं० जगदीशशास्त्री व्याकरणतीर्थः

(उद्योत कार्यालय जौडेमोरी लाहौर)
" Udyot " Office Jaure Mori Lahore.

श्रीकृष्णदीक्षितप्रबन्धेन "बाम्बे मैशीन प्रेस मोहनलाल रोड लाहौर"
इत्याख्ये स्थाने मुद्रितः । पं० जगदीशशास्त्रिणा च उद्योत-
कार्यालयात् "जौडेमोरी लाहौर" इत्यतः प्रकाशितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतस्य कतिचन नियमाः

१—अस्य मासिकपत्रस्य अग्रिमं वार्षिकं देयम् (भारते, ब्रह्मदेशे सिंहले च)—१॥)सार्धरूपकम् ।

२—प्रेषणव्ययो ग्राहकैर्न देयः ।

३—प्रबन्धादिकं समालोचनार्थं ग्रन्थादिकञ्च सम्पादकसमीपे, मूल्यादिकं च प्रकाशकसमीपे निर्दिष्टस्थाने प्रेषणीयम् ।

४—विज्ञापनपत्रादिमुद्रापणव्यवहारविषयोऽपि कार्यालये प्रकाशकसमीपाद्विवेचनीयः ।

५—पत्रं प्रतिसङ्क्रान्ति प्रकाश्येत । येन खलु ग्राहकेण यथाकालं सङ्ख्या नाधिगम्येत तेन तन्मासस्य तृतीयसप्ताहाभ्यन्तर एव कार्यालयाद्विवेच्यम, नातः परं कस्याप्यभियोगः श्रूयेत, किन्तु तेन प्रथमं स्वपोष्टस्थानं परिशोध्यैव प्रष्टव्यम् । विवेकाथ ग्राहकसङ्ख्या चावश्यं लेख्या ।

६—ग्राहकैः स्वस्थानादिकं स्पष्टमेव लेख्यम्।

७—एतस्य ग्राहका अपि साधारणसभ्येषु गण्येरन् ।

८—प्रेषितलेखाः प्रायो यथाक्रमं मुद्राप्येरन् । लेखकैर्न्यूनातिन्यूनं पक्षात्पूर्वमेव लेखाः प्रहीयेरन् । राजविरुद्धान्दोलनलेखाश्च न गृह्येरन् ।

विषयसूची

(प्रबन्धानां गुणदोषयोः प्रबन्धलेखका एव प्रतिभुवः)

विषयः		पत्राङ्कः
१—दुर्गाभ्युदयनाटकम्—	ले० श्री० पण्डितछज्जूरामशास्त्री कविरत्नं विद्यासागरः	१—३
२—श्रीकृष्णाब्जषट्पदीयम्—	ले०—श्रीपरमानन्दशर्मा शास्त्री	४
३—हैन्द्व-संख्याहसिम-निदानविमर्शः—	ले०—श्रीदीनानाथशास्त्री	५—६
४—काश्मीरेषु जलाप्लावः—	ले०—बहादुरचन्द्र शास्त्री	७—१०
५—जैनमतदिग्दर्शनम्—	ले०—जैनाचार्यभट्टारकः श्रीदेवचन्द्रसूरिः	११—१३
६—गौरवं नष्टम्—	ले०—सहकारिसम्पादकः	१४—१७
७—प्रेषितपत्रिका—		१८
८—प्रत्यालोचना—	ले०—श्री निखिलतन्त्रस्वतन्त्रदण्डिस्वामिविश्वेश्वरामाः	१९—२३
९—सम्पादकीयटिप्पणयः—		२४—२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल पुस्तकालय कांगड़ी
पुस्तक संख्या संस्कृत उद्यो
आगत ..... ९(८)
तिथि .....
गुरुकुल पुस्तकालय कांगड़ी.

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नाराद् अज्ञानान्धतमोविनाशपटुता–विख्यात–विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्न् "उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्नाजते ॥

प्रथमवर्षे- १	माघसङ्क्रान्त्याम् वि० सं० १९८५ जनवरी ता० १५—सं० १९२९	एकादशो-मयूखः ११

* ॐ *

दुर्गाभ्युदयनाटकम् ।

(पूर्वतोऽनुवृत्तम)

लेखकः—श्री पण्डितछज्जूरामशास्त्री कविरत्नं विद्यासागरः ।

राजा—सप्रणयमंजलिं बध्वा—भगवन्, या भवैतका चण्डिकाराधनायोपदिष्टा सा किंकिनामविशिष्टा कथमुत्पन्ना प्रसन्ना च भवति केन केन नाम्ना स्तुता सती कानि कानि चाद्भुतानि चरितानि भक्तानां कृते कृतवतीति मे बलवती जिज्ञासा ।

मुनिराह–राजन्, कार्यकारित्वेन देवतानां नामानि भवन्ति । मुख्यानि तु दुर्गा, चण्डिका, देवी, काली, पार्वतीत्यादीन्येव तस्या नामानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसार सागर लसद्घनपापपङ्कप्रक्षालनैकनिपुणां सुरदीर्घिकावत् ।
ब्रह्मेश्वरप्रभृतिदेवनिषेवणीयां तां यान्ति ये शरणमाशु शमाप्नुवन्ति ॥२०॥

किंच—यत्पादपद्ममकरन्दरसं हि पीत्वा, हित्वा समस्तविषयान् विषवद्रसज्ञैः । स्वानन्दनीरनिधिवीचिनिमग्नचित्तैः, संमन्यते जगदशेषमिदं तृणाभम् ॥१८॥

अपिच—अपार संसारसमुद्रमध्ये निमज्जतां या शरणं गतानाम् ।
विनाश्य दुःखान्यखिलानि कामं दत्ते निकामं भुवि भावुकानाम् ॥१९॥

अन्यच्च—यत्पूजनीयकमनीयपदारविन्द-प्रस्यन्दमानमकरन्दजुषां नराणाम् । किंकार्यमार्यकरणीयमसाध्यमास्ते नो साध्यते खलु यदत्र परत्रलोके ॥२०॥

सा भगवती—देवकार्य सिद्धेः कृते आविर्भवति यदा ।
नित्या सत्यपि कथ्यते उत्पन्नेति तदा ॥२१॥

राजा—कथमिव, मुनिः—राजन्, सर्वमादितः प्रभृति कथयामि ते कृते । इत्युक्त्वा समग्रं देवीचरितमव्यग्रं श्रावयामास ।

पारि० भाव, ज्ञातमस्य नाटकस्य मूलं त्वमिदानीं मनीषितं कुरुष्व ।

सूत्र० मारिष, त्वमद्य सद्यः सर्वं संस्कृतपात्रवृन्दममन्दचेष्टितं कुरुष्वावधानदानेन ।

पारि० यथाज्ञापयति भावः । इति निष्क्रान्तः ।

सूत्र०—अहमिदानीं मान्यमहोदयान्सहृदयान्प्रति किमपि विज्ञापयामि । (प्रणिपत्य)

शृणुत शृणुत विज्ञा ! दोषमात्रानभिज्ञाः
यदिह किमपि कर्तुं यत्यते तत्प्रयत्नात् ।
प्रगुणनिपुणतायाः पात्रवर्गस्य कार्या-
दथरसलसतो वा नाटकस्य प्रभावात् ॥२२॥

(नेपथ्ये) अहो ! अब्रह्मण्यम्—अब्रह्मण्यम्,

सूत्र० (कर्णं दत्त्वा) अये कथं खलु मत्कथनानन्तरमेव कस्यापि विगतक्षणः कुलक्षण इव शब्दः श्रुतिपथमवतरति ।

(विमृश्य) भवतु । ज्ञातम् । ताभ्यामसुराभ्यामाकुलीकृतस्य ब्रह्मणो भवेत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदिदानीमत्रस्थातु मनुचितं यत एकोपि दानवो दृष्टिपतितो महतीं भीतिं जनयति किं पुनर्द्वाविति निष्क्रान्तः । इति प्रस्तावना ।

(ततः प्रविशति संभ्रान्तो ब्रह्मा ।)

ब्रह्मा—ननु भो असुरौ, कथंकारमकारणमेव युवां मां मारयितु मिच्छथः ।

असुरौ—प्रकृत्यैव नो धर्मात्मानो द्वेष्याः प्रियाश्च पापात्मानः ।

ब्रह्मा—(स्वगतम्)

विष्णुः श्रीमानद्य वै जलमग्ने भुवने ।
कल्पान्ते निद्रात्यहो वारां नैधवने ॥२३॥

इमौ च विष्णुकर्णमलजौ दुष्टदनुजौ मां हन्तुमुद्यतौ ।
तत्किमिदानीं कर्तव्यम् । (निर्ध्याय) आं ज्ञातम् ।
यो मायया त्रिगुणयापि जगत्समग्रं संयच्छते सृजति पाति च सज्जतेन ।
यो विश्वकारणमनादिरनन्तशक्तिर्भक्त्या तदीयचरणं शरणं करोमि ।

अपि च—रुद्रोपि यस्य किल शक्त्यवबोधकस्य नोवेद तत्त्वमथकृत्स्नतयापि वेदः । तं भावये स्वहृदये शरणागतानामाशु प्रणश्यति यतः सकलोपि खेदः ॥२५॥

[सप्रणयमंजलिं बध्वा]

विष्णो, सर्वस्य त्वमेव जगतोऽसि स्वामी ।
क्षमासिन्धुरनुपम दयावानन्तर्यामी ॥२६॥
स्थावरजङ्गमरूपिणी मया कृता सृष्टिः ।
सर्वत्रापि यथायथं भवति भवद्दृष्टिः ॥२७॥
जीवनमथमरणं सुखं दुःखं तव हस्ते ।
भगवन्निति हेतोः सदृक् वद पुरुषः कस्ते ॥२८॥
किं च यशोऽपयशोपि ते दृष्टिकुदृष्टिफलम् ।
इच्छसि यत्कुरुषे तदेव चलति हि कस्य बलम् ॥२९॥ (क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकृष्णः शरणम् ।

श्रीकृष्णाब्जषट्पदीयम्

स्वान्तं करोतु शान्तं गोविन्द ! नो नितान्तम्—स्थायिपदम् ।
वयमीदृशोऽसमर्था स्तरितुं शिलायमानाः
सुखदुःखवीचिमन्तं भववारिधिं महान्तम्—स्वान्तम्०
अभयङ्करोति तेषां येषां न कोऽपि नाथः
विदधाति कान्तकान्ति[1] विधुमेवकान्तिकान्तम्—स्वान्तम्०
भवदीयनामकर्णे कृत्वैव याति दुःखम्
उदये हि तिग्मरश्मे र्ध्वान्तं यथा सदान्तम्—स्वान्तम्०
भक्तालिरञ्जके[2] ते नवपादपुण्डरीके
मकरन्दयेयमनिशं सेवेय तं भवन्तम्—स्वान्तम्०
चन्द्राननं हि भवतां कुरुतां नवां विकसिताम्
धिषणां जलाविलां[3] मे सुकुमुद्वतीं नितान्तम्—स्वान्तम्०
परमेश ! पूर्ण ! योगिश्चरणाब्जशीधुपोऽहम्
भवतो भवेयमद्येदमनिन्द्यमान्ति कान्तम्[4] स्वान्तं करोतु शान्तम् ।

रे चन्द !

रे चन्द्र ! चञ्चलदृशा स्मरजित्वरीणाम्—
आस्यस्य साम्यमभिलष्यसि चेत्तदा त्वम् ।
शीघ्रं व्रजाभ्रसरितं त्वरितं स्वकीयम्
प्रक्षालयस्व च सकालिम वक्र मेतत् ॥

श्रीपरमानन्दशर्मा शास्त्री, ऋषिकुलस्नातकः,
लवपुरीय शहन्शाहीकुटीरवसतिः ।

---

१ कान्तकान्तिः सूर्यः । २ भक्तानामालिरेव भक्तोऽलि भृङ्गस्तस्य रञ्जके स्तत्रेति
३ रलयो र्डलयोरभेदाद् धिषणापक्षे जड इवाचरतीति जडोऽज्ञानं तेनाविलां कलुषिताम् ।
४ कान्तमत्राभिलाषः । "नपुंसकेभावे क्तः" ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हैन्दव-सङ्ख्याह्रसिम-निदानविमर्शः ।

पूर्वतोऽनुवृत्तम्

(ले०—श्रीदीनानाथशास्त्री मूलत्राणम्)

असावदृढता एव मूलमवेतव्या । इत्यमियमपि हैन्दवसङ्ख्याह्रासस्य महीय × कारणम् ।

तार्तीयीकं कारणम् उत्तरोत्तरं सुविधाप्रदानमेव सङ्ख्याऽल्पीयस्त्वे । केचिन्नव्याः सुधारका अधिधर्म्मं प्रविश्य तद्रहस्यमनाकलयन्तो विषयाऽभिलाषुकाणां पुंसां कृते समाजद्वारा काश्चित् सुविधा विधापयन्ति, अनुष्ठापितवन्तश्च । तद्दुर्विलसितमेतदेव जायमानमनुभूयते, यद् अन्ये अन्या अपि सुविधा ईप्सन्ति । सौविध्याऽप्रदाने सति धर्म्माऽऽभासान्तराऽऽश्रयणविभीषिकामपि ददति, धर्म्मान्तराण्याश्रयन्तेऽपि । एवं तेषामेव विषयकाम्यतां * सर्व्वेऽभिलाषा × पूर्णीक्रियेरँश्चेत्, तदा इतरधर्म्माऽऽभासेभ्योऽस्य धर्म्मस्य वैशिष्ट्यं व्यावर्त एव वा नाऽवशिष्यते । केचिद् महात्मानः सुविधाऽनर्प्पणमेव सङ्ख्याह्रासे निदानं व्यपदिशन्ति, परं वयमेतद्विप्रतिपन्ना वर्तामहे । पूर्व्वमेवाऽन्याय्यसुविधाविश्राणनस्यैवैतद्दुर्व्विलसितम् । अधुनाऽस्पृश्येभ्यो याः सुविधा वितीर्य्यन्ते, परस्ताद् एतस्य य × परिणामो भावी, स दूरदृष्ट्या निभालनीयः ।

तुरीयं बीजम् आर्य्यराज्याऽभावः । इदं निर्व्विवादमेव, यद्-यस्या जात्या राज्यं जागृयात्, सा तज्जात्या एव उन्नामाय चेष्टते, तद्धर्म्मशास्त्राऽनुसारमेव शास्ति प्रजाः, तद्धार्म्मिकभाषाप्राधान्ये तद्विस्मरतायाश्चोद्यच्छते,† विविधै × पारितोषिकैस्स्वकीयानेव पुष्णाति, तदुत्साहमेव उपबृंहयति, इतरत्र तद्दृष्टिर्गौणी भवति । अधुना च न आर्य्याणां राज्यम् । यद्यपि वर्तमानेन राज्येन संस्कृतोन्नतावपि प्रकामं प्रयतितम्, तथापि गैर्व्याण्या वाण्या हिन्दूनाञ्च तादृशं प्राधान्यं न जागर्ति, यादृशा भवितव्यम् । तेन राज्यप्रसादेप्सायै स्वकीया एव जना गर्द्धाऽभिभूताः भूताः स्वकीयधर्म्म-भाषा-जाति-वेषभूषाऽऽदिविषये च आत्मानं घ्नन्ति । अयमपि उक्तप्रायो व्यक्तो हेतुर्गणनाह्रासे निदानम् ।

---

* अभिलाष इतीदं रूपं घञ् प्रत्ययविशिष्टत्वाद् 'घञवन्त' इति शास्त्रेण पुंसि ।

† स्वजात्या अपि आत्माऽपरिच्छिन्नतया कर्त्रभिप्रायत्वेन 'समुदाङ्भ्यो यमः' इति आत्मनेपदम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चमो हेतुः स्वकीयप्रचाराऽभावः, विधर्म्मणां गुप्तप्रचारभावश्च । अयं खलु प्राकृतिको नियमो यद्-येन खलु स्वकीयसम्प्रदायभूयिष्ठता विधित्स्यते (चिकीर्ष्यते), तेन तद्धान्तानाम् (Pen) लेखः (Press) (मुद्रायन्त्रम्) (Plat form) व्याख्यानमञ्चः इत्यादिद्वारा महत्या आरभट्या प्रचार × कार्य्यः स्वेतरेषाञ्च न्यक्कारः । परमधुनाऽस्मदीयजातौ एतदौदासीनी विभाव्यते । एकधर्म्मस्य विस्मरणम् अपरधर्म्मवृद्धिमूलकमेव । अस्मदीया जना इतरेषां वक्तृता अन्येषां पुस्तकानि च उपयुञ्जते, न स्वयं तथा कुर्व्वते । तस्याऽयं दुर्व्विपाको यद्-अपरेषां प्रभावोऽस्मासु ध्रुवं पतति, येन वयमपरगृह्या भवामः । व्यपदिष्टमपि नीतौ—

"मृदुना सलिलेन खन्यमानान्यवघृष्यन्ति गिरेरपि स्थलानि ।"

अपरतटसमीपवर्तिनश्च सन्तो वयम् अल्पमेव प्रहारमाऽऽप्य अन्यदीयधर्म्मतरङ्गिण्यां स्खलामो निमज्जामश्च न्यमाङ्क्षुश्च बहवः । इत्थं स्वभावत एव सङ्ख्यान्यूनता भाविन्येव ।

निदानेष्वेषु सम्भवत आंशिक एव विसँव्वादो भवेत् कदाचित् पाठकानाम्, परं प्रायशो न प्रत्यवतिष्ठेरन् (विप्रतिपद्येरन्) विषयेऽमुष्मिन्निति प्रतीमः ।

अद्यत्वेऽस्माभिर्हिन्दुष्वेतदनुभूतमेव, यत्-पञ्चाऽब्दयुक्तरमेषां विचारवैचित्र्यं जायते । यदा या एव एषां विचारधारा प्रसरेत्, सैवैषां दृष्टिकोणे 'धर्म्मो' भवति । सैव एषां 'वेदे' दृश्यते, प्राचीना एषां रूढ्यश्च नवीनतां स्पृशन्ति, नव्याश्च प्राचीनतां गाहन्ते । एवमेव जातायां सत्यां विचारधारायाम् एतद्बोधे चाऽननुष्ठिते सति-'सत्यं वदामि'—इयमार्य्यजातिर्नाममात्रेणैव इतराऽनार्य्यजातिभ्यो भेदं स्पर्क्ष्यति, इयञ्च सर्व्वाऽवस्थास्वेव आङ्गलाद्यनार्य्यजात्यन्तर्लीना सती स्वस्वरूपं स्वसत्ताञ्च च्यावयिष्यति । नेयं वैशद्याऽनपेता भणितिर्व्यभिचारकोटिमाटीकेत, नवेयञ्च केनाऽप्यन्यथयितुं शक्येत, नाऽत्र विषये कोऽपि विशयोऽवसेयः, यत इतरेषां गुप्तप्रचाराः साफल्यमश्नुवाना अनुभूयन्ते । इयमस्मज्जातिरधुना 'अग्रेऽमृतं गवेषयते', परं 'परिणामं विषोपमं' न विविनक्ति । तस्य यो दुरुदर्को भविष्यन्, तस्य विवेकेनैव स्वान्तं नितान्ततान्ततां भजत इव, शेमुषी मुष्यत इव, लेखनी सनीस्यत इव, तस्माद् अत्रैव विरिरंसामः । अन्ते च आर्य्यजातिकर्णधारं विद्वद्ब्राह्मणं साऽञ्जलिबन्धमभ्यर्थयामहे, यद्-यदि त्वम् ईदृशे करालेऽपि कलिकाले निर्व्विण्णतां ताटस्थ्यं वा विसृज्य स्वकीयवास्तविकनेतृत्वं दार्ढ्येन न उपाददीथाः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तर्हि नाऽसावनिष्टो दिष्टो दवीयान्, यस्मिन्नियमार्य्यजातिस्तव वाच्यतां †विवृण्वती निजसत्ताश्च व्यभिचरन्ती सती महाऽन्धतमसगर्ते अन्यासाञ्च अनार्य्यजातीनामेव प्राज्यसाम्राज्य-विभ्राजने दक्षिणहस्तायिता भूत्वा स्वेषां प्रसादाऽवसादं कुर्व्वती सर्व्वतो वचनीयताऽर्हैव निष्पद्येत–इति कृतं भूयिष्ठतया ।

———

*काश्मीरेषु जलाप्लावः ।

अहमैषमः काश्मीरानगच्छम् । तत्रत्यश्चैषमस्त्यं भयङ्करं बाडकाण्डं साक्षादकरवम् । मासादधिकतरः कालो व्यतीतः मम पूजार्हौ पण्डितश्रीनृसिंहदेवश्रीरामचन्द्रमहोदयौ तां घटनामुद्योताय लेखितुं मां व्यादिशताम् । तल्लेखने दीर्घसूत्रिणा मया भूयान्विलम्बः कृतः, तमनुशोचामि । इदानीञ्च तां घटनां लिखामि ।

काश्मीरजनपदे यादृग् बाड ऐषमः समायात् तादृशः पूर्वमप्येकदा (संवत्) षष्ट्युत्तरैकान्नविंशतिशततमे १९६० समाययाविति कथयन्ति ।

दैवदुर्विलासः प्रेक्ष्यताम् यत् पूर्वं तु प्रावृषेण्येऽपि काले बहुषु भागेषु काश्मीरे पर्जन्यो नावर्षीत् । अथ यदाऽवर्षीत् तदा-अतिमात्रम् । प्रथमं प्रजा अवग्राहेण समसीदन् ततश्च वर्षातिरेकेण । धिग् दुराग्रहमीतीनाम् !

क्व घनस्यन्तः शालिकेदाराः समन्तादम्लायन्निव, क्व च पुनः क्रूरेण जलौघेन मूलोच्छेदं न्यगीर्यन्त–हा वराकान् कृषीवलान् !

हन्त ! स्मृतमात्रः स संक्षोभः कम्पं जनयति । "एकतस्तावदुत्स्यन्दमाने नदीपूरे भग्नानां सेतूनां प्लवमानानि दारुभित्तानि दृश्यन्ते, अन्यतश्च ध्वंसमानानामामगृहाणां घोषाः श्रूयन्ते । अत्र शरणहीना नार्यः करुणं क्रन्दन्ति, तत्र विकला नरा दीनं परिदेवयन्ते ।" सर्वत्र 'हाहेति रुदित' माकर्ण्यत ।

श्रीनगरे पर्जन्यस्त्रीन् दिवसान् अजस्रं प्रावर्षत्, दवीयःसु पुनः शैलशिखिरेषु पञ्चषान् दिवसान् । वर्षारम्भात्परस्मिन्नेव दिने तन्वी जेहलमनदी तथाऽऽप्यायितुमारभत यथा पश्यतामेवास्माकं क्षणे क्षणे सोपानशः समवर्धत, अन्ततश्च तटभुवमचुम्बत् ।

अयं महान् अपायः प्रजां भृश मातङ्कयत् । अनुजेहलममुभयोः कूलयो-

---

† 'विवृण्वती' 'कुर्व्वती' त्यत्र शपश्यनोरभावाद् अवर्णान्ताऽङ्गाऽभावाच्च न नुम् ।

* बलवता केनापि प्रतिबन्धेनाऽस्य मुद्रणे विलम्बो जातः । (सम्पा०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रुदारा हर्म्या आढ्या हृष्टाश्च निविष्टाः सन्ति, तेऽपिपतिषन् । नैगमा भय-विह्वला आसन् ।

अथ समाचारा आगमन्—"अनन्तनागोपकण्ठे खन्नावलेऽम्बुवेगात्सेतु-स्त्रुटितः, अमरनाथस्य यात्रिणो विषमां दशां भुञ्जानाः सन्ति, केचिन्मृताः केचिन्म्रियन्ते, सेतुभङ्गात्केचिदनन्तनागेऽपरे मटनेऽवस्कन्दितास्तिष्ठन्ति, प्रायेण भोज्यसामग्रीक्षयात्कृच्छ्रं जीवन्ति; पम्पुरसकाशे मार्गे ऊरुद्वयसं सलिलं स्यन्दते, स्यन्दनादीनि यानानि गन्तुं न पारयन्ति; अमुष्मिन्ग्रामे तावन्ति गृहाणि जलसाद् भूतानि, अपरस्मिन्नेतावन्तः पशवः पयःपूरेण प्रवाहिताः, तत्र तत्संकटमुपस्थि-तम्, अमुत्रासौ विपदापतिता" इति ।

इतो रावलपिण्डी-काश्मीरः पन्था जलोद्रेकेण खण्डितः, केचिल्लघीयांसः सेतवश्चात्रुट्यन् । यानान्यागमनादरुध्यन्त । पत्रपत्रिका अपि त्रिचतुरान् दिवसान् न काश्मीरादगच्छन् न चैव काश्मीरमागच्छन् । तन्त्रीयन्त्र (Telegraph) मपि भङ्गमापेदे । तदेवं यो यत्रासीत् स तत्रैवावरुद्धोऽतिष्ठत् । गान्धर्वल-क्षीरभवानी-मानसवल-इच्छावल-पहलग्रामप्रभृतिषु संवसथेषु वायुसेवनाय भ्रमणीविलासाय वा निवसन्तो लोकास्तत्र तत्रैव यथाकथं प्रलयोपम मेतं कालमयापयन् ।

गान्धर्वले-कथयन्ति-गिरिणदी जलं तथाऽवर्धत यथा परितः स्थितान् दूर दूरान् केदरान् आच्छाद्य प्रावहत्, तदन्तः प्लवमाना हर्म्यनौका-(House-boots) श्च कूलभुवमतिक्रम्य तान्केदारानाक्रम्यातिष्ठन् । गिरिणदी चाटवीभ्यः प्रचुराँस्तान् स्थूलस्थूलान् लगडान् आनयत् यैर्बहवो हर्म्यनौकाः खण्डशः कृताः । जलं तथावेगेन प्रावहत् यथा कैवर्तकाः प्रवहणानि धर्तुं कृच्छ्रादपारयन् । सर्वा सर्वा रात्रिं ते जाग्रत एव निन्युः—मा नाम रात्रावकस्मात्काचिद्विपत्तिरापतत् इति ।

सदृश एव व्यतिकरोऽन्येष्वपि स्थानेषु समजायत । अथ श्रीनगरे (यत्राहं तान् दिवसानवसम्) किमघटत ? इतस्ततो राज-पुरुषाः खनित्रपिटकोपेतान् कर्मकरानादाय व्यचरन् । नद्या जलं कूलमुत्क्रम्य पार्श्ववर्तिनां गृहाणां संधीन् क्षारं क्षारं तदन्तः श्च्योतितुमारभत । आपणे केषु-चिद्भवनेषु भित्तीनां संधिभ्यो धारायन्त्रमुखेभ्य इव सलिलमूर्ध्वमुदस्रवत् । कर्मकरा मृत्पूर्णा गोणीः सलिलस्रवणस्थाने न्यास्यन्, परं तत्सर्वं व्यर्थमभूत् । जलं बलात्सन्धिं भित्त्वाऽन्यतः स्थानादस्रवत् । तीरोपकण्ठो राजपथः प्रास्फुटत्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचित्क्वचिदक्षरदपि । राजपुरुषाः पुष्कलान् प्रयत्नान् आतन्वन्, परं दैवीं विपत्तिं परिहर्तुं कः कल्पते ! जलं प्रसह्य परितः प्रासरत् । राजकीयपुस्तकालयस्य तदुपश्लिष्टस्याश्चर्यधाम्न-(Museum अजायबघर) श्चालिन्दः प्रकाममुच्चैरस्ति, जलं तद्दघ्नमुदस्यन्दत । तत्परिसरश्च सर्वो जलमयः समवर्तत । तत्रत्यस्यारामस्य पुष्पराजयः क्षुपगुल्मादयश्च दूरं न्यमज्जन् । एवमन्यान्यपि समीपवर्तीनि सदनानि सर्वतस्तोयपरिप्लुतानि समजायन्त । उडुपं विना तत्र गन्तुं कश्चिन्नापारयत् ।

वरुणदेवप्रसादादिव जलं पुस्तकालयमाश्चर्यधाम च नाविशत्, आतदलिन्दमेवोदगात्; नो चेत्सर्वः स पुस्तकराशिः सममेव तेन महार्घवस्तुजातेन जलसादभविष्यत् । अन्येष्वपि नगरस्य बहुषु भागेषु रथ्यासु च जलं तावद्दघ्नं प्रावहत् येन तरणिमन्तरेण पारमवारं वा प्राप्तुं न कोऽप्यक्षमत ।

यथा यथा जलमवर्धततराम् तथा तथा नदीगता हर्म्यनौका ऊर्ध्वमनीयन्त । अथ यावता नौकास्तटभवानां वृक्षाणां शाखाः स्प्रष्टु मारभन्त तावन्नौकास्वामिनोऽविभ्यन्-मा स्म नाम तरुस्कन्धा नावो निपोथयन् इति । अतस्ते स्कन्धाच्छेदनीया अभवन् ये केचिद्विलम्बमकुर्वन् तेषां नौका अशीर्यन् ।

श्रीनगरे मुख्यनदीतो निष्कासिता अनेकाः शाखानद्योऽपि सन्ति । प्रतिनिष्कासस्थानञ्चैकैकं गुरुतरं कपाटयुगलं रचितं विद्यते । यदा नद्या जलं बाडते तदा तानि कपाटानि पिधीयन्ते, येन प्रतोलीषु जलं न प्रसरेत्, किञ्च नगरस्य स भागः सुरक्षितस्तिष्ठेत् । अस्मिन्नवसरेऽपि सर्वाणि तानि कपाटानि प्यधीयन्त । किन्तु जलस्य तादृशमुपबृंहणमालोक्य जना आशङ्कन्तैव-मा नाम जलं कपाटान्यप्युत्क्रम्य रथ्यासु प्रसारीदिति ।

तत्रैकं 'डलगेट Dulgate' नाम निष्कासस्थानमस्ति, येन डलनाम्नो महाह्रदस्य जलं नदीमुपस्यन्दते । अथ यदि नद्यां जलं भूरितरं जायते तदा नदी तं महाह्रदं प्रति प्रतीपं स्यन्दितुमारभते, किन्तु तेन प्रतीपस्यन्देनैव 'डलगेट'-स्य कपाटे पिधीयेते । ते इमे सम्प्रति पिहिते आस्ताम् । परन्तु नद्या जलं तथोदगमत् यथा जनता भृशमाशङ्कत—तस्य कपाटयुगस्य चेद्भङ्गोऽभविष्यत् तदा बहूनां पशूनां गृहाणां जनानाञ्च हानिरभविष्यत् इति ।

अहं स्वयमपि नगरस्य तस्मिन्नेव कोणे न्यवसम् । मम निवासस्थानं शङ्कराचार्यनामपर्वतस्योपत्यकायामेवासीत् । मया मम सहचरेणावयोः प्रतिवेशिभिश्च उपायश्चिन्तितपूर्व आसीत् यत् जल उद्धते सति शङ्कराचार्यसानु-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मारोक्ष्यामः, सानोश्च प्रकृतेर्भीषणं ताण्डवं संप्रक्ष्यामहे, इति। दिष्ट्या सा वेला नागात्।

बहुकृत्वः किं वदन्ती प्रासरत्–'डलगेट कपाटे त्रुटिते' इति तदाकर्णन-समकालमेवास्मदविदूरवासिनां कातराणां काश्मीरीयाणां प्राणा उदगच्छन्निव। यत्सत्यं तेऽनागतामपि विपत्तिमागतामिवाक्रिन्दन्। तेऽक्रन्दन्, अक्रोशन्, उरांस्य-ताडयन्, विच्छायवदना विह्वलं पर्यधावन्, किम्बहुना, नितान्तं दयनीयं दृश्य-मदर्शयन्। एकदा मम सहचरः सायिकलयानमारुह्य तस्याः किंवदन्त्याः प्रत्ययं कर्तुं डलगेटं गतः, परन्तु स्तोकादेव स प्रहसन् प्रतिन्यवर्तत, अस्माँश्च भीरूणां काश्मीरीयाणामाशङ्कां वृथेत्याख्यत्।

सत्यम्, अस्माकं कृते साऽऽशङ्का वृथाऽऽसीत्। वयं हि तत्र विलासार्थं गता आस्म। नास्माकं तत्र गृहाणि, न भूमयः, न क्षेत्राणि, नच लघुलघवो बालकबालिकाः, नवान्यः परिग्रहः, अस्माकं किंभयमभविष्यत्, कामं काश्मीरो न्यमङ्क्ष्यत्। कःखलु परकीयां वेदनां संविद्यात्! येषां तत्र सर्वविधः परिग्रह आसीत् ते काश्मीरीयास्तादृशे व्यतिकरे कथं भयाशङ्कां नाकरिष्यन्? न च वय-मपि निःशेषेण वीतशङ्का अतिष्ठाम। रात्रौ स्वापात्पूर्वं कैवर्तकैः सह समयमकुर्महि यद्–'दैवाद्रात्रौ यदि जलमुद्गच्छेत् त्वया नावमादायास्माकं स्थानमागन्तव्यम्' इति। प्रलोभनञ्च तस्मै प्रादर्शयाम—'पुष्कलं ते पारितोषिकं दास्यामः' इति धिग् अस्माकमात्मंभरित्वम्! तस्य गृहं कामं ध्वंसेत तस्य स्वकं कुटुम्बं कामं निमज्जेत् परं सोऽस्मदीयान्युपकरणानि, अस्मदीयान् प्राणान् रक्षेत्, तच्च केवलं क्षुद्राय-धनाय–हाधिक्!

अथ 'पतनान्ताः समुच्छ्रयाः' इति नियमात् तत्समुच्छ्रितं जलं शनैः शनैः क्षेतुमारभत। नद्यः प्रकृतिमापद्यन्त। घोरः सलिलवाडो विरराम, केवलं यत्रतत्र तस्य चिह्नान्यवाशिष्यन्त। यत्र कतिपयैरहोभिःपूर्वं तरङ्गतरलं पानीयं प्रवहतिस्म, सा भूमिः सम्प्रति पिच्छिला पङ्किला चादृश्यत। प्राग्यत्र बालकबालिकाकलकलैः संघुष्टानि गृहाणि व्यलसन्, तत्राधुना केवलमेकः शून्यो मृत्तिकोच्चय स्तदन्तर्म-ग्नोन्मग्नानि काष्ठशकलानि वाऽऽलोक्यन्त। क्वचिदस्थिकल्पानि खण्डितस्य प्रवह-णस्य भित्तान्यतिष्ठन् क्वचिच्च नग्नमूलनाडीका महाकाया वनस्पतयोऽशेरत। जलान्यपासरन्, मार्गा मुक्ता अभवन्, यानानि यथापूर्वं गतागतमारभन्त। मृत-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेषा अवस्कन्दिता यात्रिणः श्रीनगरमुपसमवेयुः । गान्धर्वलादिभ्यः संवसथेभ्योऽपि लोका रात्र्यपगमे कुलायेभ्यः पक्षिण इव निःसृत्य श्रीनगरमेवाव्रजन् । ततश्च सर्वे यानानि परिक्रीय यथाभीष्टान् देशान् प्रातिष्ठन्त । वयमपि मार्गोच्छद्घाटमिहागच्छाम । 'तेन भयङ्करेण वाडेन काश्मीरप्रजानां कियती क्षतिः संजाता, कियन्तो वा प्राणिनो मृता इति ज्ञातुं कस्यावसर आसीत् ।

इति शम् । (बहादुरचन्द्रः शास्त्री)

जैनमतदिग्दर्शनम् ।

(लेखकः—जैनाचार्यभट्टारकः श्री देवचन्द्रसूरिः (बीकानेर)

अयि ! भव्याः ! सादरं शृण्वन्तु भवन्तः । उदधिमेखलायमाने सुरभारतीवनिताशोभिते सुहिते वर्षेऽस्मिन् भारते पुरा किल जैनधर्मपताका निजप्रान्तभागेन चतुर्षु दिक्षु जैनधर्मं दर्शयन्ती सर्वत्रैव विकाशमाना आसीत् । प्रभावेण च तस्याः प्रशस्तसमस्तभूमण्डले दयाकुलाः प्राणिवर्गाः परस्परं मैत्रीभावं प्रकटीकृत्य आनन्दोत्तरमानन्दमनुभवन्तः शिवसुखभागिनोऽभूवन् । अयि ! मान्याः ! जैनसमाजोऽपि प्राचीनः शास्त्रसम्मतश्च । अशोकभूपकाले भारतेऽत्र जैनसंख्या चत्वारिंशत्कोटिप्रमिता आसीत् । कुमारपालसमये च यूकालिक्षकादीनामपि हिंसाकरणे दण्ड आसीत् ।

हा ! हन्त ! अद्य सैव जैनपताका व्याकुलीभूय दुःखेन जीवनमुज्जीवयति । सत्यमिदं व्याहारि क्वचिच्छ्रीजुषा विदुषा माघकविनेति ।

"समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम्" इति ।

मन्ये मान्याः ! सा खलु जैनपताका इदमेव कविवचः चरितार्थयन्ती स्वयं तुष्यति च । बुधाः ! सम्प्रत्यपि नहि सा छिन्नमूला जाता । किञ्च द्वादशलक्षपरिमिता दयाधर्मकल्पपादपफलफलितजैनधर्मसुन्दरनौकामारुह्य विविधपापग्राहाकुलभवसागरलोलवीचिमालां सुखेन उत्तीर्य नानाविधलौकिकसुखमनुभवन्ति । अन्ते च शिवसुखं लप्स्यन्ते ।

अयि ! पण्डितप्रकाण्डाः ! सम्प्रत्यपि विधिकृपया तद्धर्मरक्षकाः साधवः निजवदनकमलनिःसृतमधुरामृतवचनबिन्दुभिः लोकान् पावयन्तः शास्त्रविहितेन पथा विचरन्ति धराविभागे । यद्यप्यधुना कलहपिशाचिकाकुले कलौ जैनधर्मेऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विविधानि मतानि अक्षिलक्षीभवन्ति। किन्तु सर्वेषां प्रधानं "श्वेताम्बर" इति मतम्।

श्वेताम्बरा अपि चतुर्विधाः। साधवो[1] यतयस्त्रयोदशपथिनः[2] (तेरहपंथी) द्वाविंशतिसमुदायिनश्च[3] (ढूंढिया-बाईस समुदाय-स्थानकवासीति)।

तत्र साधवः द्रव्यादिपरिग्रहरहिताः त्यागसहिताः, सहिता मिताः पररमिता सन्तः विचरन्ति सर्वत्र भूमण्डले। साधवः खलु धूमशकटादिवाहनेषु नैवारोहन्ति। शीतलपानीयमपि न गृह्णन्ति स्पृशन्ति च, बिन्दावेकस्मिन्नसंख्याताः जीवास्तद्धिंसाजनकत्वात्, उष्णोदकमानीय भक्तगृहेभ्यः पिबन्ति। पद्भ्यां गच्छन्ति। केशलुञ्चनं च विदधति। ग्रामे एकरात्रं नगरे पञ्चरात्रं पत्तने मासपरिमितां स्थितिं विधाय पुनरितस्ततः परिभ्रमन्ति केवलं चतुर्मासे तेषामेकत्रस्थितिः। तेषु साधुष्वपि विविधाः गच्छाः सन्ति। दिङ्मात्रं यथा—तपगच्छ, पायचंदगच्छ, खरतरगच्छ, लोकागच्छ, कँवलागच्छ, अंचलगच्छेत्यादिभेदेन चतुरशीतिपरिमिता आसन्, अधुना च पञ्चषाः गच्छा दृष्टिपथमायान्ति एते खलु सर्वेऽपि चतुर्विंशतितीर्थंकराणां शङ्कराणां मूर्त्तिमुपासते। दयाधर्माद्युपदेशं च वितरन्ति। हरितदूर्वादितृणमपि न स्पृशन्ति। कन्दमूलानि च न खादन्ति। इत्थं साधवो विज्ञेया उद्योतावलोकनपटुभिर्धीधनैः सूरिवर्यैः।

यतयः पुनः सपरिग्रहाः। किञ्च कामनीरहिताः सन्तः विलसन्ति किलाऽस्मिन्नेव मते। पूर्वोक्तगच्छभेदात्तत्तद्गच्छीयाः साधवः ह्युपर्युक्ता एव। यतयोऽपि तद्धर्मानुरक्ताः किञ्चिद्विरक्तास्तेष्वपि तेषां गच्छोपरि माननीयाः श्रीपदविभूषिताः "श्रीपूज्य" इत्युपाधिसमलङ्कृताः। विराजमानाः सन्तः श्रीपूज्यपदं समलङ्कुर्वन्ति। एते खलु महानुभावाः श्रीपूज्याः सूरिवर्याः प्रतिगच्छं पूर्वोक्तगच्छानुसारेण भिन्ना एव। स्थितिश्च तेषामित्थम्। यदा खलु ते विविधविचित्रभूषासमलङ्कृता आसनाद्बहिर्निर्यान्ति तदा छत्रचामरादिभिः सेवकवर्गैः सादरं सविनयं विबुधसदसि सुरासुरकिन्नरैर्वीज्यमानं पुरन्दरमिव वीज्यमानाः सन्तः शङ्खध्वनिना च लोकत्रये स्वकीयं कीर्त्तिपटहं विध्वन्य शिवहिताय प्रवर्त्तन्ते। दिशि २ च धर्मोपदेशेन श्राद्धान् अन्यान् वा पावयन्तः ससुखं विचरन्ति। (द्वादशपन्थीमतमिदम्)।

तस्मादेव शतत्रयवर्षात् स्थानकवासिमतं निःसृतम्। तेऽपि (स्थानिकवासिनः) चतुर्विंशतितीर्थंकरानेव मन्यन्ते। किञ्चायं विशेषः, यत्ते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूर्त्तिं न मन्यन्ते । भावनयैव निजहृदयाङ्गणे तानेव चतुर्विंशतितीर्थंकरान् सादरं निधाय शिवसुखं ध्यायन्ति । आचारस्तु तेषामित्थम्—मुखे वस्त्रिकां (मुखपट्टिकां) निदधति । कारणञ्चात्रमिदं यद् एकस्मिन्नेवोच्छ्वासे असंख्याता जीवाः म्रियन्ते । तद्रक्षार्थं मुखे वस्त्रिका । तेचोष्णोदकं न पिबन्ति । करपात्रादिप्रक्षालनावशिष्टजलं पिबन्ति, नक्तं च जलं स्वपार्श्वे नैव स्थापयन्ति । किञ्च जलनिष्ठकार्यं प्रस्रवणधारया एव निर्वाहयन्ति । शेषं पूर्वसाधुवत् ।

पुनस्त्रयोदशपथिनः (तेरह पंथी) तत एव निःसृताः । ते खलु धूमशकटकेशलुञ्चनादि कार्येषु पूर्ववत् । किञ्चायं विशेषो यद् दयाधर्मदानरहिताः, तद्विषये नोपदिशन्ति, हेतुश्चात्रैषः—

यथा कश्चित् मार्जारः बिलेशयं करालदंष्ट्रान्तरालीकृत्य नयति तदा ते तं न मोचयन्ति । यदि कुत्रचिद्भावः कृशानुज्वालाजालकवलिताः स्युस्तदा ता अपि न मोचयन्ति । किमधिकम् । पिपासाकुलाय पानीयं न वितरन्ति, बुभुक्षिताय अन्नं न ददति । आशयश्चेत्थं तेषां यदेतेषां खलु मोचने रक्षणे च कर्मवृद्धिः, कर्मवृद्धेः संसारः, संसारात्पापं, पापात् भूयोऽपि नानायोनिषु प्रादुर्भूय नारकीयवेदनामनुसह्य जराजन्मरहिता न भवन्ति जीवाः, अतः प्राग् कर्म एव न करणीयम्, तदकरणात् कृतकर्मणां सति क्षये सुतरामेव शिवसुखलाभ इति ।

यतीन् विहाय सर्वेऽपि खल्वेते स्नानदन्तमञ्जनादिक्रियां न कुर्वन्ति । गच्छभेदेन क्रियाया अपि भेदः सर्वेषाम् ।

हा ! एकस्मिन्नेव जैनश्वेताम्बरधर्मे एकस्यापि पितुः पुत्रा रागद्वेषाग्निज्वालाजालकवलिताः सन्तः अज्ञानप्रचण्डवायुवेगेन रागद्वेषाग्निं वर्धयन्ति । अत एव ह्रासः । इदमेव महद् दुःखम् । अधिकं तु खेदावसरोऽयं यज्जैनमते पूर्वोक्तचतुर्विधसम्प्रदायगच्छेषु तत्तद्गच्छपरिपालकाः देवगुरुभक्तिकारकाः श्रावकाः नानाविधसुखाकुलाः सन्तोऽपि संस्कृतभाषां न पठन्ति, न पाठयन्ति च । हा ! धिगिदं दैन्यम, हा ! धिगिमाञ्चौदासीनीम ।

साधवोऽपि सुरभारतीं अनादरीकृत्य केवलभाषाग्रन्थावलोकनेन रुचिरवाक्यादिभिश्च लोकानां मनांसि रञ्जयन्तः दिनान्यपनयन्ति । पूर्वं जैनधर्मे नानाविधाः पण्डितप्रकाण्डाः जैनाचार्यपदविभूषिताः बहवः सूरयोऽभूवन् । यथा—अभयदेवसूरिमलयगिरिशीलाङ्गाचार्यप्रमुखाः विद्वांसो विविधान् ग्रन्थान्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरच्य जैनधर्मसाहित्यं वर्धयामासुः । यदि भूयोऽपि ते साधवो यतयः गृहस्थाः वा परस्परं रागद्वेषं विहाय, पण्डितजनेषु श्रद्धां निधाय, भूयोपि सुरभारतीप्रचारणे मतिं कुर्युः तर्हि अवश्यमेव हसितोप्ययं जैनधर्मः उन्नतिशिखरं यास्यत्येवेति दिङ्मात्रं प्रदर्श्य सानन्दं विरम्यते। शान्तिः शान्तिः शान्तिः।

गौरवं नष्टम् ।

(ले०—सहकारिसम्पादकः)

जयचन्द्रः—नष्टं नष्टमस्माकं गौरवं नष्टम् ।

पुष्पचन्द्रः—सत्यं वक्षि ?

जय०—सत्यं सत्यं सुतरां सत्यम् ।

पुष्प०—मम जीवितेन शपसि ?

ज०—तव जीवितेन शपामि, नष्टं नष्टमिति ।

पु०—हन्त ! किं प्रलपसि ? अस्माकम् ? मरुवासिनाम् ? नष्टम् ? असम्भवम्, नितरामसम्भवम्, मरुभूमिभुवां गौरवं वैयाकरणानां शब्दब्रह्मेव कूटस्थमविचाल्यनपायोपजनविकारि न कदापि कथमपि नष्टुमर्हति । तदुक्तं मरुगीतायाम–न च्छेद्यं न च निर्दाह्यं न क्लेद्यं न च शोष्यते
नित्यं सर्वगतं स्थाणु गौरवं मरुवासिनाम् ।

ज०—ब्रवीमि तु भूयो भूयः-नष्टं नष्टं युगपन्नष्टमिति ।

पु०—अस्तु, कथं नष्टम् ? ब्रूहि, शुश्रूषुरस्मि, किं जातम् ?

ज०—किं पृच्छसि, पुरस्तादेवावेदितं नष्टं नष्टमिति ।

पु०—मा स्म भूरधीरः, किमपि तु ब्रूहि, किं नष्टमिति, नष्टं नष्टमिति कियत् प्रलपिष्यसि । अहं तु मन्ये मरुवासिनां गौरवं न स्वप्नेपि मात्रयापि विनाशमर्हति । मनाक् प्रकृतिमास्थाय विशदमाख्याहि-कुत्र किं वृत्तम् ? कुत्र पार्श्वे विनष्टम् ? कियद् विनष्टम् ।

ज०—रामगढ़े विनष्टम्, युगपद् विनष्टम् ।

पु०—कथम् ?

ज०—कश्चन ब्रह्मचारी रामायणीं कथामचकथत्, तत्र भूयांसः श्रद्धालवो नरा नार्यश्च समवेत्य बद्धादराः समाहितमनसः तत्कथामृतं कर्णयोर्निषिञ्चन्त उपाविशन्। अत्रान्तरे ठाकुरमहोदयस्तस्माज्जनसमुदायात् काम-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्युच्चकुलप्रसूतां महिलां स्वजनैः प्रसह्य स्वान्तिकमानीनयत्, अपमानितवांश्च ताम् । इत्थमपमान्यमानास्वपि नो वधूषु सुतासु च किमस्माकं गौरवं सुरक्षितमेव ? नैतदतिरोहितम्-यद् वयं वाणिज्यपरवशाः सदा प्रवासिनो न स्वकुटुम्बं सह रक्षामः, सर्वोऽपि नः परिजनः स्वदेश एव तिष्ठति । यद्येवं राजकीयाः पुरुषाः प्रवासिनां कलत्राणि धर्षयेयुः, तर्हि अद्य परेषामन्येद्युरस्माकमपि धर्ष्येरन् । नास्माभिः किमपि कर्तुं पार्यते । हन्त ! नष्टं नष्टं सर्वमेकपदे नष्टम् ।

पु०—(अट्टहासं विधाय) साधुरसि हृदयेन ! भद्र ! यदि काचन स्त्री राज्ञापमानिता तर्हि किमेतेनास्माकं गौरवस्य विनष्टम् ? वस्तुतो ग्राम्योसि ।

ज०—किं ब्रूषे ! अस्माकं स्त्रीष्वपमान्यमानास्वपि न नो गौरवस्य किमपि हीयत इति ।

पु०—ननु कथयामि-न कथमपि हीयते, तिलमात्रमपि न हीयते । मरुवासिनां तु गौरवं सदा निरपायम् ।

ज०—कथमिदमितिचेत् ?

पु०—इत्थम्, स्त्रीभिर्गौरवस्य कः सम्बन्धः ? स्त्रियः खलु पुरुषस्य क्रीतदास्यः, परमात्मविसृष्टानि संतानोत्पादनयन्त्राणि, भोजनपाचिकाः समये २ दुर्वचनभाजनानि च सन्ति । इयदपि न वेत्सि चेन् नासि मरुभूमिवासी।

ज०—मा मैवं भद्र ! अलमनेन निरर्गलप्रलापेन । स्त्रियः खलु गृहमेधिनां गृहलक्ष्म्यः ।

पु०—मन्ये, कुत्रचित् पुस्तके पठितं भवेत् । इमे पुस्तकलेखका वस्तुतो धीरङ्गाः निरातङ्कं निरुपपत्ति यदिच्छन्ति तल्लिखन्ति । अनुमत श्चेदवितथं वदामि, स्त्रियः खलु कामसाधनम, बुद्धम् ? कामसाधनम् ।

ज०—न बुद्धम्, अनिर्यन्त्रणं प्रलपसि ।

पु०—भद्र ! नैष मेऽनिर्यन्त्रणप्रलापः । अपि तु सार्वजनीनं तथ्यमिदम् । पश्य त्वमेव-यदा षष्टिवर्षदेशीयो जरत्तरः श्मश्रूणि लघीयांसि विधाय श्वेतान् केशानोषधिप्रयोगेण कालिमानमानीय तरुणायमानः स्वपौत्रीमिव अल्पवयस्कां कुमारीं सतौर्यत्रिकं स समारोहमुद्वह्य स्वगृहमानयति । सा च वराकी मुमूर्षोस्तस्याचिरादे नैसर्गिके यमलोकप्रयाणे बाल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैधव्यमनुभवन्ती रूढयौवना स्वैरं भ्रूणानि पातयति, तदा न नो मरु वासिनां गौरवं तिलमात्रमपि ह्रसति ।

यदा चास्माकं गृहलक्ष्म्यो निस्त्रपमश्लीलानि दौर्गन्ध्यमुद्गिरन्ति गीतानि गायन्त्यः, अतितनीयांसि दृष्टिमनिरुन्धानान्युज्ज्वलानि वासांसि परिधाय ससमारोहं पण्यवीथिकासु प्रचरन्ति, तदापि नास्माकं गौरवं विलीयते ।

यदा चास्माकं कुलबध्वो देवरैरन्यैश्च प्रतिवेशिभिर्लज्जां फूत्कृत्य होलोत्सवमारचयन्ति, तदापि नास्माकीनमिदं गुरु गौरवं पदमपि स्वासनाद् विचलति ।

यदा च वयमाङ्गलभाषामधीत्याङ्गलवेषं च परिधाय सभासु संस्थासु च सगौरवं स्वगौरवं व्याचक्ष्महे, परमस्माकं गृहदेवताः निरक्षराः—

"महिषीपुरतो विरणति वीणा, महिषी कूजति चतुरधुरीणा"। इत्याभाणकोदाहरणानि भवन्ति । तदाप्यस्माकं गौरवं न मनागपि भ्रश्यति । राजमार्गेषु यदा कश्चिच्छकटचालकापसदः 'अरे मारवाड़ी' इत्याकारयति, तदापि नो गौरवमविकलमेव तिष्ठति ।

येषामस्माकं व्यापारकर्मणि इयदधिकः सम्बन्धः, येषां हस्तैः प्रत्यहं परस्कोटिपरिमितद्रव्यदानप्रदानं भवति, ते वयं पञ्चषशब्दमात्रं तडित्पत्रमपि वाचयितुं न प्रभवामः, प्रतिवेशिनांऽन्येन केनचिदध्याय केन वा पाठयामः तथापि धन्यमस्माकं गौरवं बद्धमूलं कम्प्यमानं न कथमपि कम्पते । तत् त्वमेव ब्रूहि-यदितः प्रखरान् प्रहारान् प्रसहिष्णुवपि नो गौरवं ठाकुरमहोदयेन कस्याश्चित् स्त्रिया अपमाने कृतेऽपि किं भज्यते ? न भज्यते, न कदापि भज्यते, मरुभूमिजन्मना मभङ्गुरं गौरवं स्वप्नेऽपि न भज्यते ।

ज०—ऋतमुदीरयसि । परं वयस्य ! निपुणं विचार्यमाणे स्त्रियोऽपि सन्त्येव गौरवास्पदम् । गान्धीमहोदयो ऽप्यभिधत्ते, मालवीयोऽपि ब्रूते । शास्त्राण्यप्यर्थमिममुच्चैरुद्घोषयन्त्येव ।

पु०—स तेषां प्रातिस्विको विचारः । अस्मासु मरुवासिषु पुन नैंषा विचारधारा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथमपि पदं कर्तुं प्रभवति । मरुवासिनां दृष्टिकोणेन स्त्रीणां गौरवस्य च नान्योन्यः कश्चन सम्बन्धः ।

ज०—तर्हि ब्रूहि केन मरुवासिनां गौरवम् ?

पु०—वित्तेन ।

ज०—कथम् ?

पु०—शृणु सावधानम् । पुरातनं वृत्तमेकमुदीर्य बोधयामि । मोहमदराज्यकाले स्वग्रामवास्तव्य एव कश्चन वणिग् विदेशाद् बहुद्रव्यमुपार्ज्य गृहमागतः । ठाकुरमहोदयेन तदागमनवृत्तं विज्ञाय स प्रसह्य भटै र्ग्राहयित्वा स्वपार्श्वमानायितः, अर्जितस्य द्रव्यस्यार्धं प्रदातुमादिष्टश्च । वणिक् प्रोवाच- "अन्नदातः ! किमस्ति मम पार्श्वे ? अहं तु बुभुक्षाक्षामः सर्वथाऽकिञ्चनोऽस्मि इति । ठाकुरमहोदयेन शङ्कुद्वयं भूमौ निखान्य तत्र तस्य श्मश्रुयुगलमबन्धि, स्वयं च स चिरं चण्डातपे स्थापितः, नितरां दुर्वचनक्रकचैर्दारितः कर्णेहत्य ताडितश्च, अन्ते च निष्फलसर्वप्रयासेन त्यक्तश्च ततो गृहमागते तस्मिन् 'कथय किं जातम्' इति लोकास्तमपृच्छन् । वणिगुवाच-'जातं किम्, दुष्टेन यथेच्छं ताडितम्, दुरुक्तमुक्तम्, श्मश्रुकेशानां शङ्कुभ्यां बन्धनं कारितम्, ललाटन्तपतीव्रातपे ऊर्ध्वमवस्थापितम्, किमन्यत् तृणफूलोपि चारितः । परं मयापि वीरेण सर्वं सोढम् न पुनरात्मनो गौरवं मनागपि प्रत्तम् । अन्ततो विफलसकलप्रयत्नः स पिशाचाविष्टष्ठाकुरापसदो मामत्यजत् ।

ज०—तर्हि यत् सत्यं वित्तमेव सर्वथा गौरवास्पदम् ?

पु०—अथ किम्, नात्र मात्रयापि संशयः, यदि कुत्रचित् कश्चिद् अस्माकं गृहिणीरपमानयेदपि तर्हि वयं स्वोष्णीषे हीरकाणि प्रलम्ब्य, वक्षसि मौक्तिकहारानामुच्य, मृदुलास्तरणसमलङ्कृतेषु मरुत्तरशकटेषूपविश्येतस्ततः परिभ्रमणेन गौरवं प्रतिष्ठापयिष्यामः ।

यदि कश्चित् सूतः अस्मान् 'अरे मारवाड़ी' इत्येवमुच्चार्याकारयेदपि तदापि वयं तस्मै द्विगुणं भाटकं दत्वा स्वप्रतिष्ठां परिवर्धयिष्यामः । अस्माकं तु गौरवं प्रत्यहं वृद्धिह्रासशीलं न जाने कियदरत्निमितं वर्धते कियद् वा ह्रसति । वयं तु क्षणेनैव तदेधयामः, कश्चिद् वराकः कियदस्माकं प्रतिष्ठामुपहनिष्यति, शतस्य पञ्चाशतो व ग्रन्थीन। क्रयविक्रये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालस्तोकेनैव अस्माकं गौरवं पुनर्नवीक्रियते। अरे! प्रतिष्ठापि नाम दुर्लभं वस्तु। किमर्थमयमात्माणीयसि वस्तुनि नितरामायास्यते, कुरु क्रीणीष्वविक्रीणीष्वां वणिज्याम्। किंचिद् दत्स्व किंचिदादत्स्व। अहमहमिकयाग्रेसरो भव। उपार्जय वित्तम्, तदनु पश्य क्षणेनैव द्यामधिरोहति गौरवम्। कथय-कार्पास विषये किं चिन्तितम्, हिरण्यस्य च को भावः *।

॥ श्रीः ॥

लायलपुरम्
का० शु० ११

प्रेषितपत्रिका

मान्यवरेषु श्रीमत्सु मित्रवर्येषु शास्त्रिमहाभागेषु. सादरमेवं सप्रेम नतयः। शुभमत्रतत्रास्तु.

श्रीमतां कृपापत्रमवलोक्य परा प्रसत्तिरासीत्। "श्रीदुर्गाभ्युदयनाटक" प्रकाशनार्थं मनेकशो धन्यवादाः चिरकृतज्ञता च। वृत्तमिदम्—मया प्रथमं गौरवदृशा समालोचना तत्प्रत्यालोचना च न दृष्टा। श्रीमतामेतत्पत्रमुपलभ्य यदाहं ते दृष्टवान् तदावसाने भवतामेव लेखं समीचीनं निश्चैषम्। ते यत् 'तुशब्द' मन्यत्र-योजयन्ति तत्र न किमपि वैलक्षण्यमुत्पश्यामः। भवल्लेखानुसारं तुशब्दस्य पूर्वपक्ष-व्यावर्तकतैव साधीयसी, ग्रन्थसंगतौ तुशब्दस्यान्यत्रयोजनमेव भ्रामकम्, न स्वस्थानस्थितत्वम्। यच्च तैर्व्यर्थत्वलेखादिविचारः कृतः स खलु वस्तुतस्त्वेवाकाण्डताण्डवम्। यतः स पाठो भवद्भिः शुद्धिपत्रे दत्त एव, देवदत्तः पायसं भोक्तुं शक्नोति चणकान्नं तु न, इत्यत्र पायसव्यावृत्तिलेखोपि तेषां भ्रम एव, तुशब्दस्य लेखनं ग्रन्थकृतः सर्वथा संगतं मन्यामहे, तल्लापनं चापि भवतां सम्यक्, तेषामस्पष्टत्वस्य भ्रामकत्वस्य च कथनमस्मभ्यं न रोचत एवेतिशम्।

श्रीमदनुग्राह्यः—

छज्जूरामशर्मा।

---

* 'महारथी' पत्रे प्रकाशितस्य श्रीचतुरसेनवैद्यमहोदयोपनिबद्धस्य 'इज्जत विगड़ गई' इत्यस्य भावानुवादः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यालोचना।

(ले०—श्री निखिलतन्त्रस्वतन्त्र दण्डिस्वामिविश्वेश्वराश्रमाः)

श्रीगजास्यं नमस्कृत्य बुद्धिशुद्धिकरं नृणाम्। यं स्मृत्वा कृतकृत्याः स्युः शक्रप्रभृतयस्सुराः ॥१॥ पुंसां संस्मरणादेव गणराजप्रसत्तितः। उपक्रमे हि कार्यस्य सर्वस्य सिद्धिरिष्यते॥२॥ श्रीनरसिंहदेवानां श्रीसीतारामशास्त्रिभिः। अस्खलनेपिसम्प्रोक्तं स्खलनं बुद्धिविप्लवात् ॥३॥ अशुद्धत्वेन निर्दिष्टं पदं व्यर्थमनुत्तमम्। तमेवादाय यत्प्रोक्तं मुधा वान्तश्च तन्मतम्॥४॥ श्रीनरसिंहदेवो हि शुद्धिपत्रे यदादिशत्। पदमव्यर्थमादाय पुनरालोचयच्च सः॥५॥प्रत्यालोचनमेवास्य विधास्ये दर्पखण्डनम्। श्रीगणनाथकारुण्याद् गुरूणाञ्च प्रसत्तितः॥६॥ तु शब्दार्थे निमज्जन्ति श्रीसीतारामशास्त्रिणः। मुक्तावली प्रणेतॄंश्च तिरस्कुर्वन्ति गर्वतः ॥७॥ पूर्वपक्षनिवृतिश्च तुशब्देनात्र निर्दिशेत्। व्याहार्षीन्नरसिंहो(हि)पि न तं स्वीकुर्वते मुधा॥८॥पूर्वपक्षोऽत्रनैवास्ति यद् व्यावृतिस्तुना भवेत्। इति यद् ब्रुवते खिन्ना तेषां धीरनुमीयताम्॥९॥ पूर्वपक्षस्य यस्मिंश्च ग्रन्थेऽभावः प्रदृश्यते। ग्रन्थाद्बहिर्बुधैस्तत्र कल्पितस्सर्वसम्मतः ॥१०॥ सोपि नृसिंहदेवैश्च कल्पितो ह्यविशङ्कितः। कथं न मन्यसे विद्वन्! कल्पितम्बुधसम्मतम् ॥११॥

भिवानीनगरस्थब्रह्मचर्य्याश्रमसंस्थापकानां श्रीसीतारामशास्त्रिणां समालोचनायाः प्रत्यालोचनेयम्। यदुक्तम्—इहैवं व्यवस्थायां नृसिंहदेवशास्त्रिण आहुः—सम्प्रति तद्भिन्नत्वविशेषणं व्यर्थं मन्यमान आह तरीतन्तुसंयोगस्त्विति। अत्रैवं विचार्य्यं, यद्यत्र पटात्मककार्यापेक्षया तुरीतन्तुसंयोगस्यासमवायिकारणत्वमापद्यते तत्र तद्भिन्नत्वविशेषणमावश्यकमेवातिव्याप्तिभयात्। एवं हि तत्र पटं प्रति तस्य=तुरीतन्तुसंयोगस्य वैयर्थ्यशङ्कैव नास्ति कुतो वैयर्थ्यम्। एवं चेन्नास्तिवैयर्थ्यं कुतोवैयर्थ्यमननमिति। अत्र ब्रूमः, श्रीनृसिंहदेवानां महत्यपिनिबन्धे स्खलनं दृष्टवतां श्रीसीतारामाणां क्षुद्रसन्दर्भे स्खलनं तेषां कीदृशमित्यपिद्रष्टव्यम्। श्रीनृसिंहदेवैरक्षरयोजकदोषादव्यर्थपदस्थाने व्यर्थपदं यन्निविष्टमासीत्तच्छुद्धिपत्रेऽशुद्धत्वेन बोधितमपि तदादाय समालोचने प्रथमं स्खलनं सीतारामाणाम्। द्वितीयन्तु (एवं तत्र हि पटं प्रति तस्य=तुरीतन्तुसंयोगस्य वैयर्थ्यशङ्कैवनास्ति कुतो वैयर्थ्यम्। एवं चेन्नास्ति वैयर्थ्यं कुतो वैयर्थ्यमननम्) इत्येवं वदतां स्खलनम्। नहि श्रीनृसिंहदेवैरशुद्धेपि पाठे तुरीतन्तुसंयोगस्य वैयर्थ्यमुक्तम्'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपितु तद्भिन्नत्वविशेषणस्यैव, इदन्तु श्रीसीतारामाणां द्वितीयं स्खलनम्। अथ तृतीयं स्खलनम्—तुशब्दस्याव्ययत्वेनाव्ययानां चानेकार्थत्वं सर्वसम्मतं क्वचिदवधारणार्थत्वं क्वचित्पुनरर्थत्व क्वचित्पूर्वपक्षव्यावृत्यर्थत्वमित्येवमनेकार्थत्वेप्येकार्थमादाय दोषाभिधानमिदं श्रीसीतारामाणां तृतीयं स्खलनम्। अथ चतुर्थं स्खलनमुद्योते श्रीनृसिंहदेवदृष्टम्। यत्—असार्वत्रिकेपि प्रकृतपदार्थापेक्षया विजातीयपदार्थे विधेयान्तरसूचनद्वारा प्रकृतोद्देश्यव्यावृत्त्यर्थं प्रयुज्यते तुशब्द इतिनियमे—उदाहरणं देवदत्तः पायसं भोक्तुं शक्नोति चणकान्नन्तु न। अत्र श्रीसीतारामशास्त्रिभिरुक्तं भोजनशक्त्यभावे प्रकृतस्य पायसस्य व्यावृत्त्यर्थं चणकान्वितस्तुशब्दः प्रयुज्यत इति चतुर्थं तेषां स्खलनम्,नह्यत्र पायसस्य व्यावृत्तिरिष्टा तद्भोजनस्य देवदत्तीयशक्तिविषयत्वात् अपितु चणकान्नस्यैव व्यावृत्तिस्तस्य तद्भोजनशक्त्यविषयत्वात्। अहो कीदृशोऽस्य मतिविभ्रंशः, अतिवृद्धत्वमेवात्रहेतुरिति मन्ये, अतएव वाल्मीकीये लक्ष्मणोक्तिर्दशरथविषये श्रीरामम्प्रति, वृद्धानां वचनं ग्राह्यं नातिवृद्धानां पुनर्बाल्यमुपेयुषामिति। अथ पञ्चमं स्खलनम्—सारसूचनायां प्राकृतभाषया यदवोचन् सीतारामाः उदाहरणद्वये नृसिंहदेवं, प्रथमे उदाहरणे व्यर्थमिति स्वयमशुद्धं लिखित्वा पश्चाच्छुद्धिकरणेऽधिकमशुद्धमकरोत्, द्वियीये चोदाहरणे तस्मिन्नेव पृष्टे नदेयमितिमूलपाठं देयमित्यधिकमशुद्धमकरोदिति, अत्रब्रूमः—मुद्रितं पुस्तकं लिखितमिति वदन् स्खलित एव तत्रापि निवेशमव्यर्थं मन्यमान इति पाठेऽक्षरयोजकान्मकारश्च्युतो, व्यर्थं मन्यमान इति जातम्। ब्रूहि कश्चात्र श्रीनृसिंहदेवस्यापराधः। महात्मन्—प्रायश्चित्तीयोसि संवृतः, इदं पञ्चमं स्खलनम्। अथ षष्ठम्—मुक्तावल्यां तत्तत्कार्याऽसमवायिकारणलक्षणे तत्तद्भिन्नत्वं नदेयमिति नकारोऽक्षरयोजकादधिकः पतितः। अत्रनृसिंहदेवैः—शुद्धिपत्रे—पृ० ६७ पं० १७। नदेयम—अशुद्धम्। देयम्—शुद्धम्। इति निर्दिष्टम्—अयमेव पाठस्साधुरासेतुबन्धादाचसुमेरोः सर्वविद्वज्जनसम्मतः सङ्गतश्च, यत्र श्रीसीतारामा अव्यवस्थितचित्तत्वान्नदेयमिति शुद्धं देयमिति चाशुद्धमाचक्षते—अहोजितन्धार्ष्ट्येन—गतं सत्येन—महात्मन्-पश्य स्वीयं चरमं पंद्यम—सत्यं जागर्त्ति सर्वत्र तेन तत्त्वं विमृग्यतामिति। अत्र सत्यस्य साक्षिकरणे वैडालव्रतीयं न्यायमनुहरति भवान्। शान्तं पापम्-श्रीनृसिंहदेवैर्वाराणसेया विद्वांसस्त्वत्तो भीतैर्न साहाय्याय प्रार्थ्यन्ते किन्तु त्वदीयमेतद्धार्ष्ट्यंविज्ञापयितुमेवेति विजानीहि नह्यसत्यवादिनो हिरण्यकशिपोरुरोविदारणे कस्यापि साहाय्यमपेक्षते श्रीनृसिंह-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवः। सकलवाङ्मये निर्भीकोऽयं श्रीनृसिंहदेव इत्यपि विजानीहि। अथाव्यर्थपद-प्रत्यालोचनम्-अत्र श्रीसीतारामशास्त्रिण आहुः-योह्यत्रैवं वदति तद्भिन्नत्वनिवेशमव्यर्थं मन्यमान आह-तुरीतन्तुसंयोगस्त्विति, स इत्यमुच्यते-क आह तद्भिन्नत्वनिवेशो व्यर्थ इति यद्विरोधेनैवमुच्यते अव्यर्थं मन्यमान आहेति इत्यादि, अत्रब्रूमः। यत्र मीमांसकादिवादिभिः सह शास्त्रार्थनिर्धारणाय कथारम्भः,तत्रैवान्यस्य तद्विरुद्धवादिनोऽपेक्षा, यत्र चैकस्मिन्नेव शास्त्रे पदार्थतत्त्वविवेचनमारब्धं न तत्रान्यस्य तद्विरुद्धवादिनो वचनापेक्षा, किन्तु ग्रन्थयोजनाय स्वयमेव ग्रन्थकर्त्रा स्वमनस्याशङ्क्या ऽवतार्य्यते स्वग्रन्थ इति सार्वजनीनम्। अतोऽव्यर्थं=सार्थकं-मन्यमानः शङ्कमानः=आह=विश्वनाथ इति शेषः। (यदुक्तं श्रीसीतारामैः—यद्य व्यर्थमेवसन्तमव्यर्थं मन्यमानस्तथाह किं तेन तत्र कृतं भवति यत्र तद् विरुद्धमेवेति। अत्रब्रूमः तदप्यनवधाननिबन्धनम्। यथा पटात्मककार्यविशेषे तद्भिन्ननिवेशनमव्यर्थं=सार्थकं मन्यते तथा तुरीपटसंयोगात्मककार्यविशेषेऽव्यर्थं=सार्थकं नास्ति किन्तु व्यर्थं=अनर्थकमेव तत्र तुरीतन्तुसंयोगस्या ऽसमवायिकारणत्वेन लक्ष्यत्वादतिव्याप्तिवारणप्रयोजनाभावादिति भावः। यच्चोक्तं श्रीसीतारामैः—(अथवैवं तर्हि विबुध्यताम्-कुलालस्य पटं प्रति कारणत्वस्य सद्भावासद्भावाभ्यां घटं प्रतिकारणत्वे किमायाति) इति, यद्वा महिषीवत्सलक्षणे गोवत्सभिन्नत्वविशेषणस्य सार्थकत्वेपि गोवत्सलक्षणप्रस्तावे तस्य कः प्रभावः एवं पटा ऽसमवायिकारणलक्षणे आस्तां तुरीतन्तुसंयोगभिन्नत्वविशेषणस्य सार्थकत्वं निरर्थकत्वं वा, न तत्किञ्चित्करं तुरीतन्तुसंयोस्य तुरीपटसंयोगासमवायिकारणत्वे) तथोच्यते=स्खलतां स्खलनं दृष्टमिति, इति च। अत्र ब्रूमः—एतद्दूयमप्यनवधानतामूलं न परित्यजति-यतः-तत्रासन्नं जनकंद्वितीयमितिकारिकायाम्-समवायिकारणे प्रत्यासन्नं कारणमित्यसमवायिकारणस्य सामान्यलक्षणप्रस्तावे सामान्यशास्त्रं "सामान्यविधेयद्वारा विशेषमुपसर्पतीति" नियमात् यथा पटात्मककार्यविशेषमुपसर्पति लक्षणे तद्भिन्नत्वनिवेशनमव्यर्थं=सार्थकं तथैवसामान्यद्वारातुरीपटसंयोगात्मककार्यविशेष मुपसर्पति लक्षणे तद्भिन्नत्वनिवेशनमव्यर्थं=सार्थकं मन्यमान आह-तुरीतन्तुसंयोगस्त्विति, घटं प्रति कारणत्वप्रस्तावे घटभिन्नत्वस्य गोवत्सलक्षणप्रस्तावे च गोवत्सभिन्नत्वस्य प्रसक्तिरेव नास्ति, कुतः—तत्र सामान्यविशेषभावस्याभावात्। यदि च महिषीवत्सगोवत्सयोरुभयोर्विशेषयोः किञ्चिदसमवायिकारणसामान्यलक्षणंसमन्वितं स्यात् तर्हि तत्र विचारोपि प्रस्तूयेत, नह्यत्र सामान्यद्वारा विधेयस्य विशेष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

म्प्रत्युपसर्पणम्, प्रकृते तु तत्रासन्नं जनकमिति सामान्यलक्षणमसमवायिकारणस्य प्रस्तुतं तस्य चोभयविशेषे पटतुरीपटसंयोगात्मके समन्वयेपि सामान्यद्वारा-तद्भिन्नत्वनिवेशस्य प्रसक्तिरपि, तत्र च पटात्मककार्येऽतिव्याप्तिवारकत्वेन तद्भिन्नत्वमव्यर्थमपि, तुरीपटसंयोगे च प्रत्युताऽव्याप्तिप्रसञ्जकत्वाद् व्यर्थमेव तदिति, तस्मात्सामान्यलक्षणविशेषलक्षणयोस्तु सामान्यविशेषभाव एव प्रस्तावप्रयोजकः । एतेन यदुक्तं नह्येकस्य लक्ष्यस्य लक्षणे घटकं पदं लक्ष्यान्तर-लक्षणे कश्चिद्दोषमपनुदत्यावहति वा स्वतन्त्राणि हि लक्षणानि प्रतिपदार्थम्, एवंतर्हिकस्तम्बुद्धिमित्रमाह—यःपटासमवायिकारणलक्षणघटकं पदं तुरीपट-संयोगाऽसमवायिकारणलक्षणेन कयालिप्सतविधया सम्बध्नाति, नह्यजापुत्रेण सिंहीपुत्रस्य सापिण्ड्यम्, तस्मात्तथोच्यते—स्खलतां स्खलनं दृष्टमिति, इत्यपि नि-रस्तं वेदितव्यम् । यत्र हि विशेषलक्षणान्येव प्रस्तूयन्ते तत्रैवैकलक्षणघटकस्य पदस्य लक्षणान्तरेषु न दोषाधायकत्वं नवा दोषापनोदकत्वं, यत्र तु सामान्यलक्षण-प्रस्तावद्वारा विधेयस्य विशेषलक्षणेषूपसर्पणन्तत्रैकस्यैव पदस्य लक्ष्यान्तरेष्वपि दोषाधायकत्वं दोषनिवर्त्तकत्वं वा स्वीक्रियत एव, प्रकृते तु सामान्यलक्षणप्रस्ताव-द्वारैव श्रीनृसिंहदेवैस्तद्भिन्नत्वपदस्य प्रसक्तिरभिहिता, तथाचोभयोर्विशेषो-दाहरणयोः पटतुरीपटसंयोगयोरेकत्रातिव्याप्तिदोषापनोदकत्वेन अपरत्रचाव्याप्ति-दोषाधायकत्वेनाव्यर्थत्वं व्यर्थत्वञ्च, अर्थात्सार्थकत्वं निरर्थकत्वञ्च मन्तव्यमिति-भावः । ब्रूहीदानीं को बुद्धिमित्रं कश्च बुद्धिशत्रुः किमर्थकं चाजापुत्रेण सिंहीपुत्र-स्य सापिण्ड्याभावाभिधानम् । यदुक्तं श्रीसीतारामैः—(द्वयमिदंमिथोविरुद्धं यतः-आद्येन पटासमवायिकारणलक्षणस्य त्रुटिपूरकतद्भिन्नत्वविशेषणसमर्थत्वेन उत्तर-स्य ग्रन्थावतरणं सूचयति, द्वितीयेन तु असमवायिकारणसामान्यलक्षणविषयक-शङ्कापहरणार्थन्तदिति द्रढयति, अहो बहु कार्यव्यग्राणां तेषां बुद्धिदुरवस्था, अनुरू-पमिदं पात्रस्य, इति । अत्र ब्रूमः-विद्वन् , नेदमवतरणद्वयं मूलस्य किन्तु अव्यर्थं-मन्यमानः=सार्थकंशङ्कमानः, इतिस्वोक्तार्थे शङ्काया आकार एव प्रादर्शि नृसिंह-देवेन । अयमाशयः-यद्यपि सामान्यलक्षणे तद्भिन्नत्वनिवेशेऽतिव्याप्तिभङ्गेपि सा-मान्यद्वारा विशेषमुपसर्पत, तुरीपटसंयोगेप्युपसर्पति लक्षणेऽव्याप्तिस्तत्र स्यात्, अतो विशेषलक्षणमात्रे तद्देयम् । तत्राव्यर्थमप्यत्र व्यर्थमेव, पटोदाहरणतुरीपट-संयोगोदाहरणविषयमेवेदमव्यर्थस्य वाऽभिधानम् । उद्योते-इमां शङ्कापहर्त्तु-मग्रिमं ग्रन्थमवतारयति प्रभाकारः-तुरीतन्तुसंयोगस्त्विवतीति, इत्येवं प्रतीकस्या-प्ययंप्रतीकः-अत्र एकमितिपदमक्षरयोजकदोषाच्च्युतमिति विभावनीयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संक्षिप्तलेखप्रयोजकमेवैषां बहुकार्यव्यग्रत्वं नतु भवादृशां दोषानुद्धारकत्वप्रयोजक-मित्यपि विभावनीयम् ।

श्रीस्वामिनामन्योप्येतद्विषयको विस्तृतो लेखः सति सम्भवे प्रकाश्येत। (सम्पादकः)

सारसूचना ।

हमारे प्रिय पं० नरसिंहदेव शास्त्री के मस्तिक और वाणी दोनों ने प्रकृत स्थान छोड़ दिया है, इस से उन के विचार और वचन दोनों ही अनुपादेय तथा सर्वथा क्षन्तव्य होगये हैं। इसकी पड़ताल के लिये दो ही उदाहरण पर्य्याप्त हैं' एक "तुरीतन्तु संयोगस्तु" की टीका है जिस को पहले अशुद्ध लिख कर फिर शुद्ध करने के नाम से और भी अशुद्ध बना दिया है और दूसरा उसी पत्रे में (पृष्ठ में) "नदेयम्" इस मूल के शुद्ध पाठ को "देयम्" बना कर अशुद्ध कर दिया है। (सीताराम)

उलटा चोर कोतवाल को डाटे ।

हमारे प्रियं पं० सीतारामशास्त्रीजी को जैसे किसी पक्षी को अशुद्ध वस्तु देखने का स्वभाव होता है, वैसे अशुद्धि देखने का व्यसन ही पड़ गया मालूम होता है, इस लिए सर्वत्र अशुद्ध ही अशुद्ध प्रतीत होने लग पड़ा है, मालूम होता है कोई दिन ऐसा होगा कि इन को वेदवेदाङ्ग पुराण इतिहास सभी वाङ्मय में अशुद्ध ही अशुद्धभासने लगेगा क्योंकि अभ्यास बड़ गया है, यदि "नदेयं" को शुद्ध और "देयं" को अशुद्ध ऐसे लगाकर सेतुबन्ध से सुमेरु तक का कोई विद्वान् मानले, तो हम सहस्र रुपये शरत हारनी सहर्ष मनजूर करते हैं। हा हा कलि की महिमा अपार है, शिव शिव। स्वयं सत्य की दुहाई देते हैं फिर इतना असत्य इतना अनर्थ। हर हर क्या उस देश में ऐसा भी कोई पण्डित नहीं है। जो मुक्तावली पढ़ पढ़ा सकता हो, ठीक कहा है-निरस्तपादपेदेशे एरण्डो ऽपि द्रुमायते-महात्मन्-यातो शर्त्त हारनी मनजूर करें—या श्रीनृसिंहदेवशास्त्री से अपराधक्षमा प्रार्थन करें कि फिर ऐसा अनर्थ नहीं लिखूंगा—और मेरे से भूल होगई, क्योंकि आपने ही लिखा है—सत्यं जागर्त्ति सर्वत्र—इस लिए लिखना पड़ा है—विश्वेश्वराश्रम

आप का हितैषी नरवर विद्यालयस्थः—

तदुक्तम्—नचात्रातीवकर्त्तव्यं दोषदृष्टिपरं मनः। दोषोह्यविद्यमानोपि तच्चि-त्तानां प्रकाशते ॥१॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयटिप्पणयः

पञ्जाबयूनीवर्सिटी प्राज्ञाऽदूरदर्शिता च ।

अयि ! संस्कृतानुरागिण उद्योतपाठकाः ! (विशेषतः) माननीयाः पञ्जापप्रान्तीयसंस्कृतपाठशालाध्यापकाः ! विदितमेतदस्त्वत्रभवतां यद् ईशवीये १९२८ संवत्सरे दिसम्बरमासस्य तृतीयस्यां तारकायां पञ्जापयूनीवर्सिटी-परिषदः—"संस्कृतबोर्ड" (Sanskrit Board) इत्याख्याया उपसमितेरेकम-धिवेशनमजायत, यत्र उपसमित्या प्राज्ञविशारदपरीक्षाविषये महती अदूरदर्शिता प्रकटिता, अथवा संस्कृतच्छात्रा एवाऽनिर्ध्याताः । तथाहि प्राज्ञस्य प्रथमपत्रे "विक्रमोर्वशीयं" नाटकं "सङ्क्षिप्तबालरामायण"श्चेति द्वे पुस्तके वर्तेते, सम्प्रति (ई० १९३१) परीक्षाकृते तत्र ताभ्यां सहैव "कल्याणसौगन्धिकं" नामैकमपरं नाटकमपि तृतीयं पुस्तकं सन्निवेशितम् । एवमेव "वृत्तरत्नाकर" पत्रेण सह "काव्यदीपिका" प्युद्दीपिता । विशारदस्य प्रथमपत्रे शकुन्तलया साकं "कुन्दमालां" योजयित्वा नामानुप्राससमर्थनायैव स्वमनोरञ्जनं विहितम् । परं नच विवेकः कृतो यदमीषां वराकाणां छात्राणां मस्तिष्के पूर्वमेव कियान् भारः पतितः, कीदृशी चैतेषां धारणा वर्त्तते इति । साम्प्रतिका विद्यार्थिनस्तु शकुन्तलाया महिमानमप्यधिगन्तुमसमर्थाः किम्पुनस्तत्रैव कुन्दमालायाः सौरभोल्लासस्य । एषैव गतिः प्राज्ञानाम् । तन्मन्यामहे—केवलमविचारितपरम्परया यत्किमपि येन केनाऽपि संस्कृतबोर्डि यद् यदुपन्यस्यते तत्तदेव परिषदा पाशीक्रियते (स्वीक्रियते) निजेष्टसाधनार्थम्, यतो नहि संस्कृतबोर्डि पारिषद्या विशिष्ट-संस्कृतवेत्तारः सन्ति । ये केऽपि सन्ति तेष्याधिक्येन आङ्गलग्रन्थानामेव पण्डिता भवन्ति, नतु संस्कृतग्रन्थानां पाठ्यरीत्या क्रमिकाऽक्रमिकविनिवेशन-मार्मिकबोधभाजो वर्त्तन्ते, नापि चामी महानुभावा वर्त्तमानकालीनच्छात्राणां योग्यतापरिस्थितिं सम्यक् जानन्ति, ज्ञातुं वा यतन्ते एतस्मिन्नधिकारे आङ्गल-विद्यामहत्त्वमेव तेषां महत्त्वम्, किञ्च—अधिकाधिकं यः कश्चिद् ओरिएण्टलकाले-जस्य मुख्याध्यापको भवति तमेव सम्मतियोग्यं गणयित्वा इतरे पञ्जापप्रान्तीया विद्वांसः पञ्जाबयूनिवर्सिटीपरिषद्बुद्धौ मूर्खा एव सन्तीत्येषा धारणैवोपसमिते-रपि साहसिक्यमूलमाभाति । अपिच पञ्जापयूनिवर्सिटीपरिषदः पञ्जापप्रान्ते संस्कृतस्योज्जीवनं नेष्टं, प्रत्युत यथाकथञ्चित्तदुत्कर्षध्वंसनमेवेष्टतरमित्यस्माकमा-भाति । कथमन्यथाऽनया प्राज्ञस्य भाषामाध्यमिकमाचरितं स्यात् । येन न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृता नाप्यसंस्कृताः सञ्जाता अमी वराकाः प्राज्ञाः, प्रत्युतानया भङ्ग्या ज्ञानलवदुर्विदग्धतां नीताः सन्तः शास्त्रिपर्यन्तं क्षेत्रियदौर्बल्यमासादयन्तीति हा कष्टम्। नचैते पूर्ववदात्तसंस्कृतशब्दराशयो नापिच ज्ञातहिन्दीभाषालिखनभाषणप्रकारा इति कीदृशोऽयं खेदावसरः। यदारभ्य प्राज्ञपरीक्षायां हिन्दीभाषा माध्यमिकत्वेनाऽवधारिता, यूनिवर्सिट्या तदारभ्य यावान् संस्कृतस्य ह्रासः पञ्चापमण्डले सम्पन्नः तत् किं केनचिद्वर्णयितुं शक्यते। तत्त एव जानन्ति ये वंशपरम्परयाऽद्यावधि संस्कृतमेवाधीयते, येषाञ्चाऽयुषोऽर्धं संस्कृताध्यापन एव व्ययीभूतम्। मान्याः! पण्डितवर्याः! दूरे समायातं न भवेदिति कृत्वा भवत मनांसि एतस्मिन्विषये आकृष्यन्ते यत्कियत्कालपर्यन्तं स्वावमानना सहिष्यते भवद्भिरिति। आः! द्रागेव स्थाने स्थाने संस्कृतसभाः स्थापयित्वा संस्कृतगौरवं (विशेषतः पञ्चापप्रान्ते) परिपालयन्त्वत्रभवन्तः। छात्राणां सुविधायै च परस्परं मिलित्वा पाठ्यप्रणालीः विवेचयन्तु। विविच्य च प्राज्ञादिपरीक्षासञ्चालनविषये संस्कृतबोर्डो ये ये दोषाः प्रतीयेरन् ते ते सप्रमाणं सतर्कं सादरं [illegible] सिटीपरिषदे प्रकाशयन्तु। अपिच तामभ्यर्थयन्तु यत्प्राज्ञादिपरीक्षासम्बन्धिग्रन्थविवेचनादिसौकर्यकृते न केवलं प्रधानाङ्गला एव पारिषद्याः स्थापनीयाः, नापि च ओरियण्टलकालेजीयप्रधानाध्यापकसम्मतिमात्रमादरणीयम्, किन्तु—अन्येऽपि प्रधानसंस्कृता विशिष्टाः पञ्चापप्रान्तीया द्वित्रा विद्वांसः संस्कृतबोर्डः पारिषद्याः अवश्यपरिकल्पनीयाः भवन्ति, अथवा—ग्रन्थविवेचनापूर्वं तेषां सम्मतिर्ग्रहीतव्या स्यात्। तेच विद्वांसः तत्तत्प्रान्तीयविद्वत्परिषत्सम्मतिग्रहणपूर्वकं समाकलितं हिताऽहितं (Sanskrit Board) परिषदधिवेशनेषु प्रकटीकुर्वन्तु येन चान्धरम्परया परीक्षाव्याजेन जायमानः पञ्चापप्रान्ते संस्कृतह्रासः कथाशेषतां गच्छेत्, नचोपजीव्यव्याघातशङ्कायाः समुन्मेषोऽपि सम्पद्येत। "पञ्चापप्रान्ते विशिष्टाः पण्डिता न सन्तीति व्याहरणं व्यवहरणञ्च पञ्चापयूनीवर्सिटीपरिषद एव अपमानाय भवतीति सूक्ष्ममीक्षणीयं स्यान्मान्यैः पारिषद्यैः। मन्नये एतस्मिन् विषये एकः प्रतिनिधिर्मूलत्राणतः, एकोऽमृतसरतः, एकश्च लवपुरतः प्रतिवर्षं कल्पनीयः। सम्प्रति कृतोऽयमधिकपुस्तकभारप्रदानप्रकारश्च तावत्स्थगितीक्रियेत। येचाऽस्मद्विचारानुरोधिनः ते द्रागेवोद्योतसम्पादकसमीपे स्वसम्मतिपत्राणि प्रेषयन्तु।

निबन्धारः ग्राहकाश्च—

केचन निबन्धारः स्वीयं लेखनमशोधयित्वा पङ्क्तीश्च त्रुटयित्वाऽस्फुटाक्षरं लिखन्ति प्रेषयन्ति च तत्रास्माकं समयस्य महती हानि भवतीत्युपेक्ष्यन्ते तादृशा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लेखाः प्रकाशयितुम्। ये तु छात्रा अस्मिन् कर्मणि उत्सहन्ते ते पूर्वं स्वगुरुद्वारा स्वीयं लेखं शोधयित्वैव प्रेषयन्तु। प्रेषितलेखानां मुद्रणे मुद्रापणे च सम्पादकस्य परं स्वातन्त्र्यमिति मत्वा वृथाप्रश्नपत्रैः सम्पादको नायासयितव्यः। दीर्घ-दीर्घतरलेखानामव्यवहितं विप्रकृष्टश्च प्रकाशनं सर्वथा सम्पादकायत्तमिति तत्रापि स्वीयया कयाचित्कल्पनया सम्पादको न धर्षणीयः। स्वलेखेन सह स्वयं लेख-सञ्चिकाभारं विविच्यैकाणकस्याणकद्वयस्य वा टिकेटपत्रं प्रेषणीयम्, अन्यथा-ऽसौ लेखः कदापि परावर्त्तितो न भवेत्, भ्रष्टे च तस्मिन्नुत्तरदायित्वमपि सम्पादकस्य न भविष्यति।

ग्राहकाः स्वीयं नाम धाम स्पष्टं लिखन्तु, यस्य यस्य मयूखस्य प्राप्तिर्न-भवेत्तेन स्वपोष्टस्थानादिकं शोधयित्वा सप्ताहद्वयावध्येव कार्यालयतो विवि-च्येत, एतदर्थं टिकेटपत्रं परावृत्तकार्डपत्रं वा प्रेष्येत, अन्यथा तस्याभियोगो न श्रूयेत। पत्रप्रेषणसमये स्वग्राहकसङ्ख्याऽवश्यलेख्या।

सभापतिसम्भाषणम्—

अष्टादशहिन्दीसाहित्यसम्मेलनस्य सभापतिमहोदयानां साहित्यमर्म-विद्धौरेयाणां श्रीसम्पादकाचार्याणां पण्डितवरपद्मसिंहशर्मणां सम्भाषणमाद्यो-पान्तं पठित्वा कस्य विदुषः पाषाणकल्पमपि मनो न द्रवतीति यद्यसौ साहित्य-रसाऽभिनिवेशभाजां समाजाद्बहिष्कृतो न भवेत्। दृश्यतां, पठ्यतां, ध्यायताम्, आस्वाद्यताञ्च तावत्तेषां सम्भाषणसूर्धाभिषिक्तमादौ पद्ययोजनमेव—

"यद्भारतीभारतपानलीनः सुधाभुजां धाम न कामयेऽहम्।
स मुक्तिकान्ताभरिलोभनानि ज्ञानानि मे कृष्णमुनि स्तनोति"॥

अहोऽस्मिन्निबन्धे कीदृशी भाषाबन्धारभटी, कीदृशी औचितो, कीदृशी बहुश्रुतता चाभाति भारतभूषणभूतानां श्रीपद्मसिंहशर्मणामिति सर्वं तत्पाठेनैव स्वानुभवैकवेद्यं स्यात्। इयञ्चसम्भाषणपत्रिका गुरुकुलकाङ्गडीस्थानात् लब्धुं शक्या समूल्यममूल्यं वेति न जानीमहे।

शोकसमाचारः—

सकलशास्त्रनिष्णातानां ज्वालापुर-महाविद्यालयस्य भूतपूर्वमुख्याध्याप-कानां पं० भीमसेनशर्माणां चरमाश्रमे भास्करानन्दस्वरस्वतीनाम्ना प्रसिद्धानां-स्वर्गीयवृत्तं पठित्वाऽतिमात्रं खिद्यते नश्चेतः। एते हि महानुभावा गण्यमान्यविद्वत्सु अन्यतमाः सहृदयहृदयाग्रेसराः सर्वदा विकसद्धृदनारविन्दा एवास्माभिरदृश्यन्त, ननु नामाऽमीषां लालाटपट्टमभिलक्ष्य शोकमुद्रा ललाटन्तपतपनायमानताऽ-भिमानमत्यन्तमेव पर्यत्याक्षीत्। अहो! विधातुर्निष्ठुरता। दययेदनन्तशक्तिर-खिलेश्वरो भगवानमीषां परिवारे मङ्गलं स्थापयितुम्, शमयेच्च क्लेशेभ्यो विमोच्य परत्रापि तेषामात्मानमित्येवाभ्यर्थयामहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

UDYOTAH REGISTER L. NO. 28

वार्षिकमूल्यम् १॥)
सार्धरूपकम्

प्रतिखण्डमूल्यम् ≡)
आनकत्रयम्

उद्योतः

पञ्चनदीयसंस्कृतसाहित्यपरिषदो
मासिकं मुखपत्रम् ।

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नादरात्,
अज्ञानान्धतमोविनाशपटुता–विख्यात–विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन्,
"उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥१॥

प्रथमवर्षे– १ | फाल्गुणसङ्क्रान्त्याम् वि०सं०१९८५ ता० १५ फरवरी सं० १९२९ | द्वादशो मयूखः १२

सम्पादकः—
कविताकिक (-तन्त्रचक्रवर्त्ति-) नृसिंहदेवशास्त्री दर्शनाचार्यः ।
सहकारिसम्पादकः—
विद्याभास्करपण्डितपरमेश्वरानन्दशास्त्री साहित्योपाध्यायः ।
प्रकाशकः—
परिषन्मन्त्री पं० जगदीशशास्त्री व्याकरणतीर्थः

(उद्योत कार्यालय जौडेमोरी लाहौर)
" Udyot " Office Jaure Mori Lahore.

श्रीकृष्णदीक्षितप्रबन्धेन "बाम्बे मैशीन प्रेस मोहनलाल रोड लाहौर" इत्याख्ये स्थाने मुद्रितः । पं० जगदीशशास्त्रिणा च उद्योत-कार्यालयात् "जौडेमोरी लाहौर" इत्यतः प्रकाशितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उद्योतस्य कतिचन नियमाः

१—अस्य मासिकपत्रस्य अग्रिमं वार्षिकं देयम् (भारते, ब्रह्मदेशे सिंहले च)—१॥) साधरूपकम् ।

२—प्रेषणव्ययो ग्राहकैर्न देयः ।

३—प्रबन्धादिकं समालोचनार्थं ग्रन्थादिकञ्च सम्पादकसमीपे, मूल्यादिकं च प्रकाशकसमीपे निर्दिष्टस्थाने प्रेषणीयम् ।

४—विज्ञापनपत्रादिमुद्रापणव्यवहारविषयोऽपि कार्यालये प्रकाशकसमीपाद्विवेचनीयः ।

५—पत्रं प्रतिसङ्क्रान्ति प्रकाश्येत । येन खलु ग्राहकेण यथाकालं सङ्ख्या नाधिगम्येत तेन तन्मासस्य तृतीयसप्ताहाभ्यन्तर एव कार्यालयाद्विवेच्यम्, नातः परं कस्याप्यभियोगः श्रूयेत, किन्तु तेन प्रथमं स्वपोष्टस्थानं परिशोध्यैव प्रष्टव्यम् । विवेकार्थं ग्राहकसङ्ख्या चावश्यं लेख्या ।

६—ग्राहकैः स्वस्थानादिकं स्पष्टमेव लेख्यम्।

७—एतस्य ग्राहका अपि साधारणसभ्येषु गण्येरन् ।

८—प्रेषितलेखाः प्रायो यथाक्रमं मुद्राप्येरन् । लेखकैर्न्यूनातिन्यूनं पक्षात्पूर्वमेव लेखाः प्रहीयेरन् । राजविरुद्धान्दोलनलेखाश्च न गृह्येरन् ।

विषयसूची

(प्रबन्धानां गुणदोषयोः प्रबन्धलेखका एव प्रतिभुवः)

विषयः—	पत्राङ्कः—
१—संस्कृतसमुन्नतेरभिनवः पन्थाः—ले०—मुकुन्दशर्मा	१—४
२—किमपि प्रणिधानयोग्यमावेदनम्—ले०—ज्येष्ठानन्दः शास्त्रिश्रेणीकः	५—६
३—शुभाशंसा—ले०—श्री० मुख्याध्यापकः श्रीहरनन्दरायजी	७
४—प्रेषितपत्रिका—ले०—पं० पद्मसिंहशर्मा सम्पादकचार्यः	८
५—"प्रावृड्-वर्णनम्"—ले०—श्रीपरमानन्दशास्त्री संस्कृतभूषणं मुख्याध्यापकः	९
६—मनोरञ्जनम्—ले०—सहकारिसम्पादकः	१०
७—यूनिवर्सिटी-संस्कृतपरिषदोऽविवेकः—ले०—श्रीयुत चारुदत्तशास्त्री पाणिनीयः	११-१२
८—दुर्गाभ्युदयनाटकम्—ले० श्री० पण्डितछज्जूरामशास्त्री कविरत्नं विद्यासागरः	१३-१४
९—जैनदर्शनकुञ्चिका—	१५—१७
१०—वसन्तोल्लासः—	१८
११—सम्पादकीयविचाराः—	१९—२३
१२—ज्वालापुरीय-महाविद्यालयस्य संक्षिप्तः परिचयः—ले०—विद्याभास्कर-जयनारायणशर्मा शास्त्री	२४—२६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तक संस्कृत उद्योत
आगत १(७)
तिथि
गुरुकुल ग्रन्थालय कांगड़ी

ॐ

उद्योतः

विद्वन्मानसकञ्जकोषकलिकामुन्मीलयन्नाराद् अज्ञानान्धतमोविनाशपटुता-विख्यात-विश्वप्रभः ।
नानाशास्त्रविमर्शमौक्तिकगणद्योतं समुद्योतयन् "उद्योतो" दशदिक्षु भां समधिकां विस्तारयन्राजते ॥

प्रथमवर्षे- १	फाल्गुणसङ्क्रान्त्याम् वि० सं० १९८५ फरवरी ता० १५—सं० १९२९	द्वादशो-मयूखः १२

ॐ

संस्कृतसमुन्नतेरभिनवः पन्थाः ।

(ले०—मुकुन्दशर्मा० अमृतसरीय रा० ब० गागरमल्ल-सं० पाठशालास्थः)

अयि ! विद्यावदातहृदया महाभागाः ! दैवदुर्विधेयतया दिनाद्दिनं हीयमानां दयनीयदशाग्रस्तां वन्दनीयां भारतीमुन्नेतुं निःक्षिप्यतां कापि भावपूर्णा दृष्टिः । असहाया साऽद्य भवन्मुखं दैन्यकातरया दृष्ट्या ऽवलोकते । स्नेहपालितान् लोकोत्तरविवेकशालिनो योग्यतमान् पुत्रानपहाय कं वाऽन्यं शरणमुपेयान्माता । यदि भवन्त एव कृतज्ञतां न दर्शयिष्यन्ति तदा श्रुतिमर्यादा निराश्रया सती कथाशेषतां गमिष्यति । अहो ! क्व गता भोजसदृशा राजानो यैर्विना गुणसंप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्सपन्नापि भारती औदासीन्यं न मुञ्चति, नचोत्पादयति कालिदासप्रतिमान् प्रसादगुणगुम्फनचतुरान्। एवं बहुधा विचिन्त्य निश्चिनुमो यत् शिक्षापद्धतिरेवात्र मुख्यतो दोषाय। कस्याश्चिदप्यनुन्नताया भाषायाः प्रचाराय तथा शिक्षापद्धतिरपेशिता भवति यथा सा भाषा सरला सरसा ग्राह्या बहुलप्रचारा च भवेत्। यथा च तत्समाराधनाय सर्वसाधारणा एव जना अहमहमिकया स्पृहयन्तु। तादृशानि पुस्तकानि पठनीयानि भवन्ति यानि अनायासेनैव पठितुं शक्येरन्, यानि चाध्येतॄणां श्रोतॄणां च मनसि नवरसरुचिरां रुचिमुत्पादयन्तु। दैवदुर्विपाकाद् विदुषामौदासीन्याच्च तद्विधानि पुस्तकानि पाठयितारश्च नोपलभ्यन्ते। आङ्गलविद्यामन्दिरेषु तादृशानि केषांचित् महानुभावानामनुरोधात् नियतानि सन्तीति विलोक्यानन्दनिर्भरं भवति चेतः। तादृशानि एव पुस्तकानि ऋजुरीत्या (Direct method) यदि संस्कृतपाठशालास्वपि पाठ्येरन् तदानन्ताय श्रेयसे स्युः। कौमुद्यादिकन्तु नोपयुज्यते सुकुमारमतीनां बालानाम, तदध्ययनस्य परिणतमतीनामेव ग्राह्यतया मुग्धान् बालान् प्रति तद् भारयते, ग्लानिञ्चापाद्याऽमूल्यं समयमेव नाशयति तेषाम्। अथ यदि बोधपरिपाकाय लक्षणग्रन्थाः पठनीया एव स्युः तदापि न तेषां कण्ठे करणमुपयुक्तम्। किन्तु वाक्यार्थबोधः उदाहरणप्रत्युदाहरणेषु तदर्थघटनापाटवमेवालम्। लक्षणं लक्षणीयञ्चावलोक्य स्वप्रतिभाकल्पनाभ्यां यथा व्याख्यानशक्तिरुन्मिषिता भवेत् तथा प्रयतनीयमस्माभिः। दुस्तरशब्दशास्त्रस्य लक्षणग्रन्थानां वा कण्ठेकरणं नास्ति समयोपयोगि, नचोपकुरुतेऽशतोऽपि संस्कृतसाहित्यस्य, किञ्चापकुरुत एव।

यया पद्धत्या कस्याश्चित् भाषाया भाषणशक्तिं लेखशक्तिं वा समुन्मिषिता भवेत् सैव पद्धतिरिदानीमभिनन्द्यते। भाषाप्रचाराय तदध्ययनोत्सुकानां यथा खलु उत्साहभङ्गो न भवेत् तथा सौकर्यातिशयः सम्पादनीयो भवति। धर्मधनैर्भारतीयै रवश्याध्येयतयाङ्गीकृतापि भारती, अनुपयोगिपाठनविधितया अत एव दुःसंपादतया च तेषां कुसुमकोमलेषु हृदयेषु ग्लानिकरान् संस्कारानुत्पाद्य, केवलमङ्गुलिगणनीयेषु ब्राह्मणेष्वेव पर्यवसितेति परा काष्ठा खेदस्य। एते ब्राह्मणास्तदाराधने कं वा क्लेशं न सहन्ते, कस्य वोपहसनीयतां न गच्छन्ति कं वा पश्चात्तापं नानुभवन्ति। स्वास्थ्यं सुखं सर्वस्वं च परित्यज्य मातरं वाणीमाराधयंतीति नाविदितं कस्यचित्। एते परीक्षां कांचिदुत्तीर्य नाममात्रेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेतनेनाध्यापनवृत्तिं कुर्वन्तः सांसारिकं जीवनमतिवाहयन्ति। किंच शिक्षापद्धतेः परीक्षापद्धतेश्च दोषात् नैतेषां नवनवोन्मेषशालिनी प्रतिभा विकसिता भवति-किंतु कांश्चित् परिष्कारान् कण्ठगतान् कृत्वैव साधयन्ति समीहितं परीक्षायाम्। अस्या दुरवस्थायाः शिक्षापद्धतिं परीक्षापद्धतिश्चान्तरा न कोऽप्यन्यो हेतु र्बहु विचार्यापि शक्यते वक्तुम्। परीक्षायां केचित् तादृशाः प्रश्नाः पृच्छ्यन्ते येषामुत्तरं पुस्तकपाठरटनं विना टीकारटनं * विना वा न शक्यते कर्तुं सर्वसाधारणैः। एतद्दशापरिवर्तनाय न कोऽपि समयापेक्षितः समुचितोऽभ्युपायः कृतो भविष्यति चेदसंदेहं स्वल्पेनैव कालेन संस्कृतभाषा तिरोधास्यति। प्रयोगार्हे एव लक्षणोदाहरणे परीक्षायां प्रष्टव्ये भवतः नतु गूढे अप्रयोज्ये च। भाषणशक्तिपरीक्षणाय वाक्परीक्षा ऽतीवोपयोगिनी भवति-लेखशक्तिपरीक्षणाय तु प्रस्तावप्रकार एव श्रेयान्। सोऽपि वर्णनात्मक उपाख्यानात्मको वा नीतिविषयः। अनुवादविधिस्तु नितरां न प्रशस्यः, अनेन हि भाषास्वातन्त्र्यं मौलिकता च मूलतो विनश्यति। यो यस्मिन् विषयेऽनुत्तीर्णो भवेत् स तस्मिन्नेव विषयेऽन्यदा परीक्ष्येत। हा! भारति! एभिरेव कारणैर्यदि त्वं दुःखितासि तर्हि प्रतीक्षस्व कंचित् कालम-त्वद्दुःखतिरोधानसमयः सन्निहितो वर्तते। त्वत्सेवापवित्रितात्मानस्त्वद्भक्तास्त्वदुद्धाराय बद्धपरिकराः सन्ति। "कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण"। महानुभावाः! अधीयमवस्थास्मिन् समय उपकरिष्यते संस्कृतसाहित्यस्य याथातथ्येनेति विचार्यापि न जानीमहे। यैश्च महानुभावैः प्रज्ञावनतैर्मातुर्दुःखापहरणाय उदारहृदयता दर्शिता वर्तते तेऽस्माकं धन्यवादार्हास्तेषाञ्चोपकारभारं नतेन शिरसा वहामः। त एव मातुरभिमता आशास्याश्च। इतश्च संस्कृताध्यायिनः कष्टपरम्परा कथं शक्यते वर्णयितुम्। परीक्षोत्तीर्णा अपि भाग्यभाज एव लभन्ते भृतिम्-अथ चावश्यं तज्जीविकायै कोऽप्यभिनवः पन्था निरूपणीयो भवति-यदि विकल्पशास्त्रेषु आयुर्वेदविषयो वाग्भटादिर्नियतो भवेत् तर्हि संस्कृतपाठिनां महानुपकारो भवेत्। एवं ते सुखेनैवात्मनिर्भराः

* साधूक्तम्। परं चित्रीयते नो हृदयं, यत्संस्कृताध्येतारो ग्रन्थं रटन्तो दूष्यन्ते आङ्गलभाषापण्डितैः, आङ्गलभाषाध्येतारस्तु गोलारामे उपयूनिवर्सिटीहालकोणं यूनीवर्सिटीशाद्वले क्षेत्रे स्थित्वा रारट्यमाणा अपि सादरमीक्ष्यन्ते। हा! देवि! सुरभारति! काल एव तवाननुकूलः। (सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिवारपालनाय प्रभवेयुः । छात्राणां जीवनमन्तरायप्रायं क्लेशबहुलं च। वर्षे चतुरो मासानेव पाठशालास्वाध्यायकालो भवति तत्रापि छात्राणां स्वास्थ्य-विकृतिः प्रायोऽन्तरायभूता मार्गं मवरुणद्धि, स्वल्पमायुः, शुष्कभोजनादावपि परमुखापेक्षित्वं तेषामतीव दुःखायते । एवं दुरवस्थावस्थितास्ते कथं नाम परीक्षानियतान् संख्याधिकान् ग्रन्थान् अध्येतुं प्रभवन्तु । कासुचित् पाठशालासु एक एवाध्यापकोऽस्ति न खलु सः सर्वानेव विषयान् पाठयितुं समर्थः । छात्राश्चातिरिक्तमूल्यानि एतावन्ति पुस्तकानि क्रेतुं न समर्थाः। न वा महत् परीक्षाशुल्कं वितरीतुम्। तत्रापि परीक्षापरिणामभत्यसन्तोषकरं दृष्ट्वा कस्य सहृदयस्य न खिद्यते चेतः। कस्मान्न संस्कृतपरीक्षापरिणामः, आङ्गलपरीक्षा-परिणामेन पारसीकभाषापरीक्षापरिणामेन वा साम्यं भजते ?। न ते छात्राः संस्कृतच्छात्रेभ्योऽधिकं परिश्राम्यन्ति, नास्ति तत्र किमपि प्रमाणम्—सदैन्य-मभ्यर्थयामो वयं यत् विश्वविद्यालयस्य माननीयैः सभ्यैर्निर्भीकमस्या उन्नत्यै उदारा नियमा निर्मापनीयाः। समयमवस्थां वा ऽपेक्ष्यैव रचिता नियमाः प्रसुवते किमपि परिणतिरमणीयं फलम् । परीक्षकैरपि उदारैः देशकालज्ञैः अनुभवशीलैः सहृदयैश्च भाव्यम् । शिक्षाधिपतयः शिक्षाविधिमुद्धरन्तु पाठ-शालाच्छात्राणां स्वास्थ्यवृद्धयेऽथ च शिक्षणविधिमुद्धर्तुं केचित् नवविचार-शालिनः संस्कृतप्रिया उदारा निरीक्षकाः (Inspectars) * नियोजनीयाः। तद्यथैतेषां छात्राणां सौकर्यं भवेत् तथा संपादनीयं खलु अधिकारिभिः-अधि-कारिणश्च प्रेरणीयाः समितिभिः, ताश्च स्थापनीया दयार्द्रैः सहृदयैर्विद्वद्भिरतो शरणमस्माकम् । मन्यामहे यत्ते शरणार्थिनोऽस्मान् न प्रत्याख्यास्यन्ति। एवं दुःखपरम्परया सीदन्त्या मृतभाषेयमित्युपालभ्यमानाया भारत्या विपद-मपनोदिष्यन्ति च।

श्रूयतेऽस्ति लवपुरे पीयूषसरसि च कापि संस्कृतविदुषां समितिः। आशास्महे च यत्सावश्यमवश्यविचारणीयेऽस्मिन् विषये निःक्षिप्य कृपा-कटाक्षपूतां दृष्टिमात्मनो जन्म सफलयिष्यतीति शम्।

---

* परं यदि—अन्वीक्षणप्रभवः (Inspectors) पञ्चापप्रान्तीयेष्वेव योग्यतमेषु विद्वत्स्वन्यतमा नियम्येरन् तदैव छात्राणां हितमाचरितं भवेत्, नहि विदेशीया अस्मद्देशीयपरिस्थितिं सम्यक् परिचेतुं प्रभवन्ति, नापि च प्रायो वस्तुतोऽस्मद्धितैषिणो भवन्ति। (सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"किमपि प्रणिधानयोग्यमावेदनम्"

(निबन्धा ज्येष्ठानन्दः शास्त्रिश्रेणीकः सं० का० मूलतानस्थः)

अयि ! सुरसरस्वतीसेवनसज्जाः, तथाचोन्नयनकार्य्ये त्यक्तलज्जाः जटिलजालनिगिडितमातृविमोचकाः ! मेचककलङ्कधावकाः पण्डितवर्य्याः ! विदितचरमेव भाववतां भवतां यदत्रपञ्चापप्रान्ते प्राज्ञविशारदशास्त्रिपरीष्टि मेईमासान्तगते प्रथमे द्वितीये वा सप्ताहे वो भवीति, यद्यपि लघुताजूर्तिजूतिजीर्णशीर्णसंस्कृतोन्नयनार्थं परीक्षा वरिवर्तीति सर्वसम्मतम्, तथाऽपि तस्या विशेषाधानाऽनाधानात् न सहसोन्नतिपथं रोक्ष्यति संस्कृतसाहित्यम्, तथाचोन्नत्यन्तरायप्रायान् परैरनुमोदितान् नियमान् स्वप्रतिभाऽनुकूलमामूलं निवेदयामि परीक्षाविषयकविचाराचरणे प्रत्यक्षेऽक्षिविदारयन् सकलकालनाकाल इव सहसाऽवलोक्यते उष्णकालः, हा यदा तेषु दिनेषु शरीरधारणमप्यसाधारणं तदा क्व पठनावधारणा, तथाच कठिनं पठनमपि कथं स्यात्, यतः उष्णकालः समीरो न सरति सर्वत्र व्यजनचालनस्य सणत्कारः, तथाच तापः बहुत्वात् जलपरिपूर्णं तुन्दं (जठरं) तुन्दमृजत्वमेव प्राप्नुवत् सर्वकार्येष्वन्तरायमाचरति, न किलकेवलमियमनर्थपरम्परा, प्रत्युताष्टनादाऽनन्तरं खरकरखरकरस्य खरस्तापस्तापयति त्रिभुवनम्, हा हा तदैवेर्ष्यावतो वातोऽपि संसरति बत एकतः सूर्य्यतापोऽन्यतो ग्रीष्मवातघातो युगपदेव पठनात् नितान्तं स्वान्तं शान्तं करोति, विशेषतो यदा वायोरभिसरणं तदा पठनं मरणमिव चेतसि खटखटायते, अन्यच्च यथाहेतितत्तिहतिश्रान्तं रणोद्भटं भटं बालकोऽप्यभिभवितुं प्रभवति, तथा च दिनकरकरैः श्रान्तान् रात्रौ अग्निकुण्डमिव तापयति प्रदीपः, नत्वेतावन्मात्रमेव प्रत्युताहुतिरूपाणां मषकाणामभिपातेन स्वत एव खिद्यते चेतः परञ्चाऽन्यथात्वेऽन्यथात्वविभीषिकया कथं कथमपि पठन्ति छात्राः यस्योदर्कोऽयं निःसरति यद् रोगौघपरिक्रान्ताः केन्द्रं प्रविश्य बहुदिनपाठाभावात् स्मर्तुं न पारयन्तो दैवं निदन्त उत्तीर्णीताशा अपि हताशा भवन्ति, न केवलमनुत्तीर्णाः संभवन्ति प्रत्युत रोगौघमपि क्रीणन्ति, यद्यपि न समेषामेतादृशी गतिस्तथाऽप्यवश्यमेव परीष्टिजुषां काचिद्धानिः, इति मे मतिः, यदि ग्रीष्मे परिश्रमो न दुःखकारी तदाकालेजस्कूलादिषु न कदाऽपि ग्रीष्मावकाशः स्यात् अतः प्रतीयते ग्रीष्मे परिश्रमो हानिप्रदः, यतः पयःपावकयो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्वृत्ति र्न कदाऽप्येकत्र सम्भवित्रीति मत्वा विमलधीभिः सुधीभि र्ग्रीष्मेऽवकाशः क्रियते, अतः संस्कृतप्रचारस्पृहयालूनां दयालुश्रद्धालूनामेवदः कृत्यम्, यत्तैः कणेहत्यास्मिन् विषये यतेलिमम्, तथाचैतद् विषयकपंत्र समियात्—

अन्यच्च प्रायः परीक्षकमहोदयो विज्ञापन "टर्न प्रोवर" तथाच रोलनम्बर Roll Number पत्रापरत्र "रूल नम्बर के दूसरी तरफ" इत्येवं नियमानपीं-ग्लिशभाषायामेव लिखन्ति येन संस्कृतज्ञा अज्ञा इव केन्द्रं प्रतिशन्ति नूतनैस्तु महान् कष्टमनुभूयते, येन प्रबन्धारोऽपि तेषां कृत्यमवलोक्योपहसन्ति बोधने च महदायासं कुर्वन्ति, अन्यच्च किं शास्त्रिश्रेण्यामधीयाना अपि न तत्पदार्थ-वित्ताः तथाचाऽस्मिन् विषये विवृतिरूपे योदाहातिश्चित्रणे समाहरति चेतश्चेतो-मम अतो लेखनपरवशो लिखामि किञ्चित् सन् १९२५ वर्षे विशारदीय दश-कुमारचरित्रस्य ४० प्रश्नान् विहाय यदैव बहिर्निःससार दैवहतो विद्यार्थी कश्चित् तदामित्रेणागत्या ऽभाणि तव महत्युपकृतिर्जाता यद्भवता प्रवेशात्पूर्वं कथा श्राविता सैव परीक्षकेण पृष्टा श्रुत्वैतत् स आह क्व सा कथा वृथैव जल्पसि श्रुत्वैतत्सोऽपि पत्रं परिवर्त्य दर्शयामास तदा ४० संख्यात्मकान् सर्वान् हस्त-मलकायितान् प्रश्नान् विलोक्य जड़ इव निश्चल इव निस्तब्ध इव चकित-चकिततां जगाहे क्षणान्तरे रक्तिमाऽस्पदे श्वेतताऽधावत् तथाच वक्षःस्थले विचारप्रसारमूषकाः प्रदुद्रुवुः, शोकदहनदग्धं धैर्य्यमश्रुरूपेणाऽसुस्रवत् येन तद्दशामवलोक्य क्रूरोऽपि कोमलायते पाषाणोऽपि सलिलायते परञ्च किं भवति सुवर्णचटकायामुड्डीनायाम्, परञ्च बालिश इव विचारं कुर्वन् इदमेव व्यचारयत् यदधुनैव गत्वा क्षणे हि सर्वं लिखित्वा प्रबन्धकर्तृमहोदयाय ददामि परञ्च तदैव विचारान् मज्जयन्ती चिन्तामर्पपन्ती दैवंकदर्थयन्तीयूनीवर्सिटी नियमभङ्ग-तापिशुनयन्ती लहरी आगत्य गृहं गन्तुं रुरोध, परञ्चित्तमित्थमचीखिदत्, यत् परीक्षाफलपर्यन्तं न निर्वाणमाप, यत्वनालोकनं तस्यैव प्रमादस्तदपि न युक्तियुक्तं ययुक्त त्रुटि साक्षात् कुर्वाणेनैव (Turnover) इत्यस्या ऽवश्यकता, स्वीकारिता, यतोलेखे व्यग्रत्वादेतन्मात्रमेव मन्वानाः छात्रा लिखने लीना लिखन्ति, अतो 'टर्न ओवर' इति पदमोलाच्यापरत्र पश्यन्तु, इत्यर्थं लिखन्ति स्वयमेवा ऽऽलोकने तु इंग्लिशभाषायां लेखे नावश्यकता, तल्लेखस्यावश्यकत्वे इंग्लिशभाषायां लेखनमलाभसम एव, अतो युक्तमेतद्यत् संस्कृतपरीक्षायां सर्वनियमजातं संस्कृते लेख्यम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथाच अन्यत्रैकपत्रेऽनुतीर्णो विद्यार्थी केवलं षण्मासानन्तरमेव परीक्षां वितीर्य्याऽग्रिमश्रेणीमासीदति तद्वच्चात्राऽपि नियमोऽयं स्यात्—यथाचान्यत्राधिक संख्यकेभ्योऽधिकवृत्तिः प्रदीयते, तथा चात्राऽपि न्यूनादति न्यूनं प्रथमद्वितीयतृतीयेभ्योऽवश्यं वृत्यासत्तिः—प्रदेया, तथाच शास्त्रिश्रेणीतः प्रथमस्याऽपि कश्चित् प्रबन्धः स्यादिति शम्।

———

* शुभाशंसा *

(ले० श्री० मुख्याध्यापकः, श्रीहरनन्दरायजी रूइया सं० कालेजरामगढ सीकरस्थः)

एह्येह्युद्योत ! बन्धो ! ते स्वागतं करवाण्यहम्। चिरादृष्टोऽसि मे स्वान्तं सन्तप्तमुपसान्त्वय ॥१॥
अज्ञानध्वान्तमग्नानां छात्राणां कैरवश्रियाम्। विकाशय सुधास्राविमयूखैः सुमनःकलीः ॥२॥
सन्त्येवाहर्निशं तृष्णातरलीकृतमानसाः। छात्राश्चकोरकल्पास्ते मयूखान् संपिपासवः ॥३॥
न कुर्वीथास्तथा ते स्युर्यथा काठिन्यविद्रुताः। सारल्यमेव संयोज्य मनांस्यावर्जय द्रुतम् ॥४॥
यथा यथा स्यात्काठिन्यमेघाडम्बरवर्जिता। त्वद्भाषाकौमुदी नूनं भवेद्वृद्धिस्तथा तथा ॥५॥
सप्तसागरपारीणाप्यांग्ली यदिह मोदते। प्रधानस्तत्र हेतुस्तु सारल्यमिति निश्चिनु ॥६॥
गुडजिह्विकया बालाः प्रवर्तन्ते कटुष्वपि। तमिमं हृदये मन्त्रं कृत्वा कार्यं समाचर ॥७॥
"बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः। अबोधोपहताश्चान्ये" कर्तव्यं स्वं विचारय ॥८॥
रिक्तं स्थानं समासाद्य सांप्रतं तिमिरावृतम्। घूकानां जृम्भते राज्यं स्वेच्छाचारो विवर्धते ॥९॥
धर्मकर्मविभूषावाग्विचारादिषु सर्वतः। तदेवाऽतदिवाभाति भारतं हन्त ! भा-रतम् ॥१०॥
क्रमतां भिन्नमर्यादध्वान्तविध्वंसने भवान्। उत्थाप्यतां निजो देशो दर्श्यतां हस्तलाघवम् ॥११॥
स्वयमुद्योतमानास्ते मयूखाः स्युः स्वकान्तिभिः। नार्हन्ति टिप्पणीदीपैः प्रकाशमिति मन्मतिः ॥१२॥
नैव मासा'त्सुप्रभातं' पक्षात्सुर्योदयो' नतु। न च त्रिंशद्दिनान्तेनै"वोद्योतो" भवति क्वचित् ॥१३॥
तस्मादेतत्त्रयं शीघ्रं प्रत्यहं स्यात्प्रकाशितम्। तदर्थं 'जगतामीशं' 'परमेश्वर' मर्थये ॥१४॥

———

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* प्रेषितपत्रिका ।

श्रीमत्सु अभिनवोद्योतकरावतारेषु 'उद्योत-कर-' महाभागेषु सप्रश्रयं प्रणम्य निवेदयति—

सप्रमोदावसरं श्रीमतां कृपादलं समवाप्य नितान्तं तुतोष मे स्वान्तम्। प्रबलेऽस्मिन् कलिकाले ह्रसति संस्कृतसम्प्रदाये, दिवङ्गतायां देववाण्यां, म्लेच्छतामापन्ने भूदेवकुले, साम्राज्यमधिरूढे संस्कृतविद्वेषिवर्गे, सबहुमानं प्राकृतगुणगानं गायति 'लीडर' लोके, कर्णविवरं बधिरयति राष्ट्रभाषाडिण्डिमनादे, सर्वात्मना श्रुतिमिव राजभाषामभ्यस्यति द्विजवर्णे, तत्रभवतां भवतां संस्कृतपत्र-प्रकाशनोद्योगः कस्य वा गीर्वाणवाण्यनुरागिणः सचेतसो हृदयं न समुल्लासयेत् सर्वथा ऽभिनन्दनीयोयं समारम्भः। अघटनघटनापटीयान् परेशोऽत्र दुर्घटे कर्मणि साहाय्यं विदध्यात् सफलयेत्संकल्पं संस्कृतरुचीनां 'तमोबहुलं जगत् पुनरपि निरस्तान्धकारं विधातुं बद्धपरिकराणां विद्वद्भास्कराणां पञ्चनदीयसंस्कृतसाहित्य-परिषत्सदस्यानामिति बद्धेनाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमै र्हर्षोल्लसितेन चेतसा मुहुर्मुहुः प्रार्थयामि तमेव भूतभावनं भगवन्तम्।

महतीयमस्मिन् जने श्रीमतां सम्भावना, इदं परमाणौ पर्वतत्वारोपणं नाम यदयमप्यगण्यो वराक उद्योतलेखकेषु परिगणितः। चिराय विस्मृत-संस्कृतानुशीलनस्य प्राकृतस्यास्य किं सामर्थ्यं संस्कृतलेखने—देववाणीव्यव-हारे—'कथमिव समर्थो नरपशुः' इति यन्नालोचितं श्रीमद्भिस्तत्र सौहार्दातिरेक एव कारणं, यत्सत्यं 'सर्वः कान्तमात्मीयं पश्यतीति। अनतिक्रमणीयं सुहृद्वाक्य-मिति मत्वा प्रकारान्तरेण भवदादेशं प्रतिपालयितुं प्रतियतिष्ये, तदित्थं स्वयं ग्राहको भूत्वा अन्यांश्च ग्राहकान् सम्पाद्य यथाशक्ति उद्योतप्रचाराय सततमुद्युक्तो भविष्यामि। पत्रग्राहकश्रेण्यां मदीयनामाङ्कनं कार्यं, प्रथमो मयूखो वी० पी० द्वारा मह्यं प्रेषणीयः।

भवदीयः पद्मसिंहशर्मा।

---

* एतस्याः पत्रिकाया एतावानंशोऽवश्यप्रकाश्य आसीत् परमियं ममावश्यकपत्रेष्वितस्ततो विचलिताऽभूत्, सम्प्रत्यविचारितमेव लब्धा, तदस्याः प्रकाशनेऽनवसरहतकता नाकलनीया पाठक-महोदयैः। (सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

* ओ३म् *

"प्रावृड्--वर्णनम्"

मङ्गलम्--

(१)—प्रत्यूह-व्यूहध्वान्तानां हन्ताशेषजनाश्रयः ।
विधिर्विधत्ताङ्कुरुणां करुणावरुणालयः ॥

(२)—अज्ञानतिमिरान्धानां छात्राणामेकमाश्रयम् ।
सर्वशास्त्रावगन्तारं नृसिंहं गुरु माश्रये ॥

(३)—दृष्टकान्तापराधानां, कान्तानां मानहारकः ।
जगद्वयस्यो यः प्रावृट्—कालः कुशलतां क्रियात् ॥

(४)—स्वयं निष्पन्नकार्यत्वाद् यदा लज्जितमन्मथः ।
न धत्ते कौसुमान् वाणान् कालोऽसौ पातु वः सदा ॥

(५)—गुणैः समस्तैर्विनयार्जवाद्यैर्विशेषितो दातृवरः सुवर्णम् ।
यथा प्रदत्ते गुणिनेऽर्थिनेऽसौ क्षित्यान्तथा वर्षति नम्रमेघः ॥

(६)—नृत्यन्त्यभ्रे विद्युन्माला रौद्रे कण्ठे बाहुर्वोमः । *
शैल्याद्वन्द्वं दुष्टप्रीतेरस्थैर्ये याः कुर्वन्तीव ॥

(७)—प्रियविरहिण्यः शशिवदनास्ताः ।
नवजलदैरादधति सुतापम् ॥

(८)—कुत्सितालपजलेनापि धत्ते कुल्या तथा मदम् ।
दधाति दुर्जनो दैवाद् यथा सम्प्राप्य वैभवम् ॥

(९)—तेजसा ते पराभूतो मार्त्तण्डो गगनाङ्गणे ।
धत्तेऽवगुण्ठनं देव ! मेघानां पटलीमिषात् ॥ (राजस्तुतिः)

(१०)—नीरदस्यैव सम्पर्कात् पश्य विद्युद्विराजते ।
मुञ्चमानमतो मुग्धे ! प्रणते दयिते मयि ॥

(११)—कृतप्रणामा अपि या न पूर्वम्—प्रापुः प्रसादन्दयिते कथञ्चित् ।

---

* अत्र इवार्थकस्य वकारस्य प्रयोगः । "व (इव) +औमः" इति छेदः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ता अद्य भीता जलवाहनादाद् * गेहान् प्रयान्ति स्वयमेव तेषाम् ॥

(१२)—सघनघनघटानां ध्वान्तमेतत् पुरस्तात्,
नहि नहि खलु मत्ते ! चण्डदावाग्निधूमः ।
ननु सखि ! किमिति त्वं भाषसेऽद्य व्यलीकं
किमिह जलददाहो दृष्टपूर्वः कदाचित् ॥

(१३)—जहि त्वं सर्वसम्मोहं व्रज कान्तालयं सखि ! ।
जनो मेघतमिस्रासु विद्युतं त्वां समीक्षते ॥

परमानन्दशास्त्री संस्कृतभूषणं
मुख्याध्यापकः । "धर्मविद्यालयः"
(अमृतसर) ॥

मनोरञ्जनम् ।

(ले० सहकारिसम्पादकः)

एकस्मिन् दिने कश्चन काजिर्नगराद् बहिः पर्यटतिस्म । तत्र हरितभरितमेकमिक्षुक्षेत्रं दृष्टवतस्तस्य मुखं लालां स्रावयति स्म । स काजिर्नितरां चतुरो धूर्तधुरन्धर आसीत् । स क्षेत्राधिपम्—'अरे क्षेत्र कृषक ! क्व भवसि' इत्येवं समबोधयत् । अथ यदा स्वप्रश्नोत्तरं न लेभे तदा 'स्वयमेव—'किं रे काजे ! चतुरस्त्वमसि' इत्युदतरत् । पुनरप्युवाच—'इक्षून् गृह्णानि त्रिचतुरान् ?' इति । 'गृहाण गृहाणासन्नशतान्' इति च स्वयमेव तदुत्तरं दत्त्वा विंशतिपञ्चविंशानिक्षुदण्डान् उत्पाट्य पलायाञ्चक्रे । इत्थं स काजिः प्रत्यहमाययौ उपर्युक्तानि प्रश्नोत्तराणि कृत्वा च इक्षुयष्टीरचूचुरत् ।

इतश्च क्षेत्रधियो जट्टमहोदयो यदा प्रत्यहं चोर्यमाणान् इक्षून् विवेद तदैकस्मिन्नहनि स्वक्षेत्रे आत्मानं संगोप्यातिष्ठत्, काजिरप्यथाजगाम, प्रत्यहमिव प्रश्नोत्तराणि विधाय इक्षूनादाय च पलायते स्म । जट्टः काजेर्धूर्त्ततां बुबुधे 'शठे शाठ्यं समाचरेत्' इति विचार्य च स्वैरं काजिमनुससार । यावत् काजिः कस्यचित् सरस्तटमुपैति तावद् जट्टस्तदभिमुखीभूय तं ग्रीवायां गृहीत्वा च स इव स्वयमेव अधस्तनानि प्रश्नोत्तराणि कर्तुं मारभते—

---

* "आलिङ्गय मानं परितस्त्यजन्ति" इत्यपि । (सम्पादकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्र०—रे रे काजे ! जलमतिशीतम् । उ०—मद्यमद्य किं जट्ट ! विपीतम् । प्र०—निमज्जनं किं कामयसे रे । उ०—नैव सकृत्, शतकृत्वोऽरे रे ।

एतावदुक्त्वा जट्टवीरः काजिं निमज्जयितुमारेभे । कदाचित्तं निमज्जयति स्म, कदाचिच्चोन्मज्जयतिस्म । एवं प्रायो विंशतिकृत्वः पञ्चविंशतिकृत्वो वा स काजिशठं निमज्जनोन्मज्जनाभ्यां सञ्चकार । तदानीं दैवदुर्विपाकाद् ऋतु रपि हेमन्तोऽभवत्, काजिमहाशयः शैत्यातिरेकेण मुमूर्छ । तद्दशां निरीक्ष्य स जात-दयोदयो जट्टस्तं जवाद्बहिर्निस्सार्य तटे प्रचिक्षेप । अथ कालेन प्राप्त संज्ञः काजिः कर्णौ स्पृष्ट्वा पुनरैवंविधं धौर्त्यमनात्चरितुं प्रतिजज्ञे ।

लेखकः—सीतारामवर्म्मा O. C. Lahore

एकदा कश्चिद् गणिताध्यापको भोजनालयमगमत् । तत्र च भोजनालयाध्यक्षं प्रत्यभाषिष्ट—श्रेष्ठिन् ! शीघ्रं मे देहि भोजनं यथा न मां क्षुधा व्यथयेत् । सोऽपि स्तोकेनैव कालेन आहारं पक्त्वा तस्मै व्यतारीत् । बुभुक्षितो गणिताध्यापकोऽपि सम्यगुदरं बभार । अनन्तरञ्च तस्मै स्वकीयगणितानुसारमेव सार्धाणकत्रयं प्रददौ भोजनालयाध्यक्षः साक्षात्कृत्य प्राह—

महाशय ! केन गणितेन अष्टरोटिकाणां मूल्यमर्धाणकत्रयम् ?

गणिताध्यापकः—(सक्रोधम्) किं प्रलपसि ? न वेत्सि गणितम्, मदीयो लाभांशः (Commission) कुत्र गमिष्यति ?

भोजनालयाध्यक्षः—हुम् ! नायं पुस्तकालयो यत्र लाभांशो मिलति; तथ्यं भवान् गणिताध्यापक एव ।

गणिताध्यापकः किञ्चिद् ध्रीण इव तस्मै पणद्वयमदत्वा गृहं प्राचालीत् ।

यूनिवर्सिटी-संस्कृतपरिषदोऽविवेकः ।

(ले०—श्रीयुत चारुदत्तशास्त्री पाणिनीयः M. A. Prof. D. A. V. College Lahore)

माघसङ्क्रान्त्यां प्रकाशितस्योद्योतस्यैकादशे मयूखे 'पञ्जाबयूनिवर्सिटी प्राज्ञाऽदूरदर्शिता च' इतीमं विषयमधिकृत्य कृतः श्रीमतां सम्पादकवर्य्याणां लेखोऽधिगतः । तद्विषय एवाहं विवक्षे । यत्तैरुक्तं संस्कृतबोर्ड्सदस्यैः पाठ्य-पुस्तकानां निर्धारणे ऽदूरदर्शित्वमात्मनः प्रादर्शीति तत्र सन्देहलवोपि नास्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

को हि विज्ञोऽत्र विप्रतिपद्येत । प्राज्ञपरीक्षायां संक्षिप्तरामायणं विक्रमोर्वशीयं चेति द्वयोः काव्यनाटकयोः सतोर्योयं कल्याणसौगन्धिकस्यापरस्य नाटकस्य सन्निवेशः सोयं केवलं छात्राणामायासाय त्रासाय वा स्यात् अर्थान्तरस्याभीष्टस्य सम्पत्तिस्त्वनेन न संभविनी । प्राज्ञपरीक्षामुत्तितीर्षवश्छात्राः संस्कृतेन स्वाभिसन्धिं विशदयितुमधीतं वा ग्रन्थं विवरीतुं न प्रभवन्त्यतो लौकिकीमेव गिरमवलम्ब्य प्रश्नानुत्तरयन्त्विति य आतिष्ठन्ते पारिषद्यास्त एवैवंस्थितेरभिज्ञाः कथमध्येतॄणामवस्थितिमपरामृश्य विमर्शं विरहय्यात्र प्रावर्तन्तेति न सुखमवसेयम् । पाठ्यग्रन्थसंख्यातिरेकापादने का युक्तिः का वा प्रयुक्तिः स्यादित्यपि दुरूहम् । प्रथमं भाषां माध्यमिकीकृत्य व्युत्पत्तिपथं च सार्गलीकृत्येदानीं ग्रन्थभूम्नि समादरमकृषतेति कथमुपपद्यते । किन्त्वेवं प्रतिवर्षमकृतार्थानां छात्राणां भयदां गुर्वीं संख्यां ह्रसयितुं विधिरभ्युपेयते । अध्यापनरीतिशोधनदिगियं वा निदर्श्यते ।

न केवलं प्राज्ञपरीक्षायामपितु वैशारद्यामपि वैशारद्यविघाताय यत्यत एभिरभियुक्तैरित्यभियुज्यन्ते । नाटकेषु मूर्धाभिषिक्तमभिज्ञानशाकुन्तलं पाठ्यत्वेन नियुक्तमासीदेव परं तत्राप्यलम्बुद्धिमकुर्वाणास्ते तेन सहैव कुन्दमालामपि न्यवीविशन् । शकुन्तलाया व्यङ्ग्यप्राचुर्य्यं भावगाम्भीर्यं भाषौदार्य्यं च कथं विदाङ्कुर्वन्तु शब्दार्थानेव केवलान्विविदिषन्तश्छात्राः । अहो यन्नाटकं कृतबुद्धयोऽभ्यस्तविविधविषया ज्यायांसो बी० ए० परीक्षार्थिषु मध्ये केचनाल्पीयांस एव संस्कृते वैशिष्ट्यलाभायाधीयते तदेव सुकुमारधियोऽप्रथितमनसो विशारदा अप्यधीयत इति प्रोत्साहनीया अभ्युपपत्तव्याश्च ते भवन्ति नतु पुस्तकभारेण समुद्वेजनीयाः । एवं सति कुन्दमालया न तेऽर्थिनः, तद्व्यतिरिक्तास्तु स्युरेव केचन । अन्यच्चात्रावधेयम्, कुन्दमाला नाम नाटकं तथा सुबोधं यथा न ह्यस्य विशारदपाठ्यपुस्तकेषु संनिवेशो युज्यते प्राज्ञपरीक्षाकृते तु युज्यतेतराम् । अत्र विषये ये कुन्दमालामवालोकिषत ते विप्रतिपत्तुं न प्रगल्भिष्यन्ते । अस्याः कुन्दमालाया एवैकदेशः श्रीवेदव्यासाख्यविदुषः कृतौ सरलकथातरङ्गिण्यां मैट्रिक्युलेशनपाठ्यपुस्तिकायामन्तर्भावित इत्यतोप्युपष्टम्भकं प्रमाणमपेक्ष्यते किम्? । तेन विवेकिभूयिष्ठापि न विविच्याचरतीयं परिषदिति स्पष्टम् । नैतद्युक्तं यद्विवेकिनः सन्ति विविच्य च नाचरन्तीति तर्हि किमत्र दुष्यति येन सर्वं तन्त्रमाकुलीभूतम् । मन्ये प्रायेण पारिषद्या न प्राच्येन प्राची-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेन वा विधिनाऽधीतशास्त्रा, न चापि प्राज्ञादीन् विद्यार्थिनः संस्कृतमध्यापयन्ति, तेन न ते सम्यक् परिचिन्वन्ति किं छात्रैरध्येयं किं वा सौकर्यावहं तेषाम् । एवं यथाकामं प्रवर्तमाना निकामं कदर्थयन्ति बालान् संभ्रमयन्ति चाध्यापकान् ।

तदत्रोपायः कश्चिदास्थेयः । अत्र विषये सम्भूय सर्वैः संस्कृतानुरागिभिः सादरं यूनिवर्सिटीसभ्या अभ्यर्थनीयाः प्रबोधनीयाश्च । नात्र कालक्षेपः कार्यः । यद्यत्र पाठकाः प्रमदिष्यन्ति तूष्णीं च सहिष्यन्ते तर्हि भविष्यत्यपि सर्वं सोढव्यं भविष्यतीत्याकलनीयम् । मृतकल्पता चास्माकं सेत्स्यति । अतो ऽविलम्बितमैक्यमवलम्ब्य सगर्वमुच्चैर्घोषणीयं न वयं पारिषद्यानामेतमनुपपन्नमाचरणमभिनन्दामः, एतद्विषये ऽदूरभावि प्रतिविधानं च याचामह इति ।

सम्पादकमहाभागानां सामयिकेन टिप्पणेन वयं सर्वे महदुपकृतास्तान् कोटिशो धन्यवान्वदामः ।

---

* ॐ *

दुर्गाभ्युदयनाटकम् ।

(पूर्वतोऽनुवृत्तम्)

लेखकः—श्री पण्डितछज्जूरामशास्त्री कविरत्नं विद्यासागरः ।

तवशरणं समुपागतो यदि ना कश्चन तापी ।
तर्हि सवितु रप्यग्रतो भवेत्तमः संस्थापि ॥३०॥
सिन्धुस्थाने विन्दुमपि कर्तुं त्वं शक्तः ।
भवति मेरुरपि सर्षपः कृपया तव रिक्तः ॥३१॥
दशशतवक्त्रैः सर्पराड् गायन् कीर्तिन्ते ।
स्थगितो भवति तथापि तत्पारं न लभते ॥३२॥
अतएवास्मि चतुर्मुखैरीश्वर जगदीश ।
तावक गुणगानं कथं हरे कर्तुमीशः ॥३३॥
त्वं सर्वैरपि सर्वदा भक्त्या स्मरणीयः ।
दुःखौघस्तेषां सदा त्वयापहरणीयः ॥३४॥

असुरौ—यावदयं किमपि ध्यापति तावदन्यत्र कुत्रचिद्गच्छावः । इति निष्क्रान्तौ ।

(आकाशे)

ब्रह्मन्, भगवत्या योगनिद्रायाः स्तवस्त्वयाद्य कर्तव्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सैव प्रसन्ना सती तेऽभीष्ट साधयित्री भवित्री ।

ब्रह्मा—आः सुष्ठुस्मारित माकाशवाण्या । तदिदानीमहं विष्णुं प्रबोधयितुं स्थितिसंहारकर्त्रीं जगधात्रीं भगवती मेकतानेन ध्यानेन स्तौमि । (प्रणिपत्य) भगवति योगनिद्रे ।

सावित्री परमारमास्यथ सुधा मेधा त्वमेव स्मृतिः त्वं देवी प्रकृतिः समस्त जगतस्त्वं श्रीस्तथाह्रीरपि ।

शान्तिः क्षान्ति रथोति सुन्दरतरा पुष्टिश्चतुष्टिः परा घोरा त्वं सकलास्त्रिणी त्वमथवा शक्तिः परा किं स्तुमः ॥३५॥

देवि, किमनल्पजल्पनेन—इमौ हन्तुं यमनिभौ दानवौ मधुकैटभौ । प्रबोधय द्रुतं विष्णुं जिष्णुं मामद्य रक्षितुम् ॥३६॥

(नेपथ्ये)

ब्रह्मन्—
विष्णुशक्तिर्योगमायाहं तुष्टास्मिते स्तुतेः ।

एषविष्णु स्त्वदुःखमसहिष्णुरतिशीघ्रमुत्थाप्यते ।

(ततः सहसोतिष्ठति विष्णुः)

ब्रह्मा—(विष्णुं दृष्ट्वोत्थायच) देव, त्रिभुवननाथ, परित्रायतां परित्रायताम् ।

विष्णुः—(सोत्प्रासप्रणयम्) ब्रह्मन्नलं वैक्लव्येन शीघ्रमुच्यतां कुतो भवान् परित्रातव्यः ।

ब्रह्मा—(सत्रासं कम्पमभिनीय) असुराभ्याम् ।

विष्णुः—कुत इहासुरसंभावना ।

ब्रह्मा—भवत्कर्णमलतः ।

विष्णुः—क्व पुनस्तौ ।

ब्रह्मा—इदानीमत्रास्तां न जाने कुत्र गतौ, भवतु । एवं कथयामि ।

रे दानवौ, कथयतां क्व गतौ भवन्तौ एकाकिनो मम वधे विहितप्रयत्नौ ।

चेद्रक्षथः किमपि वीरपदेभिमान मागत्य विष्णुदहने भवतं पतङ्गौ ॥३७॥

असरौ—(प्रविश्य) अये ! कोनु खल्वावामाह्वयति । (पुरोऽवलोक्य) परस्परम् , हन्त अन्योपि कश्चन शङ्खचक्रगदापद्महस्तः पुरुष एतस्यावयोर्वध्यस्य समीपे तिष्ठति । भवतु । पृच्छावः ।

मधुः (समीपमुपसृत्य) (प्रकाशम) ननु कोभवान् ।

विष्णुः—(सस्मितम्) अदुष्टौ मधुकैटभौ किं मामपि न जानीथः । भवतु । शृणुतम् ।

असुराणामहं हन्ता सुरत्रातास्म्यथो हरिः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युवां हत्वा भविष्यामि कैटभारिश्च मध्वरिः ॥३८॥

कैटभः—(उपगम्य) मधो, किमयं ब्रवीति ।

मधुः—(सोपहासम्) युवयोर्निग्राहक इति ।

कैटभः—(सक्रोधम्) रेरे मिथ्या प्रगल्भत्वं सज्जो भव यमालये ।

त्वामेव प्रथमं नीत्वा पश्चादेनं विलोकये ॥३९॥

विष्णुः (विहस्य) नत्वहं सर्वदा सज्जः सज्जनानभिरक्षितुम् ।

(हस्तेन दर्शयन्) सज्जमेतद्धि मे चक्रं वक्रं दुर्जनताकृते ॥४०॥

(शेषं पुनः)

जैनदर्शनकुञ्चिका ।

(ले०—कवितार्किक—नृसिंहदेवशास्त्री दर्शनाचार्यः)

ओरियण्टलकालेज मेगजीननवम्बर १९२६ इत्यत उद्धृता ।

(पूर्वतोऽनुवृत्तम्)

एतदुक्तं भवति—उत्पादीनि त्रीणि द्रव्यस्य लक्षणानि द्रव्यं लक्ष्यम् । तत्र पर्यायार्थिकनयापेक्षया परस्परतो द्रव्याच्चार्थान्तरभावः, द्रव्यार्थिकनयापेक्षया तु व्यतिरेकेणोत्पादादीनामनुपलभ्यमानत्वादनर्थान्तरभाव इति लक्ष्यलक्षणभावो नानुपन्नः ।

बाह्या अपि चास्माकं विषयेऽस्मल्लुणमनुसरन्ति—तथाहि—'शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी' (यो० विभू० पा० सू० १४) शान्ताः=कृतस्वस्वव्यापारा अतीतेऽध्वन्यनुप्रविष्टाः, उदिताः=वर्त्तमानमार्गमनुरुन्धानाः, अव्यपदेश्याः=ये शक्तिरूपेण स्थिता व्यपदेष्टुं न शक्यन्ते एवम्भूता ये धर्माः शक्तिशब्दव्यपदेश्याः तं त्रिविधमपि धर्मं योऽनुपतति अन्वयत्वेन स्वीकरोति स शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मीत्युच्यते । यथा-सुवर्णं रुचकरूपधर्मपरित्यागेन स्वस्तिकरूपधर्मान्तरपरिग्रहे सुवर्णरूपतयाऽनुवर्त्तमानं तेषु तेषु धर्मेषु कथञ्चिद्भिन्नेषु धर्मिरूपतया सामान्यात्मना धर्मरूपतया विशेषात्मना स्थितमन्वयित्वेनावभासते इति सूत्रार्थः। एवमेव च 'सिद्धे शब्दार्थसम्बन्धे'इति वार्त्तिकमहाभाष्ये पस्पशायां "अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्य"इत्यारभ्य"आकृतिरन्या चान्या च भवति द्रव्यं पुनस्तदेव' इत्यन्तेनोक्तम् । एतस्यैवेतस्ततः 'अवयवसंस्थानरूपायामाकृतौ नष्टायामपि तत्त्वं= तद्व्यङ्ग्यस्तद्वृत्तिधर्मो न विहन्यते आश्रयप्रवाहाविच्छेदादिति सापि नित्येत्यर्थ' इति व्याकरणच्छायाग्रन्थ उक्तम्, तस्माद्युक्तमुक्तम् उत्पादव्ययेत्यादि । एवदेव 'गुणपर्यायवत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रव्यम्' इति पञ्चमाध्यायस्याष्टात्रिंशत्तमेन सूत्रेण स्फुटीकृतम् । यथास्वं पर्यायैर्द्रूयते द्रवति वेति व्युत्पत्तिरप्यस्मिन्नर्थेऽनुगता भवति । तदिदं द्रव्यं जीवपुद्गलधर्माधर्मकालाकाशभेदेन षड्विधम् । तत्र चेतनालक्षणो जीवः । तथाचोक्तम्–"उपयोगो लक्षणम्" (तत्त्वार्थ० अ० २ । सू० ८) उभयनिमित्तवशादुत्पद्यमानश्चैतन्यानुविधायी परिणाम उपयोगः तेन बन्धम्प्रत्येकत्वे सत्यपि आत्मा लक्ष्यते । सुवर्णरजतयोर्बन्धम्प्रत्येकत्वे सत्यपि वर्णादिभेदवत् । प्रमाणनयतत्त्वालोकालङ्कारेऽपि—"चैतन्यस्वरूपः परिणामी कर्त्ता साक्षाद्भोक्ता स्वदेहपरिणामः प्रतिक्षेत्रं भिन्नः पौद्गलिकादृष्टवांश्चायम्" इति जीवस्वरूपमुक्तम् । तद्व्याख्यायाञ्च "रत्नावतारिकायां" जीवविषये परमतानि प्रौढाभिर्युक्तिभिर्व्युदस्तानि तत्समयान्तरे निबन्धान्तरे च व्याख्यास्यामः । स च ज्ञानादिभेदादनेकधा भिद्यते तद्विपर्ययलक्षणोऽजीवो धर्मादिः ।

तत् जीवद्रव्यं सामान्यतो द्विविधं संसार्यसंसारिभेदात् । यत्रेदमुक्तम्— 'संसारिणो मुक्ताश्च' (तत्त्वा० अ०२।सू०१०) इति मुक्ताष्टकर्माणाः सिद्धा असंसारिणः । एतेपि अनादिसिद्धाः केचन, केचिच्च अधिगमसिद्धा इत्यपि केचिदिति वदन्ति । संसारिणस्तु परिवर्त्तिनः संसरणं परिवर्त्तनमेषामस्तीति तत्परिवर्त्तनं द्रव्यक्षेत्रकालभावभेदात्पञ्चविधमित्यन्यतोऽवसेयम् । ग्रन्थगौरवभयान्मया नेह प्रपञ्चितम् । बद्धाः संसारिण इति तु तत्त्वम् । बन्धश्चाष्टविधं कर्म तत्र ज्ञानावरणीयदर्शनावरणीय-मोहनीयान्तरायभेदाच्चतुर्विधं घातिकर्म । वेदनीयनामिक गोत्रिकायुष्कभेदाच्चतुर्विधमघातिकर्म । तदेतत्कर्माष्टकं बन्धः ।

---

१ सम्यक् ज्ञानं न मोक्षसाधनं नहि ज्ञानाद्वस्तुसिद्धिरतिप्रसङ्गादिति विपर्ययतो **ज्ञानावरणीयं** कर्मोच्यते । जैनदर्शनाऽभ्यासान्न मोक्ष इति ज्ञानं **दर्शनावरणीयं** कर्म । तीर्थकरैर्बहुषु मोक्षमार्गेषूपदिष्टेषु कस्यचिद्विशेषमार्गस्यानिश्चयः **मोहनीयं कर्म** । मोक्षमार्गं प्रति प्रवृत्तानां तद्विघ्नकरं विज्ञानं **अन्तरायाख्यं** कर्म । एतानि चत्वारि श्रेयोहन्तृत्वाद् घातिकर्माण्युच्यन्ते ।

अघातीनि कर्माणि—देहारम्भकपुद्गलसंज्ञितशुक्रपरमाणूनां विपाकस्य शरीराकारेण परिणामस्य हेतुभूतं कर्म **वेदनीय**मित्युच्यते । शुक्रपुद्गलस्य कललाख्यद्रव्यात्मकावस्थायां बुद्बुदाकारस्य चारम्भकः क्रियाविसेषः **नामिकं** कर्म । तस्यैव शुक्रपुद्गलस्य देहाकारपरिणामशक्तिर्नामिककर्मण आद्यावस्था **गोत्रिकं** कर्म । शुक्रशोणितपरमाणुव्यतिकरे जाते मिलिते तदुभयस्वरूपमायुष्कं कर्म । आयुः कायति कथयत्युत्पादनद्वारेति व्युत्पतेः, तदेतत्कर्माष्टकं पुरुषं बध्नातीति बन्धः । वेदनीयन्तु बन्धोपि न निःश्रेयसपरिपन्थि तत्त्वज्ञानाऽविघातकत्वात् ।

०७४९९८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसारिणो द्विविधाःत्रसस्थावरभेदात्। उक्तञ्च 'संसारिणस्त्रसस्थावराः' (तत्त्वा० ०।१२) 'द्वीन्द्रियादयस्त्रसाः' (त०१४) इति आदिना त्रीन्द्रियादिग्रहणम्। एतेन पशु-पक्षिकीटपतङ्गदेवमनुष्याद्याः सर्वे "त्रसा" इत्युक्तम्भवति। पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः' (त० २। १३) पृथिवीति पृथिवी, पृथिवीकायः, पृथिवीकायिकः, पृथिवीजीव इत्यादिवेद्यम्। उक्तञ्च—

पुढवी पुढवीकायो पुढवीकाइय पुढवीजीवोय।
साहारणोपमुक्को सरीरगहिदो भवन्तरिदो॥ इति

एवमवादिष्वपि बोध्यम्। द्वीन्द्रियादीनां लक्षणं ग्रन्थान्तरतो ज्ञातव्यम्। पञ्चेन्द्रिया जीवा देवमनुष्यनारकितिर्यग्भेदाच्चतुःप्रकाराः सन्तीत्याद्यपि विस्तर-भयान्नेहोक्तम्। अधिकजिज्ञासवः सर्वार्थसिद्ध्यादिग्रन्थानवलोकयन्तु।

३ उक्तञ्जीवद्रव्यम्। अजीवद्रव्यमधुनोच्यते—'अजीवकाया धर्माधर्माकाशपुद्गलाः' (त० अ० ५। १) अत्र काया इव काया इत्यौपचारिकः कायशब्दः प्रदेशबहुत्वञ्च सादृश्यमिहोपचारबीजम्। अर्थात् पृथिवीकायादिजीवद्रव्यस्य बहवोऽनन्ताः प्रदेशाः सन्ति तथा धर्माद्यजीवद्रव्यस्याप्यनन्ताः प्रदेशाः। मुख्या वृत्तिस्तु 'काय' शब्दस्य जीवद्रव्य एव। अजीवशब्दस्याकाये काले,कायशब्दस्य च जीवेऽपि वर्त्तमानत्वात्।

यद् द्रव्यं जीवानां पुद्गलानाञ्च सञ्चालने साहाय्यं जनयति अर्थात् येन जीवद्रव्यं विविधेषु लोकेषु क्षेत्रेषु अनन्तकालावधि नानापरिणामानाश्रयते लोकाकाशे सर्वत्रा-खण्डं व्याप्तममूर्त्तिकञ्च वर्त्तते तद् 'धर्माख्यं' द्रव्यम्। लोकाकाशस्थान् जीवान् चाल-यत्येव केवलं नतु चालने प्रेरयति। यथा—पानीयं मत्स्यानां सन्तरणे निमित्तं भवति। परेऽपि "निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्"—

इति कियताप्यंशेन साम्यमीहुरिति सूक्ष्ममीक्षणीयम्। संकृत्सकलपरिणा-मानां सान्निध्याधानाद्धर्म इति तु निष्कर्षः।

यद् द्रव्यं जीवानां पुद्गलानाञ्च गतिं स्थगयति अर्थात् गत्याः स्थगने निमित्त-भावमुपगच्छति नतु प्रेरयति तत् 'अधर्माख्यं'द्रव्यम्। एतदप्यमूर्त्तं लोकाकाशव्याप्तम-मूर्त्तमखण्डञ्च धर्मवत् सकृत्सकलस्थितिपरिणामिसान्निध्याद् "अधर्म" इति तत्त्वम्। यद्यधर्मद्रव्यं न स्यात्तदा कदापि पदार्थानां कुत्रापि स्थितिर्न स्यात्। इदमेव साङ्ख्यानां "गुरुवरणकमेव तम" इति तमोद्रव्यं ममाभाति।

यद्जीवपुद्गलादिपञ्चविधद्रव्यकृतयेऽवकाशमातनुते यदन्तरैषां गमागमादि-व्यवहारः स्वप्नेपि नार्हति भवितुं तद् 'आकाश' मित्युच्यते। आकाशन्तेऽस्मिन्द्रव्याणि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वयं वाकाशत इत्याकाशम् । तच्चेदममूर्त्तं सर्वव्याप्यनन्तप्रदेशि च । अस्यैव मध्यभागे स्थितोऽयं लोको लोकाकाशपदभाग् भवति । लोकाद्बहिश्चानन्ताकाशोऽस्ति सच 'अलोकाकाश' इत्युच्यते, न तत्र षण्णां द्रव्याणां संस्पर्शः । भवतश्चात्र सूत्रे-'गतिस्थित्युपग्रहौ धर्माऽधर्मयोरुपकारः' "आकाशस्यावगाह" इति । एतस्याधिकार एव श्रीकुन्दकुन्दाचार्येण प्रवचनसारेऽप्युक्तम्—

आगासस्सवगाहो धम्मदव्वस्स गमणहेदुत्तम् ।
धम्मेदरदव्वस्स दुगुणो पुणो ठाणकारणदा ।
कालस्स वट्टना से गुणोव ओगोत्ति अप्पणो भणिदो,
णेया संखेवादो गुणा हि मुत्तिप्पहीणाणम् ॥
(गाथा) ४१, ४२ ।

अत्र गाथाद्वये आकाशाद्यमूर्त्तद्रव्याणां विशेषगुणाः प्रतिपादिताः अर्थात् आकाशस्यावकाशहेतुत्वं, धर्मद्रव्यस्य गमनहेतुत्वम्, धर्मेतरद्रव्यस्य तु पुनः स्थानकारणतागुणो भवतीति प्रथमा गाथा गता । कालस्य वर्त्तना स्याद्गुणः ज्ञानदर्शनोपयोगद्वयमित्यात्मनो गुणो भणितः । अधिकन्तु तदीय तत्त्वदीपिका-तात्पर्यवृत्त्योदितात् ज्ञेयम् । (मम तु बहुविस्तरकरणे श्रोतॄणां सम्भाव्यमानं श्रवणे औदासीन्यमेव भीतिं जनयति) (शेषं पुनः)

ॐ

वसन्तोल्लासः ।

समस्या—"वसन्तः" ।

प्रफुल्लपाथोजवनीमरन्दप्रभूत सम्भारसरत्समीरः ।
सुखप्रदोषः पिककूजिरम्यः प्रियो न कस्यैष सखे ! "वसन्तः" ॥१॥
अयं "वसन्तः" सततं मनःसु प्रभुत्वमाधाय मनोजलासम् ।
ददाति सौभाग्यसुधारसानां यत्कामिनीनां तदिहास्य हासः ॥२॥
† मधौ सखे ! पुष्परसप्रमत्तं मिलिन्दवृन्दं ललयँल्लताभिः ।

† वस्तुस्थितिमनुरुध्येदं ज्ञेयं, तेन न प्रकृतमासविरोधः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वियोगिनाञ्चेतसि दावदाहप्रभावराज्यं तनुते "वसन्तः" ॥३॥
विलासिभिर्गीतयशाः किलासा वुल्लासयन् मित्र ! महौषधानि ।
सदाऽनुकूलो भगवत्कृपातो भूयाद् "वसन्तः" सरसं ध्रुं मिलन्तः ॥४॥
"उद्योत" वर्षान्त-समुद्यमेऽपि विद्वन्मनोहर्षततिं दधानः ।
मेधां नवां वा कविताश्च तर्कं सन्तानयेद् "देव" दयां "वसन्तः" ॥५॥

(सम्पादकः)

ॐ

सम्पादकीयविचाराः

अयि ! माननीया ! विपश्चिदपश्चिमा ! उद्योतप्रियाः ! प्रियपाठकमहाभागाः !

यस्य खलु भूतभावनस्य सर्ववशिनः परमेश्वरस्य परमप्रसादेन निरन्तरायतया समतिक्रान्तोऽयं प्रथमः संवत्सरः तमेवादौ सहस्रशः प्रणिपत्येत आकृष्यते भवतां दृष्टिपातः । न ह्येतदविदितमस्ति भवन्मनःसु यत्सुरभारतीसंरक्षणाय विशेषतः पञ्चापप्रान्तीयवर्त्तमानविद्वत्सम्मानसम्भालनपूर्वकं प्राचां पञ्चापदेशमूर्द्धन्यानां विद्वद्धौरेयाणां जीर्णं शीर्णं कीर्त्तिस्तम्भं पुनर्नवीकर्त्तुञ्च पञ्चनदप्रदेशेऽपि संस्कृतसाहित्यपरिषदोऽस्या अस्ति समारम्भ इति । समारभ्यमाणञ्च यत्किमपि कार्यं निरुद्देश्यञ्चेत् प्रेक्षावद्भिर्न केवलमुपेक्षणीयं भवति प्रत्युतोपहसनीयं सत् कर्त्तॄणां यथाकथञ्चिच्छिष्टमपि गौरवं समूलमुन्मूलयतीति कृत्वा आदौ परिषदा पडुद्देश्यानि यानि स्थापितानि येषाञ्च व्यापकः सम्बन्धो न केवलं पञ्चापप्रान्तीयसुरभारतीसंरक्षणतत्परजनतामात्रमन्वेति, प्रत्युत सकलेऽपि भारते वर्षे परमादरणीयाः सर्वभाषादिभूताया अस्या गीर्वाणवाण्या रक्षणे वर्द्धने प्रचारणे च बद्धपरिकराणां माननीयानां देशदेशान्तरीयविदुषां सम्मेलनेन सहापि कार्यपरतां स्फुटमावेदयतीति न तिरोहितं नियमावल्या अध्येतॄणां प्रियपाठकमहाभागानाम् । परं सर्वेषां तेषां युगपद-

ध्रुं औणादिकः प्रयोगः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नुष्ठानं नैव सुशकमिति कृत्वा दौ सङ्घटनं पुरस्कृत्य परिषदा सुदृढमिदं व्यचिन्ति यत् कथं दूरदेशस्थितैः संस्कृतप्रियैः सह दूरदेशस्थितानाममरभारतीप्रियाणामभिप्रायसङ्गतिप्रकटनं भवेत्, कथं वा सुरभारत्या उपर्य्युत्तरोत्तरमापतन्तो महोत्पाता वार्यरन्, कथं वा तत्र तत्र विद्यालयेषु, पाठशालासु, महाविद्यालयेषु, हीनया दीनया दशया पठतां तपस्विनां छात्राणां बुद्धिबलवर्धनाय, सभाक्षेत्रे च सन्मानलाभाय अस्मदीयकालानुपातिविवेकशून्यतामूलकत्वेन "संस्कृतज्ञा बुद्धुपदवाच्या" इत्यारोपितबुद्धुपदवाच्यतादिदोषाः समूलमुन्मूलयेरन्, कथं वा प्राज्ञादिपरीक्षासु प्रबन्धकमहाभागानामुपेक्षयोपस्थिता दुर्घटनाः प्रतिहन्येरन्, इत्येमादिविचारभित्तिमुत्थाप्या लोड्यमानेष्वप्यन्येष्वनेकेषूपायेषु महद् गौरवं, कालप्रतिकूलतां, चिराय संशयितफलावाप्तिताञ्चाकलय्य "उद्योत" नामकमासिकपत्रप्रकाशनमेवादौ समारब्धम्। नहि वर्त्तमानकाले कोऽपि समाजः,काऽपि वा परिषत् तादृशस्तादृशी वा वर्त्तते यो या वा समाचारपत्रबलमनासाद्य निजाभीष्टसाधने साहसमपि कर्त्तुं प्रभवेत्। नहि कललबुद्बुदाद्यवस्थोत्तरशिरःपिण्डीरूपोर्ध्वमूलरचनां विना सर्वस्यान्याङ्गप्रत्यङ्गविशिष्टस्याऽस्य विधातृक्रीडनकस्य शरीरस्य रचना क्वापि दृष्टचरी, नवा मूलं विनोत्पद्यमानाङ्कुरादीनां सम्भावनं, सम्भालनं, संरक्षणं वा कथमपि कस्यचित्प्रेक्षावतो बुद्धिपथमवतरत्येवमेव "छिन्ने मूले नैव शाखा न पत्रम्" इति न्यायेन कथमारब्धस्य पण्डितमण्डलसङ्घटनमूलभूतस्यास्योद्योतकार्यस्यापि रक्षणं विना सकलोद्देश्यपूर्त्तिर्भवेत्, गीर्वाणवाण्या वा देदीप्यमानं वास्तवं रूपं सर्वतो व्याप्तं सल्लोकेषु प्रख्यापितं क्रियेत। तद्यथा—

धर्ममोक्षयोः प्रत्यासत्तिरस्ति एवमर्थकामयोरपि सा न विदुषां बुद्ध्यगोचरः। उद्योतप्रकाशनमप्यस्माकमेकः कामः सचार्थसाध्यः। अर्थस्तु उद्योतकृते निर्वहणक्षमोऽद्यापि नीवीरूपेण न सङ्घटित इति जानन्त्येव श्रीमन्तः। एतमेतस्मामर्थहीनतायां सत्यामपि "उद्योतः" सर्वेषां ग्राहकाणां गृहेषु प्रतिमासं नियमेनैव प्रकाशमकार्षीदित्यपि न तिरोहितं पाठकमहोदयानाम्। सेयमस्य क्षेमकारिणी चेष्टा मन्तव्या। अस्माकं वह्नी धारणा एवमासीद् यद् ग्राहकाणामष्टशती सम्पत्स्यते चेद् "उद्योतः"स्वपद्भ्यां स्वयमेवात्मानं धास्यति, ततः सुरसरस्वतीसेवायै कार्यान्तराण्यपि प्रारप्स्यन्ते। परं महानयं खेदावसरः—अद्यापि स्थिराणां ग्राहकाणां पञ्चशत्येव न सम्पूर्णा केव कथात्वष्टशत्याः पूर्णतायाः। यदि तावती सङ्ख्यापूर्त्तिरभविष्यद् अवश्यमुद्योतः सार्धरूपकवार्षिकसङ्केतेनैवाचाल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यिष्यत्, कार्यालये च हानिरपि पदं नाधास्यत् किञ्चास्योपादेयतायाञ्च सन्देहलेशोऽपि न वर्त्तते यतो दूरदूरदेशात्तादृशि पत्राणि समायान्ति यानि चोक्तमर्थमुपपादयन्ति सन्ति दृष्टिपथमवतरन्ति। ननु तर्हि त्यज्यतामिदं क्लेशकरं कर्मेति न वाच्यम् यतो जलविन्दुन्यायः फलावाप्तयेऽनारतप्रवृत्तिं सूचयति।

तदेवं पूर्वोत्तरकर्त्तव्याकर्त्तव्यादिकं विविच्य नववर्षीयोद्योतकार्यसञ्चालनार्थं वार्षिकं मूल्यमस्य रूपकत्रयमेव निर्धारितम्, तच्चाग्रिममेव। सन्त्येवंविधाः केचन महापुरुषा येषां सेवायामुद्योतो नियमेन स्वीयामुपस्थितिं प्राचीकशत् परन्तैर्महानुभावैः केवलमयममावास्याया हन्तकार इत्याकलय्य कथमप्यस्य साहाय्यं नाचारि। यैस्तु देवचन्द्रसूरिमहोदयाद्यैः संरक्षकैः सद्भिरस्य साहाय्यं कृतं तेभ्योऽनेकशो धन्यवादान् वितरामः परमेतावतापि महतोऽपिमहीयसेऽस्मै कर्मणे किं स्याद् ? अतः सम्प्रति येषामग्रिमं वार्षिकं ३) रूपकत्रयमायास्यति त एव ग्राहकाः स्थिरशैल्या राजिस्थिरे पत्रे नियोक्ष्यन्ते, कार्यालयशोधनञ्च पूर्वापेक्षया बहु करिष्यते। एतस्मिन् वर्षे कार्यालयकृत्यसञ्चालने प्रतीयमानास्त्रुटयो नवे वर्षे सम्यगुत्सारयिष्यन्ते चेति बहुसम्भावना। तत्सादरं वयं माननीयान् ग्राहकमहोदयानभ्यर्थयामहे यदेतन्मयूखप्राप्तिसमकालमेव अग्रिमं वार्षिकं ३) रूपकत्रयं प्रेषयन्तु, क्षीरकण्ठस्याऽस्य शिशोरात्मानञ्च संरक्षयन्त्विति। एवं सति कार्यालयोपरि तेषां महतीं कृपादृष्टिं मानयिष्यामः। येषाञ्च दत्तमूल्यानां ग्राहकाणां पार्श्वे केनाऽपि कारणेन उद्योतमयूखाः न सम्प्राप्ताः, संशोधनं कृत्वाऽवश्यं तेभ्यः प्रथमवर्षीयमयूखान् प्रहेष्याम इति तैर्महानुभावैर्मनसि कोऽपि खेदो वैरस्यं वा नावहनीयमित्यपि च भृशमभ्यर्थयामहे। आयव्ययविवरणन्तु वार्षिकाधिवेशने मन्त्रिमहोदया वार्षिकविवरणपत्रे स्फुटं प्रकाशयिष्यन्ति। परिपच्चेयं राजकीयनियमानुरोधेन शीघ्रमेव राजिस्थिरतां (Registered) नेष्यते येन कस्यापि चेतः कार्यविषये खटखटायिततां नाचरेत्। वार्षिकं मूल्यं निम्नसङ्केतेनैव शीघ्रं प्रेषणीयम्।

उद्योत सम्पादकः—	To The Editor Udyot.
उद्योतकार्यालय	Udyot office.
जौडेमोरी लाहौर	Joure Mori Lahore.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चनदीयसंस्कृतसाहित्यपरिषदो द्वितीयमधिवेशनम्—

महानयं हर्षावसरो यत्—"पञ्चनदीयसंस्कृतसाहित्यपरिषदो द्वितीयमधिवेशनम्"–अमृतसरे आश्वेव भावीति तत्रत्येन पण्डितमण्डलेन सहर्षं सोल्लासञ्च परिषदामन्त्रिता। पण्डितमण्डलस्य सभापतिमहोदयाः श्रीमायाधारिशास्त्रिणः मन्त्रिणश्च श्रीनृसिंहदत्तशास्त्रिणः स्वैः सभ्यैः सहैतस्मिन् कर्मणि महान्तमुत्साहं प्रकटयन्त उत्सवनिर्वहणकर्मणि व्यग्रा एव वर्त्तन्ते । निर्वर्त्तितसभापतेर्नामतिथ्यादिकञ्च यथासम्भवं शीघ्रमेव मुद्रितं सत्प्रकाशितं भविष्यति। एतस्मिन् शुभावहे कर्मणि आनन्दकन्दः श्रीकृष्णो भगवान् भृशं निजां कृपादृष्टिं सन्तनुयादिति प्रार्थयामहे तमेवभूतभावनं भगवन्तम् ।

पञ्जाबयूनी० सं० बो० विरुद्धः प्रस्तावः—

पञ्जाबयूनिवर्सिटीपरिषदः "संस्कृतबोर्ड्" ! इत्याख्योपसमितिनियतीकृतान् १९३० वर्षकृते नवानधिकान् ग्रन्थान् मण्डलमिदं सर्वसम्मत्या परीक्षार्थिनां कृते कष्टप्रदाननुमन्यते तस्माद् यथापूर्वमेव ग्रन्था रक्षणीयाः । (उद्योतसम्पादकमहोदयस्य च एकादशमयूखीयलेखेनास्य मण्डलस्य सहानुभूतिरस्ति) ।

सभापतिः—मायाधारिशास्त्री । मन्त्री—नृसिंहदत्तशास्त्री ।

संशोधनम्—

गतमासीयमयूखे (एकादशमयूखे) पृ० २२ पं० २५ "अतिव्याप्तिभङ्गेपि" इत्यस्य स्थाने "अतिव्याप्तिभङ्गस्तथापि" इति पाठः साधुः । तत्रैव पृष्ठे पं० २८ "मव्यर्थस्य वाऽभिधानम्" इत्यस्य स्थाने "मव्यर्थस्य व्यर्थस्य वाऽभिधानम्" । तत्रैव पं० २८ "शङ्कापहर्त्तु" इत्यस्य स्थाने "शङ्कामपहर्त्तु" इति शुद्धं पठनीयम् । अन्यन्मात्रादिकं स्याच्चेत् त्रुटितं तत् स्वयमपि कुशलैः संशोद्धुं शक्यम् ।

भूचालः—

विदितमेवैतत्प्रायो यत् फरवरीमासस्य प्रथमतारकायां (१।२।२९) शुक्रे वासरे रात्रौ पादोनैकादशनादावसरे महान्भूचालः समजनीति तद्विषये पाठकानाम्पुरतः किञ्चित्प्रकाशयामः । तत्र बहुसम्मतपक्षः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पवनाग्नीन्द्रवरुणाः कम्पयन्ति वसुन्धराम् ।
शुभाशुभाय लोकानां रात्रावहनि चक्रवत् ॥
प्रजाधर्मरता यत्र तत्र कम्पः शुभो भवेत् ।
अशुभो यत्र पाप्मानो देवैःकाले विधीयते ॥ इति ॥

परमयं भूचालः आग्नेयः विशाखाचरणजत्वात् । तस्य फलन्तुः—

अन्होरात्रेर्द्वितीये वा यामे याम्याग्निदिक्षु वा ।
कृत्तिकापित्र्यपुष्येषु विशाखाभरणीभगे ॥
पूर्वभाद्रपदे चैव चलत्येषा वसुन्धरा ।
आग्नेयं मण्डलं ज्ञेयं सागरस्यापि शोषणम् ॥
दुर्भिक्षभयचौरादीन् तस्मिन् कम्पे विनिर्दिशेत् ।
ग्रामाश्च तेन दह्यन्ते पत्तनानि समन्ततः ॥
मध्यदेशकुरुक्षेत्रद्विजा यज्ञसमन्विताः ।
आभीरा गौडगान्धाराः कलिङ्गाः कङ्कुनास्तथा ॥
वाल्हिकाश्च त्रिगर्त्ताश्च केरलान्त्यसुराष्ट्रकाः ।
तत्र स्थितानि सत्त्वानि विरुद्धयन्ते परस्परम् ॥
शस्यस्नेहपयोहानिस्तस्माच्छान्तिं प्रकामयेत् ।

इत्याद्यद्भुततरङ्गिण्यां मत्स्यपुराणादिमतमनुरुध्य बहूपपादितं वर्त्तते । सम्मतिरत्र रमलाचार्याणां पण्डितवरमोहनलालशर्मणामपि ।

काश्यां समाचारपत्राणां समुन्नतिः, मालवीयमहोदयैः सह पण्डितानां कलहश्च—

काशीतः "सुप्रभातं" 'सूर्योदयश्च" महता समारोहेण प्रचलतः । पूर्वापेक्षया तयोः सुप्रबन्धोऽपि विशिष्ट एव प्रतीयते । परमयमतोऽपि हर्षावसरः सम्प्राप्तो यत् "सनातनधर्मसम्मेलनं" नाम मासिकं संस्कृतपत्रमपि आरभट्या प्रवर्त्तमानं नयनयोरासेचनकताञ्जनयति । कुत एतन्न स्याद् यस्य प्रवर्त्तकाः सम्पादकाश्च श्रीमहामहोपाध्यायद्राविडलक्ष्मणशास्त्रिप्रभृतयो विद्वांसः सन्ति । एतेषामेव प्रबन्धेन साप्ताहिकमप्येकं हिन्दीभाषात्मकं सनातनधर्मोपबृंहणपरं साप्ताहिकं पत्रमपि प्रकाशितं भवति, तत् कदाचित्कदाचिद् उद्योतायापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्मानं प्रकाशयति । तत्रापि पण्डितानां परस्परं वादधाराश्चलन्ति । एतत्सम्पादकैः श्रीमान्मालवीयमहोदयो दीक्षाप्रहसने "प्रधानो नट" इति लिख्यते गण्यते च । भवतु एतेन साहित्यवृद्धिः सिद्धान्तस्वरूपविवेचनाचाऽवश्यम्भाविनी । वयमप्यवकाशं प्राप्स्यामश्चेत् केषुविद्विषयेषु लेखनीं व्यापारयिष्यामः ।

व्याकरणद्वादशाध्यायी—

एतन्नामा हिन्दीभाषायां व्याकरणग्रन्थः चारुदत्तशास्त्रिवर्यप्रणीतोऽस्मद्दृष्टिपथमवतीर्णः साकल्येन तत्पाठकरणावसरस्तु न प्राप्तः तथापि यया दृष्ट्या दृष्टस्तयेदं वक्तुं शक्यते यदिदं पुस्तकं मैट्रिक्युलेशन परीक्षार्थिनां कृते रचितं सदपि देहलीदीपकन्यायेन प्राज्ञानां स्वयम्बोधसम्पादनेऽपि महदुपकर्त्तुमर्हति यतोऽत्रावश्यज्ञातव्या व्याकरणनियमाः सोदाहरणं सारल्येनोपनिबद्धा वर्त्तन्ते केषाञ्चिन्नियमानां प्रकारोऽस्मत्प्रणीतनवीनप्रस्तावग्रन्थान्तर्वर्त्तिसङ्केतैः सहापि सौदर्य्यं धत्ते । तद्यदि प्राज्ञाः परीक्षार्थिनोऽपि एतस्य परिशीलनं कुर्युस्तदा तेषां हितं भवेत् । परन्तु अल्पधनेभ्यः संस्कृतविद्यार्थिभ्यो मूल्यांशे ग्रन्थकर्त्राऽवश्यं लोपो देयः । तेषां कृते २) इति मूल्यमधिकमस्तीति मे भाति ।

———

ज्वालापुरीय-महाविद्यालयस्य

संक्षिप्तः परिचयः ।

(लेखकः—विद्याभास्कर जयनारायणशर्मा शास्त्री)

प्रोच्छलदच्छोत्तुङ्गतरङ्गायाः कृतकलिकलुषभङ्गायाः गङ्गायास्तटे वासन्तिकोल्लासमनोहरे प्रदेशे प्राचीनमहर्षिपद्धतिमनुस्मारयत् सर्वतो गीर्वाणभारतीरसप्रवाहं प्रवर्तयत्, उत्तराखण्डं मण्डयत् भारतालङ्कारभूतं विराजते "महाविद्यालय-ज्वालापुरं नाम गुरुकुलम" । के ते श्रवणी के वा चक्षुषी ये न वीक्षितुमुत्सहेतेऽमुष्य सुषमाम्, कस्य वा सफलजनुषो न श्रवणपुटकामृतानिष्यन्दायितमस्याभिधानम् । अस्मिन्नीदृशेऽपि विकटेऽभितः तृट्क्षाम-विद्यामृतपिपासुच्छात्रवृन्दस्येदमेकमात्रमाश्रयभूतम् । अस्मिन्गुरुकुले सम्प्रत्यधीयते छात्राणां सपादशती, भोजनवस्त्राध्यापनादिकं सर्वं गुरुकुलेनैव विधीयते । अस्यैवालङ्कुर्वन्त्याचार्य-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदं स्वनामधन्याः वदान्यास्तत्रभवन्तः श्रीमन्तः "शुद्धबोधतीर्थ स्वा येषां व्याकरणाखण्डलायितं कस्य न चक्षुष्मतो गोचरीभूतम् । अत्रैव च प्राचि काले [illegible]गन्तरख्यातकीर्तयः स्पृहणीयजन्मानः (उद्योतसम्पादकाः) श्री-पण्डितनृसिंहदेवशास्त्रिमहोदयाः, सर्वतन्त्राप्रतिमप्रतिभाः श्रीः १०८ मद्गुरुवर-पण्डितकाशिनाथशास्त्रिणः श्री पं० शालग्रामशास्त्रिमहोदयाश्च कार्यं निरपाद-यन् । गुरुकुलमिदं प्रतिवत्सरं स्नातकं फलं सूते, तच्च फलमपि फलान्तरं देश-सेवात्मक मध्यात्मनात्मकं वा समुत्पादयतीति चित्रम् । तथाहीदमेवैकतमं गुरु-कुलं यदन्यगुरुकुलेभ्योऽध्यापकान्वितरति—अस्य स्नातकाः प्रायशः सर्वेष्वपि गुरु-कुलेष्वध्यापकत्वं मुख्याध्यापकत्वं वा बिभ्रति । अस्यैवाष्टदशहिन्दीसाहित्य-सम्मेलनस्याधिपतिः श्रीपण्डितपद्मसिंहशर्मा साहित्याचार्यः, प्रसिद्धो-देश-भक्तः श्रीपण्डितनरदेवशास्त्री वेदतीर्थः कार्यधुर्येष्वेकतमौ । अद्यावधि पञ्च-त्रिंशदधिकशतानि स्नातका अस्य गुरुकुलस्य यत्र तत्र कार्येषु संलग्नाः मातृभूमे राननमुज्ज्वलयन्ति । अथ योयश्छात्र आचतुर्दशवर्षमत्राधीते तस्मै तुष्टं सत् कार्यकर्तृमण्डलं "विद्याभास्कर" इत्युपाधिवितरति । अस्याधुनिकेषु कार्य-सम्पादकेषु श्रीमान् पण्डितरविशंकरशर्मा मुख्याधिष्ठातृपदे, श्री पं० काशी-दत्तशर्मा सहायकमुख्याधिष्ठातृपदे, विद्याभास्करः श्री पं० हरिदत्तशर्मा शास्त्री न्याय-व्याकरणकाव्य-वेदतीर्थः, मुख्याध्यापकत्वपदेविद्याभास्करः श्री पं० चन्द्रदत्त शास्त्री काव्य तीर्थः, तथा श्री रामानन्दघोषः बी० ए० महो-दयश्च विशेषमुख्यकार्यकर्तृपदे वर्तते ।

स्नातकेषु विद्याभास्कराः श्री० पं० विश्वनाथशास्त्री न्याय-व्याकरणतीर्थः आचार्यो गुरुकुल भैसवालस्य, विद्याभास्करः श्री० पं० उदयवीरशास्त्री न्याय-सांख्यतीर्थः प्रोफेसरः लवपुरे, विद्याभास्करः श्री० पं० दुर्गादत्तशास्त्री एम० ए० प्रोफेसरः देवसमाजकालिजे लवपुरस्य, विद्या-भास्करः श्री० पं० व्यासदेव शास्त्री एम० ए० एल्० एल्० बी० तथा विद्याभास्करः श्री० पं० सूर्यकान्तशास्त्री एम्० ए० व्याकरणतीर्थः प्रोफेसरः प्राच्य महाविद्यालये लवपुरस्य, विद्याभास्करः श्री० पं० रामावतारशास्त्री वेदान्ततीर्थश्च सम्प्रति योगकर्मणि संलग्नो वर्त्तते तथा श्री० पं० विष्णु-दत्तशास्त्री बी० ए० एवमन्येऽपि कतिचन विशेषत उल्लेखार्हाः ।

अन्ते वयं सहर्षं सूचयामो यदमुष्य गुरुकुलस्य वार्षिकमहोत्सव एकविंशति-तमः फाल्गुनमासस्य पूर्णिमायां तथा चैत्रस्य बलक्षेतरे पक्षे प्रतिपदातश्चतुर्थी-पर्यन्तं होलिकामहोत्सवावसरे सम्पत्स्यते । अत्रच सम्पतिष्यन्ति नानादिग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तरेभ्यो महानुभावा दिग्विकीर्णयशसो महात्मानः संन्यासिनो महोपदेशकाश्च । अथ च युक्त-प्रान्तीयार्यमहोपदेशकसम्मेलनम्, पण्डितप्रकाण्डमण्डित "विद्वत्कलासम्मेलनम्, प्रेमसमितिवार्षिकाधिवेशनम्, महि[illegible]मेलनम्, युक्तप्रान्तीयकविसम्मेलनम् इत्यादिसम्मेलननां सम्मेलनं स[illegible]ष्यति । सर्वेऽपि महानुभावाः समेत्य सुहृद्बन्धुसमेताः सभाजयन्तु गुरुकुलम्, समेधयन्तु चास्माकमुत्साहमित्यर्थयामः ।

वैशेषिकमस्य वृत्तं कदाचिदन्यदा पाठकवर्णस्य श्रवणाध्वनीतं कर्तुमिच्छामः । कविसम्मेलनस्य सभापतिपदमष्टादशहिन्दीसाहित्यसम्मेलनस्य सभापतिस्तथाप्रसिद्धः काव्यमर्मज्ञः श्रीमान् पण्डितपद्मसिंहशर्मा साहित्याचार्य एवालङ्करिष्यति । प्रार्थयामश्च सप्रश्रयं यत्कविमहोदयाः पार्वणमस्य विंशतितारिकातः पूर्वमेव समस्याः प्रपूर्य काव्यरससरस्यः प्रहिण्वन्तु श्री पं० हरिदत्तशर्मा शास्त्री—महाविद्यालयज्वालापुर जि० सहारनपुर-इति संकेतेन । सर्वश्रेष्ठसमस्यापूर्तिकर्त्रे पारितोषिकमपि प्रदास्यते ।

समस्याश्चैताः—

संस्कृते—

[illegible]धनानां हि यशो गरीयः ।

(१) यश[illegible]

(२) नमस्ते [illegible] सुखम् ।

(३) किं पारतन्त्र[illegible]तम् ।

(४) महाविद्यालयो [illegible]

(५) लभ्यं स्वराज्यं भवेत् [illegible]

हिन्दी भाषायाम्—

(१) आह कटिजायगी ।

(२) वीर ब्रह्मचारी ने ।

(३) राखेउ नैन पलक की नाईं ।

(४) सीता फिनार है ।

विशेषसूचना—

येषां लेखा न मुद्रिताः, ते यथासमयं मुद्रिता भविष्यन्ति । [illegible]रौदासीन्यं न विधेयम् । इतोऽग्रे कस्यापि छात्रस्य लेखो न प्रकाश्येत यस्तदध्यापकशोधितो न भवेत् । नववर्षीयप्रथममयूखो विचित्रो भविष्यतीति सम्भावन[illegible] (सम्पा०)

पुस्तकालय
गुरुकुल कांगड़ी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar